No 9

॥ * ॥ अथ प्रतिष्ठासंग्रहप्रारंभः ॥ * ॥

॥ अथ प्रतिष्ठासंग्रहस्थविषयानुक्रमः ॥

प्र. सं.

॥ १ ॥

अथद्वितीयप्रकरणप्रारंभः।

अनु.

॥ १ ॥

प्र. सं.

॥२॥

अनु.

॥२॥

इति प्रतिष्ठासंग्रहानुक्रमणिका समाप्ता ।

श्रीगणेशाय नमः ॥ अथ प्रतिष्ठासंग्रहप्रारम्भः ॥ "तत्रादौ मङ्गलाचरणम्"–
विद्याधीशं त्रिनेत्रं विमलमतियुतं वैद्यनाथाभिधेयं जन्मस्थित्यन्तकारी निखिलज
निमतां यश्च पूज्यः सुरेशैः ॥ आनन्दाब्धिर्महेशःसकलकृतिनतो दुर्गमो बोधहीनैः
सत्यज्ञानस्वरूपोविगतपरिमलस्तं नमामो गिरीशम् ॥ १ ॥ यस्याम्नायो विधत्ते
चकितमतिशयं निष्कलं कोप्यबाधो यस्य स्मृत्या भवाब्धिं तरति गतमलः शुद्ध
संवित्कृतात्मा ॥ तं श्रीकृष्णं दयेशं निगमनुतिचिरं वन्दनं प्राणिराशेर्ध्यायं ध्यायं
नमामश्चरितकलुषहं स्रग्धरं वेणुमन्तम् ॥ २ ॥ आराध्य यां गिरिसुतां वरदां सुधी
रैर्लब्धं फलं समधिकं प्रथितैरभीष्टम् ॥ संसारसागरतरीं भजनैकपात्रीं दुर्गां नमामि
भवभीतिविनाशनाय ॥३॥ "ग्रन्थकर्तुर्विज्ञप्तिः"–अम्बालाख्यजिलान्तरे सुविषये संसे
वितं सज्जनै राङ्गीरायपुराधिपोऽतिमतिमान् श्रीकृष्णसिंहो नृपः ॥ तत्पुत्रो नृपनीतिरीति

प्रति० निपुणो विप्रप्रियो धार्मिकः श्रीमद्द्विजवसन्तसिंहनृपतिस्तद्राजधानीपतिः ॥ ४ ॥ सं०
॥ १ ॥ तन्मान्यो बुधवृन्दमध्यगणितःश्रीरामलालो बुधः पूर्णप्रेमविधानमानवचसावृत्यादि
भिर्मानितः ॥ मुम्मायाःपुरमागतो हि सकलस्यार्य्यस्यभाग्योदयात् खवेदांकशशांक
वत्सरगणे शाकेऽक्षशून्यधृतौ ॥५॥ पौषे मासि सिते पक्षे पञ्चम्यां गुरुवासरे ॥ प्रतिष्ठा
सर्वदेवानां मुम्मापुर्य्यां हि मुद्रिता ॥ ६ ॥ मान्यां प्रणम्य नितराञ्जलिरेष भूयो
भूयो विधाय विनयं विनिवेदयामि ॥ दूष्यं वचो मम परं निपुणं विभाव्य भावावबोध
विहितो न दुनोति दोषम् ॥ ७ ॥ अथ ग्रन्थारम्भः ॥ "तत्रादौ यजमानःमङ्गलस्नान
पूर्वकं स्नात्वा परिहितधौतवस्त्रः कुंकुमचन्दनादिधृतपुण्ड्रः सन्ध्यादिवैश्वदेवान्तानि
त्यकर्म विधाय पत्न्यासह शुभदिने शुभमुहूर्ते कुशासने स्वस्तिकादावासनविधिना ॥ १ ॥
प्राङ्मुख उपविश्य स्वस्तिमन्त्राः श्रवणीयाः ॥ " स्वतिमन्त्राः—ॐस्वस्तिनऽइन्द्रो

वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्यो ऽअरिष्टनेमिः स्वस्तिनो
बृहस्पतिर्दधातु ॥ १ ॥ भद्रङ्कर्णेभिः शृणुयामदेवाभद्रम्पश्येमाक्षभिर्यजत्राः ॥
स्थिरैरङ्गैस्तुष्टुवाᳫंसस्तनूभिर्व्यशेमहिदेवहितं यदायुः ॥ २ ॥ तम्पत्नीभिरनु
गच्छेमदेवाः पुत्रैर्भ्रातृभिरुतवाहिरण्यैः ॥ नाकङ्गृभ्णानाः सुकृतस्यलोकेतृतीयेपृ
ष्ठे ऽअधिरोचने दिवः ॥ ३ ॥ (एतेमंत्राः आचार्येण पठित्वाऽनन्तरं यजमानस्य तथा यज
मानपत्न्या भाले कुंकुमतिलकं कुर्यात्)–'आचमनम्'–ॐकेशवायनमः स्वाहा॥ ॐ
नारायणाय नमः स्वाहा ॥ ॐमाधवाय नमःस्वाहा ॥'हस्तप्रक्षालनम्' ॐगोविन्दाय
नमः ॥ 'आत्मनः समन्तात्प्रदक्षिणवदुदकक्षेपणम्'–ॐनमो भगवते वासुदेवाय ॥

‘प्राणायामाः’–“तत्रादौ”-‘पूरकः’- ❀ ॐभूः॥ॐभुवः॥ॐस्वः॥ॐमहः॥ॐजनः॥ॐ
 तपः ॥ ॐसत्यम् ॥ ॐतत्सवितुर्वरेण्यं० ॥१॥ ॐआपोज्योतीरसोमृतं ब्रह्मभूर्भुवःस्व
रोम् ॥ ॐविष्णवे नमः ॥ ‘कुम्भकः’– ❀ उपरिदर्शितक्रमेण ॥ ॐब्रह्मणे नमः ॥
‘रेचकः’– ❀ उपरिदर्शितक्रमेण॥ ॐमहेश्वराय नमः “पुण्डरीकाक्षस्मरणम्”
ॐअपवित्रःपवित्रो वा सर्वावस्थां गतोऽपि वा ॥ यःस्मरेत्पुण्डरीकाक्षं सबाह्याभ्य-
न्तरः शुचिः ॥ पुण्डरीकाक्षःपुनातु ॥ “ सङ्कल्पः” स्वस्तिश्रीमत्सच्चिदानन्दब्रह्मणोऽ
निर्वाच्यमायाशक्तिविजृम्भिताविद्यायोगात् कालकर्मस्वभावाविर्भूतमहत्तत्त्वोत्पा-

---

१ आह्निकसूत्रावल्यां प्राणायामप्रकारः–योगियाज्ञवल्क्यः–नासापुटेनानिलमेव बाह्यमाकृष्य तेनैव शनैः समस्तम् । नाडीषु सर्वासु च पूरयेद्यः स पूरको नाम महान्निरोधः ॥ न रेचकं नैव तु पूरकं वा नासाग्रभागे स्थितमेव वायुम् । सुनिश्चलं धारयति क्रमेण कुम्भाख्यमेतं प्रवदन्ति तज्ज्ञाः ॥ निःसार्य नासाविवरादशेषं प्राणं बहिः शून्य इवानिलेन । निरुच्छ्वसंस्तिष्ठति चोर्ध्ववायुः स रेचको नाम महानिरोधः ॥ इति ।

दिताहङ्कारतृतीयोद्भूतशब्दादिपञ्चतन्मात्रेन्द्रियदेवतासमुदायनिर्मितचतुर्दशभु-
वनात्मकेऽण्डकटाहे लीलया तन्मध्यवर्ति भगवतः श्रीनारायणस्य नाभिकमलो
द्भूतसकललोकपितामहस्य ब्रह्मणः सृष्टिं प्रकुर्वतस्तदुद्धरणाय प्रजापतिप्रार्थितस्य
सकलजगदुत्पत्तिस्थितिलयकारणस्य रक्षाशिक्षाविचक्षणस्य प्रणतपारिजातस्य
अच्युतानन्तवीर्यस्य भगवतो महापुरुषस्य श्रीमदादिनारायणस्याचिन्त्यापरि
मितशक्त्याध्येयमानस्य महाजलौघमध्ये परिभ्रम्यमाणानामनेककोटिब्रह्माण्डा
नां एकतममहदहङ्कारपृथिव्यप्तेजोवाय्वाकाशाद्यावरणैरावृतेऽस्मिन् ब्रह्माण्डखण्ड-
योर्मध्ये आधारशक्तिश्रीमद्वराहदंष्ट्राग्रविराजिते कूर्मानन्तवासुकितक्षककुलिक
कर्कोटकपद्ममहापद्मशङ्खमहानागैः संध्रियमाणे ऐरावतपुण्डरीकवामनकुमुदाञ्जन
पुष्पदन्तसार्वभौमसुप्रतीकाष्टदिग्गजोपरि प्रतिष्ठिते अतलवितलसुतलतलातलरसा

तलमहातलपाताललोकस्योपरिभागे भूर्लोकभुवर्लोकस्वर्लोकमहर्लोकजनलोकत
पोलोकसत्यलोकेति सप्तलोकस्याधोभागे चक्रवालशैलमहावलयनगमध्यवर्तिनो म
हाकालमहाफणिराजशेषस्य सहस्रफणानां मणिमण्डलमण्डिते दिग्दन्तिशुण्डोत्त
म्भिते अमरावतीभोगवती–सिद्धवती–गान्धर्ववत्यलकावत्यादिपुण्यपुरीप्रतिष्ठिते इ
न्द्राग्नियमनिर्ऋतिवरुणवायुकुबेरेशानेति दिक्पालप्रतिष्ठिते लोकालोकाचलवलयिते
लवणेक्षुसुरासर्पिर्दधिक्षीरोदकेतिसप्तार्णवपरिवृते जम्बुप्लक्षशाल्मलिककुशक्रौञ्च
शाकपुष्कराख्यसप्तद्वीपयुते इन्द्रकांस्यताम्रगभस्तिनागसौम्यगन्धर्वचारणभारते
तिनवखण्डमण्डिते सुवर्णगिरिकर्णिकोपेतमहासरोरुहाकारपञ्चाशत्कोटियोजन
विस्तीर्णभूमण्डले अयोध्यामथुरामायाकाशीकाञ्च्यवन्तिकद्वारावतीतिसप्तपुरीप्र
तिष्ठिते शालग्रामशम्भलनन्दिग्रामेतिग्रामत्रयविराजिते चम्पकारण्यबदरिकार

ण्यदण्डकारण्यार्बुदारण्यधर्मारण्यपद्मारण्यगुह्यारण्यजम्बुकारण्यनैमिषारण्येति
नवारण्ययुक्ते सुमेरुनिषदरजतकूटशुभ्रकूटआरकूटहिमाचलानां हरिवर्षकिम्पुरुष
वर्षयोश्च दक्षिणदिग्विराजमाने नवसहस्रयोजनविस्तीर्णे भरतखण्डे मलयाचलवि
न्ध्याचलाद्यनेकमहापर्वतमण्डिते स्वर्णप्रस्थचण्डप्रस्थसूक्तिकावर्त्तकरमणकमहार
मणकपाञ्चजन्यसिंहकलंकेति नवखण्डोपद्वीपमण्डिते दक्षिणावस्थितरेणुकाद्वय
सूकरकाशिकाञ्चीकालिकावटेश्वरकालञ्जरमहाकालेति नवोखरयुते सोमनाथमल्लि
कार्जुनमहाकालममलेश्वरकेदारेश्वरभीमाशङ्करविश्वनाथत्र्यम्बेकश्वर वैद्यनाथनागे
शरामेश्वरघुश्मेशेति द्वादशज्योतिर्लिङ्गयुते गङ्गायमुनासरस्वतीतापीपयोष्णीका
वेरीगोदावरीनर्मदेत्यादिपुण्यनदीविलसिते हिमवन्मेरुगोवर्द्धनक्रौञ्चश्रीशैल
कचित्रकूटहेमकूटमहेन्द्रमलयविन्ध्याद्यनेकपर्वतसमन्विते मतङ्गादिमहानगरयु

ते कोङ्कणहिरण्यशृङ्गकुब्जार्बुदमणिकर्णीवटशालग्रामसूकरमथुरागयानिष्क्रम
णलोहार्गलप्रोतस्वामिबदरीतिचतुर्दशगुह्यस्थलविलसिते अस्मिन् जम्बूद्वीपे कर्म
भूमौ बौद्धावतारे गङ्गादिसरिद्भिः पाविते भारतवर्षे निखिलजनपावनपरमभा
गवतोत्तमशौनकादिऋषिगणसेविते पुण्यस्थले आर्यावर्त्तान्तर्गतब्रह्मावर्त्तादमु
कदिग्भागावस्थितेऽमुकजनपदे कुरुक्षेत्रादिमध्यरेखायां अमुकदिग्भागे प्र
यागावधिकमध्यरेखायाश्च अमुकदिग्भागे श्रीभागीरथ्या अमुके तटे अमुकक्षे
त्रान्तवर्त्तिसोमसूर्यान्वयभूभृत्प्रतिष्ठिते श्रीमन्नारायणनाभिकमलोद्भूतसक
लजगत्स्रष्टुः परार्द्धद्वयजीविनो ब्रह्मणो द्वितीयपरार्द्धे पञ्चाशदधिके वर्षे प्रथ
मपक्षे प्रथमदिवसे अह्नो द्वितीये यामे तृतीये मुहूर्ते रथन्तरादिद्वात्रिंशत्क
ल्पानां मध्येऽष्टमे श्रीश्वेतवराहकल्पे स्वायम्भुवादिमन्वन्तराणां मध्ये सप्तमे

वैवस्वतमन्वन्तरे सद्युगादिचतुर्युगानां मध्येऽष्टाविंशतितमे युगे कलियुगे कलि प्रथमचरणे प्रभवादिषष्टिसंवत्सराणां मध्ये अमुकनामसंवत्सरे उत्तरादिगो लावलम्बिनि श्रीमार्त्तण्डमण्डले अमुकायने अमुकऋतौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशि स्थिते सूर्ये अमुकराशिस्थिते चन्द्रे शेषेषु ग्रहेषु यथाराशिस्थितेषु सत्सु एवं ग्रह गुणविशिष्टेऽस्मिन् शुभक्षणे अमुकगोत्रोत्पन्नोऽहं अमुकप्रवरोऽहं अमुकनामशर्माहं वा (वर्माहं उत गुप्तोऽहं) अमुकवेदान्तर्गतामुकशाखाध्याय्यहं श्रुतिस्मृतिपुराणोक्त फलप्राप्त्यर्थं सूर्यादिनवग्रहान्तर्गतकिञ्चित्ग्रहसूचितारिष्टनिरसनार्थं अन्तर्दशा विदशामहादशादिजन्मदशाहीनांशपात्यंशासु द्वादशादिवर्षदशासूचितारिष्टनिरस नार्थं सकुटुम्बस्य सपरिवारस्य द्विपदचतुष्पदसहितस्य सर्वारिष्टनिरसनार्थं स

प्रति० कलशुभफलप्राप्त्यर्थं निरवच्छिन्नगार्हस्थ्यादिधर्मसिद्धिपूर्वकं अन्ते मोक्षफलप्रा सं०
॥ ५ ॥ प्त्यर्थं करिष्यमाणशिवादिप्रतिष्ठाकर्मणः पूर्वाङ्गभूतस्वस्तिवाचनगणपतिपूजनब्रा
ह्मणवरण-पुण्याहवाचन-कलशस्थापन-मातृकापूजन-घृतमातृकापूजन-नान्दीश्राद्धा
दिकर्माहं करिष्ये ॥ एवं प्रतिज्ञासङ्कल्पं कुर्यात् ॥ "अथ स्वस्तिवाचनम्" ॥
ॐ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअरि
ष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ॥ २५ ॥ १८ ॥ पयः पृथिव्याम्पयऽओषधी
षुपयो दिव्यन्तरिक्षेपयोधाः ॥ पयस्वतीः प्रदिशः सन्तुमह्यम् ॥ १८ ॥ ३६ ॥
भद्रङ्कर्णेभिः शृणुयामदेवाभद्रम्पश्येमाक्षभिर्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवा सस्त ॥ ५ ॥
नूभिर्व्यशेमदेवहितंयदायुः ॥ २५ ॥ २१ ॥ आनोभद्राः क्रतवोयन्तुविश्वतोदब्धासोऽ

अपरीतासऽउद्भिदः ॥ देवानोयथासदमिद्वृधेऽअसन्नप्रायुवोरक्षितारोदिवेदिवे ॥
॥ २५ ॥ १४ ॥ विष्णोरराटमसिविष्णोः श्नप्त्रेस्थोविष्णोः स्यूरसिविष्णोर्ध्रुवोसिवै
ष्णवमसिविष्णवेत्त्वा ॥ ५ ॥ २१ ॥ अग्निर्देवतावातोदेवतासूर्य्योदेवताचन्द्रमादेवताव
सवोदेवतारुद्रादेवतादित्यादेवतामरुतोदेवताविश्वेदेवादेवताबृहस्पतिर्देवतेन्द्रो
देवतावरुणोदेवता ॥ १४ ॥ २० ॥ द्यौःशान्तिरन्तरिक्षँ शान्तिःपृथिवीशान्तिरापः
शान्तिरोषधयःशान्तिःवनस्पतयः शान्तिर्विश्वेदेवाः ॥ शान्तिर्ब्रह्मशान्तिः सर्वँ
शान्तिःशान्तिरेव शान्तिःसामाशान्तिरेधि ॥ ३६ ॥ १७ ॥ विश्वानिदेवसवितर्दुरि
तानिपरासुव ॥ यद्भद्रन्तन्नऽआसुव ॥ ३० ॥ ३ ॥ दीर्घायुत्वायबलायवर्च्चसेसुप्रजास्त्वा

प्रति० यशंसायअथोजीवशरदः शतम् ॥ इमारुद्रायतवसेकपर्दिनेक्षयद्वीरायप्रभंराम सं०
॥ ६ ॥ हेमतीः। यथाशमसंद्विपदेचतुष्पदेविश्वम्पुष्टङ्ग्रमेऽअस्मिन्ननातुरम् ॥ १६ ॥४८॥
एतत्तेदेवसवितर्य्यज्ञम्प्राहुर्बृहस्पतयेब्रह्मणे ॥ तेनयज्ञमवातेनयज्ञपतिन्तेनमामव ॥
॥ १२ ॥ १२ ॥ सहस्तोमाःसहच्छन्दसऽआवृतंःसहप्रमाऽऋषयःसप्तदैव्यां॥
पूर्वेषाम्पन्थामनुदृश्यधीराऽअन्वालेभिरेरथ्योनरश्मीन् ॥ ३४ ॥ ४९ ॥ यज्जा
ग्रतो दूरमुदैतिदैवन्तदुसुप्तस्य तथैवैति ॥ दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्त
न्मेमनःशिवसङ्कल्पमस्तु ॥ ३४ ॥ १ ॥ गणानान्त्वागणपतिंहवामहे प्रिया ॥ ६ ॥
णान्त्वाप्रियपतिंहवामहे॥ निधीनान्त्वानिधिपतिंहवामहेवसो मम ॥ आहम

जानि गर्भधमात्त्वमंजासि गर्भधम् ॥ २३ ॥ १८ ॥ नमोगणेभ्योगणपति
भ्यश्चवो नमोनमोव्रातेभ्यो व्रातपतिभ्यश्चवो नमोनमोगृत्सेभ्योगृत्सपति
भ्यश्चवोनमोनमोविरूपेभ्योविश्वरूपेभ्यश्चवोनमोनमः सेनाभ्यः ॥ १६ ॥
॥ २५ ॥ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टंय्यज्ञंसमि
मन्दधातु ॥ विश्वेदेवासइहमादयन्तामोम्प्रतिष्ठ ॥ २ ॥ १३ ॥ एषवैप्रतिष्ठाना
मयज्ञोयत्रैतेनयज्ञेनयजन्तेसर्वमेवप्रतिष्ठितं भवति ॥ इति नमस्कारपूर्वकप्रार्थनाः ॥ सु
मुखश्चैकदन्तश्च कपिलोगजकर्णकः ॥ लम्बोदरश्च विकटोविघ्नराजोविनायकः ॥
धूम्रकेतुर्गणाध्यक्षोभालचन्द्रोगजाननः ॥ द्वादशैतानिनामानियःपठेच्छृणुयाद
पि ॥ विद्यारम्भेविवाहेचप्रवेशेनिर्गमेतथा ॥ संग्रामे संकटेचैवविघ्नस्तस्य
न जायते ॥ विघ्नवल्लीकुठारायगणाधिपतयेनमः ॥ हस्तसंपुटौसंयोज्य गणनाथं
२

प्रार्थयेत् ॥ तद्यथा ॥ यत्पादपल्लवयुगंविनिधायकुंभद्वन्द्वेप्रयाणसमयेसगणा
॥ ७ ॥ धिराजः ॥ विघ्नान्विहन्तुमलमस्यजगत्त्रयस्यगोविन्दमादिपुरुषंतमहंभजामि ॥ १ ॥
उद्यद्दिनेशरुचिरंनिजहस्तपद्मैः पाशांकुशाभयवरान्दधतंगजास्यम् ॥ रक्ताम्बरंस
कलदुःखहरंगणेशंध्यायेत्प्रसन्नमखिलाभरणाभिरामम् ॥ २ ॥ अविघ्नंकुरुमेनित्यं
विघ्नंचपरितोहर ॥ यात्रामंगलसिद्ध्यर्थमेकदन्तनमोऽस्तुते ॥ ३ ॥ मञ्जुलारुण
विस्तीर्णकरपुष्करराजितम् ॥ शिवोद्भवंचभास्वंतंकमलामोददंभजे ॥ ४ ॥ इति
नमस्कारपूर्वकप्रार्थना ॥ हस्तेअक्षतान्गृहीत्वा ॥ गजवक्त्रायनमः ॥ ॐमनो
जूतिर्ज्जुषतामाज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टंयज्ञꣳसमिमन्दधातु ॥ वि
श्वेदेवासऽइहमादयन्तामोम्प्रतिष्ठेतिमन्त्रेणप्रतिष्ठाप्यावाहयेत् ॥ भोहेरम्बत्वमे ॥ ७ ॥
ह्येहित्र्यम्बकेयाम्बिकात्मज ॥ सिद्धिबुद्धिपतेऽध्यक्षसर्वलोकपितः पितः ॥ नागा

स्यनागहारत्वंगणनाथचतुर्भुज ॥ भूषितः स्वायुधैर्दिव्यैः पाशाङ्कुशपरश्वधैः ॥ आवाहयामिपूजार्थंरक्षार्थमध्वरस्यच ॥ इहागत्यगृहाणत्वंपूजांरक्षचमेक्रतुम् ॥ आगच्छविघ्नराजेन्द्रस्थानेचात्रस्थिरोभव ॥ यावत्पूजासमाप्येततावत्त्वंसन्निधौभव ॥ आगच्छदेवदेवेशगणनाथनमोऽस्तुते ॥ सूर्यकोटिसमाभस्त्वंगजवक्त्रचतुर्भुज ॥ गजवक्त्रगणाध्यक्षसर्वविघ्नविनाशन ॥ लम्बोदरत्रिनेत्रत्वमागच्छगणनायक ॥ अथातःसम्प्रवक्ष्यामिगणयागंसुशोभनम् ॥ कामिके वासिकेयज्ञेविवाहेव्रतसंयमे ॥ आदौगणेश्वरः पूज्यः सर्वकामफलप्रदः ॥ मासमासाधिपःपूज्योगणेशोयोभविष्यति ॥ येनपूजयते यज्ञेसमाचार्योवनस्पतिः॥कोसौमासपतिर्देवःसर्वविघ्नविनाशनः ॥ ॥ श्रीकृष्णउवाच ॥ आदौगणेश्वरःश्रेष्ठोविघ्ननाशोविनायकः ॥ सर्वकामकृतौपूज्योयज्ञकालेसनातनः ॥ मण्डलंचततः कुर्य्यात्कोष्ठानांद्वादशस्मृतम् ॥ सिन्दूरस्थापितंदेवमीशानेचविनायकम्॥

प्रति० ॥ ८ ॥

क्रमयुक्तस्ततः स्थाप्योमासमासाधिपःप्रभुः॥मार्गेगणपतिः पूज्यःपौषेचैवविनायकः॥
गजवक्रोमाघमासेभालचन्द्रोऽथफाल्गुने॥उपेन्द्रश्चैत्रमासेचवैशाखेविघ्ननाशनः॥ ज्येष्ठे
शिवसुतःपूज्यआषाढेहरनन्दनः ॥ श्रावणेविघ्नराजस्तुभाद्रेऽथोमोदकप्रियः ॥ आश्विने
कार्तिकेबीजंमहाबीजंचमार्गके ॥ विघ्नहर्त्ताधिकेमासिएवंपूज्योगणेश्वरः ॥ गन्धपुष्पै
स्तथाधूपैःकर्पूरैर्यक्षकर्दमैः[१] ॥ मृगाणांकुंकुमैःशुभ्रैःसिन्दूरेणविशेषतः ॥ रक्तोत्पलदलैः
पूज्याबिल्वपत्रैश्चकेशरैः ॥ मालतीकेतकीपुष्पैर्हेमपुष्पैर्विचक्षणैः ॥ अर्घ्यपाद्यैश्चधूपैश्च
रक्तवस्त्रेणच्छादयेत् ॥ पूजांकुर्य्यात्तुदेवस्यदद्यान्मोदकभोजनम्॥नमोमूषकमारूढशु
भकर्त्रैथतेनमः ॥ नमःकात्यायनीपुत्रलम्बकर्णायतेनमः॥ उद्यद्रविस्वरूपायविद्याबुद्धि
विचक्षण॥देहिमेपुत्रसौभाग्यं देहिमेसुखसंपदम् ॥ वांछासिद्धिश्चमेदेहिविद्यांदेहियशो

सं० ॥ ८ ॥

१ यक्षकर्दमस्तु—कस्तूरिकायाद्वौभागौद्वौभागौकुंकुमस्यच ॥ चंदनस्यत्रयोभागाः शशिनस्त्वेकएवहीत्युक्तलक्षणोज्ञेयः ।

धनम् ॥ शत्रवोनाशतांयान्तुदुर्जनोनाशतामियात् ॥ स्वानांचैवहितार्थायप्रार्थयित्वागणे
श्वरम् ॥ आदौपूज्य गणेशन्तुशान्तिपाठमथाचरेत् ॥ नाशयेत्सर्वविघ्नानिकल्याणं
जायतेसदा ॥ कृष्णेनभाषितंपूर्वंदेवतानांहितार्थिना ॥ उत्पातेविघ्नसम्भूतौपूजयेद्गणना
यकमित्यावाह्य ॥ इति गणयागः ॥ संकल्पः—ॐ अस्यश्रीसदाशिवादिप्रतिष्ठायागक
र्मणः सांगतासिद्ध्यर्थं श्रीगणेशदेवस्यपञ्चोपचारैर्यथाविधिपूजनमहंकरिष्येइतिप्रतिज्ञां
कृत्वा ॥ अथ पुराणोक्त गणपति पूजनम् ॥ सुमुखायनमस्तुभ्यंगणाधिपतयेनमः॥पुष्पा
सनंमयादत्तंविघ्नपुंजंनिवारय ॥ गणपतयेनमः आसनंसमर्पयामि ॥ उमापुत्रायदेवाय
सिद्धिवन्द्यायतेनमः ॥ पाद्यंगृहाणदेवेशविघ्नव्यूहंनिवारय ॥ लम्बोदरायनमः ॥ पाद्यं
समर्पयामि ॥ द्वैमातुरकृपासिन्धोदेवषाण्मातुराग्रज ॥ वरदस्त्वंवरंदेहिवाञ्छितंवाञ्छि
तार्थद ॥ अनेनार्घ्यप्रदानेनवाञ्छितार्थं प्रयच्छमे ॥ एकदन्तमहाकायनागयज्ञोपवी

तक ॥ गणाधिदेवदेवेशगृहाणार्घ्यंनमोऽस्तुते ॥ द्वैमातुरायनमः ॥ अर्घ्यंसमर्प
यामि ॥ नर्मदाचन्द्रभागादिगंगासंगमजैर्जलैः ॥ स्नापितोसिमयादेवाविघ्नसंघंनि
वारय ॥ उमापुत्रायनमः ॥ स्नानंसमर्पयामि ॥ सूर्यकोटिसमाभासनागयज्ञोपवी
तक॥सुवर्णसूत्रैरचितमुपवीतंगृहाणमे ॥ इभवक्त्रनमस्तेस्तुगृहाणपरमेश्वर ॥ ब्रह्मसूत्रंम
यादत्तंविघ्नपुञ्जंनिवारय ॥ विघ्नेश्वरायनमः॥उपवीतंसमर्पयामि ॥ रक्ताम्बरधराधीशपा
शांकुशधरेश्वर ॥ वस्त्रयुग्मंमयादत्तंगृहाणपरमेश्वर ॥ सूर्य्यकर्णायनमः ॥ वस्त्रंसमर्पया
मि॥ ईशपुत्रनमस्तुभ्यंनमोमूषकवाहन ॥ गन्धंगृहाणदेवेशविघ्नपुञ्जंनिवारय॥गणाध्य
क्षायनमः॥गन्धंसमर्पयामि ॥ रक्तचंदनसंमिश्रैरक्षतैः पूजयाम्यहम्॥सर्वभूतहितार्थाय
विघ्नराजजगद्गुरो ॥ विघ्नहर्त्रेनमः ॥ अक्षतान्समर्पयामि ॥ पाटलामल्लिकादूर्वाशतप
त्राणिवैप्रभो ॥ पुष्पाणीशगृहाणत्वंविघ्नपुञ्जंनिवारय ॥ विघ्नविनाशिनेनमः ॥ पुष्पंसम

पंयामि ॥ लम्बोदरविशालाक्षधूम्रकेतोनमोनमः ॥ धूपंगृहाणदेवेशविघ्नपुंजं निवारय॥
विकटायनमः ॥ धूपंसमर्पयामि ॥ घृताक्तवर्तिसंयुक्तंवह्निनायोजितंमया ॥ दीपंगृहा
णदेवेशरुद्रप्रियनमोऽस्तुते ॥ वामनायनमः ॥ दीपंसमर्पयामि ॥ नमोमोदकहस्ताय
भालचन्द्रायतेनमः ॥ नैवेद्यंगृह्यतांदेवविघ्नपुंजं निवारय ॥ सर्वदेवाधिदेवायनमः ॥
नैवेद्यंसमर्पयामि ॥ इदंफलंमयादेवस्थापितंपुरतस्तव ॥ तेनमेसफलावाप्तिर्भवेज्जन्मनि
जन्मनि ॥ सर्वार्त्तिनाशिनेनमः ॥ फलंसमर्पयामि ॥गजानननमस्तुभ्यं विनायक नमो
नमः ॥ आचम्यतांगणाध्यक्षविघ्नपुञ्जंनिवारय ॥ हेरम्बायनमः॥आचमनंसमर्पयामि॥
पूगीफलंसकर्पूरनागवल्लीदलैर्युतम् ॥ नानाभोग्यसमायुक्तंताम्बूलंप्रतिगृह्यताम् ॥ विघ्न
राजायनमः ॥ ताम्बूलंसमर्पयामि ॥ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः॥ अनन्तपु
ण्यफलदमतः शान्तिंप्रयच्छमे॥ विनायकायनमः॥ दक्षिणांसमर्पयामि ॥ चन्द्रादित्यौ

प्रति० च धरणीविद्युदग्निस्तथैवच ॥ त्वमेवसर्वज्योतींषिआरार्तिंप्रतिगृह्यताम् ॥ गणेश्वरायन

॥ १० ॥ मः ॥ नीराजनंसमर्पयामि ॥ गणेश्वरनमस्तेस्तुसर्वसिद्धिप्रदायक ॥ निर्विघ्नंकुरुदेवेश सं०

सर्वकार्येषुसर्वदा ॥ धूम्रायनमः ॥ प्रदक्षिणांनिवेदयामि ॥ प्रार्थनापूर्वकनमस्कारः॥ वि

घ्नेश्वरायवरदायसुरप्रियाय लम्बोदराय सकलायजगद्धिताय ॥ नागाननायसितसर्पवि

भूषिताय गौरीसुतायगणनाथनमोनमस्ते ॥ भक्तार्तिनाशनपरायगणेश्वराय सर्वेश्वरा

यशुभदायसुरेश्वराय॥विद्याधरायविकटायचवामनाय भक्तप्रसन्नवदनायनमोनमस्ते॥

इतिप्रार्थनापूर्वकनमस्कारंकुर्यात् ॥ अर्पणम्–अनेनपाद्यादिभिः कृतेनगणपतिपूजनेन

श्रीगणपतिर्देवःप्रीयताम् ॥ गणपतिपूजनकृतस्याविधेः सर्वपरिपूर्णमस्तु॥ इतिपुराणोक्त

गणपतिपूजनम् ॥ ॥ अथप्रसंगात्वेदोक्तप्रकारेणापिसर्वदेवानांषोडशोपचारपूजनंप्र

दर्श्यंते ॥ आवोदेवासऽईमहेवामम्प्रयत्यध्वरे ॥ आवोदेवासआशिषोयज्ञियासोहवाम ॥ १० ॥

हे॥४॥५॥इत्यनेनमन्त्रेणावाहनम् ॥ एषोहदेवऽम्प्रदिशोनुसर्व्वाः पूर्वोहजातःसऽउगर्ब्भेऽ
अन्तः॥ सऽएवजातः सजनिष्ष्यमाणः प्प्रत्यङ्जनास्तिष्ठतिसर्व्वतोमुखः ॥ ३२ ॥ ४ ॥
इत्यनेनदेवस्यसंमुखीकरणम् ॥ पुरुषऽएवेदꣳ सर्व्वय्यद्भूतँय्यच्चभाव्व्यम् ॥ उतामृत
त्वस्येशानोयदन्नेनातिरोहति ॥ ३१ ॥ २ ॥ इत्यनेनपाद्यम् ॥ एतावानस्यमहिमा
तोज्ज्यायाँश्श्चपूरुषः ॥ पादोस्यविश्श्वाभूतानित्रिपादस्यामृतन्दिवि ॥ ३१ ॥
॥ ३ ॥ इत्यनेनार्घ्यम् ॥ वरुणस्योत्तम्भनमसिवरुणस्यस्कम्भसर्ज्जनीस्थो वरु
णस्यऽऋतसदन्न्यसिवरुणस्यऽऋतसदनमसिव्वरुणस्यऽऋतसदनमासीद ॥ ४ ॥
॥ ३६ ॥ इत्यनेन स्नानम् ॥ पयःप्पृथिव्व्याम्पयऽओषधीषुपयोदिव्व्यन्तरिक्षे
पयोधाः ॥ पयस्वतीःप्प्रदिशःसन्तुमह्यम् ॥ १८ ॥ ३६ ॥ इत्यनेनपयःस्नानम् ॥ ततः
शुद्धोदकस्नानम् ॥ दधिक्राव्व्णोऽअकारिषञ्जिष्णोरश्श्वस्यवाजिनः ॥ सुरभिनोमु

प्रति० स्वाकरत्प्रणआयूꣳषितारिषत् ॥ २३ ॥ ३२ ॥ इत्यनेनदधिस्नानम् ॥ पुनर्ब्रह्माणस्ये सं०
॥ ११ ॥ त्यनेनशुद्धोदकेनस्नानम् ॥ घृतङ्घृतपावानः पिबतवसां वसापावानः पिबतान्त
रिक्षस्यहविरसिस्वाहा ॥ दिशः प्प्रदिशऽआदिशोविदिशऽउद्दिशोदिग्भ्यः स्वाहा ॥
॥६॥१९॥ इत्यनेनघृतस्नानम् ॥ अपाꣳरसमुद्वयसꣳ सूर्य्येसन्तꣳसमाहितम् ॥ अपाꣳ
रसस्यऽयोरसस्तंवोगृह्णाम्म्युत्तममुपयामगृहीतोसीन्द्रायत्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरि
न्द्रायत्वाजुष्टतमम् ॥ ९ ॥३ ॥ इत्यनेनशर्करास्नानम् ॥ पुनःशुद्धोदकस्नानम् ॥ मधु
वाताऽऋतायतेमधुक्षरन्तिसिन्धवः ॥ माध्वीर्न्नःसन्त्वोषधीः ॥ १३ ॥ २७ ॥ इत्य
नेनमधुस्नानम् ॥ पुनस्तथैवशुद्धोदकस्नानम् ॥ पञ्चनद्यःसरस्वतीमपियन्तिसस्त्रो
तसः ॥ सरस्वतीतुपञ्चधासोदेशेभवत्सरित् ॥ ३४ ॥ ११ ॥ इत्यनेनपञ्चामृतस्नानम् ॥ ॥ ११ ॥
पुनः शुद्धोदकस्नानम् ॥ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोवेनऽआवः ॥

सबुध्न्याऽउपमाऽअस्यविष्ठाः सतश्श्चयोनिमसतश्चविवः ॥ १३ ॥ ३ ॥ इत्यनेनय
ज्ञोपवीतम् ॥ वसोःपवित्रमसिद्यौरसिपृथिव्यसिमातरिश्श्वनोघर्म्मोसिविश्श्वधा
असि ॥ परमेणधाम्नादृꣳहस्वमाह्वाम्मातेयज्ञपतिर्ह्वार्षीत् ॥ १ ॥ २ ॥ इत्यनेनवस्त्र
म् ॥ युञ्जन्तिब्ब्रध्नमरुषञ्चरन्तम्परितस्त्थुषः ॥ रोचन्तेरोचनादिवि ॥ २३ ॥ ५ ॥
युञ्जन्त्यस्यकाम्म्याहरिविपक्षसारथे ॥ शोणाधृष्णूनृवाहसा ॥ २३ ॥ ६ ॥ इत्य
नेनगन्धम् ॥ अक्षन्नमीमदन्तह्यवप्प्रियाऽअधूषत ॥ अस्तोषतस्वभानवोविप्प्रान
विष्ठयामतीयोजान्न्विन्द्रतेहरी ॥ ३ ॥ ५१ ॥ इत्यनेनअक्षतान् ॥ श्रीश्श्चतेलक्ष्मी
श्श्चपत्न्यावहोरात्रेपार्श्श्वेनक्षत्राणिरूपमश्श्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मऽइ
षाणसर्वलोकम्मऽइषाण ॥ ३१ ॥ २२ ॥ इत्यनेनपुष्पम् ॥ नमोविल्मिने
चकवचिनेचनमो वर्म्मिणेचवरूथिनेचनमः श्श्रुतायच श्रुतसेनायचनमोदुन्दु

प्रति० ॥ १२ ॥

भ्यायचाहनन्यायचनमोधृष्णवे ॥ १६ ॥ ३५ ॥ इत्यनेनबिल्वपत्रम् ॥ काण्डा त्काण्डात्प्ररोहन्तिपरुषः परुषस्परि ॥ एवानोदूर्वेप्प्रतनुसहस्रेणशतेनच ॥ १३ ॥ ॥ २० ॥ इत्यनेनदूर्वाम् ॥ धूरसिधूर्व्वधूर्वन्तन्धूर्व्वतंय्योस्मान्धूर्व्वतितन्धूर्व्वयंव्वयन्धू र्व्वामः ॥ देवानामसिव्वह्नितमर्ठःसस्नितमम्प्राप्प्रितमञ्जुष्टतमन्देवहूतमम् ॥ १ ॥ ८ ॥ इत्यनेन धूपम् ॥ अग्निर्ज्ज्योतिर्ज्ज्योतिरग्निः स्वाहासूर्य्योज्ज्योतिर्ज्ज्योतिः सूर्य्यः स्वाहा ॥ अग्निर्व्वर्च्चोज्ज्योतिर्व्वर्च्चः स्वाहा सूर्य्योवर्च्चोज्ज्योतिर्व्वर्च्चः स्वाहा ॥ ज्ज्योतिः सूर्य्यः सूर्य्योज्ज्योतिः स्वाहा ॥ ३ ॥ ९ ॥ इत्यनेनदीपम् ॥ (यजमानह स्तप्रक्षालनंदीपदानानन्तरंकर्त्तव्यम्) ॥ नाभ्याआसीदन्तरिक्षर्ठःशीर्ष्णोद्यौः स मवर्तत ॥ पद्भ्याम्भूमिर्द्दिशः श्श्रोत्रात्तथालोकाँऽअकल्पयन् ॥ ३१ ॥ १३ ॥ इत्यनेन नैवेद्यम् ॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥ वसन्तोस्यासीदाज्ज्यग्री

सं० ॥ १२ ॥

ष्मऽइध्मः शरद्धविः ॥ ३१ ॥ १४ ॥ इत्यनेनआचमनम् ॥ याः फलिनीर्य्याऽअफला अ
पुष्पायाश्चपुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वꣳहसः ॥ १२ ॥ ८९ ॥
॥ इत्यनेनपूगीफलम् ॥ हिरण्यगर्भः समवर्त्तताग्रे भूतस्यजातः पतिरेकऽआसीत् ॥
सदाधारपृथिवीन्द्यामुतेमांकस्मैदेवायहविषाविधेम ॥ १२ ॥ ४ ॥ इत्यनेनदक्षिणा
म् ॥ अग्निर्द्देवतावातोदेवतासूर्य्योदेवताचन्द्रमादेवतावसवोदेवतारुद्रादेवतादित्त्या
देवतामरुतोदेवताविश्वेदेवादेवताबृहस्पतिर्द्देवतेन्द्रोदेवतावरुणोदेवता ॥ १४ ॥
॥ २० ॥ इत्यनेननीराजनम् ॥ येतीर्थानिप्रचरन्तिसृकाहस्तानिषंगिणः ॥ तेषाꣳ०स
हस्रयोजनेवधन्वानितन्मसि ॥ १६ ॥ ६१ ॥ इत्यनेनप्रदक्षिणाम् ॥ यज्ञेनयज्ञमय
जन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् ॥ तेहनाकम्महिमानः सचन्तयत्रपूर्वेसा
ध्याः सन्तिदेवाः ॥ ॐराजाधिराजायप्रसह्यसाहिने नमोवयंवैश्रवणायकुर्म्महे स

३

मेकामान्कामकामायमह्यं कामेश्वरोवैश्रवणोदधातु कुबेरायवैश्रवणाय महाराजा
धिराजायनमः ॐस्वस्ति साम्राज्यंभौज्यंस्वाराज्यंवैराज्यंपारमेष्ठ्यंराज्यंमाहारा
ज्यमाधिपत्यमयंसमंतपर्य्यायीस्यात्सार्वभौमः सार्वायुषाआन्तादापरार्धात्पृथि
व्यैसमुद्रपर्य्यंता या एकराळिति तदप्येषश्लोकोऽभिगीतोमरुतः परिवेष्टारोमरुत्त
स्यावसन्गृहे आविक्षितस्यकामप्रेर्विश्वेदेवाः सभासदइति ॥ ॐविश्वतश्चक्षुरुतवि
श्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात् ॥ सम्बाहुभ्यांधमतिसम्पतत्रैर्द्यावाभूमीज
नयन्देवएकः ॥ ३१ ॥ १६ ॥ इत्यनेनपुष्पाञ्जलिम् ॥ उत्तिष्ठब्रह्मणस्पतेदेवयन्तस्त्वे
महे ॥ उपप्रयन्तुमरुतः सुदानव इन्द्रप्प्राशूर्भवासचा ॥ ३४॥५६॥ इ० विसर्जनम् ॥
इतिवेदोक्तषोडशोपचारपूजनम् ॥ अथाचार्य्यादिब्राह्मणानांवरणपूर्वकंपूजनम् ॥
तत्रब्राह्मणान्प्राङ्मुखानुपवेशयेत् ॥(स्वयंयजमानउदङ्मुखः)॥ मतांतरेतुब्राह्मणानुद

ङ्मुखानुपवेशयेत् ॥ आचार्यः प्राङ्मुखः कर्त्ताप्राङ्मुखइत्यपिलिखितम् ॥ तत्रप्रथमं ॥
पत्न्याअञ्चलकोणेरक्ताक्षतहरिद्रादूर्वाफलानिबद्धायथा—यंब्रह्मवेदांतविदोवदंतिपरंप्र
धानं पुरुषन्तथान्ये ॥ विश्वोद्गतेःकारणमीश्वरंवातस्मैनमोविघ्नविनाशनायेत्यादिमंगल
मन्त्रैर्यजमानस्यदुकूलाञ्चलकोणेबद्ध्वा यजमानस्यदक्षिणपार्श्वेपत्नीमुपवेशयेत् ॥
(सर्वेषुधर्मकृत्येषुपत्नीदक्षिणतः सदेतिवचनात्) अन्यमतेतुवामोपवेशनमपिलिखित
म् ॥ शान्तिकेषुचसर्वेषुप्रतिष्ठोद्यापनादिषु ॥ वामेह्युपविशेत्पत्नीव्याघ्रस्यवचनंयथेतिस्म
रणात् ॥ ततोयजमानः स्वासनेउपविश्य ॥ पवित्रपाणिराचम्य ॥ गणेशंगुरुंचस्मृत्वा ॥
स्वस्त्ययनादीनिपठित्वा ॥ दक्षिणहस्तेताम्रपात्रेसकुशयवजलंगृहीत्वा॥अद्येत्यादिवि
शिष्टकालपर्यन्तमुक्त्वायथा संकल्पः॥ममक्षेमायुरारोग्यपरमश्रीसुखप्राप्तये सपुत्रस्य
सभार्यस्यचिन्तितार्थसिद्धये आधिव्याधिजरामृत्युभयशोकदुःखादिनिवृत्तये भूत

भविष्यद्वर्त्तमानत्रिविधोत्पातशान्तयेपरमैश्वर्यप्राप्त्यर्थंकरिष्यमाणशिवादिप्रतिष्ठां
गभूततत्तत्कर्मकरणार्थं आचार्यादिब्राह्मणानां वरणपूर्वकपूजनमहंकरिष्ये इतिसंक
ल्प्य ॥ जलाक्षतादीन्भूमौप्रक्षिपेत् ॥ ततोयजमानोविप्राणांसामान्यतः पादप्रक्षाल
नादिकंकृत्वा ॥ सामान्यतोष्टांगमर्घ्यमादाय॥सर्वेभ्योब्राह्मणेभ्यएकदैवदद्यात्॥आपः
क्षीरंकुशाग्राणिदधिदूर्वाक्षतास्तथा ॥ तिलाःसिद्धार्थकाश्चैवअष्टांगोर्घ्यःप्रकीर्तितः ॥
कुत्रचित्तिलाइत्यस्यस्थानेकुंकुमपदप्रक्षेपः कृतः सामान्यतोऽर्घ्यदानप्रकारमाह ॥ य
जमानः स्वासनादुत्थायोत्तिष्ठन्नेवब्राह्मणान् प्रार्थयेत् ॥ ॐआशुः शिशानोवृषभोनभी
मोघनाघनः क्षोभणश्चर्षणीनाम् ॥ संक्रन्दनोनिमिषएकवीरः शतꣳ॰सेनाअजयत्सा
कमिन्द्रः ॥ ततः प्रार्थनाश्लोकाः ॥ पावनाः सर्ववर्णानांब्राह्मणाब्रह्मरूपिणः ॥ अ
नुगृह्णन्तुमामद्यशिवयागाख्यकर्मणि ॥ स्वस्वकर्म्मरतानित्यंवेदशास्त्रार्थकोविदाः ॥

श्रोत्रियाः सत्यवादाश्चदेवध्यानरताः सदा ॥ यद्वाक्यामृतसंसिक्तावृद्धिंयान्ति नरद्रुमाः ॥ अंगीकुर्वन्तुमत्कर्मकल्पद्रुमसमाशिषः ॥ यथोक्तनियमैर्युक्तामन्त्रार्थेस्थिरबुद्धयः ॥ यत्कृपालोकनात्सर्वाऋद्धयोवृद्धिमाप्नुयुः ॥ स्वागतंवोद्विजश्रेष्ठामदनुग्रहकारकाः ॥ इदमर्घ्यमिदंपाद्यंभवद्भिः प्रतिगृह्यताम् ॥ चरणक्षालनाद्देवास्तुष्यन्तिशुद्धमानसाः ॥ तज्जलेनचसंसिक्ताःपूर्णकामाभवन्तुमे ॥ इमंवोऽर्घ्यंप्रयच्छामिगृह्णन्तुप्रीतमानसाः ॥ पावयन्तुचमांनित्यंपरमांस्तुमनोरथान् ॥ प्रीतयेपरमेशस्यभूरिभावाप्तयेपुनः ॥ शिवयागजपारम्भहवनान्तंचयद्भवेत् ॥ तस्यसम्पादनायैवभवतांप्रार्थनंकृतम् ॥ इत्युक्त्वाब्राह्मणानामग्रेऽर्घ्यंस्थापयेत् ॥ ब्रह्माचस्वशाखीयः कर्त्तव्यः ॥ अत्रब्रह्माचार्यादयोऽनुक्रमेणार्घ्याइतिकेचित् ॥ प्रतिष्ठाकाण्डादौतुपूर्वंब्रह्मस्थानेसदस्यवरणमुक्त्वातदनन्तरमाचार्य्यादीनांवरणमित्युक्तमस्ति ॥ गृह्यमन्त्रभाष्येतु ॥ आ

प्रति० चार्य्यंवृणुयात्पूर्वंब्रह्माणंतदनन्तरम् ॥ ततः कर्माणिकुर्वीतसर्वसूत्रविदांमतमितिलिखित सं०
॥ १५ ॥ मस्ति ॥ परशुरामेणापि ॥ आचार्य्यादिसमस्तानांजापकानांद्विजन्मनाम् ॥ पाद्यार्घ्या
दिकरिष्येहंसर्वकर्मांगसिद्धये इत्येवलिखितम् ॥ तेनात्रश्रुतिस्मृतिद्वैधेउभयंसाधुरिति
न्यायेनविकल्प एवज्ञेयः ॥ अन्यतरपक्षानुष्ठानेतुआत्मनस्तुष्टिरेवनियामिकेतिज्ञेयम् ॥
केचित्तुमानुष्यवरणमाचार्यपूर्वकंदैववरणं तु ब्रह्मपूर्वकमितिव्यवस्थामेवात्रविषयेउद्
घाटयन्ति ॥ आचार्यादिपूजनम् ॥ तद्यथा ॥ आचार्यंप्राङ्मुखमुपवेश्यस्वयंचयजमान
उदङ्मुखो भूत्वायवजलपुष्पद्रव्यपूगीफलादिकमादायाचार्य्यस्यदक्षिणजान्वाल
भ्य ॥ संकल्पः अद्येत्यादिदेशकालादिसंकीर्त्यामुकगोत्रोमुकप्रवरोऽमुकशर्माहंकरिष्य
माणाशिवादिप्रतिष्ठांगभूततत्तत्कर्मकरणार्थंअमुकगोत्रममुकप्रवरममुकवेदान्तर्गतामु ॥ १६
कशाखाध्यायिनममुकशर्माणंब्राह्मणं एभिः पूगीफलाक्षतद्रव्यचन्दनवासोभिराचार्य्यं

त्वेनत्वामहंवृणे ॥ वृतोस्मीतिप्रतिवचनम् ॥ अनन्तरमर्घ्यादिभिः पूजनम् ॥ तच्चाग्रेवक्ष्यते
वरणानन्तरं व्रतेनदीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् ॥ दक्षिणाश्रद्धामाप्नोतिश्रद्धयास
त्यमाप्यतेइतिमन्त्रंपठेत् ॥ अनन्तरंयजमानोऽञ्जलिंबद्ध्वाचार्य्यंप्रार्थयेत् ॥ शक्रा
दीनांयथास्वर्गेआचार्य्योवाबृहस्पतिः ॥ तथात्वंममयज्ञेस्मिन्नाचार्य्योभवसुव्रत ॥ म
न्त्रमूर्तिर्भवान्नाथसंसारोच्छेदकारकः ॥ पूजार्हस्तुयथादेवः कुरुधर्मोहुतिंचनः ॥
संसारभयभीतेनअयंयज्ञः सुभक्तितः ॥ प्रारब्धस्त्वत्प्रसादेननिर्विघ्नंमेभवेदिति ॥
भगवन्सर्वधर्मज्ञशिवधर्मपरायण ॥ सर्वशास्त्रार्थतत्त्वज्ञशिवशास्त्रविशारद ॥ अना
दिजन्मसन्तानेह्यप्रमेयेभवार्णवे ॥ अद्यमेह्युत्तमंजन्मअद्यमे सफलंधनम् ॥ अद्यमेज
ननोच्छित्तिरद्यमेपरमंपदम् ॥ मोचितोहंत्वयानाथदुश्छेद्याद्भवबन्धनात् ॥ संत्रातो
हंत्वयायस्मादप्रमेयाद्भवार्णवात् ॥ मुक्तोऽहंमर्त्यसंसारात्प्रपन्नोहंतवान्तिकमिति ॥ तद

प्रति० नन्तरंप्राङ्मुखंब्रह्माणमुपवेश्यस्वयमुदङ्मुखोयजमानोयवद्रव्यपूगीफलादिकमादाय सं०
॥१६॥ दक्षिणंजानूपलभ्य ॥ अद्येत्यादिदेशकालपर्यन्तमुच्चार्य्यामुकगोत्रोहममुकप्रवरो
हममुकशर्माहंसग्रहशिवादिप्रतिष्ठाकर्मणितत्तद्ब्रह्मकर्मकरणार्थममुकगोत्रोत्पन्नममुक
प्रवरममुकवेदान्तर्गतामुकशाखाध्यायिनममुकशर्माणं ब्राह्मणमेभिः पूगीफलाक्षत
द्रव्यादिभिर्ब्रह्मत्वेन त्वामहं वृणे ॥ वृतोस्मीतिप्रतिवचनम् ॥ व्रतेनदीक्षामाप्नोती
त्यादिपाठः ॥ आवाहयामिदेवेशंब्रह्माणंकमलोद्भवम् ॥ चतुर्वेदसमायुक्तंसर्वसिद्धा
न्तवेदिनम् ॥ प्रार्थना॥यथाचतुर्मुखोब्रह्मासर्ववेदविशारदः ॥ तथात्वंममयज्ञेस्मिन्ब्रह्मा
भवद्विजोत्तम इतिब्रह्माणंप्रार्थयेत् ॥ ततः सर्वानृत्विजः प्राङ्मुखानुपवेश्य स्वयमुदङ्मु
खो भूत्वा देशकालौसंकीर्त्यामुकगोत्रोहममुकप्रवरोहंकलत्रादिकुटुम्बसहितोहंकरि
ष्यमाणशिवादिप्रतिष्ठाकर्मणिभूततत्तत्कर्मकरणार्थममुकामुकगोत्रोत्पन्नानमुकामुक ॥ १६

वेदान्तर्गतामुकामुकशाखाध्यायिनो विप्रानृत्विक्त्वेनयुष्मानहंवृणे ॥ वृतोऽस्मीति प्रति
वचनम् ॥ व्रतेनदीक्षामाप्नोतीत्यादिपठेयुः ॥ ततः प्रार्थयेत ॥ ऋग्वेदप्रार्थना–
ऋग्वेदःपद्मपत्राक्षोगायत्रः सोमदैवतः ॥ अत्रिगोत्रस्तुविप्रेन्द्रऋत्विक्त्वंमेमखेभव ॥
इतिमन्त्रेणऋग्वेदिनमृत्विजंप्रार्थयेत् ॥ यजुर्वेदप्रार्थना ॥ कातराक्षोयजुर्वेदस्त्रैष्टुभोवि
ष्णुदैवतः ॥ काश्यपेयस्तुविप्रेन्द्रऋत्विक्त्वंमेमखेभवेतियजुर्वेदिनमृत्विजंप्रार्थयेत् ॥
सामवेदप्रार्थना ॥ सामवेदस्तुपिंगाक्षोजागतः शक्रदैवतः ॥ भारद्वाजस्तुविप्रेन्द्रऋ
त्विक्त्वंमेमखेभवेति सामवेदिनमृत्विजंप्रार्थयेत ॥ अथर्ववेदप्रार्थना ॥ बृहन्नेत्रोऽथर्व
वेदोनुष्टुभोरुद्रदैवतः ॥ वैशम्पायनविप्रेन्द्रऋत्विक्त्वंमेमखेभवेत्यथर्ववेदिनमृत्विजं
प्रार्थयेत ॥ भगवन् सर्वधर्मज्ञसर्वधर्मभृतांवर ॥ वितते मम यज्ञेऽस्मिन्नृत्विक् त्वं भ
व सुव्रत इतिप्रत्येकमृत्विजंप्रार्थयेत् ॥ ततो यजमान उदङ्मुखो भूत्वा प्राङ्मुखान्

सदस्यान् वृणुयात् ॥ तद्यथा ॥ अद्येत्यादिदेशकालान्तंसंकीर्त्यामुकगोत्रोत्पन्नोऽहम मुकप्रवरोहंपुत्रपौत्रकलत्रादिकुटुम्बसहितोहंअमुकगोत्रोत्पन्नममुकप्रवरममुकवेदान्त र्गतामुकशाखाध्यायिनंब्राह्मणंत्वामहंवृणे वृतोस्मीतिप्रतिवचनम् ॥ सदस्यानां बहुत्वपक्षेतुबहुवचनपदप्रक्षेपः कर्त्तव्यः ततः प्रार्थना ॥ ऋत्विग्भिःसहितोब्रह्मन्संयतैः सुसमाहितैः ॥ आचार्येणचसंयुक्तःकुरुकर्म्मयथोदितम् ॥ वाञ्छितार्थफलावाप्त्यै पूजितोसि सुरासुरैः ॥ निर्विघ्नकार्यसंसिद्ध्यैत्वामहंगणपंवृणे ॥ त्वन्नोगुरुः पिता मातात्वंप्रभुस्त्वंपरायणः ॥ आचार्यादिभिः संयुक्तः कुरुकर्मयथोदितम् ॥ अ स्ययागस्यनिष्पत्तौभवन्तोभ्यर्थितामया ॥ सुप्रसन्नैःप्रकर्तव्यंकर्मेदंविधिपूर्वकम् ॥ ततःपुरुषसूक्तसहस्रनामपाठकर्तृकान् वेदपारायणपाठकादीन्वृणुयात् ॥ पूर्ववद्धोत्रा द्युच्चार्य ॥ पूर्वद्वारेऋग्वेदपारायणार्थंत्वामहंवृणे ॥ द्वावेकंवावृणुयात् ॥ एवंदक्षिणद्वारे

यजुर्वेदपारायणार्थम् ॥ पश्चिमद्वारेसामवेदपारायणार्थम् ॥ उत्तरद्वारे अथर्ववेदपाराय
णार्थम् ॥ प्रत्येकंद्वावेकंवावृणुयात् ॥ एवंपूर्वद्वारेऋग्वेदोक्तसूक्तजपार्थम् ॥ दक्षिणद्वारेयजु
र्वेदोक्तसूक्तजपार्थम् ॥ पश्चिमद्वारेसामवेदोक्तसूक्तजपार्थम् ॥ उत्तरद्वारे अथर्ववेदोक्तसूक्त
जपार्थंद्वौद्वौएकैकंवाब्राह्मणंवृणुयात् ॥ नवकुण्डीपंचकुण्डीपक्षेएवैषांबहूनामृत्विजांवर
णम् एककुण्डीपक्षेतुऋत्विजांसंकोचेनापिनिर्वाहोज्ञेयः ॥ एवंपूर्वद्वारेऋग्वेदोक्तशान्ति
सूक्तपाठार्थम् ॥ दक्षिणद्वारेयजुर्वेदोक्तशान्तिसूक्तपाठार्थम् ॥ पश्चिमद्वारेसामवेदोक्त
शान्तिसूक्तपाठार्थम् ॥ उत्तरद्वारे अथर्ववेदोक्तशान्तिसूक्तपाठार्थंप्रत्येकंद्वारपालानष्टौ
चतुरोवाएकंवावृणुयात् ॥ सर्वेषांगोत्राद्युच्चारणपूर्वकंवरणंकुर्यात् ॥ एवंनवग्रहमन्त्रजा
पकान् गणेशगायत्रीविष्णुगायत्रीरुद्रगायत्रीदुर्गापाठवास्तुक्षेत्रपालादिजपार्थंचब्राह्म
णानवृणुयात् ॥ ततोयजमानोयथाशक्तिप्रत्येकमेकदैववासर्वेषामाचार्यादिब्राह्मणाना

मासनदानादिपुरःसरंपूजनंकुर्यात् ॥ आचार्यऋत्विजामेवमधपर्कादिनापूजनमितिक
र्मकाण्डदानतर्पणादयः ततःॐसाधुभवानास्तामर्चयिष्यामोभवन्तमितिप्रत्येकार्चनप
क्षेज्ञेयं बहुत्वपक्षेतुसाधुभवन्तआसतामर्चयिष्यामोभवतइतिवाक्यंवदेत् अर्चयेतिवच
नानन्तरंषडर्घ्याभवन्त्याचार्यऋत्विग्वैवाह्योराजाप्रियः स्नातकंप्रतिसंवत्सरानर्हयुर्य
क्ष्यमाणास्तुऋत्विजइति सुवर्णमणिभिर्दिव्यैरचितेदेवनिर्मिते॥ दिव्यसिंहासनेविप्रउप
विश्यप्रसीदमेइतिमन्त्रेणासनेउपवेशयेत ॥ ॐविष्टरोविष्टरोविष्टरइत्याचार्येणोक्ते ॥
विष्टराःप्रतिगृह्यन्तामिति यजमानोवदेत्प्रतिगृह्णामइतिप्रतिवचनमुक्त्वावर्ष्मोऽस्मिस
मानानामुद्यतामिवसूर्यः इमन्तमभितिष्ठामियोमाकश्चाभिदासतीतिमन्त्रेणब्राह्मणाः
प्रत्येकंविष्टरंगृहीत्वाउदगग्रंविष्टरंदक्षिणपादतलेस्थापयेयुः ततः पाद्यम् ॐ पाद्यंपाद्यं ॥ १८ ॥
पाद्यंमित्याचार्य्येणोक्तेपादोदकंशुचिभिस्तुसुवर्णकलशेस्थितम्॥ गन्धपुष्पाक्षतैर्युक्तंपाद्यं

मेगृह्यतांविभोइतिमन्त्रंपठित्वायजमानःपाद्यं प्रतिगृह्यतामित्युक्त्वोदकपात्रंगृहीत्वाऽ
र्घ्यस्याञ्जलिंपूरयेत् ततोऽर्घ्याः ॐविराजोदोहोसीतिप्रजापतिर्ऋषिर्गायत्रीच्छन्दोब्रह्मा
देवतापादप्रक्षालनेविनियोगः ॐ विराजोदोहोसि विराजोदोहमशीय मयिपाद्यायैविरा
जोदोहइतिमन्त्रंपठित्वादक्षिणंचरणंप्रक्षालयेयुःपुनर्वामचरणप्रक्षालनमेवमेवकर्त्तव्यम्
ततोद्वितीयंविष्टरंपूर्ववदितिकर्त्तव्यतांकृत्वायजमानोदद्यात् ॐअर्घ्योऽर्घ्योऽर्घ्यं इत्या
चार्येणोक्ते ततो यजमानः-आपःक्षीरंकुशाग्राणिदधिदूर्वाक्षतास्तथा। सर्षपाः कुंकुमंचे
तिअर्घोष्टाङ्गः प्रकीर्तितइत्यष्टाङ्गमर्घ्यंकृत्वा ॥ अर्घ्यः—स्वागतंभोद्विजश्रेष्ठामदनुग्रह
कारकाः इदमर्घ्यमिदंपाद्यंभवाद्भिःप्रतिगृह्यतामितिपठित्वाअर्घ्यंप्रतिगृह्यतामितियज
मानोवदेत् ततोब्राह्मणाः प्रतिगृह्णीमइत्युकृत्वाआपस्थइतिमन्त्रस्यप्रजापतिर्ऋषिः
अनुष्टुपछन्दोब्रह्मादेवताऽर्घ्यग्रहणेविनियोगः ॐआपस्थयुष्माभिः सर्वान्कामान्वा

प्नुवानीतिमन्त्रेणार्घ्यंगृहीत्वामूर्द्धपर्यन्तमर्घ्यमानीयतत्रस्थमक्षतादिकंमूर्द्धनिनिवेश्य
ॐसमुद्रंवइतिमन्त्रस्याऽथर्वणऋषिर्गायत्रीच्छन्दआपोदेवताऽर्घ्याभिमन्त्रणेविनि
योगः ॐसमुद्रंवःप्रहिणोमि स्वांयोनिमभिगच्छत अरिष्टास्माकं वीरामापरासेचिमत्प
यइतिमन्त्रंपठित्वाभूमौप्रक्षिपेयुः आचमनम्,–ततआचमनीयमाचमनीयमाचम
नीयमित्याचार्येणोक्तेततोयजमानः शुभद्रव्यसमायुक्तंस्वर्णपात्रोदकंशुभम् ॥ भोऽभ
यङ्करसर्वेषां गृहाणाचमनीयकमितिपठित्वा आचमनंप्रतिगृह्यन्तामितिवदेत् ॥ ततो
ब्राह्मणाआचमनंप्रतिगृह्णीमइत्युक्त्वा ॐआमागन्निनितिमन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्
छन्दः आपोदेवता आचमनेविनियोगः–ॐआमागन्यशसासꣳसृजवर्चसातस्माकुरु
प्रियम्प्रजानामधिपंपशूनामरिष्टन्तनूनामिति मन्त्रेणसकृदाचम्यस्मार्त्ताचमनंकुर्य्युः

१ स्मार्ताचमनम्–आह्निकसूत्रावल्याम्–भरद्वाजः–केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्करौ । द्वाभ्यामोष्ठौ तु सम्मृज्य द्वाभ्यामुन्मार्जनं तथा । एकेन हस्तौ प्रक्षाल्य पादावपि तथैवच । सम्प्रोक्ष्यैकेन मूर्द्धानं ततः संकर्षणादिभिः। आस्यनासाक्षिकर्णौच नाभ्युरस्कं भुजौ क्रमात् । इति ॥

मधुपर्कः—ततॐमधुपर्कोंमधुपर्कोंमधुपर्क इत्याचार्येणोक्ते यजमानः—आज्यमेकंपलं
ग्राह्यंदधित्रिपलमेवचमधुनःपलमेकंतुमधुपर्कंतदुच्यते। इत्युक्तलक्षणंदधिमधुघृतरूपं
मधुपर्ककांस्यपात्रस्थितं द्वितीयकांस्यपात्रेणपिहितमादाय ब्रूयात् मधुपर्कंगृहाणेश
सर्वदामधुपर्कंद मधुपर्कप्रदानेनप्रीतोममाद्विजेश्वर इतिमन्त्रंपठित्वामधुपर्कंप्रतिगृह्य
तामितिवदेत् ततोब्राह्मणायजमानहस्तस्थितंमधुपर्कंमित्रस्यत्वेतिमन्त्रेणप्रतीक्ष्य ॐ
मित्रस्यत्त्वेतिमन्त्रस्यकुत्सऋषिस्त्रिष्टुपूछन्दः सवितादेवतामधुपर्कावेक्षणेविनियोगः
ॐमित्रस्यत्त्वाचक्षुषाप्रतीक्ष्येइतिमन्त्रंपठेयुः ततोदेवस्यत्त्वेतिबृहस्पतिर्ऋषिस्त्रिष्टुपूछ
न्दःसवितादेवता मधुपर्कग्रहणेविनियोगः ॐदेवस्यत्त्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपू
ष्णोहस्ताभ्यामित्यंजलिंप्रतिगृह्यसव्यपाणौमधुपर्कं निधायदक्षिणहस्तस्थकनिष्ठिक
यांगुल्या ॐनमःस्यावाश्यायान्नशनेयतआविद्धंतत्तेनिष्कृन्तामीतिमन्त्रेणसकृदालो

डयतूष्णींसकृदनामिकाङ्गुष्ठाभ्यामादायबहिर्निक्षिप्यपुनरेवंद्विवारमालोडनंनिरीक्षणं
चकुर्युः ततोयन्मधुनइति कुत्सऋषिर्जगतीच्छन्दोमधुपर्काधिष्ठातृदेवतामधुपर्कप्राश
नेविनियोगः ॐयन्मधुनोमधव्यंपरमꣳरूपमन्नाद्यन्तेनाहंमधुनोमधव्येनपरमेणरूपे
णान्नाद्येनपरमोमधव्योन्नादोशानीतिमन्त्रेणानामिकाङ्गुष्ठाभ्यांमधुपर्कमादायत्रिवार
प्राशनंकुर्युः मधुवातेतिप्रत्यृचंवात्रिवारंप्राशनंकुर्युः प्राशितशेषंमधुपर्कमन्तेवासिनेद
द्यात् पुत्रायवादद्यात् पूर्वस्यांदिशिअसंचरेदेशेवानिदध्यात्सर्वञ्चप्राश्नीयादितिगृह्य
प्रामाण्येनयथासम्भवंकुर्युः तदनन्तरमाचम्य ॥ वाङ्मेआस्येऽस्त्वितिकराग्रेणमुख
स्पर्शनंनसोर्मेप्राणोऽस्त्विति दक्षिणवामनासारन्ध्रे अक्ष्णोर्मेचक्षुरस्त्वितिदक्षिणोत्तरच
क्षुषीकर्णयोर्मेश्रोत्रमस्त्वितिकर्णयोः बाह्वोर्मेबलमस्त्वितिवामदक्षिणबाह्वोः ऊर्वोर्मे
ओजोऽस्त्वितिवामदक्षिणोरू अरिष्टानिमेऽङ्गानितनूस्तन्वामेसहसंत्विति शिरःप्रभृती

निसर्वाण्यंगानिउभाभ्यांहस्ताभ्यामालभेत्   एवमाचान्तोदकानांविप्राणांयजमानो
गौर्गौर्गौरितिब्रूयात् ततोब्राह्मणाः   मातारुद्राणांदुहितावसूनांस्वसादित्यानाममृ
तस्यनाभिः ॥ प्रणुवोचंचिकितुषेजनायमागामनागामदितिंवधिष्ट ॥ममचामुकशर्मणो
यजमानस्यचपाप्माहतः ॐइत्युच्चार्य्यउत्सृजततृणान्यत्तुइत्युच्चैर्ब्रूयुः स्नानम् गंगा
गोदावरीचैवयमुनाचसरस्वती नर्मदासिन्धुकावेरीताभ्यःस्नानीयमाहृतमित्यनेनस्ना
नम् ब्राह्मणेभ्योनमः   स्नानंसमर्पयामि वस्त्रम्–वस्त्रयुग्मंसमानीतंपट्टसूत्रेणनिर्मितम्
सुवर्णखचितंदिव्यंभोविप्रेन्द्रगृहाणत्वम् इत्यनेनवस्त्रयुग्मम् ब्राह्मणेभ्योनमः वस्त्र
युग्मंसमर्पयामि ‘उपवीतम्–’ कार्पासतन्तुभिर्युक्तंब्रह्मणानिर्मितंपुरा अनेकरत्न
खचितमुपवीतंगृहाणमे इत्यनेनयज्ञोपवीतम् ब्राह्मणेभ्योनमः यज्ञोपवीतांनिवेदयामि
अनुलेपनम्–चन्दनंमलयोद्भूतंकस्तूर्याऽगरुसंयुतम्   कर्पूरेणचसंयुक्तंस्वीकुरुष्वानु

लेपनम् ब्राह्मणेभ्योनमः चन्दनंसमर्पयामि 'पुष्पाणि'–शतपत्रैः कर्णिकारैश्चम्पकै
र्मल्लिकादिभिः तुलस्यायुक्तपुष्पाणिविप्रेन्द्रत्वंगृहाणमे इत्यनेनपुष्पाणि ॥ ब्राह्मणे
भ्योनमः पुष्पाणिसमर्पयामि 'धूपम्' दशांगंगुग्गुलंधूपंसुगन्धंचमनोहरम् कृष्णा
गरुसमायुक्तंधूपंदेवगृहाणमे इत्यनेनधूपम् ब्राह्मणेभ्योनमः धूपंसमर्पयामि दीपम्–
आज्यंचवर्त्तिसंयुक्तंवह्निनायोजितंचयत् दीपंगृहाणविप्रेन्द्रत्रैलोक्यतिमिरापहमित्य
नेनदीपम् ब्राह्मणेभ्योनमः दीपंसमर्पयामि नैवेद्यम्–अन्नंचतुर्विधंस्वादुरसैःषड्भि
समन्वितम् भक्ष्यभोज्यसमायुक्तंनैवेद्यंगृह्यतांविभो इत्यनेननैवेद्यम् ॥ ब्राह्मणेभ्योन
मः नैवेद्यंसमर्पयामि ताम्बूलम्-कर्पूरैलालवंगादिनागवल्लीदलान्वितम् पूगीफलसमा
युक्तंताम्बूलंप्रतिगृह्यतामित्यनेनताम्बूलम् ॥ ब्राह्मणेभ्योनमः ताम्बूलंसमर्पयामि
दक्षिणाः–हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः अनन्तपुण्यफलदमतः शान्तिप्रय
च्छमे इत्यनेनदक्षिणाम् ब्राह्मणेभ्योनमः दक्षिणांसमर्पयामि ॥ 'आरात्तिकम्'–च

न्द्रादित्यौचधरणीविद्युदग्निस्तथैवच त्वमेवसर्वज्योतींषिआरार्तिंप्रतिगृह्यतामित्यनेना
रार्त्तिकम् ब्राह्मणेभ्योनमः आरार्तिकंनिवेदयामि प्रदक्षिणाम्—यानिकानिचपापानिब्रह्म
हत्यासमानिच तानिसर्वाणिनश्यन्तुप्रदक्षिणपदेपदे इतिप्रदक्षिणाम् ब्राह्मणेभ्योनमः
प्रदक्षिणांनिवेदयामि ॥ ततःसर्वेषांप्रार्थनाः क्षमातपोदयादानंसत्यंशौचंचसंयमः वि
द्याविनयसंयुक्ताब्राह्मणालोकतारकाः यजनंयाजनंचैवाध्ययनाध्यापनंतथा दानप्र
तिग्रहोहोमः षट्कर्मनिरताः सदा त्रिकालसन्ध्याकरणेस्वाध्यायाचरणेतथा नाना
शास्त्राभ्यासरताःसंसारोच्छेदकारकाः भवद्दर्शनमात्रेणमुक्तास्तुभवबन्धनात् ॥ अग्नि
शुश्रूषणरताधर्ममार्गेदृढव्रताः परदारपरद्रव्यपरनिन्दाविवर्जिताः भवतांदर्शनेनैव
शुद्ध्यन्तिमलिनाजनाः भूमिदेवास्तुविप्रावै त्रिषुलोकेषुविश्रुताः अस्मिन्कर्मणिसर्वे
वैसहायाः सन्तुसर्वदा ब्राह्मणाः सन्तुमेशस्ताः पापात्पान्तुसमाहिताः वेदानांचैव

प्रति॰ दातारः पातारः सर्वदेहिनाम् जपयज्ञैस्तपोहोमैर्दानैश्चविविधैःपुनः देवानांपितॄणां सं॰
॥ २२ ॥ चैवतृप्त्यर्थंयाजकाःकृताः येषांदेहेस्थितावेदाः पावयन्तिजगत्त्रयम् रक्षन्तुसततंतेमां
जपयज्ञेव्यवस्थिताः ब्राह्मणाजंगमंतीर्थंत्रिषुलोकेषुविश्रुतम् येषांवाक्योदकेनैवशुद्धय
न्तिमलिनाजनाः पावनाः सर्ववर्णानांब्राह्मणाब्रह्मरूपिणः सर्वकर्मरतानित्यंवेदशास्त्रा
र्थकोविदाः श्रोत्रियाः सत्यवाचश्चदेवध्यानरताः सदा यद्वाक्यामृतसंसिक्ताऋ
द्धिंयान्तिनरद्रुमाः अंगीकुर्वन्तुकर्मैतत्कल्पद्रुमसमाशिषः यथोक्तनियमैर्युक्तामन्त्रा
र्थैस्थिरबुद्धयः यत्कृपालोचनात्सर्वाऋद्धयोवृद्धिमाप्नुयुः ममयज्ञेजपेपूज्याः सन्तुमे
नियमान्विताः अक्रोधनाः शौचपराः सततंब्रह्मचारिणः देवध्यानरतानित्यंप्रसन्नमन
सः सदा अदुष्टभाषिणः सन्तुमासन्तुपरनिन्दकाः ममापिनियमाह्येतेभवन्तुभवतामपि
इति प्रार्थयेत् इति आचार्यादिपूजनम् ॥ अथ ब्राह्मणवरणम् ततो यजमानोनिरुक्तब्रा ॥ २२ ॥

ह्मणानामेववैदिकंदैववरणंकुर्यात् तथाहि प्राङ्मुखोपवेशितानेवाचार्यादीन्स्वयमुदङ्मु
खोयजमानोवृतानांब्राह्मणानांवैदिकंदैववरणमहंकरिष्ये इति प्रतिज्ञासंङ्कल्पंकुर्यात्
तत्र दैविकवरणे परशुरामेण ब्रह्माणं पूर्ववृत्वाऽनन्तरमाचार्यादीनांवरणमुक्तम् तत्रपु
ष्पांजलिंगृहीत्वातत्रादौ ब्रह्मणोवरणम् ॐआवाहयाम्यहंदेवंब्रह्माणंकमलोद्भवम् ॥ कम
ण्डलुधरंहस्ते कुशपुस्तकधारिणम् ॥ वेदशास्त्रपुराणज्ञमागमोक्तिविदंयथा ॥ यजमान
स्ययज्ञेऽस्मिन् ब्रह्मात्वंरक्षकोभव ॥ ब्रह्माणंरक्तवर्णाभंरक्तवस्त्रैरलंकृतम् ॥ चतुर्भुजंचतुर्व
क्रंसस्रुवंस्रुचिहस्तकम् ॥ यथाचतुर्मुखोब्रह्मासर्ववेदधरोभुवि ॥ तथात्वंममयज्ञेऽस्मिन्ब्र
ह्माभवद्विजोत्तम ॥ इत्यादिश्लोकैर्ब्रह्ममूर्ध्न्यञ्जलिनापुष्पाणिविकिरन्नावाहयेत् एवमावा
ह्यसयवेनहस्ताग्रेणदक्षिणजानुमालभ्यवृणुयात् अमुकगोत्रोमुकप्रवरान्वितोमुकशर्मा
हंअमुकगोत्रममुकशर्माणंब्राह्मणममुकवेदान्तर्गतममुकशाखाध्यायिनमोभिश्चन्दनपु

षपालङ्कारयज्ञोपवीतवासोभिस्त्वामहंवृणे वृतोऽस्मीतिप्रतिवचनानन्तरमञ्जलिंबध्वाप्रा
र्थयेत् मर्माणित इतिमन्त्रेणब्राह्मणंप्रणमाम्यहम् ॐमर्म्माणितेवर्म्मणाच्छादयामिसो
मस्त्वाराजामृतेनानुवस्ताम् उरोर्वरीयोवरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु इतिम
न्त्रेणनमस्कृत्याशिवयागजपयज्ञेनाहंयक्ष्ये तत्रत्वंमेब्रह्माभवेत्यभिधाय ॐभवामीतिप्र
तिवचनम् ततःपूर्ववत्पुष्पांजलिंगृहीत्वा आचार्यवरणम् ॐआवाहयामिदेवेज्यमाचार्यंय
ज्ञकारिणम् पुराणन्यायमीमांसासर्वशास्त्रार्थपारगम् बृहस्पतिर्यथास्वर्गेज्ञानविज्ञानसंयु
तः॥तथैवममयज्ञेस्मिन्नाचार्यस्त्वंभवप्रभो इतिपठित्वा अञ्जलिनातन्मूर्धनिपुष्पाणिवि
किरन्नावाहयेत् एवमावाह्य सयवेनहस्ताग्रेणदक्षिणजानुमालभ्य वृणुयात् अमुकगोत्रो
मुकप्रवरोमुकशर्माहममुकगोत्रोत्पन्नममुकप्रवरममुकवेदान्तर्गतममुकशाखाध्यायिन
ममुकशर्माणंब्राह्मणंएभिश्चन्दनपुष्पाक्षतालङ्कारयज्ञोपवीतवस्त्रादिभिस्त्वामाचार्य्यंम

हंवृणेवृतोस्मीतिप्रतिवचनानन्तरं अञ्जलिंबध्वाप्रार्थयेत्॥बृहस्पतइतिमन्त्रेणाचार्यंप्रण
माम्यहम्ॐबृहस्पतेअतियदर्य्योंअर्हाद्युमद्विभातिक्रतुमज्जनेषु यद्दीदयच्छवसऽऋत
प्रजा ततदस्मासुद्रविणंधेहिचित्रम् शिवयागजपयज्ञेनाहंयक्ष्ये तत्रत्वंमेआचार्योभव
ॐभवामीतिप्रतिवचनम्॥अनन्तरंपुष्पाञ्जलिंगृहीत्वा ऋग्वेदीयब्राह्मणवरणम् ॐ आ
वाहयेऋषींस्तान्येपूर्वस्यां दिशिसंस्थिताः॥मार्कण्डेयोभरद्वाजः काश्यपेयस्तुनारदः॥
पुलस्त्यः पुलहश्चैवदत्तात्रेयश्चभार्गवः ॥ अस्ययज्ञस्यसिद्ध्यर्थमेतेऋग्वेदपाठकाः॥ऋ
ग्वेदंवपुषाश्वेतंशुभ्रवस्त्रैरलंकृतम् ॥ श्वेताभरणसंयुक्तंकाञ्चनेनविभूषितम् ॥ इतिपुष्पांज
लितन्मूर्धनिविकिरन्नावाहयेत् सयवेनदक्षिणहस्तेनदक्षिणजानुमालभ्यवृणुयात् अमुक
गोत्रोहमित्यादिपठित्वाअमुकगोत्रोत्पन्नमित्युच्चार्याभिर्वरणसामग्रीभिःऋग्वेदिनंत्वा
महंवृणेवृतोस्मीतिप्रतिवचनानन्तरम्प्रार्थयेत् ॐअग्निमीळेसुमन्त्रेणऋग्वेदंप्रणमाम्य

प्रति० हम् ॥ ॐ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजम् होतारंरत्नधातमम् इति नमस्कृत्य शि सं०
॥ २४ ॥ वादियागेनाहंयक्ष्ये अत्रत्वंमेऋग्वेदोभव ॐ भवामीति प्रतिवचनम् ततोयजमानः पु
ष्पाञ्जलिमादाययजुर्वेदीयब्राह्मणवरणम् आवाहयेऋषींस्तान्येदक्षिणांदिशमाश्रिताः॥
अगस्त्योव्यासवाल्मीकौगौतमोगर्गसंज्ञकः ॥ माण्डव्योन्योदधीचश्चगालवश्चतथाष्ट
मः॥ यजमानस्ययज्ञेस्मिन्नृषयोज्ञाननिर्मलाः॥ रत्नाभरणसंयुक्तंरत्नकुण्डलशोभितम्॥
रक्तवस्त्रधरंदेवंयजुरावाहयाम्यहमित्यञ्जलिनापुष्पाणितन्मूर्द्धनिविकिरन्नावाहयेत्सयवे
नदक्षिणहस्ताग्रेणदक्षिणजानुमालभ्यवृणुयात् अमुकगोत्रोत्पन्नमित्युच्चार्याभिर्वरणसा
सामग्रीभिस्त्वामहंयजुर्वेदिनंयजुर्वेदप्रतिनिधित्वेनवृणेवृतोऽस्मीतिप्रतिवचनं अञ्जलिं
बध्वाप्रार्थयेत् इषेत्त्वेतिमन्त्रेणयजुर्वेदंनमाम्यहम् ॐ इषेत्त्वोर्ज्जेत्वाव्वायवस्थदेवोवःसवि ॥ २५ ॥
ताप्रार्प्पयतु ऽश्रेष्ठतमायकर्म्मणऽआप्यायद्ध्वमघ्न्याइन्द्रायभागम्प्रजावतीरनमी

वाऽअयक्ष्मामावस्तेनऽईशतमाघशꣳसोध्रुवाऽअस्मिन्गोपतौस्यातबह्वीर्यजमानस्य
पशून्पाहि इत्यनेननमस्कृत्यशिवादियागेनाहंयक्ष्ये तत्रत्वंमेयजुर्वेदोभव ॐभवा
मीति प्रतिवचनम् ततोयजमानः पुष्पाञ्जलिंगृहीत्वा सामवेदीयब्राह्मणवरणम् आवा
हयामिऋषींस्तान्येपश्चिमांदिशमाश्रिताः वसिष्ठश्चैवदुर्वासाजमदग्निः पराशरः विश्वा
मित्रऋषिशृङ्गआत्रेयोप्यत्रिरष्टमः यजमानस्ययज्ञेऽस्मिन्सामगायेसमुद्यताः साम
वेदंश्यामवर्णंश्यामवस्त्रैरलंकृतम् गीतध्वनिसमायुक्तंवीणाहस्तंविचिन्तयेत् ममयज्ञ
स्यरक्षार्थंसाममावाहयाम्यहमित्यञ्जलिनातन्मूर्द्धनिपुष्पाणिविकिरन्नावाहयेत् सय
वेनहस्ताग्रेणदक्षिणजानुमालभ्यवृणुयात् अमुकगोत्रोऽमुकप्रवरोऽमुकवेदान्तर्गतामु
कशाखाध्याय्यमुकशर्माहममुकगोत्रोत्पन्नममुकप्रवरममुकवेदान्तर्गतामुकशाखाध्या
यिनमेभिर्दास्यमानवरणद्रव्यैः सामवेदिप्रतिनिधित्वेनसामवेदिनंत्वामहंवृणे वृतोस्मी

५

16

तिप्रतिवचनानन्तरंप्रार्थयेत् अग्नऽआयाहिमन्त्रेणसामवेदंनमाम्यहम् ॐअग्नऽआया
हिवीतयेगृणानोहव्यदातये निहोतासत्सिबर्हिषि इतिनमस्कृत्य शिवादियागेनाहंय
क्ष्ये तत्रत्वंमेसामवेदोभव ॐअहंभवामीतिप्रतिवचनम् ततो यजमानः पुष्पाञ्जलिंगृही
त्वा अथर्वणवेदीयब्राह्मणवरणम् ॐआवाहयेऋषींस्तान्येउत्तरस्यांदिशमाश्रिताः ॥
ऋतुर्दक्षोमरीचिश्चयाज्ञवल्क्योमहातपाः शौनकोयस्तुजीमूतोवामदेवस्तथांगिराः॥यज
मानस्ययज्ञेस्मिन्नथर्वशिरसासह॥अथर्ववेदंकृष्णाभंवेष्टितनीलवाससा ।नीलाक्रान्तंमहा
रौद्रंचिन्तयेऽच्युतमानसम् ॥ कराग्रेविशिखांधृत्वादुष्प्रेक्षशिखिरंधनुः । अतिरौद्रंततो
ध्यात्वारौद्रंचततपरोध्रुवम् ॥इत्यादिमन्त्रैश्चाञ्जलिनापुष्पाणिविकिरन्नावाहयेत् सयवेन
हस्ताग्रेणदक्षिणजानुमालभ्यवृणुयात् तथाहि अमुकगोत्रोऽमुकप्रवरोऽमुकवेदान्तर्गता ॥ २५ ॥
मुकशाखाध्याय्यहममुकगोत्रोत्पन्नममुकवेदान्तर्गतममुकशाखाध्यायिनममुकश

र्माणं ब्राह्मणमेभिश्चन्दनपुष्पाक्षतालङ्कारवासोभिस्त्वामहंवृणे वृतोऽस्मीति प्रतिवचना नन्तरंप्रार्थयेत् शन्नोदेवीतिमन्त्रेणाथर्ववेदंनमाम्यहम् ॐशन्नोदेवीरभिष्टयआपो भवन्तुपीतये शंयोरभिस्रवन्तुन इत्यनेननमस्कृत्यशिवादियागेनाहंयक्ष्ये तत्रत्वंमेऽ थर्ववेदोभव भवामीतिप्रतिवचनम् उक्तप्रकारेणजापकादीन्[1]वृणुयात् जपिनंशिवनामा नमृत्विजंत्वामहंवृणे शिवादियागेनाहं यक्ष्ये तत्रत्वंमेजापकोभव भवामीतिप्रतिवच नम् वरुणश्राद्धंततोवरुणश्राद्धार्थंनानानामगोत्रान्नानाप्रवरान्नानाशाखाध्यायिनोनाना शर्मणोब्राह्मणान्[2]शिवादियागाङ्गभूतवरुणश्राद्धेयुष्मानहंवृणे वृताः स्म इतिप्रतिवचनम्

---

१ उक्तंचपरशुरामेण एवंयस्यचयद्गोत्रंयथावत्प्रवरान्वितम्। यद्वेदाध्यायिनंविप्रंयच्छाखाध्यायिनंपुनः॥ २ तदुक्तंपरशुरामेण गुर्वादिभ्यः समस्तेभ्यऋत्विग्भ्यारिदमासनम्। गन्धपुष्पंचधुपंचवरुणश्राद्धेप्रकल्पयेत्॥

संकल्पः अद्येत्यादिव्रतानांब्राह्मणानामासनाद्यर्चनमहंकरिष्येइतिसङ्कल्प्य ॥ वरुणश्रा
द्धेवरुणरूपेभ्योब्राह्मणेभ्य इमानिआसनपाद्यार्घ्याचमनगन्धपुष्पधूपदीपनैवेद्ययज्ञोप
वीतवस्त्रालङ्कारादीनिब्राह्मणेभ्योनमइतिदद्यात् प्राजापत्यान्युपवीतानिबार्हस्पत्यानि
वस्त्राणिअग्निदेवताकानिसुवर्णनिर्मितानिकुण्डलाद्यलंकारादीनि ताम्बूलादीनिमधुपर्क
पात्रादीनिवरुणरूपेभ्यः समस्तब्राह्मणेभ्यः स्वाहासम्पद्यताम् इति वरुणश्राद्धम् तत
आचमनम् ततोवरुणपूजनम् वरुणश्राद्धादिविधेः परिपूर्णतांप्रार्थयेत् प्रमादादिति
पठेत् इतिविप्रवरणंपूजनंच ॥ अथयजमानंहस्तेरक्षाबन्धनपूर्वककङ्कणबन्धनंच ॐग
णाधिपंनमस्कृत्यनमस्कृत्यपितामहम् । विष्णुंरुद्रंश्रियंदेवींवन्दे भक्त्यासरस्वतीम् ॥

---

१ भविष्योत्तरपुराणे–दूर्वायवाङ्कुराश्चैववालकंनूतनपल्लवाः।हरिद्राद्वयसिद्धार्थः शिखिपक्षोरगत्वचः॥कंकणौषधयश्चैताः कौतुका ख्या-
नवस्मृताः॥अथवा–यवाङ्कुरांस्तथादूर्वाःसर्षपान्गन्धसंयुतान्।गोमयंदधिसंयुक्तंकारयेत्ताम्रभाजने।तद्भाजनंकरपुटेधृत्वा मंत्रान्पठेत्ततः ।

स्थानाधिपंनमस्कृत्यदिननाथंनिशाकरम् । धरणीगर्भसम्भूतंशशिपुत्रंबृहस्पतिम् ॥ दै
त्याचार्य्यंनमस्कृत्यसूर्यपुत्रंमहाग्रहम् ।राहुंकेतुंनमस्कृत्ययज्ञारम्भेविशेषतः॥शक्राद्या
देवताःसर्वामुनींश्चकथयाम्यहम् । गर्गंमुनिंनमस्कृत्यनारदंमुनिसत्तमम् ॥ वशिष्ठंमुनि
शार्दूलंविश्वामित्रंमहामुनिम् । व्यासंकविंनमस्कृत्यसर्वशास्त्रविशारदम् ॥ सर्वेनमस्कृ
तास्तेमेयज्ञंरक्षन्तुसर्वदा । पूर्वेरक्षतुगोविन्दआग्नेय्यांगरुडध्वजः ॥ याम्येरक्षतु वाराहो
नारसिंहस्तुनैर्ऋते केशवोवारुणींरक्षेद्वायव्यांमधुसूदनः उत्तरेश्रीधरोरक्षेदीशाने
चगदाधरः॥ऊर्द्ध्वंगोवर्द्धनोरक्षेदधस्तात्तुत्रिविक्रमः।एवंदशदिशोरक्षेद्वासुदेवोजनार्दनः ॥
यज्ञाग्रेपातुमांशंखः पृष्ठेपद्मन्तुरक्षतु॥वामपार्श्वेगदारक्षेद्दक्षिणेचसुदर्शनः । उपेन्द्रः पा
तुब्रह्माणमाचार्यंपातुवामनः । अच्युतः पातुऋग्वेदंयजुर्वेदमधोक्षजः ॥ कृष्णोरक्षतुसा
मारूयमथर्वाणंतुमाधवः॥ विप्रायेचोपदेष्टारस्तांश्चदामोदरोऽवतु । वेदमन्त्रैश्चकर्त्तव्यार

क्षाशुभ्रैश्चसर्षपैः ॥ रक्षोहणादिभिर्मन्त्रैःसूक्तंरक्षोहणंपठेत् ॥ ॐ रुक्षोहणंम्वलगुहंनम्वैष्ण
वीमिदमुहन्तम्वंलुगमुत्त्किरामि यम्मेनिष्ट्योयमुमात्त्योनिचुखानेदमुहन्तं वंलुगमु
त्त्किरामि यम्मैसमानोयमसंमानोनिचुखानेदमुहन्तम्वंलुगमुत्त्किरामि यम्मेसवंधु
र्य्यमसंबन्धुर्न्निचुखानेदमुहन्तम्वंलुगमुत्त्किरामि यम्मैसज्जातोयमसंजातोनिचुखानो
त्कृत्त्याङ्किरामि १ स्वराडसिसपत्नहासत्रराडस्यभिमातिहाजनराडसिरक्षोहासर्वं
राडस्यमित्रहा २ रक्षोहणोव्वलगहनःप्प्रोक्षामिवैष्णवान्रक्षोहणोवोवलगहनोऽवनयामि
वैष्णवान्रक्षोहणोवोवलगहनोवस्तृणामि वैष्णवान्रक्षोहणौवाम्वलगहनाउपदधामिवै
ष्णवीरक्षोहणौवाम्वलगहनौपर्य्यूहामिवैष्णवींवैष्णवमासिवैष्णवास्त्थ ३ नतद्रक्षांसि
सिनपिशाचास्तरन्तिदेवानामोजःप्रथमजꣳ ह्येतत् योबिभर्त्तिदाक्षायणꣳ हिरण्य
ꣳ सदेवेषुकृणुतेदीर्घमायुःसमनुष्येषुकृणुतेदीर्घमायुः ४ रक्षोहाविश्वचर्षणिरभियोनि

मयोहते द्रोणासधस्थमासदत् ५ एवंदिग्बन्धनपूर्वकयजमानहस्तेरक्षां[1]बन्धनंकुर्यात् ॐयदाबध्नन्दाक्षायणाहिरण्यꣳशतानीकायसुमनस्यमानाः तन्मआबध्नामिशतशारदायायुष्माञ्जरदष्टिर्य्यथासम् १ येनबद्धोबलीराजादानवेन्द्रोमहाबलः तेनत्वांप्रतिबध्नामिरक्षेमाचलमाचल २ इत्यनेनमन्त्रेणयजमानंदक्षिणहस्तेकङ्कणबन्धनम् स्त्रियस्तु वामहस्तेरक्षाबन्धनंकर्त्तव्यम् रक्षाबन्धनंकृत्वा मातृदेवोभवपितृदेवोभवआचार्य्यदेवोभवअतिथिदेवोभवसत्याएताआशिषः सन्त्वितिविप्राआशीर्वादंदद्युः इति रक्षाबन्धनपूर्वककङ्कणबन्धनं च ॥ अथ घटस्थापनपूर्वकं पुण्याहवाचनम् तत्रादौघट

१ केचित्तुआचार्यादिवरणात्पूर्वमेवरक्षाबन्धनंकुर्वन्ति तत्र यथादेशाचारः तथा कर्तव्यमिति विवेकः। परशुरामः-कृत्वैवं वरणं पूर्वं वाच्यं पुण्याहवाचनम् अध्वर्युरुदकुंभंतं प्राक्स्थापितफलान्वितम् सामवेदी समुत्थाय प्रेषवत्प्रैषमुच्चरेत् प्राक्स्थापितामित्यस्य गणेशपूजनावसरे स्थापितमित्यर्थः तं कलशमादाय पुण्याहवाचनं कर्त्तव्यम् अथवा पुण्याहवाचनादौ कलशं यथाविधि स्थाप्यपुण्याहवाचनं कुर्यादिति विवेकः।

प्रति० स्थापनम् ॥ भूरसीतिभूमिस्पर्शः । ॐभूरसिभूमिरस्यदितिरसिविश्वधायाविश्वं सं०
॥ २८ ॥ स्यभुवनस्यधर्त्री पृथिवीय्यच्छपृथिवीन्दृꣳहपृथिवीम्माहिꣳसीः ॥ १२ ॥ १८ ॥
धान्यमसीतिधान्यम् । धान्यमसि धिनुहिदेवान्प्राणायत्त्वोदानायत्वाव्यानायत्त्वा दी
र्घामनुप्प्रसितिमायुषेधान्देवोवः सविताहिरण्यपाणिः प्प्रतिगृब्भ्णात्वच्छिद्रेणपाणि
नाचक्षुषेत्वामहीनाम्पयोसि ॥ १ ॥ २० ॥ आजिघ्रकलशमितितस्योपरिकलशस्थाप
नम् ॥ ॐआजिघ्रकलशम्मह्यात्वाविशन्त्विन्दवः पुनरूर्जानिवर्त्तस्वसानः सह
स्रन्धुक्ष्वोरुधारापयस्वतीः ॥ ८ ॥ ४३ ॥ वरुणस्येत्युदकप्रक्षेपणम् । वरुणस्योत्तम्भन
मसिवरुणस्यस्कम्भसर्ज्जनीस्थोवरुणस्यऽऋतसदन्न्यसिवरुणस्यऽऋतसदनमसिऽव
रुणस्यऽऋतसदनमासीद ॥ ४ ॥ ३६ ॥ वसोःपवित्रमितिवस्त्रंकण्ठेवेष्टयेत् । ॐवसोःपवित्र
मसिशतधारंवसोः पवित्रमसिसहस्रधारम् देवस्त्वासवितापुनातुवसोः पवित्रेणशत ॥ २८ ॥

धांरेणसुप्वाकामंधुक्षः ॥१॥३॥ याःफलिनीरितिपूगीफलप्रक्षेपः।ॐयाःफलिनीर्याऽअं
फलाऽअंपुष्पायाश्चपुष्पिणीः॥ बृहस्पतिप्प्रसूतास्तानोमुञ्चन्त्वठंहसः ॥ १२ ॥९९॥
परिवाजेतिमन्त्रेणकलशेपंचरत्नानिनिक्षिपेत् परिवाजंपतिःकविरग्निर्हव्यान्न्यक्रमी
त् दधद्रत्नानिदाशुषे ॥ ११ ॥ २५॥ हिरण्यगर्भइतिद्रव्यंक्षिपेत्। ॐहिरण्यगर्भः
समवर्त्तताग्रेभूतस्यजातः पतिरेकऽआसीत् सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवा
यहविषाविधेम ॥ १३ ॥ ४ ॥ गन्धद्वारामितिगन्धंप्राक्षिपेत्--ॐगन्धद्वारान्दुराधुर्षां
नित्यपुष्टांकरीषिणीम् ईश्वरींसर्वभूतानान्तामिहोपह्वयेश्रियम् युञ्जन्तीत्यनेनवाग
न्धम्।युञ्जन्तिब्रध्नमरुषञ्चरन्तम्परितस्थुषः रोचन्तेरोचनादिवि याओषधीरितिसर्वौष
धीः प्रक्षिपेत्। याऽओषधीःपूर्वाजातादेवेभ्यस्त्रियुगम्पुरा मनैनुबभ्रूणामहठंशतन्धा

१ कनकं १ कुलिशं २ नीलं ३ पद्मरागं च ४ मौक्तिकं ५ एतानि पंचरत्नानि।

मानिसुप्तचं ॥ १२ ॥ ७५ ॥ स्योनापृथिवीतिमंत्रेणसप्तमृदः—ॐस्योनापृथिविनोभवानृ
क्षुरानिवेशनी यच्छानुः शर्म्मसुप्प्रथाः ॥ ३६॥१३॥ काण्डादितिदूर्वाप्रक्षेपः।ॐकाण्डा
त्काण्डात्प्ररोहन्तीपरुषः परुषस्परि एवानोदूर्वेप्प्रतनुसहस्रेणशतेनच ॥ १३॥ २० ॥
अश्वत्थेतिमन्त्रेणकलशमुखेस्थापयेत् अश्वत्थेवोनिषदनम्पर्णेवोवसतिष्कृता॥गोभा
जऽइत्किलासथयत्सनवथपूरुषम् ॥ १२॥ ७९ ॥ पवित्रेस्थइतिमन्त्रेणपवित्राणिक्षिपेत्
ॐपवित्रेस्थोवैष्णव्योसवितुर्वः प्प्रसवऽउत्पुनाम्म्यच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मि
भिः देवीरापोऽअग्ग्रेगुवोऽ अग्ग्रेपुवोऽअग्रऽइममद्ययज्ञन्नयताग्ग्रेयज्ञपतिर्ठसुधातुंयज्ञ
पतिन्देवयुवम् ॥१॥१२॥ पूर्णादर्वीतिमंत्रेण तंडुलपूरितपात्रंकलशोपरिस्थापयेत् ॐपू

१ ततोऽस्मिन्कलशे—अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात् राजद्वाराद्गोकुलाच्चमृदमानीयनिक्षिपेत्। २ चूताश्वत्थ
न्यग्रोधोदुम्बरप्लक्षइतिपञ्चपल्लवान्।

र्णांदंर्विंपरांपतसुपूर्णांपुनरापंत वस्नेववि क्रीणावहाऽइषमूर्ज्जंठंशतक्रतो ॥ ३ ॥ ४९ ॥
श्रीश्चतइतिमन्त्रेणनालिकेरफलनिधानम् । ॐ श्रीश्चंतेलक्ष्मीश्चपत्न्यांवहोरात्रेपा
र्श्वेनक्षत्राणिरूपमश्विनौव्यात्तंम् इष्णन्निषाणामुम्मंऽइषाणसर्वलोकम्मंऽइषाण ॥
॥ ३१ ॥ २२ ॥ मनोजूतीतिमन्त्रेणप्रतिष्ठा । ॐमनोजूतिर्ज्जुषतामाज्ज्यं
स्यबृहस्पतिर्य्यज्ञमिमन्तंनोत्त्वरिष्टंयज्ञठंसमिमंदधातु विश्वेदेवासंऽइहमादयन्ता
मो ३ प्रतिष्ठेत्यनेनमंत्रेणकलशंप्रतिष्ठाप्य ॐ भूर्भुवस्वः गणेशवरुणइहागच्छ
इहतिष्ठ गणानान्त्वेतिमन्त्रेणगणपतिम् तत्त्वायामीतिमन्त्रेणवरुणम् कलशे
आवाह्यपूजयेत् ॐ गणानांन्त्वागणपतिठंहवामहे प्प्रियाणान्त्वाप्प्रियपतिं
ठंहवामहे निधीनान्त्वांनिधिपतिंठंहवामहे वसोमम आहमजानिगर्ब्भधमात्वम
जासिगर्ब्भधम् ॥ २३ ॥ १८ ॥ तत्त्वायामिब्ब्रह्मणावन्दमानास्तदाशास्ते

यजमानोहविर्भिः अहेडमानोवरुणेहबोध्युरुशंशꣳसमानऽआयुःप्रमोषीः ॥ २१ ॥
॥ २ ॥ षोडशोपचारैर्गणेशवरुणंपूजयेत् ॥ ततःकलशेगङ्गाद्यावाहनम् ॥ सर्वेसमु
द्राः सरितस्तीर्थानिजलदानदाः ॥ आयान्तुयजमानस्यदुरितक्षयकारकाः ॥ का
शीकुशस्थलीमायाऽवन्त्ययोध्यामधोःपुरी ॥ शालग्रामंसगोकर्णंनर्मदाचसरस्वती॥ती
र्थान्येतानिकुम्भेस्मिन्प्रविशन्तुब्रह्मशासनात् ॥ ऊषारूढासरोजाक्षीपद्महस्ताशशिप्रभा
आगच्छतुसरिज्ज्येष्ठागङ्गापापप्रणाशनी ॥ नीलोत्पलदलश्यामापद्महस्ताम्बुजेक्षणा
आयातुयमुनादेवीकूर्मयानस्थितासदा ॥ प्राचीसरस्वतीपुण्यापयोष्णीगौतमीतथा॥ च
र्म्मिलाचन्द्रभागाचसरयूर्गण्डकीतथा जम्बुकाचशतद्रुश्चकालिकासुप्रभातथा वितस्ता
चविपाशाचनर्मदाचपुनःपुनः गोदावरीमहावर्त्ताशर्करावर्त्तमार्ज्जुनी कावेरीकौशिकीचैव
तृतीयाचमहानदी विटङ्काप्रतिकूलाचसोमनन्दाचविश्रुता करतोयावेत्रवतीरेणुकावेणु

काचया आत्रेयगङ्गावैतर्णीकाश्मीरीह्लादिनीचया पावनीचशवत्रासाकल्मषाशंसिनीत
थावसिष्ठाचअपाय्याचसिन्धुवत्यारुणीतथा ताम्राचैवत्रिसन्ध्याचतथामन्दाकिनीपरा
तैलकाशीचपाराचदुन्दुभीनकुलीतथा नीलगन्धाचबोधाचपूर्णचन्द्राशशिप्रभा अमरे
शंप्रभासंचनैमिषंपुष्करंतथा आषाढिडिण्डिभारत्नंभारभूतंचलाकुलम् हरिश्चन्द्रंपरं
गुह्यंगुह्यंमध्यमकेश्वरम् श्रीपर्वतंसमाख्यातंजलेश्वरमतःपरम् आम्रातकेश्वरंचैवमहा
कालंतथैवच केदारमुत्तमंगुह्यंमहाभैरवमेवच गयांचैवकुरुक्षेत्रंगुह्यंकनखलंतथा विम
लंचन्द्रभासंचमाहेन्द्रंभीममष्टकम् वस्त्रापदंरुद्रकोटिमविमुक्तंमहालयम् गोकर्णभद्र
कर्णचहेमांशंस्थानमष्टमम् छागलाहंविरंचंवैककर्कोटंमण्डलेश्वरम् कालञ्जरवनंचैवदेव
दारुवनंतथाशङ्कुकर्णंतथैवहस्थलेश्वरमतःपरम् एतानद्यश्चतीर्थानिगुह्यक्षेत्राणिसर्वशः
तानिसर्वाणिकुम्भेस्मिन्नविशन्तुब्रह्मशासनात् इत्यादिरीत्याकलशेतीर्थान्यावाह्यकल

शाभिमन्त्रणंकुर्यात् कलशस्यमुखेविष्णुःकण्ठे रुद्रःसमाश्रितः मूलेतस्यस्थितोब्रह्मामध्येमातृगणाःस्मृताः कुक्षौतुसागराःसप्तसप्तद्वीपावसुन्धरा ऋग्वेदोऽथयजुर्वेदःसामवेदोह्यथर्वणः अंगैश्चसहिताःसर्वेंकलशंतुसमाश्रिताःततःकलशप्रार्थना देवदानवसंवादेमथ्यमानेमहोदधौउत्पन्नोसियदाकुम्भविधृतोविष्णुनास्वयम् त्वत्तःसर्वाणितीर्थानिदेवाःसर्वेत्वयिस्थिताः त्वयितिष्ठन्तिभूतानित्वयिप्राणाःप्रतिष्ठिताःशिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः आदित्यावसवोरुद्राविश्वेदेवाःसपैतृकाःत्वयितिष्ठन्तिसर्वेंपियतःकामफलप्रदाः त्वत्प्रसादादिमंयज्ञंकर्त्तुमीहेजलोद्भव सान्निध्यंकुरुमेदेवप्रसन्नोभवसर्वदा एवंघटस्थापनंकृत्वापुण्याहवाचनंकुर्यात् ॥ अथपुण्याहवाचनम्—ततोऽवनिकृतजानुमण्डलः

१ तत्रवेदव्यासः-सम्पूज्यगन्धमाल्याद्यैर्ब्राह्मणान्स्वस्तिवाचयेत् धर्म्मकर्म्मणिमांगल्येसंग्रामेऽद्भुतदर्शने पुण्याहवाचनंदैवेब्राह्मणस्यविधीयते ॐकारपूर्वंविप्रस्यभवेत्पुण्याहवाचनम् एतदेवनिरोंकारंकुर्यात्क्षत्रियवैश्ययोः उपांशुचतथावैश्येस्वस्तिशूद्रेचकारयेत् ।

कमलमुकुलसदृशमञ्जलिं शिरस्याधाय दक्षिणेनपाणिनासुवर्णपूर्णकलशंधारयित्वा
(अंगानिस्पृशेत् शिरसिमेसौभाग्यमस्तु मस्तकेश्रीकान्तिरस्तु चक्षुषोः सुतेजोऽस्तु
श्रोत्रयोर्मेश्रवणेन्द्रियशक्तिरस्तुबाह्वोर्मेबलमस्तु इत्यादिरीत्यांगानिस्पृशन्कलशंपृथि
व्यामेवस्थापयेत्) दीर्घानागानद्योगिरयस्त्रीणिविष्णुपदानिच तेनायुःप्रमाणेनपुण्यंपु
ण्याहंदीर्घमायुरस्तु अपांमध्येस्थितादेवाःसर्वमप्सुप्रतिष्ठितम् ब्राह्मणानांकरेन्यस्ताः
शिवाआपोभवन्तुनः शिवाआपःसन्तु लक्ष्मीर्वसतिपुष्पेषुलक्ष्मीर्वसतिपुष्करे सामेवसतु
वैनित्यंसौमनस्यंतथास्तुनः सौमनस्यमस्तु अक्षतंचास्तुमेपुण्यंदीर्घमायुर्यशोबलम्
यद्यच्छ्रेयस्करंलोकेतत्तदस्तुसदामम अक्षतंचारिष्टंचास्तु गन्धाःपान्तुसुमांगल्यमस्तु
पुष्पाणिपान्तु सौश्रियमस्तु अक्षताःपान्तु आयुष्यमस्तु ताम्बूलानिपान्तु ऐश्वर्यमस्तु
दक्षिणाःपान्तु आरोग्यमस्तु बहुधेयंचास्तु दीर्घमायुःशान्तिः पुष्टिस्तुष्टिः श्रीर्यशोविद्या

॥ ३२ ॥ विनयोवित्तंबहुपुत्रंबहुधनंचायुष्यंचास्तु यंकृत्वासर्ववेदयज्ञक्रियाकरणकर्मारम्भाःशु
भाःशोभनाः प्रवर्तन्तेतमहमोंकारमादिंकृत्वाऋग्यजुःसामाथर्वाशीर्षबहुऋषिसंमतंसम
नुज्ञातं भवद्भिरनुज्ञातः पुण्यंपुण्याहंवाचायिष्ये वाच्यताम्(माविघ्नंमाचमेपापंमासन्तुप
रिपन्थिनः सौम्याभवन्तुसुखिनः सर्वेलोकाःसुखावहा इतिकर्त्तावदेत् विप्रास्तथास्त्वि
त्युक्त्वा करोतुस्वस्तितेब्रह्मास्वस्तिवापिहिजातयः सरीसृपाश्चयेश्रेष्ठास्तेभ्यस्तेस्वस्तिस
र्वदा ययातिर्नहुषश्चैवधुन्धुमारोभगीरथः तुभ्यंराजर्षयः सर्वेस्वस्तिकुर्वन्तुनित्यशः स्व
स्तितेस्तुद्विपादेभ्यश्चतुष्पादेभ्यएवच स्वस्त्यस्त्वपादकेभ्यश्च सर्वेभ्यःस्वस्तिसर्वदा
स्वाहास्वधाशचीचैव स्वस्तिकुर्वन्तुतेसदा लक्ष्मीररुन्धतीचैवकुरुतांस्वस्तितेनघ असि
तोदेवलश्चैव विश्वामित्रस्तथांगिराः स्वस्तितेद्यप्रयच्छन्तुकार्त्तिकेयश्चषण्मुखः विवस्वा ॥ ३२ ॥
न्भगवान्स्वस्तिकरोतुतवसर्वदा दिग्गजाश्चैवचत्वारः क्षितिश्चगगनंग्रहाः अधस्ताद्धरणीं

योसौनागोधारयतेसदा शेषश्चपन्नगश्रेष्ठःस्वस्तितुभ्यंप्रयच्छतु) अथयजुः-भुद्रंकर्णेभिः
शृणुयाम देवाभुद्रंपंश्येमाक्षभिर्यजत्राः स्थिरैरंगस्तुष्टुवाꣳसंस्तनुभिर्व्यशेमहिदेवहितंय
दायुः ॥ २५ ॥ २१ ॥ अथ ऋक् ॥ द्रविणोदाद्रविणसस्तुरस्यद्रविणोदाःसनरस्यप्रि
यंसत् द्रविणोदावीरवतीमिशंन्नोद्रविणोदारासतेदीर्घमायुः ॥ अथ यजुः ॥ द्रविणो
दाःपिपीषति जुहोतुप्प्रचतिष्ठत नेष्ट्राद्दतुभिरिष्यत ॥ २६ ॥ २१ ॥ अथ साम॥ देवो
वोद्रविणोदाः पूर्णाविविष्टासिचमऊर्ध्वा १ सिंचा २ ध्वमुपवाप्रएध्वम् आदिद्वोदे २
वग्न्योहतेऽइहा २३ भा ३४३ ओ २३४ ॥ इडा ३ न्निधियतिन्नोऽअग्निः त्वष्टाविष्णुः
प्रजायांसरराणोयजमानायद्रविणन्दधातु ॥ अथऋक् ॥ सवितापश्चात्तात्सवि
तापुरस्तात्सवितोत्तरात्तात्सविताधुरात्तात् ॥ सवितानः सुवतु सर्वतातिंसविता
नोरासतांदीर्घमायुः ॥ अथयजुः ॥ सवितात्वासवानाꣳसुवतामग्निर्गृहपतीनां

थ्ठ॒ंसोमो॒वनु॒स्प्पतीनाम् ॥ बृह॒स्पति॒र्वा॒चऽइन्द्रो॒ज्ज्यैष्ठ्यो॒रुद्रः॑प॒शु॒भ्यो॒मि॒त्रः॑स॒त्यो॒वरु॑
णो॒धर्म्म॑पतीनाम् ॥ ९ ॥ ३८ ॥ ८॥ अथ साम ॥ उंद्वाउच्छणाउता २३४ याइतिष्ठादेवो
नसविताऊर्ध्वोवा २३२ जात्योसवितापादंजिभिः २ वाद्याद्धि २ विंविद्धयामा २३
हा ३४ इड २३४ पद्रडा ॥ ३ ॥ अथाथर्वण ॥ येनदेवंसवितारम्परिदेवाऽअधारयन् ते
नेमम्ब्रह्मणस्पतेपरिराष्ट्रावधत्तमम् ॥ ४ ॥ अथऋक् ॥ नवोनवोभवतिजायमानोह्नांकें
तुरुषसामेत्यग्रम् भागन्देवेभ्योविदधात्यायन्प्रचन्द्रमास्तिरतेदीर्घमायुः ॥ १ ॥
'अथ यजुः' नतद्रक्षाथ्ठ॒ंसिनपिशाचास्तरन्तिदेवानामोजः प्रथमजथ्ठ॒ंह्येतत् ॥ योबिभ
र्त्तिदाक्षायणथ्ठ॒ं हिरण्यथ्ठ॒ं सदेवेषुकृणुतेदीर्घमायुःसमनुष्येषुकृणुतेदीर्घमायुः ॥
॥ ३४ ॥ ४१ ॥ ५ ॥ अथसाम ॥ चन्द्रमाआअवाप्सुवांतराअवासुपर्णोधाअवावतेदिवि
नवोहिराउवारायनोइमायाउवा पदंम्बिदाउवातिविद्युताः वितंमाआउवास्यारो

दा २३ सा ३४३ आ २३४५ इडा ॥३॥ 'अथर्वणः' नमोनमोभवतिजायमानोह्नांकेतु

रुषसामेत्यग्रम् भागंदेवेभ्योविदधात्यायन्प्रचंद्रमास्थिरतेदीर्घमायुः ॥ ४ ॥ अथऋक्

उच्चादिविदक्षिणावन्तोऽअस्थुर्य्येऽअश्वदाःसहते सूर्य्येण ॥ हिरण्यदाऽअमृतत्वम्भज

न्तेवासोदाः सोमप्प्रतिरन्तऽआयुः ॥ १ ॥ अथयजुः ॥ उच्चातेजातमन्धसोदिविसद्भू

म्यादद ॥ उग्रंशर्म्ममहिश्रवः ॥ २ ॥ २६ ॥ १५ ॥ अथसाम ॥ उच्चाता ३३ जातम

न्धसादिवा ३ मा १ द्भू २ मिपा २३ ददा ३ उग्रंशर्मामहा २३३ श्रवा ३ स्तौषे

२३४॥ ३ ॥ अथ अथर्वण ॥ उच्चैर्घोषोदुन्दुभिःसत्वनायन्वानस्पत्यः सम्भृतअस्त्रिया

भिः॥वाचंक्षुणवानोदमयत्स्वपत्नोत्सिंहइवज्येष्टांनभिरुतस्तविहि ॥४॥ इत्येताऋचःपु

ण्याहेब्राह्मणाब्रूयुः ॥ ब्राह्मणानांप्रार्थना ॥ व्रतनियमतपःस्वाध्यायक्रतुदमदानविशिष्टा

नांसर्वेषांब्राह्मणानांमनःसमाधीयतांसमाहितमनसःस्मः प्रसीदन्तुभवन्तः ॥ प्रसन्ना

स्मः ॥ अथपूर्वस्थापितघटात्ताम्रपात्रेजलमादाय यजमानमूर्द्धनिदूर्व्वयासेचनंकुर्या
त्॥सेचनम्–शान्तिरस्तु ॥ पुष्टिरस्तु ॥ तुष्टिरस्तु॥ वृद्धिरस्तु॥ऋद्धिरस्तु॥अविघ्नमस्तु॥
आयुष्यमस्तु ॥ आरोग्यमस्तु ॥ शिवमस्तु ॥ शिवंकर्मास्तु ॥ कर्म्मसमृद्धिरस्तु ॥
धर्म्मसमृद्धिरस्तु ॥ वेदसमृद्धिरस्तु ॥ शास्त्रसमृद्धिरस्तु ॥ पुत्रपौत्रसमृद्धिरस्तु ॥ धन
धान्यसमृद्धिरस्तु ॥ इष्टसम्पदस्तु ॥ 'ततोबहिर्निक्षिपेत्' ॥ अरिष्टनिरसनमस्तु ॥ य
त्पापंरोगमशुभमकल्याणं तद्दूरेप्रतिहतमस्तु ॥ततःपुनरेवयजमानमूर्द्धनिसेचनम्॥यद्य
च्छ्रेयस्तत्तदस्तु ॥ उत्तरेकर्मण्यविघ्नमस्तु ॥ उत्तरोत्तरमहरहरभिवृद्धिरस्तु ॥ उत्तरो
त्तराः क्रियाः शुभाः शोभनाः सम्पद्यन्ताम् ॥ तिथिकरणमुहूर्त्तनक्षत्रग्रहलग्नसम्पदस्तु ॥
तिथिकरणमुहूर्त्तनक्षत्रग्रहलग्नाधिदेवताःप्रीयन्ताम्॥तिथिकरणेसमुहूर्त्तेनक्षत्रेसग्रहेसल
ग्ने सदैवतेप्रीयेताम् ॥ दुर्गापाञ्चाल्यौप्रीयेताम् ॥ अग्निपुरोगाविश्वेदेवाःप्रीयन्ताम् ॥ इ

न्द्रपुरोगामरुद्गणाःप्रीयन्ताम् ॥ वसिष्ठपुरोगाऋषिगणाःप्रीयन्ताम् ॥ माहेश्वरीपुरो
गाउमाद्यामातरःप्रीयन्ताम् ॥ अरुन्धतीपुरोगाएकपत्न्यःप्रीयन्ताम् ॥ विष्णुपुरोगाः
सर्वेदेवाः प्रीयन्ताम् ॥ ब्रह्मपुरोगाः सर्ववेदाः प्रीयन्ताम् ॥ आदित्यपुरोगाः सर्वेग्रहाः
प्रीयन्ताम् ॥ ब्रह्मचब्राह्मणाश्चप्रीयन्ताम् ॥श्रद्धामेधेप्रीयेताम्॥श्रीसरस्वत्यौप्रीयेताम्॥
भगवतीकात्यायनीप्रीयताम् ॥ भगवतीमाहेश्वरीप्रीयताम् ॥ भगवतीऋद्धिकरीप्री
यताम् ॥ भगवतीवृद्धिकरीप्रीयताम् ॥ भगवतीतुष्टिकरीप्रीयताम् ॥ भगवतीपुष्टिकरी
प्रीयताम् ॥ दुर्गापाञ्चाल्यौप्रीयेताम् ॥ भगवन्तौविघ्नविनायकौप्रीयेताम् ॥ सर्वाःकुल
देवताःप्रीयन्ताम् ॥ सर्वाग्रामदेवताःप्रीयन्ताम् ॥ सर्वाइष्टदेवताःप्रीयन्ताम् ॥ ततःपुनर्ब
हिस्त्यागः ॥ हताश्चब्रह्मद्विषः ॥ हताश्चपरिपन्थिनः ॥ हताश्चविघ्नकर्त्तारः ॥ हताश्च
विघ्नकराः ॥ शत्रवःपराभवंयान्तु ॥ शाम्यन्तुघोराणि ॥ शाम्यन्तुपापानि ॥ शाम्य

न्तुईतयः ॥ पुनर्यजमानमूर्द्धनिसेचनम् ॥ शुभानिवर्द्धन्ताम् ॥ शिवाआपःसन्तु ॥
शिवाऋतवःसन्तु ॥ शिवाअग्नयःसन्तु ॥ शिवाअतिथयःसन्तु ॥ शिवाआहुतयःसन्तु ॥
शिवावनस्पतयःसन्तु ॥ शिवाओषधयःसन्तु ॥ अहोरात्रेशिवेस्याताम् ॥ 'अथऋक्' ॥
शम्बुःकनिक्रदद्देवःपुर्ज्जन्योनअभिवर्षतु ओषधयः प्रतिधीयताम्॥ शन्नोद्यावापृथिवी
शंप्रजाभ्यःशन्नोऽस्तुद्विपदेशञ्चचतुष्पदे ॥ 'अथयजुः' ॥ निकामेनिकामेनः पुर्ज्जन्यो
अभिवर्षतु फलवत्योनऽओषधयःपच्यन्ताम् योगक्षेमोनःकल्पताम् ॥ २२ ॥ २२ ॥
'अथसाम' ॥ त्वष्टा ३४ नोदैवियम्वचाः पर्ज्जन्योब्रह्मणस्पातीः२३ पुत्रैर्भ्रातृभिरदि
तुर्पान्तु २३ नाःदुष्टरात्रमणंवाचा ३४३(३२३४५ इन्द्रा॥३३॥अथाथर्वणः)॥गणास्त्वो
पगायन्तुमारुताः पर्जन्यघोषिणः पृथक् सर्गावयस्यवर्षतोवर्षतुपृथिवीमनुः ॥ ४ ॥
शुक्राङ्गारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिताआदित्यपुरोगाः सर्वे ग्रहाः

प्रीयन्ताम् ॥ भगवान्नारायणःप्रीयताम् ॥ भगवान्पर्जन्यः प्रीयताम् ॥ भगवान्स्वामीमहासेनः प्रीयताम् ॥ पुरोनुवाक्ययायत्पुण्यंतदस्तु ॥ याज्ययायत्पुण्यंतदस्तु ॥ वषट्कारेणयत्पुण्यंतदस्तु ॥ प्रातः सूर्योदयेयत्पुण्यंतदस्तु ॥ एतत्कल्याणयुक्तंपुण्यंपुण्याहंवाचयिष्ये ॐवाच्यताम् ब्राम्यंपुण्यमहर्यञ्चसृष्ट्युत्पादनकारकम् ॥ वेदवृक्षोद्भवंनित्यंतत्पुण्याहंब्रुवन्तुनः ॥ भोब्राह्मणाममयजमानस्यसकुटुम्बस्यसपरिवारस्यगृहेपुण्याहंभवन्तोब्रुवन्तु ॥ ३ ॥ ॐपुण्याहम् ॥ ३ ॥ अथ ऋक् ॥ उद्गातेवंशकुनेसामगायसिब्रह्मपुत्रइवसवनेषुशंससि वृषेववाजीशिशुमतीरपीत्यासर्वतोनः शकुनेभद्रमावदविश्वतोनः शकुनेपुण्यमावद ॥ १ ॥ 'अथयजुः' ॥ पुनन्तुमादेवजनाः पुनन्तुमनसाधियः ॥ पुनन्तुविश्वाभूतानिजातवेदःपुनीहिमा ॥ १९ ॥ ३९ ॥ 'अथसाम' ॥ पुनानासोमाः उधारा ॥ २३४ ॥ याआपोसानोअर्षस्यारत्नधायोनिमृतस्य

प्राति० सा २ इह औहोवाउन्मादेवोहिरा ॥ २३ ॥ हा ३ ओहोउउवाण्ययाआ ३ हो ४ वा सं०
॥ ३६ ॥ हो ४५ इडा ४ वा ४ ॥ ३ ॥ अथाथर्वणः ॥ पुनन्तुमादेवजनाः पुनन्तुमनसाधियाः पु
नतुविश्वाभूतानिपवमानः पुनातुमाम् ॥ ४ ॥ पृथिव्यामुद्धृतायान्तुयत्कल्याणं पुरा
कृतम् ॥ ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणम्ब्रुवन्तुनः ॥ भोब्राह्मणाममयजमान
स्यसकुटुम्बस्यसपरिवारस्यगृहेकल्याणं भवन्तोब्रुवन्तु ३ ॐकल्याणम् ॥ ३ ॥ 'अ
थ ऋक् ॥ अपाः सोममस्तमिन्द्रप्रयाहिकल्याणीर्जायासुरणंगृहेते ॥ यत्ररथस्य
बृहतोनिधानम्विमोचनम्वाजिनोदक्षिणावत् ॥ १ ॥ 'अथयजुः' ॥ यथेमाम्वाचंक
ल्याणीमावदानिजनेभ्यः ब्रह्मराजन्याभ्याथ्ंशूद्रायचार्य्यायचस्वायचारणायच ॥ प्रि
योदेवानान्दक्षिणायैदातुरिहभूयासमयम्मेकामः समृद्ध्यताम् ॥ २६२ ॥ अथसा ॥ ३६ ॥
म ॥ कयानश्चि ३ त्रा ३ आबभूवातूऊतीसदावृधः सखाओउहोहा ३ कया २३

शच्चाद्राष्ट ३ यौहो ३ हूमा ३ वा २ ता ३ पूहो ॥ २३ ॥ ३ ॥ 'अथाथर्वणः' ॥ विश्व
जित्कल्याण्यैमापरिधेहि कल्याणिद्विपाच्चसर्वन्नौरक्षचतुष्पाद्यच्चनस्वम् ॥ ४ ॥ सा
गरस्यतुयाऋद्धिर्म्महालक्ष्म्यादिभिः कृता ॥ सम्पूर्णासुप्रभावाचतान्तामृद्धिंब्रुवन्तुनः
॥ ६ ॥ भोब्राह्मणाः मम यजमानस्यसकुटुम्बस्यसपरिवारस्यगृहेऋद्धिंभवन्तोब्रुव
न्तु ॥३॥ ॐऋध्यताम् ॥३॥ अथऋक् ॥ ऋध्यामुस्तोमंसनुयामुवाजुमानोमन्त्रंसुरथे
होपंयातम् ॥ युशोनपुक्कंमधुगोस्वुन्तराभूतांशोऽअश्विनोःकामंमप्राः॥१॥ 'अथयजुः'॥
सुत्रस्युऽऋद्धिरुस्यगंन्मुज्ज्योतिरुमृताऽअभूम ॥ दिवंम्पृथिव्याऽअद्ध्यारुहामा
विंदामदेवान्त्स्वुज्ज्योतिः ॥ २ ॥ ८ ॥ ५२ ॥ 'अथसाम' ॥ श्रौहोवाऔहोवा
अगन्मज्योतिः २ अगन्मज्योति २ अमृताऽअभूम २ अमृताऽअभूमान्तरिक्षंपृथि
व्याऽअध्यारुहामा ३ दिवमन्तारिक्षादध्यारुहामा ३ अविदामदेवान् ३ समुदैवैर

७

प्रति० गन्महि ३ हौहोवा औहोवाऔहोवासुवज्योंती ॥ २३४५ ॥ ३ ॥ 'अथाथर्वणः' ऋध सं०
॥ ३७ ॥ ग्मन्तोयोर्नियोनियग्माषभूवामृतासुवर्द्धमानः सजन्मा अदब्धासुरभ्राजमानोहेव
त्रितोधर्तादाधारत्रीणि ॥ ४ ॥ स्वस्त्यस्तुयाविनाशाख्या पुण्यकल्याणवृद्धिदा ॥
विनायकप्रियानित्यंतान्तांस्वस्ति ब्रुवन्तुनः ॥ ८ ॥ भो ब्राह्मणाः ममयजमान
स्य सकुटुम्बस्यसपरिवारस्यगृहेस्वस्तिभवन्तोब्रुवन्तु ॥ ३ ॥ ॐस्वस्ति ॥ ३ ॥
अथ ऋक् ॥ स्वस्तिऋद्धिप्रपथेश्रेष्ठारेक्णस्वस्त्याभियावामभेति ॥ सानोऽअमासाऽ
आरणेनिपातुस्वावेशाभवतुदेवगोपाः ॥ अथ यजुः ॥ स्वस्तिनइन्द्रोवृद्धश्र
वाः स्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्तिनस्ताक्ष्योंऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्द
धातु ॥ २५ ॥ १९ ॥ १० ॥ अथसाम ॥ द्राम्हवा ॥ ३ ॥ नशक्रंपुरुहूतमिं ॥ २३ ॥ ॥ ३७ ॥
द्राम् ३६ ठं स्वस्तिनोमघवा ३४३ इतु ३ वा ५ इन्द्राः ६५६ त्रातारमिन्द्रमवितार

मिन्द्राम्महवेहवेसुहवार्ठं सूरमिम्॥३॥अथाथर्वण: ॥ स्वस्तिमात्र उतपित्रेणोऽअस्तुस्व
स्तिगोभ्य: ॥ विश्वंसुभूतंसुविदत्रन्नोऽअस्तुज्योगेवद्दृशेमसूर्य्यम् ॥ ४ ॥ मृकण्डसूनोरा
युर्यद्धूवलोमशयोस्तथा ॥ आयुषातेनसंयुक्ताजीवन्तुशरद:शतम् ॥ शतञ्जीवन्तुभवं
त: ॥ अथऋक् ॥ शतञ्जीवशरदोवर्द्धमान: शतंहेमन्तान्छतमुवसन्तान् ॥ शतमिन्द्रा
ग्नीसंवितावृहस्पति: शतायुंषाहविषेमम्पुनर्द्दु: ॥ १२ ॥ अथयजु: ॥ शतमिन्नुशर
दोऽअन्तिदेवायत्रानश्चक्राजुरसन्तनूनाम् ॥ पुत्रासोयत्रपितरोभवन्तिमानोमद्ध्यारी
रिषतायुर्गन्तो: ॥२५॥२२॥ अथसाम ॥ हा४हा उहाउहाउपशोहाउ ३ वर्चोंहा३३॥अ
स्मिनन्हाई २ अस्मिनन्हा ३३१ उवा २ तवेदिन्द्रावमंवसुत्वम्पुष्यासिमध्यमसत्राविश्व
स्यंपरमस्यराजसिनकिष्ठागोषुवृण्वतेहाउहाउहाउयशोहाउ३ वर्चोंहाउ ३ अस्मिनन्हा
ई ३ अस्मिनन्हा ३१ उवा२ आयुर्विश्वायुर्विश्वंविश्वमायुरशिमहिप्रजांत्वष्टराधिनिधे

स्वस्मैशतंजीवेमशरदोवयन्ते २३४५ शतायुर्वै पुरुषः शतवीर्यस्तमुल्लिखेत्प्राणा
यत्वापानायत्वाव्यानायत्वेति प्राणापानव्यानानेव तदात्मावरन्धत्ते ॥ ३ ॥ अ
थाथर्वणः ॥ आयुरस्मैधेहिजातवेदः अजांत्वष्टराधिनिधेस्वस्मैरायस्पोषंसवितरासु
वास्मैशतंजीवातिशरदस्तवायम् ॥ ४ ॥ १३ ॥ शिवगौरीविवाहेयायाश्रीरामेनृपा
त्मजे ॥ धनदस्यगृहेयाश्रीरस्माकंसास्तुसद्मनि ॥१४॥ ॐ अस्तुश्रीः ॥ अथऋक् ॥
श्रियेजातःश्रियऽआनिर्रियायुःश्रियुम्वयोंजरितृभ्योंदधाति ॥ श्रियुंवसानाऽअमृतत्व
मांयन्नभवन्तिसुत्यासंमिथामितद्रौ ॥ अथयजुः ॥ मनसःकाममाकूतिंम्वाचःसत्यमं
शीय ॥ पशूनार्ठ०रूपमन्नंस्युरसोयशः श्रीः श्रयतांमयिस्वाहा ३९४१६॥अथसाम॥
आयन्तसू ४ रायामविश्वा २३ दिन्द्रारस्याभवाश्रिये श्रायन्तीम्यम्भवतीश्रावैंःश्राय
न्तीयार्ठ०श्रीनवमामहःश्रियेमेतवश्रियार्ठ०प्रतिष्ठापयति३अथवाभद्राइन्द्रस्मरा ३५॥

॥ अथाथर्वणः ॥ राहवातुवरुणःसोमोऽअग्निर्बृहस्पतिर्वसुभिरेहयाति ॥ अस्यश्रीमुपसं
यातसर्वउग्रस्यवेतुंसमनसोजाताभद्रादधिश्रिमेहिरितेवा ॥ ४ ॥ प्रजापतिर्लोकपा
लोधाताब्रह्माचदेवराट् ॥ भगवाञ्छाश्वतोनित्यंसनोरक्षतुसर्वतः ॥ १७ ॥ भगवान्
प्रजापतिःप्रीयताम् ॥ अथ ऋक् प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिताब
भूव ॥ यत्कामास्तेजुहुमस्तन्नोऽअस्तुवयं स्यामपतयोरयीणाम् ॥ अथयजुः॥प्रजाप
तेनत्वदेतान्यन्योविश्वारूपाणिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोऽअस्तुवयमभु
ष्येपितासावस्यपिताव्वयंस्यामपतयोरयीणाम् ॥ २३६५ ॥ अथसाम ॥ हाउ ३
इमाः ३ प्रजाः ३ प्रजापतेहो३२प्रजावतेहा ३१ उवाणहृदयं२ हृदया ३१२ उएवा १२
प्रजापरूपमजिजन ३३८३३ डा २३४५ ॥ ३ ॥ अथाथर्वणः ॥ प्रजापतेरावृतोब्रह्मणा
वर्म्मणाहंकस्यपस्यज्योतिषावर्चसाचजरदष्टिः कृतवीर्योविहायाः सहस्रसायंसुकृतश्च

रेयम् ॥ ४२ ॥ आयुष्मतेस्वस्तिमतेयजमानायदाशुषे ॥ क्रियास्त्राशिषः सन्तुऋ
त्विग्भिर्वेदपारगैः ॥ २० ॥ देवेन्द्रस्ययथास्वस्तियथास्वस्तिगुरोर्गृहे ॥ एकलिङ्गय
थास्वस्तितथास्वस्तिसदाममं ॥ २१ ॥ ॐआयुष्मतेस्वस्तिरस्तु ॥ 'अथऋक्' ॥
स्वस्तयेवायुमुपब्रवामहैसोमंस्वस्तिभुवनस्ययस्पतिः ॥ बृहस्पतिंसर्वगणंस्वस्तये
स्वस्तयऽआदित्यासोभवन्तुनः ॥ २२ ॥ 'अथयजुः ॥ प्रतिपन्थामपद्महिस्वस्ति
गामनेहसम् ॥ येनविश्वाः परिद्विषोवृणक्तिविन्दतेवसु ॥ ४ ॥ २९ ॥ 'अथसाम' ॥
त्यमूषुवाजिना २३४ सुदेवजूता २३४ सुसहोवानन्तारुता ३२ ॐ रथाना
मुअरिष्टना २३४ ॥ द्रमानपृतना २४३ जमाशुं १ स्वस्तिपत्रिताक्ष्यमिहा ३४३ हू ३
वापइमा ६५६ ॥ ३ ॥ अथाथर्वणः ॥ वेदस्वस्तिद्रुघणःस्वस्तिः परशुर्वेदिः परशुनः
स्वस्तिहविष्कृतोयज्ञियायज्ञकामास्तेदेवासोयज्ञमिमंजुषन्ताम् ॥ ४ ॥ स्वस्तिदावि ॥ ३९ ॥
षांपतिर्वृत्रहाविमृधोवशी वृषेन्द्रःपुरएतुनः सोमपाअभयंकरः ॥ ५ ॥ स्वस्तयेवाजि

भिश्चप्रणेतः सयन्महीरिषऽआसत्तिसपूर्वीः रायोवन्तारोबृहतः स्यामास्मेऽअस्तुभ
गऽइन्द्रप्रजावान् भद्रादधिश्रियप्रेहिबृहस्पतिः पुराएतातेऽअस्तुअथेममस्यावरआ
पृथिव्याआरेशत्रून्कृणुहिसर्ववीरम् ॥ २३ ॥ महोअग्नेःसमिधानस्यशर्म्मण्यनागामि
त्रेवरुणेस्वस्तये श्रेष्ठेस्यामसवितुः सवीमनितद्देवानामवोऽअद्यावृणीमहे ॥३३॥१७॥
२४ ॥ 'अथयजुः' विश्वानिदेवसवितर्दुरितानिपरासुव ॥ यद्भद्रंतन्नऽआसुव ३०३
॥ २५ ॥ तस्यैसप्तदशसामिधेन्योभवन्तिसद्धान्तावाज्यभागौसदेवावरुन्धते विश्वा
निदेवसवितः सघानोदेवसवितासहावेद्युपाथंशुहवियोयोज्यंनुवाक्ये अनुष्टुभौ
संयाज्येराजतिथंहिरण्यन्दक्षिणानामुपतयाअथोतक्कमानयत्रमायशतमानम्भवति श
तायुर्वै पुरुषः शतेंद्रियआयुरेवेन्द्रियंवीर्यमात्मन्धत्ते ॥ मन्त्रार्थाः सफलाः स
न्तुपूर्णाः सन्तुमनोरथाः ॥ शत्रूणांबुद्धिनाशोऽस्तुमित्राणामुदयस्तव ॥ २६ ॥ ऋग्वे
दोऽथयजुर्वेदः सामवेदोह्यथर्वणः ॥ ब्रह्मवाक्येसदानित्यंनिघ्नन्तुतवशात्रवान् ॥ २७ ॥

अक्षतान्विप्रहस्तात्तुनित्यंगृह्णन्तियेनराः ॥ चत्वारितेषांवर्द्धन्तिआयुःकीर्त्तिर्यशोबलम् ॥ २८ ॥ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधाच्छुभमानंमहीयते धनं धान्यं पशुं बहुपुत्रलाभंशतसंवत्सरंदीर्घमायुः ॥ ॥ इति दानखण्डोक्तपुण्याहवाचनम् ॥

ततः ईशानकोणेऽव्रणंकलशंपूर्वोक्तप्रकारेणस्थापयित्वातदुपरिगणेशंवरुणंचावाह्यपूजयेत्पूर्वंपुण्याहवाचनेपूजितमेववाकलशमीशानकोणेस्थापयेत् ततोब्रह्मामुरारिस्त्रिपुरान्तकारीभानुः शशीभूमिसुतोबुधश्चगुरुश्च शुक्रःशनिराहुकेतवःसर्वेग्रहाःशान्तिकराभवन्त्विति मन्त्रेणाक्षतपुंजोपरिसामान्यतोनवग्रहानावाह्यपूजयेत् अधिदेवताप्रत्यधिदेवतादिक्पालादिसहितसूर्यादिनवग्रहेभ्योनमः पाद्यादिना

वा. उ. ईशा.

धृति पुष्टि	देव	जया	स्वधा
शची	ग.	कुलदे	मातर
मेधा	गौ	पद्मा	लोक
तुष्टि	वि॰	सा.	स्वाहा

प. पू.

नै. द. अ.

पूजयेत्ततोहस्तेनजलमादायानेनयथासम्भवेनपञ्चोपचारादिपूजनेनअधिदेवताप्रत्यधिदेवतादिसहितसूर्यादिनवग्रहाःप्रीयंताम् १ अथमातृकापूजनम् ॥ तत्रादौदेशकालादिसङ्कीर्त्यंक्रियमाणशिवादिप्रतिष्ठाकर्माङ्गभूतश्रीगणपतिसहितगौर्यादिषोडशमातॄणामावाहनपूर्वकंपूजनमहंकरिष्ये इतिसङ्कल्प्य आवाहनम् गौरीपद्माशचीमेधासावित्रीविजयाजयादेवसेनास्वधास्वाहामातरोलोकमातरः हृष्टिःपुष्टिस्तथातुष्टिरात्मनःकुलदेवताः

---

१ अथ मातृकास्थापनपूर्वकपूजनप्रकारःकथ्यते । अकृत्वामातृयागंतुवैदिकंयत्समाचरेत् तस्यक्रोधसमाविष्टाहिंसामिच्छन्ति मातरः पञ्चोर्ध्वाःपञ्चतिर्यक्चरेखाःकार्याःप्रयत्नतः षोडशकोष्ठकाज्ञेयाः पूज्यामातरःपृथक्पृथक् कुलदेवींगणेशंचगौरींपद्मासमन्विताम् पूजयेन्मध्यमेकोष्ठेशेषाबाह्येहिकोष्ठके मध्यकोष्ठेचतुष्केतुस्थापयेच्चपृथक्पृथक् गणेशंवायुकोणेचमध्यमेचकुलेश्वरीम् गौरीचनैर्ऋतेपूज्या पद्मापावककोणके शचीचपश्चिमेस्थाप्यामेधाचैवद्वितीयके सावित्रीदक्षिणेपूज्याविजयाचद्वितीयके जयाचउत्तरेस्थाप्यादेवसेनाद्वितीयके स्वाहाग्नेयांसमभ्यर्च्यईशान्यांचस्वधातथा पूर्वेंतुमातरःपूज्यालोकमातरस्तदग्रके धृतिः पुष्टिर्वायुकोणेतुष्टिश्चनैर्ऋतेतथा एवंहिमातरःस्थाप्याःस्वस्वस्थानेपृथक्पृथक् ।

 इतिपठित्वाआदौगणपतिंपूजयेत् ततः श्रीपूजनम् ततोगौर्यादीनांपूजनमितिक्र
 मः तथाहि ॐआशुः शिशानोवृषभोनभीमोघनाघनः क्षोभणश्चर्षणीनामितिपठि
त्वा गजवक्त्रगणाध्यक्षसर्वविघ्नविनाशन ॥ लम्बोदरत्रिनेत्रत्वमागच्छ गणनायक ॥
गणानान्त्वेतिमन्त्रेणवायुकोणे ॐभूर्भुवः स्वः श्रीमहागणपते इहागच्छइहतिष्ठश्रि
यैनमः ॐभूर्भुवःस्वः श्री इहागच्छइहतिष्ठ हिमाद्रितनयांदेवींवरदांभैरवप्रियाम् ॥
लम्बोदरस्यजननींगौरीमावाहयाम्यहम् ॥ आयङ्गौः पृश्निरक्रमीदसदन्मातरम्पुरः ॥
पितरञ्चप्रयन्त्स्वः ॥ गौरीमावाहयामिस्थापयामि ॐभूर्भुवःस्वः गौरिइहागच्छ
इहतिष्ठ १ सुवर्णांत्वांपद्महस्तांविष्णोर्वक्षःस्थलेस्थिताम् त्रैलोक्यपूजितांदेवींपद्मा
मावाहयाम्यहम् ॐहिरण्यरूपाऽउषसोविरोकऽ उभाविन्द्राऽउदिथः सूर्य्यश्च ॥ आ
रोहणम्वरुणमित्रगर्त्तन्ततश्चक्षाथामदितिन्दितिंचमित्रोसिवरुणोसि ॥ २० ॥ १६ ॥

पद्मामावाहयामिस्थापयामि भूर्भुवःस्वः पद्मेइहागच्छइहतिष्ठ ॥ २ ॥ उत्पलाक्षीं
सुदर्शनांशचींकुण्डलधारिणीम् देवराजप्रियांभद्रांशचीमावाहयाम्यहम् ॥ ॐकुदा
चुनस्तरीरसिनेन्द्रंसरश्चसिदाशुषे ॥ उपोपेन्नुमघवन्भूयऽइन्नुतेदानन्देवस्यपचतऽआदि
त्येभ्यस्त्वा ॥ शचीमावाहयामिस्थापयामि ॐभूर्भुवःस्वः शचिइहागच्छेहतिष्ठ ॥
वैवस्वतकरोत्फुल्लरक्तपद्माधिवासिनीम् ॥ बुद्धिप्रसादिनींसौम्यांमेधामावाहयाम्यहम् ॥
ॐमेधाम्मेवरुणोददातुमेधामग्निः प्रजापतिर्मेधामिन्द्रश्चवायुश्चमेधान्धातादंदा
तुमेस्वाहा ॥ ३२ ॥ १६ ॥ मेधामावाहयामि स्थापयामि ॐभूर्भुवः स्वर्मेधेइहाग
च्छेहतिष्ठ ॥ ४ ॥ जगत्स्रष्ट्रींजगद्धात्रींयक्षीरूपेणसंस्थिताम् ॥ ॐकाराक्षींभगवतींसा
वित्रीमावाहयाम्यहम् ॥ ॐतत्सवितुर्वरेण्यंभर्गो० ॥ सावित्रीमावाहयामिस्थापयामि ॥
ॐभूर्भुवःस्वःसावित्रीहागच्छेहतिष्ठ ॥ ५ ॥ दैत्ययक्षक्षयकरींदेवानांचाभयप्रदाम् ॥

प्रति० गीर्वाणवन्दितान्देवीं विजयामावाहयाम्यहम् ॥ ॐ विज्ज्यं धनुः कपर्द्दिनो विशल्ल्यो सं०
॥ ४२ ॥ बाणवाँ२ उत ॥ अनेशन्नस्ययाऽइषवऽआभुरस्य निषङ्गधिः ॥ विजयामावाहयामि स्थाप
यामि ॥ ॐ भूर्भुवः स्वः विजये इहागच्छेह तिष्ठ ॥ विश्वभद्रां जयारिक्तां रक्तांबरधरां स
दा ॥ त्रैलोक्यवन्दितां देवीं जयामावाहयाम्यहम् ॥ यातेरुद्रा शिवा तनूर घोरा पापका
शिनी ॥ तयानस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥ १६ ॥ २ ॥ जयायै नमः
जयामावाहयामि स्थापयामि ॥ ॐ भूर्भुवः स्वः जये इहागच्छेह तिष्ठ ॥ ७ ॥ मयूरवाह
नारूढां शक्तिखड्ग धनुर्धरीम् ॥ आवाहये द्देवसेनां तारकासुरमर्दिनीम् ॥ देवानां भद्रासु
मतिर्ऋजूयतान्देवानाᳯरातिरभिनोनिवर्त्तताम् ॥ देवानाᳯसख्यमुपसेदिमा वयन्देवानऽ
आयुः प्रतिरन्तु जीवसे ॥ २५ ॥ १५ ॥ देवसेनायै नमः देवसेनामावाहयामि स्थापयामि ॥ ४२ ॥
ॐ भूर्भुवः स्वः देवसेने इहागच्छेह तिष्ठ ॥ ८ ॥ कव्यमादाय सततं पितृभ्यो याप्र

यच्छति ॥ पितृलोकार्चितांदेवींस्वधामावाहयाम्यहम् ॥ पितृभ्यःस्वधायिभ्यःस्वधा
नमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः
अक्षन्पितरोमीमदन्तपितरोतीतृपन्तपितरःपितरः शुन्धध्वम् ॥ १९ ॥ ३६ ॥ स्वधायै
नमः स्वधामावाहयामिस्थापयामि ॥ ॐभूर्भुवःस्वः स्वधेइहागच्छेहतिष्ठ ॥ ९ ॥ ह
विर्गृहीत्वासततन्देवेभ्योयाप्रयच्छति ॥ स्वर्गलोकार्चितास्वाहासमागच्छममाध्व
रे ॥ स्वाहायज्ञंमनसःस्वाहोरोरन्तरिक्षात्स्वाहाद्यावापृथिवीभ्याꣳस्वाहावातादारभे
स्वाहा ॥ ४ ॥ ६ ॥ स्वाहायैनमः स्वाहामावाहयामिस्थापयामि ॥ ॐभूर्भुवःस्वःस्वा
हेइहागच्छेहतिष्ठ ॥ १ ॥ भूतग्राममिदंकृत्स्नंययाउत्पादितंपुरा त्रैलोक्यपूजितां
देवींमात्रीमावाहयाम्यहम् ॥ आपोअस्मान्मातरःशुन्धयन्तुघृतेननोघृतप्वःपुन
न्तु ॥ विश्वꣳहिरिप्रम्प्रवहन्तिदेवीरुदिदाभ्यःशुचिरापूतऽएमि ॥ दीक्षातपसोस्त

नूरंसितान्त्वांशिवाठंशुग्मास्परिंदधेभद्रंवर्णम्पुष्यन् ॥ ४ ॥ २ ॥ मात्रेनमः मातरमा
वाहयामिस्थापयामि ॥ ॐभूर्भुवः स्वर्मातरिहागच्छेहतिष्ठ ॥ ११ ॥ आवाहयेल्लो
कमात्रींजगत्पालनसंस्थिताम् ॥ शक्राद्यैर्वन्दितांदेवींतत्रत्यैश्चसुरैरपि ॥ भवंतन्नः स
मंनसौसचेतसावरेपसौ ॥ मायज्ञठंहिंठंसिष्टम्मायज्ञपतिंजातवेदसौशिवौ भवत
मद्यनः ॥ ५ । ३॥ लोकमात्रेनमः लोकमातरमावाहयामिस्थापयामि ॥ ॐभूर्भु
वःस्वर्लोकमातरिहागच्छेहतिष्ठ ॥ १२ ॥ नमस्तुष्टिकरींदेवींलोकानुग्रहकारिणीम् ॥
सर्वकामसमृद्ध्यर्थंधृतिमावाहयाम्यहम् ॥ यत्प्रज्ञानमुतचेतोधृतिश्चयज्ज्योतिरन्त
रमृतम्प्रजासु॥यस्मान्नऽऋतेकिञ्चनकर्म्मंक्रियतेतन्मेमनः शिवसङ्कल्पमस्तु ३।४३॥
धृत्यैनमः धृतिमावाहयामिस्थापयामि ॥ ॐभुर्भुवः स्वर्धृतेइहागच्छेहतिष्ठ ॥ १३ ॥
प्रणताइमेलोकेस्मिन्पुत्रपुष्टिसुखप्रदा ॥ भक्तेभ्यश्चापिवरदाविद्युज्ज्वालार्ककुण्ड

ला ॥ तत्वांयामिब्रह्मंणावन्दंमानुस्तदाऽशांस्तेयजंमानोहविर्भिः ॥ अहेंडमानोवरु
णेहबोद्ध्युरुंशर्ठसुमानुआयुः प्प्रमोंषीः ॥ २१ ॥ २॥ पुष्ट्यैनमः पुष्टिमावाहयामिस्था
पयामि ॥ ॐभूर्भुवः पुष्टेइहागच्छेहतिष्ठ ॥ १४॥ आवाहयामितांतुष्टिंसर्वलोकेषु
पूजिताम् ॥ सन्तोषभावनादींश्चरक्षणायाध्वरेमम बृहस्पतेपरिदीयारथेनरक्षोहा
मित्त्रांः॒ऽअपुबाधमानः ॥ प्रभुञ्जन्त्सेनाः प्प्रमृणोयुधाजयंन्नुस्म्माकंमेध्यवितारथा
नाम् ॥ तुष्ट्यैनमः तुष्टिमावाहयामिस्थापयामि ॥ ॐभूर्भुवःस्वस्तुष्टेइहागच्छेहतिष्ठ
॥ १५ ॥ तामात्मादिहितांदेवींसर्वकामफलप्रदाम् ॥ वंशरक्षाकरींगोप्त्रींदेवीमावाहया
म्यहम् ॥ प्प्राणायुस्वाहाऽपुानायुस्वाहा व्व्यानायुस्वाहा अम्बेऽअम्बिकेम्बालिकेनमा
नयतिकश्चुनससस्त्यश्वुकः सुभद्रिकाङ्काम्पीलवासिनीम् ॥ २२ ॥ १८ ॥ आत्मनः
कुलदेव्यैनमः आत्मनःकुलदेवीमावाहयामिस्थापयामि ॥ ॐभूर्भुवः स्व आत्मकु

लदेवीहागच्छेहतिष्ठ ॥ १६ ॥ एवंप्रत्येकमावाहनंस्थापनंचकुर्यात् ॥ मनोजूतिरि
तिमंत्रेणप्रतिष्ठांकुर्यात् ॥ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्पतिर्य्यज्ञमिमन्तंनो
त्वरिष्टंय्यज्ञठंसमिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामो३म्प्रतिष्ठ ॥ २ ॥ १३ ॥
गौर्यादिषोडशमातरः श्रीगणपतिसहिताः सुप्रतिष्ठिताः सत्योवरदाभवन्तु अथमातृ
कापूजा ॥ सुवर्णमणिभिर्दिव्यैरर्चितेदेवनिर्मिते दिव्यसिंहासनेस्निग्धेप्रविशंतुसुराल
ये श्रीगणपतिसहितगौर्यादिषोडशमातृभ्योनमः आसनंसमर्प्पयामि पाद्यम् पादो
दकंतुभोदेव्यःसुवर्णकलशेस्थितम् गन्धपुष्पादिभिर्युक्तंगृह्यतांचनिवेदितम् श्रीगण
पतिसहितगौर्यादिषोडशमातृभ्योनमः पाद्यंसमर्पयामि अर्घ्यम् अष्टद्रव्यसमायुक्तं
स्वर्णपात्रस्थितंजलम् अर्घ्यंभवन्तोगृह्णंतांमयाभक्त्यानिवेदितम् श्रीगणपतिसहित
गौर्य्यादिषोडशमातृभ्योनमः अर्घ्यंसमर्पयामि आचमनम् मयानिवेदितंदेव्यः

कुरुताचमनंशुभम् सुप्रसन्नाचवरदाभवन्तुममसर्वदा श्रीगणपतिसहितगौर्य्यादि
षोडशमातृभ्योनमः आचमनंसमर्पयामि पञ्चामृतस्नानम् पञ्चामृतैस्ततः स्नानंम
न्त्रैर्वेदोद्भवैरपि मध्येमध्येप्रपूजाचमधुपर्कपुरःसरम् श्रीगणपतिसहितगौर्यादिषो
डशमातृभ्योनमः पञ्चामृतस्नानंनिवेदयामि शुद्धोदकस्नानम् नदीनांचैवसरसांमया
नीतंजलंशुभम् अनेनस्नानमन्त्रेणमन्त्रैर्वरुणसम्भवैः श्रीगणपतिसहितगौर्यादिषोडश
मातृभ्योनमः शुद्धोदकस्नानंसमर्पयामि वस्त्रम् वस्त्रयुग्मंसमानीतंपट्टसूत्रविनिर्मि
तम् वस्त्रंकार्पासतन्तूनांसुवर्णेनविराजितम् श्रीगणपतिसहितषोडशमातृभ्योनमः वस्त्रं
समर्पयामि यज्ञोपवीतम् गणपतेनमस्तुभ्यंत्राहिमांभवसागरात् ब्रह्मसूत्रंसोत्तरीयंगृ
हाणगणनायक इतिविनायकाय यज्ञोपवीतम् अन्यत्रयज्ञोपवीताभावएवबोध्यः आ
भरणानि केयूरमुकुटैश्चैवनूपुरैरंगुलीयकैः पूजिताःस्थप्रयत्नेनरत्नैराभरणैर्मया श्रीगण

प्रति० पतिसहितगौर्यादिषोडशमातृभ्योनमः आभरणानिसमर्पयामि गन्धादिद्रव्यम् सं०
॥ ४५ ॥ चन्दनंमलयोद्भूतंकस्तूर्यागरुसंयुतम् कर्पूरेणसमायुक्तंगृह्यतांमातरः शुभम् कुङ्कुमं
कामनादिव्यंकामनाकामसम्भवम् कुङ्कुमेनार्चितादेव्योभवन्तुवरदाःसदा श्रीग
णपतिसहितगौर्यादिषोडशमातृभ्योनमः गन्धंसमर्पयामि अक्षताः अक्षताश्चमहा
दिव्यामुक्ताफलसमन्विताः गृह्यन्तांभोशुभादेव्योमयाभक्त्यानिवेदिताः श्रीगणपति
सहितगौर्यादिशोडशमातृभ्योनमः अक्षतान्समर्पयामि पुष्पाणि शतपत्रैःकर्णिकारै
श्चम्पकैर्मल्लिकादिभिः पुष्पैर्नानाविधैश्चैवभवन्तुपूजिताः सदा श्रीगणपतिसहित
गौर्यादिशोडशमातृभ्यो नमः पुष्पाणि समर्पयामि–धूपम् दशांगंगुग्गुलंधूपं
सुगन्धंचमनोहरम् मयानिवेदितंधूपंगृह्यतांमातरःसदा श्रीगणपतिसहितगौर्यादिषोड ॥ ४६ ॥
शमातृभ्योनमः धूपंसमर्पयामि दीपम्–सुप्रकाशोमहान्दीपः सर्वत्रातिमिरापहः बाह्या

भ्यन्तरज्योतिश्चगृह्णंतुदीपकंसदा श्रीगणपतिसहितगौर्यादिषोडशमातृभ्योनमः दी
पंसमर्पयामि ॥ नैवेद्यम् अन्नंचपायसंभक्ष्यंसिताघृतसमन्वितम् दधिक्षीरघृतैर्युक्तं
गृह्यतांमातरः शुभम् श्रीगणपतिसहितगौर्यादिषोडशमातृभ्योनमः नैवेद्यंसमर्पयामि
ताम्बूलम्–नागवल्लीदलैर्युक्तंपूगीफलसमन्वितम् कर्पूरखादिरैर्युक्तंगृह्यतांसुतांबूलकम्
श्रीगणपतिसहितगौर्यादिषोडशमातृभ्योनमः ताम्बूलंसमर्पयामि पूगीफलम्–पूगी
फलंमहद्दिव्यंदेवानांचप्रियङ्करम् मयानिवेदितंभक्त्यागृह्यतांमातरः सदा श्रीगणपति
सहितगौर्यादिषोडशमातृभ्योनमः पूगीफलं समर्पयामि नीराजनम्–नीराजनं
प्रगृह्यंतांपञ्चवर्तिभिरावृतम् तेजोराशिमयंदिव्यंलोकानन्दकरंशुभम् श्रीगणपति
सहितगौर्यादिषोडशमातृभ्योनमः नीराजनंसमर्पयामि कुसुमांजलिः चन्दनस्य
प्रसूनैश्चतथाकलपद्रुमस्यच सुरहस्तच्युतांनित्यंगृह्यतांकुसुमांजलिम् श्रीगणपति

सहितगौर्यादिषोडशमातृभ्योनमः कुसुमांजलिंसमर्पयामि प्रार्थना—मंत्रहीनंक्रियाही
नंभक्तिहीनंचयत्कृतम् पूजनंप्रतिगृह्णन्तांक्षम्यतांमातरः सदा इतिप्रार्थयेत् इतिषोडश
मातृकापूजनम् ॥ अथब्राह्म्यादिसप्तघृतमातृकास्थापनपूजनप्रकारश्चप्रदर्श्यते ॥ गृह
निर्गमवामाङ्गेवसोर्द्धाराचवेदिका कार्याविवाहेविद्वद्भिर्गृहनिर्गमदक्षिणे कुड्यलग्नांवसो
र्धारांसप्तधारांघृतेनच कारयेत्पञ्चधारांवानातिनीचांनचोच्छ्रिताम् हस्तमात्रप्रमाणां
चगृहनिर्गमदक्षिणे वसोर्धारातुकर्तव्यावसोर्मंत्रेण कारयेत् अथ ब्राह्म्यादिघृतमा
तृकापूजनम्—वसोः पवित्रमसिशतधारम्वसोः पवित्रमसिसहस्रधारम् देवस्त्वा सवि
तापुनातु वसोः पवित्रेणशतधारेणसुप्वाकामधुक्षः १३ अनेनमन्त्रेणभित्तौडोरको
परिसप्तघतधारादद्यात् उत्तरोत्तरक्रमेण मनोजूतिरित्यादिमन्त्रेणप्रतिष्ठांकुर्यात् ॥
ॐभूर्भुवःस्वः ब्राह्म्यादिसप्तघृतमातॄरावाहयामि तासांनामानि—ॐब्राह्म्यैनमः ॐमाहे
श्वर्यैनमः ॐकौमार्यैनमः ॐ वैष्णव्यैनमः ॐवाराह्यैनमः ॐइन्द्राण्यैनमः ॐचा

मुण्डायैनमः ॐब्राह्म्यादिसप्तघृतमातृभ्योनमः पाद्यादीनिसमर्पयामि एवंपूजयित्वा ततः सर्वमातृकापूजनंकुर्यात् ॐकीर्त्यैनमः ॐलक्ष्म्यैनमः ॐधृत्यैनमः ॐमेधायैनमः ॐसिद्ध्यैनमः ॐप्रज्ञायैनमः ॐसरस्वत्यैनमः। अथमण्डपमातृकापूजा—ईशानतआरभ्यपूर्वादिक्रमेण—ॐनन्दिन्यैनमः ॐनलिन्यैनमः ॐमैत्रायैनमः ॐउमायैनमः ॐपशुवर्द्धिन्यैनमः॥ अथद्वारमातृपूजा ॐजयन्त्यैनमः ॐविजयायैनमः ॐशोभनायैनमः ॐपिङ्गलायै० ॐभद्रकाल्यैनमः इतिनाममन्त्रेणार्चयेत्॥ ततःआयुष्यंवर्चस्यठंरायस्पोषमौद्भिदम्॥ इदठं हिरण्यंवर्चस्वज्जैत्रायाविशतादुमाम्॥ ५०॥ इति मन्त्रंपठेत् एषांसमनन्तरोक्तमातृकाणां वक्ष्यमाणानाञ्चस्थापनं हस्तमात्रपरिमितायां हस्तमात्रोच्छ्रितायां वेद्यां कुंकुमकोष्ठकानि कृत्वा तत्र कर्तव्यम् जयाचवि

१ टीप—'द्वारमातरः—'संस्कारभास्करे—जयन्ती मंगला चैव पिंगला दक्षिणे गृहात्। आनन्दवर्धिनी वामे महाकाली च निर्गमे॥ एषो हि पाठो वर्तते।

जयाचैवसीमंतेचसुखावहा प्राशनेचसमाशीर्णाचूडभद्रासुभाद्रिका व्रतबन्धेतुज्ञात
व्याईश्वरीभुवनेश्वरी विवाहेषुचकर्त्तव्यासुभद्रासर्वतोमुखी गृहकार्येप्रतिष्ठायांना
गेन्द्रीपद्मवासिनी जातिकर्म्मणिशिष्टैश्चजयालीलाप्रकीर्तिता तदुपरिपञ्चसप्तवावसो
र्धाराःकर्त्तव्याः नान्यत्रेत्यपिकेचिद्वदन्ति इतिघृतमातृकादिसकलमातृकाणांस्था
पनपूजनप्रकारः ॥ ॥ अथाभ्युदयिकश्राद्धप्रयोगः—तत्रदक्षिणोत्तरक्रमेणद्वाद
शस्थानेषु प्रत्येकमासादितद्रव्योज्वलितप्रदीपोदेशकालौसङ्कीर्त्याचम्यप्राङ्मुख
उदङ्मुखोवोपविशेत् ॥ सव्येन सर्वकर्म कर्त्तव्यम् ॥ (ऋजवएवकुशाः
तिलकार्येयवाः कर्तव्याः) ततः ॐअपवित्रः पवित्रोवासर्वावस्थांगतोपिवा यः
स्मरेत्पुण्डरीकाक्षंसबाह्याभ्यंतरः शुचिः ॐपुण्डरीकाक्षःपुनात्वितिश्राद्धीयद्रव्या
णिसिञ्चेत् कुशोदकेन ततःकुशयवजलान्यादाय सङ्कल्पः ॐअद्यामुकगोत्राणां

मातृपितामहीप्रपितामहीनाममुकामुकदेवीनांनान्दीमुखीनां तथामुकगोत्राणां पि
तृपितामहप्रपितामहानाममुकामुकशर्मणांनान्दीमुखानां तथामुकगोत्राणांमातामहप्र
मातामहवृद्धप्रमातामहानाममुकामुकशर्मणांनान्दीमुखानां अमुकगोत्रस्यामुकस्य
कर्त्तव्यामुककर्मनिमित्तकर्माभ्युदयिकश्राद्धमहंकरिष्ये इतिसंकल्पयेत् ततोगायत्रीं
त्रिर्जपित्वा ॐ देवताभ्यः पितृभ्यश्चमहायोगिभ्यएवच ॥ नमः स्वाहायैस्वधायैनित्य
मेवनमोनमः इतित्रिर्जपेत् ततः ॐ अद्यामुकगोत्राणांमातृपितामहीप्रपितामहीनाम
मुकाममुकदेवीनां नान्दीमुखीनामाभ्युदयिकश्राद्धसम्बन्धिनोविश्वेदेवाइदमासनंवो
नमः इतिकुशत्रयरूपंसयवमासनंदक्षिणतआरभ्योत्सृजेत् एवंयथोत्तरम् ॥ ॐअद्या
मुकगोत्राणांपितृपितामहप्रपितामहानाममुकामुकशर्मणांनान्दीमुखानां आभ्युदयि
कश्राद्धसम्बन्धिनोविश्वेदेवा इदमासनंवोनमः ॥ ॐ अद्यामुकगोत्राणां मातामह

 जयाचैवसीमंतेचसुखावहा प्राशनेचसमाशीर्णाचूडभद्रासुभद्रिका व्रतबन्धेतुज्ञात
 व्यांईश्वरीभुवनेश्वरी विवाहेषुचकर्त्तव्यासुभद्रासर्वतोमुखी गृहकार्यैप्रतिष्ठायांना
गेन्द्रीपद्मवासिनी जातिकर्म्मणिशिष्टैश्चजयालीलाप्रकीर्तिता तदुपरिपञ्चसप्तवावसो
र्धाराःकर्त्तव्याः नान्यत्रेत्यपिकेचिद्वदन्ति इतिघृतमातृकादिसकलमातृकाणांस्था
पनपूजनप्रकारः ॥ ॥ अथाभ्युदयिकश्राद्धप्रयोगः—तत्रदक्षिणोत्तरक्रमेणद्वाद
शस्थानेषु प्रत्येकमासादितद्रव्योज्वलितप्रदीपोदेशकालौसङ्कीर्त्यांचम्यप्राङ्मुख
उदङ्मुखोवोपविशेत् ॥ सव्येन सर्वकर्म कर्त्तव्यम् ॥ (ऋजवएवकुशाः
तिलकार्येयवाः कर्तव्याः) ततः ॐअपवित्रः पवित्रोवासर्वावस्थांगतोपिवा यः
स्मरेत्पुण्डरीकाक्षंसबाह्याभ्यंतरः शुचिः ॐपुण्डरीकाक्षःपुनात्वितिश्राद्धीयद्रव्या
णिसिञ्चेत् कुशोदकेन ततःकुशयवजलान्यादाय सङ्कल्पः ॐअद्यामुकगोत्राणां

मातृपितामहीप्रपितामहीनाममुकामुकदेवीनांनान्दीमुखीनां तथामुकगोत्राणां पि
तृपितामहप्रपितामहानाममुकामुकशर्मणांनान्दीमुखानां तथामुकगोत्राणांमातामहप्र
मातामहवृद्धप्रमातामहानाममुकामुकशर्मणांनान्दीमुखानां अमुकगोत्रस्यामुकस्य
कर्त्तव्यामुककर्मनिमित्तकर्माभ्युदयिकश्राद्धमहंकरिष्ये इतिसंकल्पयेत् ततोगायत्रीं
त्रिर्जपित्वा ॐ देवताभ्यः पितृभ्यश्चमहायोगिभ्यएवच ॥ नमः स्वाहायैस्वधायैनित्य
मेवनमोनमः इतित्रिर्जपेत् ततः ॐ अद्यामुकगोत्राणांमातृपितामहीप्रपितामहीनाम
मुकाममुकदेवीनां नान्दीमुखीनामाभ्युदयिकश्राद्धसम्बन्धिनोविश्वेदेवाइदमासनंवो
नमः इतिकुशत्रयरूपंसयवमासनंदक्षिणतआरभ्योत्सृजेत् एवंयथोत्तरम् ॥ ॐअद्या
मुकगोत्राणांपितृपितामहप्रपितामहानाममुकामुकशर्मणांनान्दीमुखानां आभ्युदयि
कश्राद्धसम्बन्धिनोविश्वेदेवा इदमासनंवोनमः ॥ ॐ अद्यामुकगोत्राणां मातामह

प्रमातामहवृद्धप्रमातामहानाममुकामुकशर्म्मणां नान्दीमुखानामाभ्युदयिकश्राद्धसम्ब
न्धिनोविश्वेदेवा इदमासनंवोनमः ॥ ॐ अद्यामुकगोत्रेमातरमुकदेविनान्दीमुखि
आभ्युदयिकश्राद्धइदमासनंतेनमः एवंपितामहीप्रपितामहीभ्यामासनंदद्यात् ॐअ
द्यामुकगोत्रपितरमुकशर्मन्नान्दीमुखाभ्युदयिकश्राद्धइदमासनंतेनमः ॥ एवं पिता
महप्रपितामहयोरपि ॥ ॐ अद्यामुकगोत्रमातामहाऽमुकशर्म्मन्नान्दीमुख आभ्यु
दयिकश्राद्धेइदमासनंतेनमः ॥ एवंप्रमातामहवृद्धप्रमातामहयोरपि ॥ ततआवाहन
म् ॥ ॐविश्वान्देवानहमावाहयिष्येइत्युक्त्वा ॥ विश्वेदेवासऽआगंतशृणुतामऽइम
ᳮहवम् ॥ इदम्बर्हिन्निषीदत ॥ उपयामगृहीतोसिविश्वेभ्यस्त्वादेवेभ्यऽएषतेयो
निर्विश्वेभ्यस्त्वादेवेभ्यः ॥ ७ ॥ ३४ ॥ इत्यावाह्य ॥ यवोसियवयास्मद्द्वेषोयव
यारातीर्दिवेत्त्वान्तरिक्षायत्त्वापृथिव्यैत्त्वाशुन्धन्ताँल्लोकाःपितृषदनाः पितृषदनम

सि ॥ ९ ॥ २६ ॥ इतिदेवपात्रेयवान्विकीर्य ॥ विश्वेदेवासआगंतशृणुतामऽइमꣳ हवम् ॥ एदम्बर्हिर्न्निषीदत ॥ उपयामगृहीतोसिविश्वेभ्यस्त्वादेवेभ्यऽएषते योनिर्विश्वेभ्यस्त्वादेवेभ्यः ॥ ७ ॥ ३४ ॥ विश्वेदेवाःशृणुतेमꣳहवम्मे येऽअन्तरिक्षे यऽउपद्यविष्ठ ॥ येऽअग्निजिह्वाऽउतवायजत्राऽआसद्यास्मिन्बर्हिषिमादयद्ध्वम् ॥ ३३ ॥ ५३ ॥ ॐआगच्छंतुमहाभागाविश्वेदेवामहाबलाः ॥ ये यत्र योजिताः श्राद्धेसावधानाभवन्तुते इतिपठेत् ॥ ॐनान्दीमुखान्पितॄनहमावाहयिष्ये इत्युक्त्वा ॥ ॐउशन्तस्त्वानिधीमह्युशन्तःसमिधीमहि ॥ उशन्नुशतऽआवहपितॄन्हविषेऽअत्तवे ॥ २९ ॥ ७० ॥ इतिपितॄनावाह्य ॥ ॐअपहताऽअसुरारक्षाꣳसिवेदिषदः ॥ २ ॥ ॥२९॥ इतिमात्रादिपात्रे यवान्विकीर्य ॥ ॐआयन्तुनः पितरःसोम्यासोग्निष्वात्ताः पथिभिर्द्देवयानैः ॥ अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवन्त्वस्मान् ॥ १९॥५८॥

इति पठित्वा ॥ ततोऽर्घ्यकरणम् ॥ तत्रदेवपूर्वकंसर्वेष्वर्घपात्रेषुपवित्राणिकृत्वा
 ॐशन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शंयोरभिस्रवन्तुनः ॥ ३६ ॥ २२ ॥ इति
देवार्घ्यपात्रेजलंक्षिपेत् ॥ ततोदेवार्घ्यपात्रेषु ॥ ॐ यवोसियवयास्मद्द्वेषोयवयारातीः
दिवेत्वान्तरिक्षायत्वापृथिव्यैत्वाशुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥५ ॥
॥ २६ ॥ मात्रादिपात्रेषु ॥ ॐ यवोऽसिसोमदेवत्योगोसवोदेवनिर्म्मितः॥प्रत्नमद्भिः पृ
क्तः पुष्ट्यानान्दीमुखाँल्लोकान्प्रीणाहिनः स्वाहेति मन्त्रेणयवान्क्षिपेत् ॥ ततः प्रत्ये
कंगन्धपुष्पेतूष्णींक्षिपेत्॥ ततः प्रथमदेवपात्रंवामहस्ते कृत्वा तत्रस्थंपवित्रंभोजनपा
त्रेनिधाय तदुपरिकिंचिदुदकान्तरंदत्त्वा ॥ ॐयादिव्याआपःपयसासंबभूवुर्याऽअंत
रिक्षाऽउतपार्थिवीर्याः॥ हिरण्यवर्णायज्ञियास्तानऽआपःशिवाःशꣳस्योनाःसुहवाभव
न्त्विति पठित्वा ॥ कुशत्रययवजलान्यादाय ॥ॐअद्यामुकगोत्राणां मातृपितामही

प्रपितामहीनाममुकामुकदेवीनांनांदीमुखीनामाभ्युदयिकश्राद्धसम्बन्धिनोविश्वेदेवा
एषवोहस्तार्घोंनमः॥एवमेवपित्रादिश्राद्धदेवेभ्योमातामहादिदेवेभ्यश्चहस्तार्घंदद्यात्॥
ततोमातुरर्घमादाय ॥ पूर्ववतकृत्वा ॥ ॐयादिव्याइत्यादिपठित्वा ॥ कुशादीन्यादा
य ॥ ॐअद्यामुकगोत्रे मातरमुकदेविनान्दीमुखिआभ्युदयिकश्राद्धेएषतेहस्तार्घोंन
मः ॥ एवंपितामहीप्रपितामह्योरपिदद्यात् ॥ ततःपित्राद्यर्घ्यपात्रमादाय ॥ सर्वंपूर्व
वत्कृत्वा ॥ कुशादीन्यादाय ॥ ॐअद्यामुकगोत्र पितरमुकशर्मन्नान्दीमुखाभ्युद
यिकश्राद्धेएषतेहस्तार्घोंनमः एवमेवपितामहादिपञ्चभ्योहस्तार्घंदद्यात् ॥ ततोऽवशि
ष्टजलपवित्रयुतंप्रथमंदेवार्घ्यपात्रमादाय ॥ ॐविश्वेभ्योदेवेभ्यस्स्थानमसीतिदेवास
नदक्षिणभागेउत्तानंस्थापयेत् ॥ एवमपरदेवार्घपात्रद्वयंतत्तदासनदक्षिणभागेउत्तानं
स्थापयेत् ततः पितामहीप्रपितामह्यर्घपात्रद्वयस्थितं पवित्रादिमात्रर्घपात्रेनिधाय ॥

मात्रर्घपात्रंपितामह्यर्घपात्रोपरितत्पात्रंप्रपितामह्यर्घपात्रोपरिधृत्वादक्षिणकरेणादाय
ॐमातृभ्यःस्थानमसीतिमात्रासनवामभागेन्युब्जीकुर्यात॥एवमेवपित्राद्यर्घपात्राणां
मेलनंकृत्वापित्रासनवामभागे॥ ॐपितृभ्यःस्थानमसीतिअर्घपात्राणिन्युब्जीकुर्यात्
॥एवमेवमातामहाद्यर्घपात्राणांमेलनंकृत्वा मातामहासनवामभागे॥ ॐमातामहप्रमा
तामहवृद्धप्रमातामहेभ्यःस्थानमसीतिन्युब्जीकुर्यात् ॥ ततोगंधादिदानंतत्रक्रमः॥
ॐअद्यामुकगोत्राणांमातृपितामहीप्रपितामहीनाममुकामुकदेवीनां नांदीमुखीनामा
भ्युदयिकश्राद्धसंबंधिनोविश्वेदेवा एतानिगंधपुष्पधूपदीपताम्बूलयज्ञोपवीतवासांसि
वोनमः॥एवंपित्रादिदेवेभ्योमाता महादिदेवेभ्यश्चदद्यात्॥ॐअद्यामुकगोत्रेमातरमुक
देविनान्दीमुखिआभ्युदयिकश्राद्धे एतानिगन्धपुष्पधूपदीपतांबूलसिन्दूरवासांसिते ॥ ९० ॥
नमः॥एवंपितामहीप्रपितामहीभ्यामपिगन्धादिदानम् ॥ततःॐअद्यामुकगोत्रापितर

मुकशर्मन्न नान्दीमुखाभ्युदयिकश्राद्धे एतानि गंधपुष्पधूपदीपताम्बूलयज्ञोपवीतवासांसितेनमः ॥ एवंपितामहादिपंचभ्योऽपि गन्धादिदानम् ॥ ततोजलेनसर्वासनानिभोजनपात्रसहितानिचतुष्कोणमण्डलेनवेष्टयेत् ॥ ततःसजलपुटकादौहस्तेनैवसघृतमन्नम् ॥ ॐ अग्नयेकव्यवाहनायस्वाहा ॐसोमायपितृमतेस्वाहा ॥ इत्याहुतिद्वयंजुहुयात् ॥ ततोऽपसव्यंकृत्वा दक्षिणाभिमुखः पातितवामजानुर्मोटकतिलजलान्यादाय ॥ ॐइदमन्नमेतद्भूस्वामिपितृभ्योनमः ॥ इतिभूस्वामिने किंचिदन्नंदद्यात् ततः सव्यंकृत्वा ॥ प्राङ्मुखउदङ्मुखोवाहुतशेषमन्नंदेवपूर्वकपात्रेषु किंचिद्धृत्वा ॥ पिण्डार्थं किंचिदवशेषयेत् ॥ ततोऽन्यदन्नंयथासंभवं सर्वत्रपरिविष्य घृतंजलंतत्रोपनीयपात्रमालभेत् ॥ तत्रक्रमः ॥ उत्तानपाणिभ्यांप्रथमंदेवपात्रंस्पृष्ट्वा ॥ ॐ पृथिवीतेपात्रंद्यौरपिधानं ब्राह्मणस्यमुखेऽअमृतेऽअमृतंजुहोमि स्वाहा इति पठित्वा ॥ ॐ इदं

प्राति० विष्णुर्विचक्रमेत्रेधानिदधे पदम् ॥ समूढमस्य पाँ सुरे स्वाहा ॥ ५ ॥ १५ ॥ कृष्ण सं०
॥ ५१ ॥ हव्यमिदंरक्ष मदीयमितिपठित्वा ॥ ॐइदमन्नमित्यन्ने ॥ ॐ इमाआपइतिजले ॥
ॐइदमाज्यमितिघृते ॥ ॐइदंहविरितिपुनरन्ने ॥ इतिदक्षिणांगुष्ठमारोप्य ॥ ॐयवो
सियवयास्मद्द्वेषोयवयारातीर्द्दिवेत्वान्तरिक्षायत्त्वापृथिव्यैत्त्वाशुन्धन्ताँल्लोकाः पितृ
षदनाः पितृषदनमसि ॥ ५ ॥ २६ ॥ इतियवान्विकीर्य्य कुशादीन्यादाय ॥ ॐअद्यामु
कगोत्राणांमातृपितामहीप्रपितामहीनाममुकामुकदेवीनांनान्दीमुखीनामाभ्युदयिक
श्राद्धसम्बन्धिनोविश्वेदेवाइदमन्नंसोपकरणंवोनमः॥ यद्येकमेवपात्रंभवतितदावामेन
पाणिनापात्रमत्यजन्नेवइदंविष्णुरित्यादिपठित्वा॥यवप्रक्षेपपर्यन्तंकृत्वा॥कुशादीन्या
दाय ॥ पित्राद्युल्लेखेनपित्रादिदेवेभ्योप्यन्नमुत्सृजेत्॥एवमेवमातामहादिदेवेभ्यः भिन्न
भिन्नपात्रपक्षे ॥ॐपृथिवीतेपात्रमित्यादीनांसर्वेषामावृत्तिः॥ततोमातृपात्रमुत्तानाभ्या ॥ ५१ ॥

मेवकराभ्यांस्पृष्ट्वा ॐपृथिवीतेपात्रमित्यादि ॥ इदंविष्णुरितिपठित्वा॥ ॐकृष्णकव्य
मिदंरक्षमदीयम् ॥ ॐइदमन्नमित्यन्ये ॥ ॐइमाआपइतिजले॥ ॐ इदमाज्यमिति
घृते ॥ ॐइदंहविरितिपुनरन्ने दक्षिणकराङ्गुष्ठमारोप्य॥ ॐ अपहताऽअसुरारक्षांᳫसि
सिवेदिषदइत्यन्नोपरि यवान्विकीर्य्य ॥ ॐ अद्यामुकगोत्रे मातरमुकीदेविनान्दी
मुख्याभ्युदयिकश्राद्धइदमन्नं सोपकरणं ते नमः ॥ एवं पात्रालम्भनादिकं कृत्वा ॥
प्रत्येकं पितामहीप्रपितामहीभ्यामपि दद्यात् ॥ एवं पितृपात्रमालभ्य ॥
ॐ पृथिवीतेपात्रमित्यादि पठित्वा ॥ पूर्ववत्सर्वंकृत्वा ॥ ॐ अद्यामुकगो
त्रपितरमुकशर्मन्नान्दीमुखाभ्युदयिकश्राद्धइदमन्नं सोपकरणंतेनमः ॥ इतिपित्रेन्न
मुत्सृजेत् ॥ एवंपितामहादिभ्यः पञ्चभ्योऽपिप्रत्येकमन्नमुत्सृजेत् ॥ ततःप्राञ्जलिः
ॐ अन्नहीनंक्रियाहीनं विधिहीनंचयद्भवेत ॥ तत्सर्वमच्छिद्रमस्त्विति जपेत ॥

दर्भेषूपविश्य ॥ गायत्रींत्रिर्जपित्वा ॥ ॐमधुमधुमध्वितिजपेत् ॥ मधुवाताऽऋता
यते मधुक्षरन्तिसिन्धवः ॥ माध्वीर्न्नःसन्त्वोषधीः ॥ १३ ॥ २७ ॥ मधुनक्तमुतोष
सोमधुमत्पार्थिवꣳरजः ॥ मधुद्यौरस्तुनःपिता ॥ १३ ॥ २८ ॥ मधुमान्नोवनस्प
तिर्म्मधुमाँ२ऽअस्तुसूर्यः ॥ माध्वीर्गावोभवन्तुनः ॥ १३ ॥ २९ ॥ इत्यादिऋचःपठित्वा ॥
अन्यानपिपितृमन्त्रान् उदीरतामवरइत्यादीन्जपेत् ॥ अन्यानितुपुरुषसूक्तादीनि
पवित्राणिजपेत् ॥ ततःप्रागग्रकुशत्रयंभूमावास्तीर्य ॥ जलेनप्रोक्ष्य ॥ जलप्रोक्षितस
यवघृतमन्नंकुशादिनादाय ॥ ॐअग्निदग्धाश्चयेजीवायेथदग्धाः कुलेमम ॥ भूमौदत्ते
नतृप्यन्तुतृप्तायान्तुपरांगतिमितिमन्त्रेणकुशोपरिविकिरेत् ॥ ततआचम्यहरिंस्मृत्वा
गायत्रींत्रिर्जपेत् ॥ चतुरस्त्रांपिण्डयोग्यांभूमिंपरिष्कृत्य उत्तरोत्तरक्रमेणस्थानत्रये
प्रादेशमात्रंपरिमाय ॥ ततःप्रागग्रारेखांदर्भपिञ्जुलीमूलेन ॥ ॐ अपहताऽअसुरारक्षां

ॐसिवेदिषदः ॥ २ ॥ २९॥इतिकुर्यात् ॥ ततःप्रत्येकंरेखात्रयोपरि येरूपाणिप्रतिमु
ञ्चमानाऽअसुराःसन्तःस्वधयाचरन्ति ॥ परापुरोनिपुरोयेभरन्त्यग्निष्टाँल्लोकात्प्र
णुदात्यस्मात् ॥ २ ॥ ३० ॥ इतिमन्त्रेणाङ्गारान् भ्रामयेत् ॥ तदुपरिप्रत्ये
कंकुशत्रयमास्तीर्य ॥ ॐदेवताभ्यःपितृभ्यश्चमहायोगिभ्यएवच ॥ नमः
स्वाहायैस्वधायैनित्यमेवनमोनमः ॥ इतित्रिर्जपित्वा ॥ प्रत्येकमवनेजनंद
द्यात् ॥ तत्रक्रमः ॥ यवजलगन्धपुष्पैर्नवपात्राणिपूरयित्वा पात्रमेकंवामकरे
कृत्वा ॥ कुशादीन्यादाय ॐअद्यामुकगोत्रेमातरमुकदेविनान्दीमुखिआभ्युद
यिकश्राद्धेपिण्डस्थानेऽवनेनिक्ष्वतेनमः इतिसर्वदक्षिणकुशत्रयमूलेमात्रेऽवनेजनंद
द्यात्॥किञ्चिज्जलमवशेषयेत् ॥ एवमेवपात्रान्तरमादाय ॥ तत्कुशमध्येपितामह्यै
तत्कुशत्रयाग्रेप्रपितामह्यैच अवनेजनंदद्यात्॥ ततश्चापरपात्रमादाय॥ कुशादींश्चा

३०

दाय ॥ ॐअद्यामुकगोत्रपितरमुकशर्मन्नान्दीमुखाभ्युदयिकश्राद्धेपिण्डस्थानेऽवने
॥ ९३ ॥ निक्ष्वतेनमः इतिमध्यस्थितकुशत्रयमूलेपित्रेऽवनेजनंदद्यात् ॥ एवं तत्कुशत्रयम
ध्याग्रयोः पितामहप्रपितामहयोरवनेजनंदद्यात् ॥ ततः सप्तमपात्रमादायकुशादीं
श्चादाय ॥ ॐअद्यामुकगोत्रमातामहामुकशर्मन्नांदीमुखाभ्युदयिकश्राद्धेपिण्डस्थाने
ऽत्रावनेनिक्ष्वतेनमः ॥ इत्यपरकुशत्रयमूलेमातामहायावनेजनंदद्यात्॥एवंप्रमातामह
वृद्धप्रमातामहयोरपि ततोयवदधिबदरघृतमिश्रान्ननवपिण्डान्निर्माय ॥ एकंपिण्डं
कुशादींश्चादाय ॥ ॐअद्यामुकगोत्रे मातरमुकदेवि नान्दीमुखि आभ्यु
दयिकश्राद्धे एषपिण्डस्ते नम इति तदवनेजनस्थाने पिण्डंदद्यात् ॥ एवमेव
पितामहीप्रपितामहीभ्यांस्वीयस्वीयावनेजनस्थाने पिण्डंदद्यात् ॥ ततश्चतुर्थ ॥ ९३ ॥
पिण्डमादाय ॥ ॐअद्यामुकगोत्रपितरमुकशर्मन्नान्दीमुखाभ्युदयिकश्राद्धेएष

तेपिण्डोनमः ॥ इत्यवनेजनस्थानेपित्रेपिण्डंदद्यात् ॥ एवमेवपितामहादिपञ्चभ्यस्त
त्तदवनेजनस्थानेषुप्रत्येकंपञ्चपिण्डान्दद्यात् ॥ ततोदर्भमूलेकरंप्रोक्ष्याचम्यहरिंस्मृ
त्वा ॥ ॐअत्रमातरोमादयध्वँय्यथाभागमावृषायद्ध्वम् ॥ २ ॥ ३१ ॥ इतिपठित्वा ॥
उदङ्मुखीभूयश्वासंनियम्यतेनैवयथापरावर्त्तयन् ॥ ॐअमीमदन्तमातरोयथाभाग
मावृषायिषत ॥ २ ॥ ३१ ॥ इतिजपेत् ॥ एवमत्रपितरोमादयध्वँय्यथाभागमावृषाय
ध्वम् ॥ २ ॥ ३१ ॥ इतिजप्त्वा ॥ उदङ्मुखीभूयश्वासंनियम्यतेनैवयथामुखंपरावर्त्तय
न् ॥ ॐअमीमदन्तपितरोयथाभागमावृषायिषत ॥ २ ॥ ३१ ॥ इतिजपेत् ॥ एवमे
वमातामहादिपक्षेमन्त्रजपः ॥ ततोऽवनेजनावशिष्टजलेनप्रत्यवनेजनंदद्यात् ॥ तत्रक्र

१ अत्र पितामहप्रपितामहपिण्डदानानन्तरं मातामहप्रमातामहवृद्धप्रमातामहेभ्यः सपत्नीकेभ्यः एवमेव त्रीन्पिण्डान् दद्यात् पूर्ववत्क्रमेण ॥

मः ॥ ॐअद्यामुकगोत्रेमातरमुकदेविनान्दीमुख्याभ्युदयिकश्राद्धेपिण्डेप्रत्यवनेनि
क्ष्वतेनमः ॥ इतितत्पिण्डोपरिदद्यात् ॥ एवंपितामहीप्रपितामहीभ्यांतथा ॥ ॐअद्या
मुकगोत्रपितरमुकशर्मन्नान्दीमुखाभ्युदयिकश्राद्धपिण्डेऽत्रप्रत्यवनेनिक्ष्वतेनमः ॥इति
पिण्डोपरिप्रत्यवनेजनंदद्यात् ॥ एवमेवतत्तत्पिण्डोपरिपितामहादिपञ्चभ्योदद्यात् ॥
ततोनीवींविस्रंस्याचम्यहरिंस्मृत्वा ॥ सूत्राण्यादाय ॥ ॐ नमोवोमातरोरसा
यनमोवोमातरः शोषाय नमोवोमातरोजीवायनमोवोमातरः स्वधायै नमोवोमात
रोघोरायनमोवोमातरोमन्यवेनमोवोमातरोमातरो गृहान्नोमातरोदत्तसतोवोमातरो
देष्मएतद्वोमातरः ॥ २ ॥ इतिमातॄणांपिण्डत्रयोपरिसूत्रंदद्यात् ॥ ॐ नमो
वः पितरोरसायनमोवः पितरः शोषाय नमोवः पितरोजीवायनमोवः पितरः
स्वधायै नमोवः पितरोघोरायनमोवः पितरोमन्यवेनमोवः पितरः पितरोन

मोवोगहान्नंःपितरोदत्तमतोवः पितरोदेष्मैतद्वः पितरोवासुआधत्त ॥ २ ॥ ३२ ॥ इत्यने
नपित्रादिपिण्डषट्कोपरिप्रत्येकं सूत्रंदद्यात् ॥ ततः कुशत्रययवजलान्यादाय ॥ ॐ
अद्यामुकगोत्रेमातरमुकदेविनान्दीमुखिआभ्युदयिकश्राद्धेपिण्डे एतत्तेवासोनमः ॥
इतिसूत्रमुत्सृजेत् ॥ एवमेवपितामहीप्रपितामहीभ्याम् ॥ ॐअद्यामुकगोत्रपितरमु
कशर्मन्नान्दीमुखाभ्युदयिकश्राद्धेपिण्डेएतत्तेवासोनमः ॥ एवंपितामहादिपञ्चभ्यः
सूत्रंदद्यात् ॥ ततोगन्धपुष्पधूपदीपताम्बूलादिभिः प्रत्येकंपिण्डमभ्यर्च्य ॥ ॐशिवा
आपः सन्त्वितिजलम् ॥ ॐसौमनस्यमस्त्वितिपुष्पम् ॥ ॐअक्षतंचारिष्टमास्त्व
तितण्डुलान्प्रत्येकंपात्रेषुनिक्षिप्य ॥ कुशादीन्यादाय ॥ ॐअद्यामुकगोत्रामाताऽमु
कदेवीनान्दीमुखी आभ्युदयिकश्राद्धेदत्तैतदन्नपानादिभिः प्रीयतामित्यक्षय्योदक
मुत्सृजेत् ॥ एवंपितामह्याः प्रपितामह्याश्चाक्षय्योदकंदद्यात् ॥ तथाद्यमुकगोत्रःपि

ताऽमुकशर्मानान्दीमुख आभ्युदयिकश्राद्धे दत्तैतदन्नपानादिभिः प्रीयतामितिपित्रे
 एवंपितामहादिपञ्चभ्योऽक्षय्योदकंदद्यात् ततः ॐअघोरामातरःसन्त्वितिमातृपि
ण्डत्रयोपरिपूर्वाग्रांजलधारांदद्यात् ॥ ॐअघोराःपितरःसन्त्वितिपित्रादिपिण्डषट्कोप
रिजलधारां दद्यात् ॥ ततः ॐगोत्रन्नोवर्द्धतां दातारोनोभिवर्द्धन्ताम् ॥ वेदाः सन्तति
रेवच ॥ श्रद्धाचनोमाव्यगमद्बहुदेयंचनोस्त्विति ॥ अन्नंचनोबहुभवेदतिथींश्चलभे
महि ॥ याचितारश्चनःसन्तुमाचयाचिष्मकंचन॥एताःसत्याआशिषः सन्तुइत्याशीःप्रा
र्थयेत् ॥ ततःसपवित्रकुशत्रयाणि प्रत्येकंमात्रादिपिण्डत्रयेमातामहादिपिण्डत्रयेच
धृत्वा ॥ ॐऊर्ज्जंवहन्तीरमृतंघृतंपयःकीलालंपरिस्रुतम् ॥ स्वधास्थतर्प्पयतमेमा
तॄः ॥२॥३४॥ इतिमात्रादिपिण्डोपरिजलधारांदद्यात् ॥ ततस्तथैव ॥ ॐऊर्ज्जंवहन्ती
रित्यादिपठित्वापित्रादिपिण्डषट्कोपरिजलधारांदद्यात् ॥ ॐ ऊर्ज्जंवहन्तीरमृतंङ्घृत

म्पयः कीलालंम्परिस्रुतम् ॥ स्वधास्थंतर्प्पयंतमेपितॄन् ॥ २ ॥ ३४ ॥ ततःपिण्डानाघ्रा
यउत्थाप्यापिण्डाधारकुशानुल्मुकंचवह्नौक्षिपेत् ॥ अर्घपात्राण्युत्तानानिकृत्वादक्षि
णांदद्यात् ॥ दक्षिणाद्रव्यम् फलमूलेफलंमूलंवाप्रत्येकम् ॥ तत्रक्रमः ॥ ॐअद्यामुक
गोत्राणांमातृपितामहीप्रपितामहीनाममुकामुकदेवीनां नान्दीमुखीनामाभ्युदयिकश्रा
द्धसम्बन्धिनांविश्वेषांदेवानांकृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिदंसुवर्णमग्निदैवतमिमे
फलमूलेचवनस्पतिदैवतेयथायथंनामगोत्रायब्राह्मणायदक्षिणांदातुमहमुत्सृजे ॥ एवं
पित्रादिश्राद्धसम्बन्धिविश्वेदेवश्राद्धदक्षिणांमातामहादिश्राद्धसम्बन्धिविश्वेदेवश्राद्धद
क्षिणांचदद्यात् ॥ ॐअद्यामुकगोत्रायामातुरमुकदेव्यानान्दीमुख्याः कृतैतदाभ्यु
यिकश्राद्धप्रतिष्ठार्थमिदंसुवर्णमग्निदैवतमिमेफलमूलेचवनस्पतिदैवतेइत्यादि ॥ एवं

१ पिण्डांश्चगोऽजविप्रेभ्योदद्यादग्नौजलेपिवा इतिवचनात् ।

पितामहीप्रपितामह्योरपि ॥ ॐअद्यामुकगोत्रस्यपितुरमुकशर्म्मणोनान्दीमुखस्यकृतै
तदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमेफलमूलेवनस्पतिदैवतइत्यादि ॥ एवंपितामहादि
श्राद्धदक्षिणांदद्यात् वाजेवाजेवतवाजिनोनोधनेषुविप्राऽअमृताऽऋतज्ञाः ॥ अस्य
मध्वंःपिबतमादयध्वंन्तृप्तायातपथिभिर्देवयानैः ॥ १ ॥ १८ ॥ वाजेवाजइत्यादिनामा
त्रादिविसर्जनम् ॥ ॐविश्वेदेवाः प्रीयन्तामितिदेवविसर्ज्जनम् ॥ ततोदेवताभ्य
इतित्रिर्जपः ॥ दीपनिर्वापणम् ॥ आचमनम् ॥ प्रमादात्पाठः ॥ श्राद्धीयवस्तु
ब्राह्मणाय दद्यात् ॥ इत्याभ्युदयिकश्राद्धपद्धतिः समाप्ता ॥ ॥ अथसंक्षिप्त
नान्दीश्राद्धविधिप्रारम्भः ॥ आचम्यप्राणानायम्य ॥ कर्त्तव्येऽस्मिन्पूर्वसंकल्पितेकर्म्म
णिसांकल्पिकनान्दीश्राद्धमहंकरिष्ये ॥ एतच्छ्राद्धीयाग्रभागफलपुष्पाणियज्ञेश्व ॥ ५६ ॥
राय विष्णवेनमः ॥ यज्ञेश्वरोहव्यसमस्तकव्यभोक्ताव्ययात्माहरिरीश्वरोत्र ॥ त

त्सान्निधानादपयान्तिसद्यो रक्षांस्यशेषाण्यसुराश्चसर्वे ॥ सत्यवसुसंज्ञकाविश्वेदेवाः
नान्दीमुखाः ॐभूर्भुवः स्वः इदंवः पाद्यंपादावनेजनम् ॥ पादप्रक्षालनंवृद्धिः ॥
अमुकगोत्राः मातृपितामहीप्रपितामह्यः नान्दीमुख्यः ॐभूर्भुवः स्वः इदं वः पाद्यं
पादावनेजनम् ॥ पादप्रक्षालनंवृद्धिः॥ अमुकगोत्राः पितृपितामहप्रपितामहाःनान्दीमु
खाः ॐभूर्भुवःस्वः इदं वः पादावनेजनंपादप्रक्षालनंवृद्धिः ॥ द्वितीयगोत्राः मातामह
प्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐभूर्भुवः स्वः इदं वः पाद्यंपा
दावनेजनंपादप्रक्षालनंवृद्धिः ॥ सत्यवसुसंज्ञकानांविश्वेषांदेवानांनान्दीमुखानाम्
ॐभूर्भुवः स्वः इदमासनंसुखासनंस्वाहा ॥नान्दीश्राद्धेक्षणौक्रियेताम् ॥ ॐतथाप्राप्नु
तांभवन्तौप्राप्नुवाव ॥ अमुकगोत्रामातृपितामहीप्रपितामह्यः नान्दीमुख्यः ॐभूर्भुवः
स्वः इदमासनंस्वाहानान्दीश्राद्धेक्षणौक्रियेताम् ॥ ॐतथातथाप्राप्नुतांभवन्तौप्राप्नुव ॥ ना

प्रति० न्दीश्राद्धे अमुकगोत्राः पितृपितामहप्रपितामहाः नान्दीमुखाः ॐभूर्भुवः स्वः इदमास सं०
॥ ५७ ॥ नं स्वाहा नान्दीश्राद्धेक्षणौक्रियेताम् ॥ ॐतथा प्राप्नुतांभवन्तौप्राप्नुवाव ॥ द्वितीयगो
त्रामातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीका नान्दीमुखाः ॐभूर्भुवः स्वः इद
मा०क्षणौक्रियेताम् ॥ ॐतथाप्राप्नुतांभवन्तौप्राप्नुवाव ॥ सत्यवसुसंज्ञकेभ्योविश्वेभ्यो
देवेभ्यः ॐभूर्भुवः स्वः इदंगन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः ॥ अमुकगोत्राभ्यो
मातृपितामहीप्रपितामहीभ्योनान्दीमुखीभ्यः ॐभूर्भुवः स्वः इदं गन्धाद्यर्चनंस्वाहास
म्पद्यतां वृद्धिः ॥ अमुकगोत्रेभ्यःपितृपितामहप्रपितामहेभ्योनान्दीमुखेभ्यः ॐभू
र्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतांवृद्धिः ॥ द्वितीयगोत्रेभ्यः मातामहप्रमा
तामहवृद्धप्रमातामहेभ्यः सपत्नीकेभ्यः नान्दीमुखेभ्यः ॐभूर्भुवः स्वः इदं गन्धाद्य ॥ ५७ ॥
र्चनं स्वाहा सम्पद्यतांवृद्धिः ॥ सत्यवसुसंज्ञकाविश्वेदेवानान्दीमुखाः ॐभूर्भुवः स्वः

इदंवोयुग्मब्राह्मणभोजनपर्याप्तंदास्यमानमन्नममृतरूपेण स्वाहा सम्पद्यतांवृद्धिः ॥ अमुकगोत्रामातृपितामहीप्रपितामह्यः नान्दीमुख्यः ॐभूर्भुवः स्वः इदं वोयुग्म ब्राह्मणभोजनपर्याप्तंदास्यमानमन्नममृतरूपेण स्वाहा सम्पद्यतांवृद्धिः ॥ अमुकगोत्राःपितृपितामहप्रपितामहानान्दीमुखाः ॐभूर्भुवः स्वः इदंवोयुग्मब्राह्मणभोजनपर्याप्तंदास्यमानमन्नममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः ॥ द्वितीयगोत्रामातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकानान्दीमुखाः ॐभूर्भुवःस्वःइदंवोयुग्मब्राह्मणभोजनपर्याप्तंदास्यमानमन्नममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः॥ स्वस्तिनऽइन्द्रो॰इतिमन्त्रं पठेत् ॥ अस्यनान्दीश्राद्धस्यफलप्रतिष्ठासिद्ध्यर्थंसत्यवसुसंज्ञकेभ्योविश्वेभ्योदेवेभ्योनान्दीमुखेभ्यः अमुकगोत्राभ्यः मातृपितामहीप्रपितामहीभ्यः नान्दीमुखीभ्यः ॥ अमुकगोत्रेभ्यः पितृपितामहप्रपितामहेभ्यः नान्दीमुखेभ्यः द्वितीयगोत्रेभ्यः

मातामहप्रमातामहवृद्धप्रमातामहेभ्यः सपत्नीकेभ्यः द्राक्षामलकयवमूलनिष्क्रायि
णीं दक्षिणां दातुमहमुत्सृजे ॥ मातापितामहीचैवतथैवप्रपितामही ॥ पितापितामहश्चै
वतथैवप्रपितामहः ॥ मातामहस्तत्पिताचप्रमातामहकादयः॥एते भवन्तु मे प्रीताःप्रय
च्छंतु च मङ्गलम् ॥ इडामग्नेपुरुदंशंसनिंगोःशश्वत्तमंहवमानायसाध ॥ स्यान्नःसूनु
स्तनयोविजावाग्नेसातेसुमतिर्भूत्वस्मेइतिवाद्यम् इडामग्नेऽअधिधारया २ यिम्मास्त्वा
न्निष्क्रन्नपूर्वचितोनिकारिणःक्षत्रमग्नेसयममस्तुतुभ्यमुपसुतावर्द्धतांतेअनिष्टतः॥ नान्दी
श्राद्धंसम्पन्नंसुसम्पन्नम् ॥ अस्यनान्दीश्राद्धस्यकर्माङ्गदेवताः प्रीयंताम् ॥ इतिना
न्दीश्राद्धकर्मसमाप्तम् ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

इति श्रीराज्ञीयरायपुरनिवासिनानकचन्दात्मजरामलालपण्डितविरचितेप्रतिष्ठासङ्ग्रहग्रन्थे

प्रथमः किरणः समाप्तः ॥ श्रीशिवार्पणमस्तु ॥ शुभंभवतु ॥

॥ इति नांदीश्राद्धकर्म समाप्तम् ॥

॥ श्रीगणेशायनमः ॥ ॥ अथमंडपमध्यवर्तिवेदीनांपूजनम् ॥ तत्रप्रथमंसर्वतोभद्र
मंडलदेवतानांपूजनंतदनंतरमाग्निस्थापनं तदनंतरंवास्तुमंडलदेवतानांपूजनं तदनं
तरं अधिदेवताप्रत्यधिदेवतासहितग्रहादिपूजनं तदनंतरंयोगिनीक्षेत्रपालादिपूजन
मितिक्रमंकेचिद्वर्णयंति ॥ वयंतुअग्निस्थापनानंतरंवास्तुमंडलस्थापितदेवतानांपूजनं
तदनंतरंसूर्यादिग्रहपूजनं तदनंतरंयोगिन्यादिपूजनंकृत्वा पश्चात् सर्वतोभद्रमंडल
स्थापितदेवतानांपूजनंकृत्वा तस्यामेवमध्यवेद्यांप्रधानदेवतापूजनमितिक्रमंब्रूमः ॥
अंगदेवतापूजनानंतरमेवसर्वत्रप्रधानदेवतायाः पूजनस्यप्रसिद्धत्वादितिसुधीभिर्विभा
वनीयम् ॥ अथाचार्य्यःस्वकुंडमागत्यतत्पश्चिमेप्राङ्मुखउपविश्यप्राणानायम्यदेश
कालौसंकीर्त्य शिवादिप्रतिष्ठाकर्म्माङ्गत्वेन परिसमूहनाद्यग्निप्रतिष्ठांकरिष्ये इतिसं
कल्प्य ततोयथापरिमितेतुषकेशशर्करादिरहितेस्थंडिले कुण्डेवाचतुरस्रांभूमिंकुशैः

॥ इति नांदीश्राद्धकर्म समाप्तम् ॥

॥ श्रीगणेशायनमः ॥ ॥ अथमंडपमध्यवर्तिवेदीनांपूजनम् ॥ तत्रप्रथमंसर्वतोभद्र मंडलदेवतानांपूजनंतदनंतरमग्निस्थापनं तदनंतरंवास्तुमंडलदेवतानांपूजनं तदनं तरं अधिदेवताप्रत्यधिदेवतासहितग्रहादिपूजनं तदनंतरंयोगिनीक्षेत्रपालादिपूजन मितिक्रमंकेचिद्वर्णयंति ॥ वयंतुअग्निस्थापनानंतरंवास्तुमंडलस्थापितदेवतानांपूजनं तदनंतरंसूर्यादिग्रहपूजनं तदनंतरंयोगिन्यादिपूजनंकृत्वा पश्चात् सर्वतोभद्रमंडल स्थापितदेवतानांपूजनंकृत्वा तस्यामेवमध्यवेद्यांप्रधानदेवतापूजनमितिक्रमंब्रूमः ॥ अंगदेवतापूजनानंतरमेवसर्वत्रप्रधानदेवतायाः पूजनस्यप्रसिद्धत्वादितिसुधीभिर्विभा वनीयम् ॥ अथाचार्य्यःस्वकुंडमागत्यतत्पश्चिमेप्राङ्मुखउपविश्यप्राणानायम्यदेश कालौसंकीर्त्य शिवादिप्रतिष्ठाकर्म्माङ्गत्वेन परिसमूहनाद्यग्निप्रतिष्ठांकरिष्ये इतिसं कल्प्य ततोयथापरिमितेतुषकेशशर्करादिरहितेस्थंडिले कुण्डेवाचतुरस्त्रांभूमिंकुशैः

परिसमुह्यतान्कुशानैशान्यांपरित्यज्य गोमयोदकेनोपलिप्य स्फ्येनस्रुवमूलेनवाप्रा
गग्रप्रादेशमात्रमुत्तरोत्तरक्रमेणत्रिरुल्लिख्य उल्लेखनक्रमेणैवानामिकांगुष्ठाभ्यां मृद
मुद्धृत्यजलेनाभ्युक्ष्य ततः कांस्यपात्रस्थंवह्निंद्वितीयकांस्यपात्रेणापिहितंप्रत्यङ्मु
खमुपसमाधायाग्निर्मूर्द्धेतिमंत्रेणस्थापयेत् ॥ अग्निर्मूर्द्धादिवः ककुत्पतिः पृथिव्याऽ
अयम् ॥ अपाꣳरेताꣳसिजिन्वति ॥ ॐइन्द्रस्यत्वौजसासादयामि ॥ १३ ॥ १४ ॥
इत्यग्निंप्रतिष्ठापयेत् ॥ अथप्रसंगात्कुशकण्डिकापिकथ्यते ॥ अद्यकर्त्तव्यशिवादि
प्रतिष्ठांगभूतेस्मिन्होमकर्म्मणिकृताकृतावेक्षणरूपब्रह्मकर्म्मकर्त्तुममुकगोत्रोत्पन्नमसु
कशर्माणंब्राह्मणमेभिश्चन्दनपुष्पाक्षतफलद्रव्यवासोभिर्ब्रह्मत्वेनत्वामहंवृणे वृतोस्मी
तिप्रतिवचनम् ॥ ॐव्रतेनदीक्षामाप्नोति दीक्षयाप्नोतिदक्षिणाम् ॥ दक्षिणाश्रद्धामाप्नोति ॥ ६१ ॥
श्रद्धयासत्यमाप्यते ॥ यथाविहितंकर्म्मकुरु यथाज्ञानंकरवाणि ततोऽग्नेर्दक्षिणतःपरि

स्तरणभूमिंपरित्यज्य ब्रह्मणेआसनंदत्त्वा तदुपरिप्रागग्रान्कुशानास्तीर्यब्रह्माणमाग्नि
प्रदक्षिणक्रमेणानीय अत्रत्वंमेब्रह्माभवेत्यभिधायकल्पितासनेउपवेशयेत् ततः प्रणी
तापात्रंपुरतः कृत्वाजलेनापूर्यकुशैराच्छाद्यब्रह्मणोमुखमवलोक्याग्नेरुत्तरतःकुशोपरि
निदध्यात् ॥ ततःपरिस्तरणम् बर्हिषश्चतुर्थभागमादाय आग्नेयादीशानांतं ब्रह्मणोऽग्नि
पर्यंतं नैर्ऋत्याद्वायव्यांतं अग्नितः प्रणीतापर्य्यंतं ततोऽग्नेरुत्तरतःपश्चिमदिशिपवित्रच्छे
दनार्थंकुशत्रयं पवित्रकरणार्थंसाग्रमनंतर्गर्भंकुशपत्रद्वयम् प्रोक्षणीपात्रम् आज्य
स्थालीचरुस्थालीसंमार्जनकुशत्रयम् उपयमनार्थंवेणीरूपकुशत्रयम् प्रादेशमिताःस
मिधस्तिस्रःस्रुवःआज्यंषट्पंचाशदुत्तरमुष्टिशतद्वयावच्छिन्नतंडुलपूर्णपात्रंपवित्रच्छेद
नकुशानांपूर्वपूर्वदिशिक्रमेणासादनीयम् तस्यामेवदिशिअसाधारणवस्तून्युपकल्प
नीयानि अथकृतपवित्रच्छेदनकुशैः पवित्रेछित्त्वा प्रादेशमितपवित्रकरणंपवित्रहस्तेन

प्रणीतोदकंत्रिःप्रोक्षणीपात्रेनिधाय अनामिकांगुष्ठाभ्यामुत्तराग्रेपवित्रेगृहीत्वा त्रिरुत्पवनंततःप्रणीतोदकेनप्रोक्षणीप्रोक्षणं प्रोक्षणीजलेनयथासादितवस्तुसेचनं अग्निप्रणीतयोर्मध्येप्रोक्षणीपात्रंनिधाय आज्यस्थाल्यामाज्यंनिरूप्य ततोऽधिश्रयणं ततस्तृणंप्रज्वाल्याग्निप्रदक्षिणंभ्रामयित्वावह्नौतत्प्रक्षिप्य स्रुवप्रतपनंकृत्वा संमार्जनकुशानामग्रैरग्रंमध्यैर्मध्यंमूलैर्मूलंस्रुवसंमार्जनंकृत्वाप्रणीतोदकेनाभ्युक्ष्य पुनःप्रतप्यस्रुवंदक्षिणतोनिदध्यात् ततआज्यस्याग्नेरवतारणम् ॥ ततआज्येप्रोक्षणीवदुत्पवनं आज्यमवेक्ष्यसत्यपद्रव्येतन्निरसनम् पुनःप्रोक्षण्युत्पवनं ततउपयमनकुशान्वामहस्तेकृत्वा उत्तिष्ठन् प्रजापतिंमनसाध्यात्वातूष्णीमग्नौघृताक्ताः समिधस्तिस्रःप्रक्षिपेत् ततउपविश्यसपवित्रप्रोक्षण्युदकेनप्रदक्षिणक्रमेणाग्निपर्युक्षणंकृत्वा प्रणीतापात्रे

॥ अथ मंडपमध्यवर्तिवेदिपूजनप्रारंभः ॥

पवित्रेनिधाय पातितदक्षिणजानुः कुशाग्रेणब्रह्मणान्वारब्धः समिद्धतमेऽग्नौ स्रुवे
णाज्याहुतीर्जुहुयात् तत्राघारादारभ्यद्वादशाहुतिषुतत्तदाहुत्यनंतरंस्रुवावस्थितहुतशेष
स्यप्रोक्षणीपात्रेप्रक्षेपः अथहोमः प्रथममाज्याहुतीर्दद्यात् ॐप्रजापतयेस्वाहा इदंप्रजा
पतयेनमम इतिमनसा ॐइंद्रायस्वाहा इदमिन्द्राय० इत्याघारौ ॐअग्नयेस्वाहाइद
मग्नये० ॐसोमायस्वाहाइदंसोमाय० इत्याज्यभागौ ॐभूःस्वाहा इदमग्नये०
ॐभुवः स्वाहाइदंवायवे० ॐस्वःस्वाहाइदंसूर्याय० एतामहाव्याहृतयः ॐत्वन्नोऽ
अग्नेवरुणस्यविद्वान्देवस्यहेडोऽ अवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमः शोशुचानोवि
श्वाद्वेषाᳬंसिप्रमुमुग्ध्यस्मतस्वाहा २९ ॥ ३॥इदमग्नीवरुणाभ्यांनमम ॐसत्वन्नोऽ
अग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ॥ अवयक्ष्वनोवरुणᳬंरराणोवीहिमृडीकᳬं
सुहवोनएधिस्वाहा ॥ २१ ॥ ४ ॥ इदमग्नीवरु० ॥ अयाश्चाग्नेस्यनभिशास्तिपाश्चसत्य

36

मित्वमयाअसि ॥ अयानोयज्ञंवहास्ययानोधेहिभेषजꣳस्वाहा इदमग्नये० ३ ॐयेते
शतंवरुणयेसहस्रंयज्ञियाः पाशांविततांमहान्तः ॥ तेभिर्न्नोऽअद्यसवितोत्तविष्णुर्विश्वेमु
ञ्चन्तुमरुतः स्वर्क्काः स्वाहा इदंसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यः स्वर्क्केभ्यो० ४ ॥
ॐउदुत्तमं वरुणपाशमस्मदवाधमंविमध्यमꣳश्रथाय ॥ अथावयमादित्यव्रतेतवानां
गसोऽअदितयेस्यामस्वाहा ॥१२ । १२॥ इदंवरुणाय० ५ इतिद्वादशाहुतयः ॥अथाग्नि
प्रोक्षणमंत्रः ॥ ॐआपःशिवाः शिवतमाः शान्ताः शान्ततमाः तास्तेकृण्वन्तुभेषजम्
इत्यनेनाग्निप्रोक्षणम् ॥ ततोगोक्षीरेणनीवारचरुस्थाप्यदेवताकंश्रपयित्वाततस्तमेवाचा
र्य्यकुण्डस्थमग्निं अग्निस्थापनानंतरमेवअग्निप्रोक्षणपर्य्यंतंकर्म्मकृत्वावाकुंडसंख्यया
विभज्य प्रागादिकुण्डेषुऋत्विग्भिःस्वस्वकुण्डेस्वगृह्योक्तविधिनासंस्कृतेषुयथाविभागं ॥ ६३ ॥
संस्थाप्य चतुर्थीकाकर्म्मसमाप्तियावद्रक्षणंतस्ययत्नतः कर्त्तव्यमितिबोध्यम् ॥

॥ अथ वास्तुरचनापूजाचोच्यते ॥ ॥ एकाशीतिपदंवास्तुगृहकर्म्मणिशस्यते ॥
चतुःषष्टिपदोवास्तुःप्रासादेदेवभूभुजामितिवचनाच्चतुःषष्टिपदवास्तुरचनापूजाप्रकारए
वात्रनिरूप्यते तद्यथा प्रासादेमंडपेवामध्यवेद्याईशानभागेनैर्ऋतेवाद्विहस्तमेकहस्तंवा
चतुरस्रमष्टाष्टकपदंवास्तुमण्डलंसद्धान्येनाक्षतैः शालिपिष्टेनवाप्रदक्षिणक्रमेणोल्लिख्य
बहिःपंक्तौकोणेषष्ठार्द्धपदाः चतुर्विंशतिरेकपदाः मध्येचतुष्पदोब्रह्मा दिक्षुचत्वार
श्चतुष्पदाः शेषा अष्टौ द्विपदाः एवंपंचचत्वारिंशतदेवतापदानि तद्बहिरष्टौचरक्या
दीनामिति तत्रब्रह्माणंशिखिनंचादिंकृत्वाक्रमेणनाममंत्रैरावाहनादिभिः षोडशोप
चारैः प्रपूजयेत् तत्रब्रह्मादिपक्षोनृसिंहपरिचर्य्यायामुक्तः । शिख्यादिपक्षस्तु शिवादि
परिचर्य्यायामितिविवेकः ॥ अथपूजा ॥ तत्पश्चिमतउपविश्याचम्याद्येत्यादिदेश
कालौस्मृत्वा शिवादिप्रतिष्ठाकर्मांगत्वेनवास्तुदेवतानांस्थापनंपूजनंचकरिष्ये इतिसं

कल्प्य ततोवास्तुवेदिचतुष्कोणेषुआग्नेयादीशानादिवाप्रदक्षिणक्रमेणशंकुचतुष्टयंरोपयेत् ॥ तत्रमंत्रः ॥ विशंतुभूतलेनागालोकपालाश्चसर्वतः ॥ स्थीयतांमंडपेऽस्मिन्मेसर्वकामार्थसिद्धये ॥ १ ॥ अनेनैवमंत्रेणचतुर्षुकोणेषुशंकुरोपणं प्रासादोपवनतडागकूपवापीवास्तुकर्म्मणितत्तन्नामातिदिशेत् ततःशंकूनांपार्श्वेरोपणक्रमेणमाषभक्तबलिंदद्यात् ॥ तत्रमंत्रः ॥ अग्निभ्यश्चाथसर्वेभ्योयेचान्येतत्समाश्रिताः ॥ तेभ्योबलिंप्रयच्छामिपुण्यमोदनमुत्तमम् ॥ १ ॥ नैर्ऋत्याधिपतिश्चैवानिर्ऋत्यांयेचराक्षसाः ॥ तेभ्योबलिंप्रयच्छामिसर्वेगृह्णंतुमंत्रितम् ॥ २ ॥ ॐनमोवायुरक्षोभ्योयेचान्येतत्समाश्रिताः ॥ तेभ्योबलिंप्रयच्छामिगृह्णंतुपुण्यमोदनम् ॥ ३ ॥ ॐरुद्रेभ्यश्चैवसर्पेभ्योयेचान्येतत्समाश्रिताः ॥ तेभ्योबलिंप्रयच्छामिगृह्णंतुसततोत्सुकाः ॥ ४ ॥ ततोवेद्युपरिकुंकुमादिनासुवर्णरजतादिशलाकयारत्नेनवा फलपुष्पान्यतमेनवानवरेखाःपश्चि

मादारभ्यप्रागायताः उदक्संस्थाः समाः अंगुलद्वयांतराः कुर्यात् ॥ ॐलक्ष्म्यैनमः ॥ १ ॥ ॐयशोमत्यैनमः ॥ २ ॥ ॐकांतायैनमः ॥ ३ ॥ ॐसुश्रियैनमः ॥ ४ ॥ ॐविलयायैनमः ॥ ५ ॥ ॐशिवायैनमः ॥ ६ ॥ ॐसुभगायैनमः ॥ ७ ॥ ॐसुमत्यैनमः ॥ ८ ॥ ॐइडायैनमः ॥ ९ ॥ ततोदक्षिणादारभ्यउदगायताः प्राक्संस्था नवरेखाः कुर्यात् ॥ ॐधन्यायैनमः ॥ १ ॥ ॐप्राणायैनमः ॥ २ ॥ ॐविशालायैनमः ॥ ॥ ३ ॥ ॐस्थिरायैनमः ॥ ४ ॥ ॐभद्रायैनमः ॥ ५ ॥ ॐजयायैनमः ॥ ६ ॥ ॐनिशायैनमः ॥ ७ ॥ ॐविरजायैनमः ॥ ८ ॥ ॐविभवायैनमः ॥ ९ ॥ एवंकृते चतुःषष्टिकोष्ठकंमंडलंभवति ॥ तासांरेखाणांगंधादिनापूजनम् ॥ अथशिख्यादिक्रमेणवास्तुमंडलस्थदेवतानांपूजनमिदानींप्रदर्श्यंते ॥ ईशानकोणपदोत्तरार्द्धेवास्तुशिरसि ॥ आवाहयामित्वांदेवशंकरंशिखिरूपिणम् ॥ स्रुक्स्रुवौडमरुंशूलंचतुर्हस्ते

प्रति० षुबिभ्रतम् ॥ नेत्रत्रयसमायुक्तंस्वाहोमासहितंविभुम् ॥ आगच्छत्वं शिखिन् देवक्षे सं०
॥ ६५ ॥ त्रेस्मिन्सन्निधोभव ॐनमःशिवायेति ॐनमःशम्भवायेतिवाआवाहनम् ॥ नमः
शम्भुवायंचमयोभुवायंचनमःशंकरायंचमयस्करायंचनमःशिवायंचशिवतरायच ॥
॥ १६ ॥ ४१ ॥ ॐभूर्भुवःस्वः शिखिनमावाहयामि० शिखिन्निहागच्छेहतिष्ठ
ॐशिखिनेनमः ॥ १ ॥ तद्दक्षिणेऽर्द्धपदेवास्तोर्द्दक्षिणनेत्रे आवाहयामिपर्ज्जन्यंयाद
सांसुख्यनायकम् कुंभीरथसमारूढंपाशहस्तंवरप्रदम् ॥ ॐशन्नोवातः÷पवतार्ठशन्नः÷त
पतुसूर्य्यः ॥ शन्नः÷कनिक्रदद्देवः÷पर्ज्जन्योऽअभिवर्षतु ॥ ३६। १० ॥ ॐभूर्भुवःस्वःपर्ज
न्यमावाहयामि० पर्जन्येहागच्छेहतिष्ठ पर्ज्यन्यायनमः ॥ २ ॥ तद्दक्षिणैकपदेवा
स्तोर्वामनेत्रे ॥ आवाहयामितन्देवंमहेन्द्रतनयंप्रभुम् ॥ मुद्रिकाकंकणैर्युक्तंसर्वाभरण ॥ ६६ ॥
भूषितम् वरदाभयहस्तंचजयंतंपूजयाम्यहम् ॥ ॐमर्म्माणितेवर्म्मणाच्छादयामिसोम

स्त्वाराजामृतेनानुवस्ताम् ॥ उरोर्वरीयोवरुणस्तेकृणोतुजयन्तुन्त्वानुदेवामदन्तु ॥
॥ १६ ॥ ४८ ॥ ॐभूर्भुवः स्वः जयंतमावाहयामि० जयन्तइहागच्छेहतिष्ठ जयं
तायनमः ॥ ३ ॥ तद्दक्षिणैकपदेवास्तोर्दक्षिणांसेकुलिशायुधमावाहयेत् ॥ एहिदे
वसहस्राक्षदेवारिबलसूदन ॥ ऐरावतेशसर्वज्ञशचीहृदयनंदन ॥ वज्रहस्तसुराध्यक्ष
त्वामिन्द्रावाहयाम्यहम् ॥ ॐआयात्विन्द्रोवसऽउपनऽइहस्तुतः संधमादस्तुशूरः ॥
वावृधानस्तविषीर्य्यस्यपूर्वीर्द्यौर्न्नक्षत्रमभिभूतिपुष्यात् ॥ २० ॥ ४७ ॥ ॐभूर्भुवः
स्वः इन्द्रमावायामि० इन्द्रइहागच्छेहतिष्ठ इन्द्रायनमः ॥ ४ ॥ तद्दक्षिणैकपदे
वास्तोर्दक्षिणबाहौसूर्यमावाहयेत् ॥ आवाहयामिदेवेशंभास्करंतिग्मतेजसम् ॥
कलिंगंकाश्यपंरक्तंसप्ताश्वंसप्तरज्जुकम् ॥ द्विभुजंपद्महस्तंचत्रैलोक्यतिमिरापहम् ॥
सर्वसौख्यस्यदातारंकर्म्मसाक्षिणमीश्वरम् ॥ आगच्छभगवन्सूर्यक्षेत्रेस्मिन्सन्निधौ

भव ॥ ॐ बण्महा ँ२ ऽअसिसूर्य्यबडादित्यमहा ँ२ ऽअसि ॥ महस्तेसतोमहि
मापंनस्यतेद्धादेवमहा ँ२ ऽअसि ३३ । २८ ॥ ॐ भूर्भुवःस्वः सूर्य्यमावाहयामि०
सूर्य्यइहागच्छेहतिष्ठ सूर्य्यायनमः ॥ ५ ॥ तद्दक्षिणैकपदेवास्तोर्दक्षिणबाहौसत्य
मावाहयेत् आवाहयामितंसत्यंपुण्ययुक्तमकल्मषम् । पद्महस्तंमहाबाहुंवरदंनिर्मलं
शुभम् । ज्ञानमुद्राधरंदेवंचिंतितंब्रह्मकेवलम् । आगच्छदेवसत्यस्त्वंक्षेत्रेऽस्मिन्सन्निधो
भव ॥ ॐ व्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणाम् ॥ दक्षिणाश्रद्धामाप्नोति
श्रद्धयासत्यमाप्यते ॥ १९ ॥ ३० ॥ ॐ भूर्भुवःस्वः सत्यमावाहयामि०
सत्यइहागच्छेहतिष्ठ सत्यायनमः ॥ ६ ॥ तद्दक्षिणैकपदेवास्तोर्दक्षिणबाहौभृश
मावाहयेत् आवाहयेयंभृशमादिदेवंसंचारशीलंभुवनत्रयेपि ॥ एकेनहस्तेनवरप्रदा
नंगदांदधानंचपरेणतेन ॐआत्वाहार्षमन्तरभूर्द्धुवास्तिष्ठाविचाचलिः ॥ विशस्त्वासर्वा

वान्छन्तुमात्वद्राष्ट्रमधिंभ्रशत् ॥ १२ । ११॥ ॐ भूर्भुवःस्वः भृशमावाहयामि० भृशइ
हागच्छेहतिष्ठ भृशायनमः ॥ ७॥ तद्दक्षिणैकपदेवास्तोर्दक्षिणप्रबाहौआकाशमावाह
येत् आवाहयेत्तमाकाशंविष्णोः पदमनंतकम् यत्रदेवास्तथायज्ञा ग्रहाः सर्वेप्रतिष्ठिताः
आगच्छत्वंमहाकाशक्षेत्रेस्मिन्सन्निधौभव ॥ ॐ यावाङ्कशामधुमत्याश्विनासूनृ
तावती ॥ तयायज्ञंमिमिक्षतम् ॥ उपयामगृहीतोस्यश्विभ्यांत्वैषतेयोनिर्म्माध्वीभ्यां
त्वा ॥ ७ ॥ ११ ॥ ॐ भूर्भुवः स्वः आकाशमावाहयामि० आकाशइहागच्छेहतिष्ठ
आकाशायनमः ॥ ८ ॥ तद्दक्षिणपदार्द्धेवास्तोर्दक्षिणप्रबाहौवायुमावाहयेत् आवाहया
मिदेवेशंभूतानांदेहधारिणम् आगच्छभगवन्वायोक्षेत्रेऽस्मिन्सन्निधौभव ॥ ॐ वायो
येतंसहस्रिणोरथासस्तेभिरागहि॥ नियुत्वान्सोमपीतये ॥ २७॥ ३२ ॥ ॐभूर्भुवः स्वः
वायुमावाहयामि० वायोइहागच्छेहतिष्ठ वायवेनमः ॥ ९ ॥ तद्दक्षिणपदार्द्धेवास्तोर्द

प्रति० क्षिणमणिबंधेपूषणमावाहयेत् आवाहयामिदेवेशंपद्महस्तंवरप्रदम् रक्तवस्त्रपरीधानंवि सं०
॥ ६७ ॥ द्युद्वर्णमहाबलम् आगच्छभगवन्पूषन्क्षेत्रेऽस्मिन्सन्निधौभवॐपूषन्तवव्रतेवयन्नरिष्ये
मुकदाचन॥ स्तोतारस्तऽइहस्स्मसि ॥३४॥ ४१ ॥ ॐ भूर्भुवः स्वः पूषणमावाहयामि०
पूषन्निहागच्छेहतिष्ठ पूष्णेनमः ॥ १० ॥ तत्पश्चिमैकपदेवास्तोर्दक्षिणपार्श्वेवितथमा
वाहयेत् ॥ आवहयेत्वांवितथंपुराणंद्यावापृथिव्यंतरचारिणंच ॥ गृहाणपूजांचणकोदना
ख्यंबलिंचगृह्णन्भगवन्नमस्ते ॥ ॐ तत्सूर्य्यस्यदेवत्वन्तन्महित्वम्मध्याकर्त्तोर्विततंसं
सञ्जभार ॥ यदेदयुक्तहरितःसधस्थादाद्रात्रीवासस्तनुतेसिमस्स्मै ॥ ३३ ॥ ३७ ॥
ॐभूर्भुवःस्ववितथमावाहयामि० वितथइहागच्छेहतिष्ठवितथायनमः ॥ ११ ॥ तत्प
श्चिमैकपदेवास्तोर्दक्षिणपार्श्वेएवगृहक्षतमावाहयेत् आवाहयामित्वांदेवगृहक्षतस ॥ ६७ ॥
माख्यक ॥ पूजांगृहाणदेवेशममस्वस्तिकरोभव ॥ ॐ अक्षन्नमीमदन्तह्यवप्रियाऽ

अंधूषत ॥ अस्तोषतस्वभानवो विप्रानविष्ठयामतीयोजान्विन्द्रतेहरी ॥ ३ ॥ ५१ ॥
ॐभूर्भुवः स्वः गृहक्षतमावाहयामि गृहक्षतइहागच्छेह तिष्ठ गृहक्षतायनमः ॥ १२ ॥
तत्पश्चिमैकपदेवास्तोर्दक्षिणरोमैयममावाहयेत् आवाहयामिदेवेशंदाक्षिणांदिशमाश्रि
तम् महिषेचसमारूढमंजनाद्रिसमप्रभम् चित्रगुप्तसहायंतंदण्डमुद्गरधारिणम् सप्त
र्षिभिः समायुक्तंधर्माधर्मप्रवर्त्तकम् लोकस्ययमनार्थायकिंकरैः परिवारितम् आगच्छ
भगवन्धर्म्मक्षेत्रेस्मिन्सन्निधौभव ॐ यमायत्वाङ्गिरस्वतेपितृमतेस्वाहा ॥ स्वाहा
घर्म्मायस्वाहाघर्म्मः पित्रे ॥ ३८ ॥ ९ ॥ ॐभूर्भुवः स्वर्यममावाहयामि॰ यमइ
हागच्छेहतिष्ठ यमायनमः ॥ १३ ॥ तत्पश्चिमैकपदेवास्तोर्दक्षिणजानौगन्धर्वमावा
हयेत् आवाहयामिदेवेशंषड्जादिगानतत्परम् वीणांगृहीत्वाहस्तेनतद्वादनरतंविभुम्
अप्सरोगणसंकीर्णनानागंधैश्चचर्च्चितम् गधर्वत्वमिहागच्छपूजेयंप्रतिगृह्यताम् ॥ ॐ गु

न्धुर्वस्त्वांविश्वावसुः ॥ परिदधातुविश्वस्यारिष्टयैयजमानस्यपरिधिरस्यग्निरिडऽई
डितः ॥ इन्द्रस्यबाहुरसिदाक्षिणोविश्वस्यारिष्टयैयजमानस्यपरिधिरस्यग्निरिडऽई
डितः॥मित्रावरुणौत्वोत्तरतः परिधत्तांध्रुवेणधर्मणाविश्वस्यारिष्टयैयजमानस्यपरिधि
रस्यग्निरिडऽईडितः ॥ २ ॥ ३ ॥ ॐभूर्भुवःस्वर्गन्धर्वमा०इहागच्छेहतिष्ठगन्धर्वायनमः
॥ १४ ॥ तत्पश्चिमैकपदेवास्तोर्दक्षिणजंघायांभृंगराजमावाहयेत् आवाहयामितंदेवंभृं
गराजंमहाबलम् षट्पदैःसेव्यमानंचकुसुमामोदसंरतम् आगच्छालिकुलत्वंहिक्षेत्रेऽस्मि
न्तसन्निधौभव ॐसौरीबलाकाशार्गःसृंजयः शयाण्डकस्तेमैत्राः सरस्वत्यैशारिःपुरु
षवाक्श्वाविद्भौमीशार्दूलोवृकः पृदाकुस्तेमन्यवेसरस्वतेशुकः पुरुषवाक्॥२४।३३॥
ॐभूर्भुवःस्वःभृंगराजमावाहयामि० भृंगराजइहागच्छेहतिष्ठभृंगराजायनमः ॥१५॥ त
त्पश्चिमैकपदेवास्तोर्दक्षिणस्फिचिमृगमावाहयेत मृगमावाहयिष्यामिशशांककृत

चिह्नकम् कृष्णवर्णंचतुष्पादंश्वेतोदराविषाणकम् आगच्छभगवन्नेणक्षेत्रेऽस्मिन्सन्निधौ
भव ॐप्रतद्विष्णुंस्तवतेवीर्य्येणमृगोनभीमःकुंचरोगिरिष्ठाः ॥ यस्योरुषुत्रिषुविक्रमणे
ष्वधिक्षियन्तिभुवनानिविश्वा ॥ ५ । २० ॥ ॐभूर्भुवःस्वःमृगमावाहयामि० मृग
इहागच्छेहतिष्ठ मृगायनमः ॥१६॥ तत्पश्चिमेऽर्द्धपदेवास्तोःपादयोःपितॄनावाहयेत् पि
तॄनावाहयिष्यामिसोमपाद्यानन्नुक्रमात् पिंगाक्षान्कपिलजटान्हस्तेकुशकमंडलून् ॥
दधानान्नसितवस्त्राणिसितयज्ञोपवीतिनः ॥ गृह्णानान्कुसरान्नंचपितॄन्संपूजयाम्यहम् ॥
उशन्तस्त्वानिधीमह्युशन्तःसमिधीमहि ॥ उशन्नुशतऽआवहपितॄन्हविषेअत्तवे ॥१९॥
॥७०॥ॐभूर्भुवःस्वःपितॄनावाहयामि० पितरइहागच्छतइहतिष्ठत पितृभ्योनमः ॥१७॥
तदुत्तरार्द्धेवास्तोर्वामस्फिचि दौवारिकमावाहयेत् ॥ एह्येहिदौवारिक रक्षणायद्वारा
णिसर्वाणिचमंदिरस्य पैष्टंबलिंवासितदंतकाष्ठंगृहाणपूजांभगवन्नमस्ते ॥ ॐद्वारो

37

 देवीरन्वस्यविश्वेव्रतादंदन्तेऽअग्नेः ॥ उरुव्यचसोधाम्नापत्यमाना इत्यापिमंत्रोज्ञेयः ॥
 ॐ आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रेराजन्यः शूरऽइषव्योतिव्याधीमहा
रथोजायतान्दोग्ध्रीधेनुर्वोढानड्वानाशुःसप्तिःपुरन्धिर्य्योषाजिष्णूरथेष्ठाःसभेयोयुवास्य
यजमानस्यवीरोजायतान्निकामेनिकामेनःपर्जन्योवर्षतुफलवत्योनऽओषधयः पच्यन्
न्ताय्योगक्षेमोनः कल्पताम् ॥ २२ ॥ २२ ॥ ॐ भूर्भुवःस्वर्दौवारिकमावा
हयामि० दौवारिकइहागच्छेहतिष्ठ दौवारिकायनमः ॥ १८ ॥ तदुत्तरैकपदेवा
स्तोर्वामजंघायांसुग्रीवमावाहयेत् ॥ आवाहयेत्वांकपिमध्यमुख्यं सुग्रीवराजं मम
मण्डलेस्मिन् ॥ पाषाणवृक्षौदधतंकराभ्यांगृहाणपूजांभगवन्नमस्ते ॥ ॐनीलग्रीवाः
शितिकण्ठादिवंरुद्राऽउपश्रिताः ॥ तेषांसहस्रयोजनेवधन्वानितन्मसि ॥ १६ ॥
॥ ५६ ॥ ॐभूर्भुवःस्वःसुग्रीवमावाहयामिसुग्रीवइहागच्छेहतिष्ठ सुग्रीवायनमः॥ १९ ॥

तदुत्तरैकपदेवास्तोर्वामजानौपुष्पदंतमावाहयेत् ॥ आवाहयामिदेवेशंपुष्पदंतंविना यकम् लंबोदरंमहाकायंगजवक्त्रंचतुर्भुजम् सिद्धिबुद्धिसमायुक्तंसर्वविघ्नविनाशनम् पुष्प दन्तसमायुक्तंपूजेयंप्रतिगृह्यताम् ॐनमोगणेभ्योगणपतिभ्यश्चवोनमोनमोव्रातेभ्यो व्रातपतिभ्यश्चवोनमोनमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्वरूपेभ्य श्चवोनमोनमः ॥ १६ ॥ २५ ॥ ॐभूर्भुवःस्वः पुष्पदन्तमावाहयामि ॥ पुष्पदन्तइ हागच्छेहतिष्ठपुष्पदंतायनमः ॥२०॥तदुत्तरैकपदेवास्तोर्वामोरौवरुणमावाहयेत् आवाह यामिदेवेशंवरुणंजलनायकम् कुंभीरथसमायुक्तंश्वेताद्रिशिखरोपमम् पाशहस्तंमहाबा हुंयादोगणसमन्वितम् आगच्छवरुणत्वंहिक्षेत्रेस्मिन्सन्निधौभव ॐइमंमेवरुणश्रु धीहवमद्याचमृडय ॥ त्वामवस्युराचके ॥ २१ ॥ १ ॥ ॐभूर्भुवः स्ववरुणमावाह यामि० वरुणइहागच्छेहतिष्ठ वरुणायनमः ॥ २१ ॥ तदुत्तरैकपदेवास्तोर्वामपार्श्वेऽ

सुरमावाहयेत् असुरत्वमिहागच्छरक्षोगणसमन्वित शक्तिशूलधरोनित्यंरक्ताक्षश्च
महाबलः हिरण्यपाशभृद्देवपूजांस्वीकुरुमेविभो ॐयमश्विनानमुचेरासुरादधिसरं
स्वत्यसुंनोदिंद्रियायं ॥ इमन्तर्ठंशुक्रम्मधुंमन्तुमिन्दुर्ठंसोमर्ठंराजांनामिहभक्षया
मि ॥ १९ ॥ ३४ ॥ ॐभूर्भुवः स्वरसुरमावाहयामि० असुरइहागच्छेहतिष्ठ असु
रायनमः ॥ २२ ॥ तदुत्तरैकपदेवास्तोर्वामपार्श्वेएवशेषमावाहयेत् आवाहयामिदे
वेशंपातालतलवासिनम् सहस्रशिरसंनागंफणामणिविराजितम् कर्पूरविशदंदेवंनागरा
जंमहाबलम् परोपकारनिरतमनंतंविष्णुवाहनम् आगच्छनागराजत्वंक्षेत्रेऽस्मिन्सान्नि
धौभव ॐयाऽइषवोयातुधानानांयेवावनस्पतीरनु ॥ येवावटेषुशेरंतेतेभ्यः सर्पे
भ्योनमः ॥ १३ ॥ ७ ॥ ॐभूर्भुवः स्वः शेषमावाहयामि० शेषइहागच्छेहतिष्ठ शे ॥ ७० ॥
षायनमः ॥ २३ ॥ तदुत्तरैकपदेवास्तोर्वामभागेपापमावाहयेत् आवाहयामितं

पापंनाम्नायक्ष्मेतिविश्रुतम् निर्मांसंनिर्घृणंशक्तिपाशपाणिंमहाबलम् आगच्छभगवन्पा
पपूजेयंप्रतिगृह्यताम् ॥ ॐएतत्तेरुद्रावसन्तेनंपरोमूजवतोतीहि ॥ अवततधन्न्वापि
नाकावसुः कृत्तिवासाऽअहिंठसन्नः शिवोतीहि ॥ ३ ॥ ६१ ॥ ॐभूर्भुवःस्वः पापमा
वाहयामि० पापइहागच्छेहतिष्ठ पापायनमः ॥ २४ ॥ तदुत्तरेवायुकोणाद्धेंवास्तो
र्वामप्रबाहौरोगमावाहयेत् आवाहयामितं रोगंवातादित्रिगुणात्मकम् त्रिपादंत्रिशिखं
रक्तनेत्रंभस्मविभूषितम् लोकानांचसुखंदेहिबलिभिर्घृतमोदकैः पूजांगृहाणभोरोग
क्षेत्रेस्मिन्सान्निधौभव ॥ ॐद्रापेऽअन्धसस्पतेदरिद्रनीललोहित ॥ आसांप्रजानामेषां
म्पशूनांमाभेर्म्मारोङ्ङ्मोचंनः किञ्चनाममत् ॥ १६ ॥ ४७ ॥ ॐभूर्भुवः स्वः रोग
मावाहयामि० रोगइहागच्छेहतिष्ठ रोगायनमः ॥ २५ ॥ तदुत्तरेवायुकोणार्द्धे
वास्तोर्वामप्रबाहवे अहिमावाहयेत॥अहिमावाहयिष्यामित्रैलोक्यांतरचारिणम् शेषकु

प्रति० लसमुद्धृतंलसत्कर्णमहीश्वरम् ॥ आगच्छनागराजत्वंक्षेत्रेऽस्मिन्सन्निधौभव ॥ ॐअ सं०
॥ ७१ ॥ हिंरिवभोगैःपर्य्येतिबाहुंज्ज्यायांहेतिम्परिबाधमानः ॥ हस्तघ्नोविश्वावयुनानिविद्वान्पु
मान्पुमांᳬंसम्परिपातुविश्वतः ॥ २८ ॥ ५१ ॥ ॐभूर्भुवः स्वः अहिमावाहयामि०
अहेइहागच्छेहतिष्ठ अहयेनमः ॥ २६ ॥ तत्प्रागेकपदेवास्तोर्वामबाहौमुख्यमावा
हयेत् ॥ आवाहयामितंशैवंगणानांमुख्यनायकम् ॥ जटाजूटधरंसौम्यंशूलपट्टिशधा
रिणम् ॥ नमस्तेमुख्यदेवेशक्षेत्रेऽस्मिन्सन्निधौभव ॥ ॐअवतत्यधनुष्ट्वᳬंसहस्राक्षशते
षुधे ॥ निशीर्य्यशल्यानाम्मुखाशिवोनः सुमनाभव ॥ १६ ॥ १३ ॥ ॐभूर्भुवः स्वर्मु
ख्यमावाहयामि० मुख्यइहागच्छेहतिष्ठ मुख्यायनमः॥२७॥तत्प्रागेकपदेवास्तोर्वाम
बाहावेवभल्लाटमावाहयेत् आवाहयामिदेवेशंभल्लाटंविश्वरूपिणम् भिल्लवेषधरंकृष्णंध ॥ ७१ ॥
नुर्बाणासिधारिणम् भिल्लमोहनकर्त्तारंबर्हिपिच्छैस्त्वलंकृतम् आगच्छभगवन्देवक्षे

त्रेस्मिन्सन्निधौभव ॐ इमारुद्रायंतवसैकपुर्द्दिनेक्षुयद्वीरायप्रभंरामहेमुतीः ॥ यथाशम
संदाद्विपदेचतुंष्पदेविश्वंपुष्टंग्रामेऽअस्मिन्ननातुरम् ॥ १६ ॥ ४८ ॥ ॐ भूर्भुवःस्वः भल्ला
टमावाहयामि० भल्लाटइहागच्छेहतिष्ठभल्लाटायनमः ॥२८॥ तत्प्रागेकपदेवास्तोर्वाम
बाहावेवसोममावाहयेत् अवाहयामिदेवेशंशशांकंरजनीपतिम् ॥ क्षीरोदधिसमुद्भूतंहर
मौलिविराजितम् सुधाकरंद्विजाधारंत्रैलोक्यप्रियकारकम् औषध्याप्यायनकरंसोमंकं
दर्पवर्द्धनं आगच्छभगवन्सोमक्षेत्रेस्मिन्सन्निधौभव ॥ ॐआप्यांयस्वसमेंतुतेविश्व
तंः सोमवृष्ण्यंम् भवावाजंस्यसंगुथे ॥ १२ ॥ ११२ ॥ ॐभूर्भुवःस्वः सोममावाहयामि०
सोमइहागच्छेहतिष्ठ सोमायनमः ॥ २९ ॥ तत्प्राक्पदेवास्तोर्वामांशेसर्प्पमावाहयेत्
अवाहयेच्चतंनागंफणासप्तकसंयुतम् आगच्छोरगराजत्वंक्षेत्रेस्मिन्सन्निधौभव ॐ वि
ष्णोर्नुकंवीर्य्याणिप्रवोचंयः पार्थिवानिविममेरजांऽसि ॥ योअस्कंभायदुत्तरंऽसध

स्थंविचक्रमाणस्त्रेधोरुंगायोविष्णंवेत्वा ॥ ५ ॥ १८ ॥ ॐ भूर्भुवःस्वःसर्प्पमावाहयामि
सर्प्पइहागच्छेहतिष्ठसर्प्पायनमः ॥ ३० ॥ तत्प्राक्पदेवास्तोर्वामश्रोत्रेऽदितिमावाहयेत्
आवाहयामितांदेवीमदितिंदेवमातरम् द्विभुजांपद्महस्तांचसर्वाभरणभूषिताम् कश्यप
स्यप्रियांभार्यांसुरूपां वामलोचनाम् आगच्छह्यदितेत्वंहिक्षेत्रेऽस्मिन्सन्निधौभव ॐ
इडुऽ एह्यदितुऽएहिकाम्याऽएतं ॥ मयिवः कामुधरंणम्भूयात् ॥ ३ ॥ २७ ॥ ॐभू
र्भुवः स्वः अदितिमावाहयामि० अदितेइहागच्छेहतिष्ठ अदितयेनमः ॥ ३१ ॥
तत्प्राक्पदेवास्तोर्वामनेत्रेदितिमावाहयेत् दितिमावाहयिष्यामिदैत्यानांचैवमातरम्
शुक्लांगींद्विभुजांचैवशूलपट्टिशधारिणीम् समागच्छदितेत्वंहिक्षेत्रेऽस्मिन्सन्निधौभव ॥
ॐ अदितिर्द्यौरदितिरंतरिक्षमदितिर्मातासपितासपुत्रः ॥ विश्वेदेवाऽअदितिःपंचजनाऽ
अदितिर्ज्जातमदितिर्ज्जनित्वम् ॥ २५ ॥ २३ ॥ ॐभूर्भुवःस्वः दितिमावाहयामि०

दितेइहागच्छेहतिष्ठ दितयेनमः ॥ ३२ ॥ पुनरन्तरीशकोणगतद्वितीयपंक्तिस्थपदद्वये
वास्तोर्मुखेअपआवाहयेत् अपआवाहयिष्यामि सर्वगावरदाःशिवाः ॥ आपस्त्वाया
न्तुसततंपवित्रामंगलावहाः ॥ समागच्छतयूयंवैकुर्वन्त्यःपावनंजगत् ॐआपोहिष्ठाम
योभुवस्तानऽऊर्ज्जेदधातन महेरणायचक्षसे॥३६।१४॥ॐभूर्भुवःस्वःअपआवाहयामि०
आपइहागच्छतेहतिष्ठत अद्भ्योनमः ॥३३॥तद्दक्षिणेपदद्वयेवास्तोर्दक्षिणहस्तेसावित्रमा
वाहयेत् अत्रआपवत्समावाहयेदित्यपिकस्मिंश्चित्पुस्तकेपाठः आपवत्सत्वमेह्येहिकर्म
स्कंधवरप्रद पूजांगृहाणदेवेशकुंभहस्तनमोस्तुते ॐमातेवत्सोमनोयमत्परमाच्चित्स
धस्थात् अग्नेत्वांकामयागिरा॥१२। ११५॥ॐभूर्भुवः स्वः आपवत्समावाहयामि० आ
पवत्सइहागच्छेहतिष्ठआपवत्सायनमः ॥३४॥ तद्दक्षिणेपदचतुष्टयेवास्तोर्दक्षिणहस्तेऽ
र्य्यमणमावाहयेत् ॥ अर्य्यमन्नकुरुमेभद्रंसंज्ञयासहसर्वदा गृहाणेमांमयादत्तांपूजांदे

 वनमोस्तुते ॥ ॐयदद्यसूरऽउदितेनागामित्रोऽअर्य्यमा ॥ सुवातिसविताभगः ॥ ३३ ॥
 ॥ २० ॥ ॐ भूर्भुवःस्वःअर्य्यमणमावाहयामि० अर्य्यमन्निहागच्छेहतिष्ठ० अर्य्यम्णेनमः ॥ ३५ ॥ तद्दक्षिणेपदद्वयेवास्तोर्दक्षिणहस्तेसवितारमावाहयेत् आवाहयेत्सवितृमंडलमध्यसंस्थंसप्ताश्ववाहनयुतंधृतपंकजंत्वाम् ॥ केयूरकुंडलविधारकदेहिसौख्यंपूजांगृहाणभगवन्त्सवितर्नमस्ते ॥ ॐविश्वानिदेवसवितर्दुरितानिपरासुव यद्भद्रंतन्नआसुव ॥ ३० ॥ ३ ॥ ॐभूर्भुवःस्वःसवितारमावाहयामि० सवितरिहागच्छेहतिष्ठ सवित्रेनमः ॥ ३१ ॥ तद्दक्षिणपदद्वयेवास्तोर्दक्षिणहस्तेसावित्रमावाहयेत् सावित्रत्वमिहागच्छसर्वध्वांतनिवारक पूजांगृहाणदेवेशमयाशक्त्याप्रकल्पिताम् ॥ ॐ हस्तेऽआधायसविताबिभ्रदभ्रिꣳहिरण्ययीम् अग्नेर्ज्योतिर्निचाय्यपृथिव्याऽअध्याभरदानुष्टुभेनच्छन्दसाङ्गिरस्वत् ॥ ११ ॥ ११ ॥ ॐ भूर्भुवःस्वःसावित्रमावाहयामि०

सावित्रइहागच्छेहतिष्ठ सावित्रायनमः ॥ ३७ ॥ तत्पश्चिमपदचतुष्केवास्तोर्जठरद
क्षिणभागेविवस्वंतमावाहयेत् ॥ एह्येहिदेवत्रिगुणात्मकत्वंहयंसमारुह्यतमोनुद
न्वै ॥ हस्तद्वयेवैधृतचक्रपद्मगृहाणपूजांभगवन्नमस्ते ॐविवस्वन्नादित्यैषतेसोमपी
थस्तस्मिन्मत्स्व श्रदस्मैनरोवचसेदधातनुयदाशीर्दादम्पतीवामंमश्नुतः ॥ पुमान्
पुत्रोजायतेविन्दतेवस्वधाविश्वाहारपएधतेगृहे ॥८।५॥ ॐभूर्भुवःस्वर्विवस्वंतमावाह
यामि० विवस्वन्निहागच्छेहतिष्ठ विवस्वतेनमः ॥ ३८ ॥ तत्पश्चिमपदद्वयेवास्तो
र्वृषणदेशेविबुधाधिपमावाहयेत् एह्येहिवास्तोर्विबुधाधिपत्वंगजाधिरूढोममरक्षणा
य ॥ वराप्सरोभिश्चविवीज्यमानोगृहाणपूजांभगवन्नमस्ते ॥ ॐसबोधिसूरिर्म्मघ
वावसुपतेवसुदावन् ॥ युयोध्यस्मद्द्वेषांसिविश्वकर्म्मणेस्वाहा ॥ १२ ॥ ४३ ॥ ॐ
भूर्भुवः स्वः विबुधाधिपमावाहयामि० विबुधाधिपइहागच्छेहतिष्ठ विबुधाधिपायन

प्राति० मः ॥ ३९ ॥ तत्पश्चिमेपदद्वयेवास्तोर्मेढ्रदेशेजयमावाहयेत् ॥ आवाहयामितंदेवं सं०
॥ ७४ ॥ जयंयष्टिविधारकम् ॥ जयत्वंहिसमागच्छक्षेत्रेस्मिन्सन्निधौभव ॥ ॐअषाढंयुत्सुपृ
तंनासुपप्रिंꣳस्वर्षामप्सांवृजनस्यगोपाम् ॥ भरेषुजाꣳसुक्षितिꣳसुश्रवसंजयंतन्त्वाम
नुंमदेमसोम ॥३४।२०॥ ॐभूर्भुवः स्वः जयमावाहयामि० जयइहागच्छेहतिष्ठ ज
यायनमः ॥ ४० ॥ तदुत्तरपदचतुष्केवास्तोर्जठरवामभागेमित्रमावाहयेत् ॥ मित्रत्वमे
ह्येहितमोपशान्त्यैपद्मासनः पद्मकरोसिनित्यम् ॥ गृहाणपूजांघृतमोदकादिर्मित्रोन
मंत्रैर्भगवन्नमस्ते ॥ ॐमित्रोनऽएहिसुमित्रधऽइन्द्रस्योरुमाविशदक्षिणमुशन्नुशंतं
ꣳस्योनस्योनम् ॥ ४। २७ ॥ ॐभूर्भुवः स्वः मित्रमावाहयामि० मित्रइहागच्छेह
तिष्ठ मित्रायनमः ॥ ४१ ॥ तदुत्तरपदद्वयेवास्तोर्वामहस्तेराजयक्ष्माणमावाहयेत् ॥ ॥ ७४ ॥
आवाहयामितंदेवंयक्ष्माणंराजसंज्ञकम् ॥ नानाव्याधिसमाकीर्णंरोगैश्चपरिशोभितम् ॥

वामेनवरदंचैवदक्षिणेनाभयप्रदम्॥ आगच्छभगवन्यक्ष्मन्पूजेयंप्रतिगृह्यताम् ॥ॐनाशयित्त्रीबलासस्यार्शसऽउपचितामसि ॥ अथोशतस्ययक्ष्माणाम्पाकारोरसिनाशनी ॥ १२ ॥ १७ ॥ ॐ भूर्भुवःस्वःराजयक्ष्माणमावाहयामि० राजयक्ष्मन्इहागच्छेहतिष्ठ राजयक्ष्मणेनमः ॥ ४२ ॥ तदुत्तरपदद्वयेवास्तोर्वामहस्तेरुद्रमावाहयेत् ॥ आवाहयामितंरुद्रंसर्वदाशंकरंविभुम् उमाधिष्ठितवामांगंवरदाभयहस्तकम् जटागंगाधरंसौम्यंकर्पूराद्रिसमप्रभम् आगच्छभगवन्रुद्रक्षेत्रेस्मिन्सन्निधौभव॥ॐअवरुद्रमदीमह्यवदेवंत्र्यम्बकम् ॥ यथानोवस्यसस्करद्यथानःश्रेयसस्करद्यथानोव्यवसाययात् ॥३॥५८॥ ॐभूर्भुवः स्वःरुद्रमावाहयामि रुद्रइहागच्छेहतिष्ठ रुद्रायनमः ॥ ४३ ॥ तत्पूर्वपदचतुष्केवामहस्तेपृथ्वीधरमावाहयेत् ॥ पृथ्वीधरत्वंममंडलेस्मिन्नाधारभूतोजगतीतलस्य ॥ स्थित्वावरंदेहिसुखप्रदत्वंगृहाणपूजांभगवन्नमस्ते ॥ ॐ स्योनापृथिविनोभवा

नृक्षरानिवेशनी ॥ यच्छानुःशर्म्मसप्रथाः ॥ ३६ ॥ १३ ॥ ॐभूर्भुवःस्वः पृथ्वीधरमावा
हयामि पृथ्वीधरइहागच्छेहतिष्ठपृथ्वीधरायनमः ॥४४॥ मध्येपदचतुष्टयेवास्तोर्हृदये
ब्रह्माणमावाहयेत्॥आवाहयामिदेवेशंमूर्द्धभागेव्यवस्थितम् हंसयुक्तरथारूढंकोटिसूर्य्य
समप्रभम् चतुर्मुखंचतुर्बाहुंचतुर्वेदसमन्वितम् पुस्तकंचाक्षसूत्रादिदधानंचकमंडलुम्
विश्वकर्म्मेतिनामानंदेवतागणपूजितम् आगच्छभगवन्ब्रह्मन्क्षेत्रेस्मिन्सन्निधौभव ॥
ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोवेनऽआवः ॥ सबुध्न्याऽउपमा
ऽअस्यविष्ठाः सुतश्चयोनिमसतश्चविवः ॥ १३ ॥३॥ ॐभूर्भुवःस्वः ब्रह्माणमावाहया
मि ब्रह्मन्निहागच्छेहतिष्ठ ब्रह्मणेनमः ॥ ४५ ॥ ततोमण्डलबहिर्भागेईशानादिकोण
क्रमेणचरक्यादीन्आवाह्यपूजयेत् ॥ तद्यथा ॥ अहमावाहयिष्यामिचरकींनामरा
क्षसीम्अंकुशंडमरुंशंखंकुडलंचापिबिभ्रतीम्आगच्छचरकित्वंहिपूजेयंप्रतिगृह्यताम् ॥

ॐयन्तेदेवीनिर्ऋतिराबबन्धपाशंग्रीवास्वविचृत्यम् ॥ तन्तेविष्याम्यायुषोनमध्याद
थैताम्पितुमद्धिप्रसूतंनमोभूत्यैयेदंचकार ॥ १२ ॥ ६५ ॥ ॐभूर्भुवः स्वः चरकी
मावाहयामि० चरकिइहागच्छेहतिष्ठ चरक्यैनमः ॥ १ ॥ अथाग्नेय्यांविदारीमावाहये
त् ॥ आवाहयामितांदैत्यांविदालीसदृशाननाम् विशालनखरोमाढ्यांचापबाणधरांव
राम् विदारित्वमिहागच्छपूजेयंप्रतिगृह्यताम् ॐअक्षुराजायंकितवंकृतायांदिनवदर्श
त्रेतायैकल्पिनंद्वापरांयाधिकल्पिनंमास्कन्दायसभास्थाणुम्मृत्यवेंगोव्यच्छमन्तंकाय
गोधातङ्क्षुधेयोगाम्विकृतन्तम्भिक्षमाणऽउपतिष्ठतिदुष्कृतायचरंकाचार्य्यम्पाप्मनेसै
लगम् ॥ ३० ॥ १८ ॥ ॐभूर्भुवः स्वः विदारीमावाहयामि० विदारिइहागच्छे
हतिष्ठ विदार्य्यैनमः ॥ २ ॥ ततोनैर्ऋत्यांपूतनामावाह्यपूजयेत् ॥ पूतनेत्वमि
हागच्छराक्षसीगणसंयुता ॥ मयानिवेदितांपूजांगृहाणवरदाभव ॥ ॐ इन्द्रस्य

क्रोडोदित्यैपाजुस्यृन्दिशांजत्रवोदित्यैभुसङ्गीमूतान्हृदयौपुशेनान्तरिक्षम्पुराततानभ
ऽउदर्य्यैणचक्रवाकौमतंस्ताभ्यान्दिवंवृकाभ्यांगिरीनश्माशिभिरुपलान्लीहावल्मीकान्
क्लोमभिर्ग्लौभिर्ग्गुल्मान्हिराभिः स्रवन्तीर्हृदान्कुक्षिभ्या ँ समुद्रमुदरेणवैश्वानरम्भ
स्मना ॥ २५ ॥ ८ ॥ ॐभूर्भवः स्वः पूतनामावाहयामि० पूतनेइहागच्छेहतिष्ठ
पूतनायैनमः ॥ ३ ॥ अथवायव्येपापराक्षसीमावाहयेत् ॥ अहमावाहयिष्यामि
राक्षसींपापपूर्विकाम् ॥ रक्ताननांधूम्रवस्त्रांराक्षसीगणसंयुताम् ॥ राक्षसित्वमिहाग
च्छपूजेयंप्रतिगृह्यताम् ॐ यस्यास्तेघोरआसञ्जुहोम्येषाम्बन्धानामवसर्ज्जनाय ॥
यांत्वाजनोभूमिरितिप्रमन्दते निर्ऋतित्वाहंपरिवेदविश्वतः ॥ १२ ॥ ६४ ॥ ॐभू
र्भुवःस्वः पापराक्षसीमावाहयामि० पापराक्षसिइहागच्छेहतिष्ठपापराक्षस्यैनमः ॥ ४ ॥
ततः पूर्वदक्षिणपश्चिमोत्तरदिक्षुक्रमेणस्कंदमर्य्यमणंजृंभकंपिलिपिच्छंचावाहयेत् ॥

तथाहि ॥ पूर्वेस्कंदः—आवाहयामिदेवेशंषण्मुखंकृत्तिकासुतम् रुद्रतेजःसमुद्भूतंदेवसेना
समन्वितम् मयूरवाहनंशक्तिपाणिंवैब्रह्मचारिणम् आगच्छभगवन्स्कन्दक्षेत्रेस्मिन्सन्नि
धौभव॥ॐयत्रबाणाःसम्पतन्तिकुमाराविशिखाइव। तन्नुऽइन्द्रोबृहस्पतिरदितिःशर्म्म
यच्छतुविश्वाहाशर्मयच्छतु ॥१७।४८॥ ॐभूर्भुवःस्वःस्कन्दमावाहयामि० स्कन्दइहा
गच्छेहतिष्ठ स्कंदायनमः ॥ १ ॥ दक्षिणेऽर्य्यमणम् ॥ आवाहयामिदेवेशमर्य्यमणंपितृ
नायकम् दिव्यंमहिषमारूढंदंडपाणिंशुभेक्षणम् कर्म्मणांफलदातारंलोकानांकर्मसाक्षि
णम् एहित्वमर्य्यमन्देवक्षेत्रेस्मिन्सन्निधौभव।ॐयदद्यसूरऽउदितेनागामित्रोअर्य्यमा सु
वातिसविताभगः॥३३।२०॥ॐभूर्भुवःस्वःअर्य्यमणमावाहयामि० अर्य्यमन्निहागच्छेह
तिष्ठ अर्य्यम्णेनमः ॥२॥ पश्चिमेजृंभकम्—॥ आवाहयेत्वांप्रहरंचमुख्यंजृंभायमाणंवर
खड्गहस्तम् ॥ प्रत्यग्दिशायांचसुरक्षणीयमत्राधिवासंकुरुजृंभकत्वम्॥ॐहिंकारायस्वा

हाहिंकृतायस्वाहाक्रन्दंतेस्वाहावक्रन्दायस्वाहाप्रोथंतेस्वाहाप्रप्रोथायस्वाहागन्धाय
स्वाहाघ्रातायस्वाहानिविष्टायस्वाहोपविष्टायस्वाहासन्दितायस्वाहावल्गंतेस्वाहासीना
यस्वाहाशयानायस्वाहाजाग्रंतेस्वाहास्वपंतेस्वाहाकूजंतेस्वाहाप्रबुद्धायस्वाहाविजृंभमा
णायस्वाहाविचृंतायस्वाहासꣳहानायस्वाहोपस्थितायस्वाहायंनायस्वाहाप्रायणायस्वा
हा ॥ २२ ॥ ७ ॥ ॐभूर्भुवःस्वः जृंभकमावाहयामि० जृंभकइहागच्छेहतिष्ठ
जृंभकायनमः ॥३॥ उत्तरेपिलिपिच्छम् आवाहयेत्तंपिलिपिच्छकंचमयूरपिच्छानिवि
धारयंतम् ॥ वामेतुहस्तेधनुरादधानंबाणंदधानंत्वितरेतुहस्ते ॥ ॐकास्विदासीत्पूर्वचि
त्तिःकिꣳस्विदासीद्बृहद्वयः ॥ कास्विदासीत्पिलिपिलाकास्विदासीत्पिशङ्गिला ॥२३ ॥
॥५३॥ॐभुर्भवःस्वःपिलिपिच्छमावाहयामि पिलिपिच्छइहागच्छेहतिष्ठ पिलिपिच्छा ॥ ७७ ॥
यनमः॥४॥ततःप्रागाद्यष्टसुदिक्षुइन्द्रादिलोकपालानावाह्यपूजयेत् ॥ तद्यथा पूर्वे

इन्द्रमावाहयेत्॥चतुर्द्दंतगजारूढोवज्रपाणिःपुरंदरः॥प्राचीपतिस्तुध्यातव्योनानाभरण
भूषितः॥ॐत्रातारमिन्द्रमवितारमिन्द्रंᳬहवेहवेसुहवᳬशूरमिंद्रम्॥ह्वयामिशक्रम्पुरुहूत
मिन्द्रᳬस्वस्तिनोमघवाधात्विन्द्रः॥२०॥५०॥ ॐभूर्भुवःस्वरिंद्रमावाहयामि०इन्द्रइहा
गच्छेहतिष्ठ इंद्रायनमः ॥ १ ॥ अथाग्निकोणेऽग्निमावाहयेत् ॥ पिशंगःश्मश्रुकेशाक्षःपि
शंगाक्षोजटाधरः ॥ छागस्थःसाक्षसूत्रश्चसप्तार्चिःशक्तिधारकः ॥ ॐत्वन्नोऽअग्नेवरुण
स्यविद्वान्देवस्यहेडोऽ अवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषाᳬसि०प्रमु
मुग्ध्यस्मत् ॥ २१ । ३ ॥ ॐभूर्भुवः स्वः अग्निमावाहयामि० अग्नेइहागच्छेह
तिष्ठ अग्नयेनमः ॥ २ ॥ दक्षिणेयममावाहयेत् ॥ ईषत्पीतोयमो ध्येयोदंडहस्तोवि
जानता ॥ ॐयमायइत्यादिमंत्रोवायमस्यज्ञेयः ॥ ॐ यमायत्वाङ्गिरस्वतेपितृमतेस्वा
हा ॥ स्वाहाघर्मायस्वाहाघर्म्मःपित्रे ॥ ३८ । ९ ॥ ॐयमायत्वामखायत्वासूर्य्यस्य

त्वातपसे ॥ देवस्त्वासवितामध्वानक्तुपृथिव्याःसꣳस्पृशस्पाहि ॥ अर्चिरसिशोचिरसि
तपोसि ॥ ३७ । ११ ॥ ॐभूर्भुवः स्वर्यममावाहयामि० यमइहागच्छेहतिष्ठ यमाय
नमः॥३॥अथनैर्ऋत्येनिर्ऋतिमावाहयेत्॥ रक्तदृक्पाशभृत्क्रुद्धोनिर्ऋतिर्विकृताननः॥
पुंस्थितः खड्गहस्तश्चभूतवान्राक्षसप्रियः ॥ ॐ असुन्वन्तमयजमानमिच्छस्तेनस्ये
त्यामन्विहितस्करस्य॥अन्यमस्मदिच्छसातइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु॥१२॥
॥६२॥ ॐभूर्भुवःस्वः निर्ऋतिमावाहयामि० निर्ऋतेइहागच्छेहतिष्ठ निर्ऋतयेनमः ॥
॥ ४ ॥ अथपश्चिमेवरुणमावाहयेत् ॥ वरुणःपाशभृत्सौम्यः प्रतीच्यांमकराश्रयः॥ आ
वाहयामिवरुणक्षेत्रेस्मिन्सन्निधौभव ॥ ॐतत्त्वायामिब्रह्मणावन्दमानस्तदाशास्ते
यजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशꣳसमानआयुःप्रमं.षीः ॥ २१ ॥
॥ २ ॥ ॐभूर्भुवः स्वः वरुणमावाहयामि० वरुणइहागच्छेहतिष्ठ वरुणायनमः ॥

र्थानुसमयेनवाषोडशोपचारैः पंचोपचारैर्वाप्रणवादिनमोन्तेनस्वस्वनाममंत्रेणपूजयेत् ॥
तत्र क्रमः ॥ ॐ शिखिनेनमः इदंपाद्यं एषोर्घः इदमाचमनीयम् इदंपुनराचमनीयम्
इदंवस्त्रम् इदमनुलेपनम् एताअक्षताः एतानिपुष्पाणि एषधूपः एषदीपः एतानिना
नाविधानिनैवेद्यानि इदमाचमनीयम् इदंतांबूलं इदंपूगीफलम् एषादक्षिणा ॥ १ ॥ ए
वंपर्ज्जन्यायनमः एतानिपूर्वोक्तानिपाद्यादीनि ॥ २ ॥ जयंतायनमः एतानिपा० ॥३ ॥
कुलिशायनमः एतानिपाद्यादीनि ॥४॥ सूर्यायनमः एतानिपा० ॥५॥सत्यायनमः एता
नि० ॥ ६ ॥ भृशायनमः एतानिपा०॥७॥ आकाशायनमः एतानिपा०॥८॥वायवेनमः
एतानिपा० ॥९॥ पूष्णेन०एतानि॥१०॥वितथायनमःएतानिपा०॥११॥गृहक्षतायनमः
एतानिपा० ॥१२॥ यमायनमः एतानिपा० ॥१३॥ गंधर्वायनमः एतानिपा० ॥ १४ ॥
भृंगराजायनमः एतानिपा० ॥ १५ ॥ मृगायनमः एतानिपा० ॥ १६ ॥ पितृभ्योनमः

वाहयेत् ॥ पंचवक्त्रंदशभुजंत्रिनेत्रंस्मितसुंदरम् ॥ कर्पूरगौरंचंद्रार्द्धशेखरंसुविभूषितम् ॥
 नीलग्रीवमनाहारंव्याघ्रचर्मांबरावृतम् ॥ कमंडलक्षसूत्रादिपाशशूलधरंहरम् ॥ उद्दंड
दंडडमरुखट्वांगाभयपात्रकम् ॐ अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरंहूतौसजोषाः ॥
यःशर्ठ·संतेस्तुवतेधायिपज्रऽइन्द्रज्ज्येष्ठाऽअस्मा २ ऽअवन्तुदेवाः ॥३३॥५०॥ ॐ भूर्भु
वःस्वः रुद्रमावाहयामि० रुद्रइहागच्छेहतिष्ठ ॥ रुद्रायनमः ॥९॥ निर्ऋतिपश्चिमयोर्म
ध्येभूमिमावाहयेत् ॥ ससुवर्णामहीप्रोक्तादिव्याभरणभूषिता ॥ चतुर्भुजासौम्यव
पुश्चंद्रांशुसदृशांबरा ॥ रत्नपात्रसस्यपात्रपात्रौषधिसमन्विता ॥ पद्माकराचध्यात
व्याभूमिर्यादवनंदन ॥ ॐ स्योनापृथिवीनोभवानृक्षरानिवेशनी ॥ यच्छानःशर्मसप्रथाः
॥ ३६ ॥ १३ ॥ ॐ भूर्भुवःस्वः भूमिमावाहयामि० भूमेइहागच्छेहतिष्ठ ॥ भूम्यैनमः
॥ १० ॥ ततःशिखिप्रभृतिपंचचत्वारिंशत्देवान्प्रत्येकमेकत्रवाकांडानुसमयेनपदा

र्थानुसमयेनवाषोडशोपचारैःपंचोपचारैर्वाप्रणवादिनमोन्तेनस्वस्वनाममंत्रेणपूजयेत् ॥
तत्र क्रमः ॥ ॐ शिखिनेनमः इदंपाद्यं एषोर्घः इदमाचमनीयम् इदंपुनराचमनीयम्
इदंवस्त्रम् इदमनुलेपनम् एताअक्षताः एतानिपुष्पाणि एषधूपः एषदीपः एतानिना
नाविधानिनैवेद्यानि इदमाचमनीयम् इदंतांबूलं इदंपूगीफलम् एषादक्षिणा ॥ १ ॥ ए
वंपर्ज्जन्यायनमः एतानिपूर्वोक्तानिपाद्यादीनि ॥ २ ॥ जयंतायनमः एतानिपा० ॥३ ॥
कुलिशायनमः एतानिपाद्यादीनि ॥४॥ सूर्यायनमः एतानिपा० ॥५॥सत्यायनमः एता
नि० ॥ ६ ॥ भृशायनमः एतानिपा०॥७॥ आकाशायनमः एतानिपा०॥८॥वायवेनमः
एतानिपा० ॥९॥ पूष्णेन०एतानि॥१०॥वितथायनमःएतानिपा०॥११॥गृहक्षतायनमः
एतानिपा० ॥१२॥ यमायनमः एतानिपा० ॥१३॥ गंधर्वायनमः एतानिपा० ॥ १४ ॥
भृंगराजायनमः एतानिपा० ॥ १५ ॥ मृगायनमः एतानिपा० ॥ १६ ॥ पितृभ्योनमः

एतानिपा० ॥ १७ ॥ दौवारिकायनमः एतानिपाद्या० ॥ १८ ॥ सुग्रीवायनमः एतानि
पा०॥१९॥ पुष्पदंतायनमः एतानिपा०॥ २० ॥ जलाधिपतयेनमः एतानिपा०॥२१॥
असुरायनमः एतानिपा० ॥ २२ ॥ शेषायनमः एतानिपा० ॥ २३ ॥ पापा
यनमः एतानिपा० ॥ २४ ॥ रोगायनमः एतानिपा० ॥ २५ ॥ अहयेनमः एतानिपा०
॥ २६ ॥ मुख्यायनमः एतानिपा० ॥२७॥ भल्लाटायनमः एतानिपा० ॥ २८ ॥ सोमा
यनमः एतानिपा० ॥ २९ ॥ नागायनमः एतानिपा ॥३० ॥ अदितयेनमः एतानिपा०
॥ ३१ ॥ दितयेनमः एतानिपा० ॥३२॥ अद्भ्योनमः एतानिपा० ॥३३॥ सावित्रायनमः
एतानिपा०॥३४॥ जयायनमः एतानिपा०॥३५॥रुद्रायनमः एतानिपा० ॥३६॥ अर्य्य
म्णेनमः एतानिपा० ॥३७॥ सवित्रेनमः एतानिपा० ॥३८॥ विवस्वतेनमः एतानिपा०
॥ ३९ ॥ विबुधायनमः एतानिपा० ॥४०॥ मित्रायनमः एतानिपा० ॥४१ ॥ राजयक्ष्म

णेनमः एतानिपा० ॥ ४२ ॥ पृथ्वीधरायनमः एतानिपा० ॥ ४३ ॥ आपवत्सायनमः
एतानिपा० ॥ ४४ ॥ ब्रह्मणेनमः एतानिपाद्यादीनि ॥ ४५ ॥ ततोमंडलबाह्येईशानेचर
क्यैनमः एतानिपा० ॥ १ ॥ आग्नेय्यांविदार्य्यैनमः एतानिपा० ॥ २ ॥ नैर्ऋत्यांपूतना
यैनमः एतानिपाद्या० ॥ ३ ॥ वायव्येपापराक्षस्यैनमः एतानिपा० ॥ ४ ॥ पूर्वेस्कंदा
यनमः एतानिपा० ॥ १ ॥ दक्षिणेअर्यम्णेनमः एतानिपा० ॥ २ ॥ पश्चिमेजृंभकायन
मः एतानिपा० ॥ ३ ॥ उत्तरेपिलिपिच्छायनमः एतानिपा० ॥ ४ ॥ पूर्वेइंद्रा
यनमः एतानिपाद्या० ॥ १ ॥ अग्निकोणेअग्नयेनमः एतानिपाद्यादीनि० ॥ ३ ॥
॥ २ ॥ दक्षिणेयमायनमः एतानिपा० ॥ ३ ॥ नैर्ऋत्येनिर्ऋतयेनमः एतानिपा०
॥ ४ ॥ पश्चिमेवरुणायनमः एतानिपा० ॥ ५ ॥ वायव्येवायवेनमः एतानिपा०
॥ ६ ॥ उत्तरेकुबेरायनमः एतानिपाद्या० ॥ ७ ॥ ईशानेईशानायनमः एतानिपा०

॥ ८ ॥ ईशानपूर्वयोर्मध्येरुद्रायनमः एतानिपा० ॥ ९ ॥ निर्ऋतिपश्चिमयोर्मध्येभूम्यै नमः एतानिपा० ॥ १० ॥ पूर्वेउग्रसेनायनमः एतानिपा० ॥ १ ॥ दक्षिणेडाम रायनमः एतानिपाद्या० ॥२॥पश्चिमेमन्हालित्सायनमः एतानिपा० ॥३॥ उत्तरेकुलिशा यनमः एतानिपाद्यादीनि० ॥ ४ ॥ एवंवास्तुमंडलदेवतानांपूजनंकृत्वातदनंतरंमंडल मध्येएव मंडूकादिपीठदेवेभ्योनमः इतिपीठदेवानावाह्यसंपूज्य अनंतरंवास्तुमंडलम ध्येमंडलस्थोत्तरेवायथाविधिनाघटंपीठंवासंस्थाप्यतस्योपरिवास्तुप्रतिमायाअग्न्युत्ता रणंकृत्वावास्तुप्रतिमांस्थापयेत् ॥ अथाग्न्युत्तारणमंत्राः—देशकालौसंकीर्त्य अस्यांमू र्तौअवघातादिदोषपरिहारार्थमग्न्युत्तारणंदेवतासांनिध्यार्थंच प्राणप्रतिष्ठांकरिष्ये ॥ समुद्रस्यत्वेत्यष्टाभिर्ऋग्भिः प्रथमावृत्तौदुग्धधारांद्वितीयावृत्तौजलधारांचप्रतिमा ॥ ८१ ॥ यांपात्रस्थितायांदद्यात् ॥ ॐसमुद्रस्यत्वावकयाग्नेपरिव्ययामसि ॥ पावकोऽअ

स्मभ्यंर्ठ॰शिवोभंव ॥ १७ ॥ ४ ॥ हिमस्यंत्त्वाजुरायुणाग्ग्नेपरिंह्वययामसि ॥पाव
कोऽअस्म्मभ्यंर्ठ॰शिवोभंव ॥ १७ ॥ ५ ॥ उपुज्म्मन्नुपंवेतुसेवंतरनुदीष्ष्वा ॥ अग्ने
पित्तमुपामंसिमण्डूंकिताभिरागंहिसेमन्नोंयज्ञम्पांवुकवंर्णर्ठ॰ शिवंकृंधि ॥ १७ ॥ ६ ॥
अपामिदन्न्ययंनर्ठ॰ समुद्रस्यंनिवेशंनम् ॥ अन्न्याँ स्ते॒ऽअस्मत्तंपन्तुहेतयंः ॥ पाव
कोऽअस्म्मभ्यंर्ठ॰शिवोभंव ॥ १७ ॥ ७ ॥ अग्नेपावकरोचिषांमुन्द्रयांदेवजिह्वयां ॥
आदेवान्न्वंक्षियक्षिंच ॥ १७ ॥ ८ ॥ सनंःपावकदीदिवोग्नेंदेवाँ इहावंह ॥ उपंयु
ज्ञर्ठ॰हुविश्चंनः ॥ १७ ॥ ९ ॥ पावकयायश्चितयंन्त्याकृपाक्षामंन्नुरुचऽउुपसोन
भानुनां ॥ तूर्वन्नयामुन्नेतंशस्युनूरणऽ आयोघृणेनतंतृषाणोअुजरंः ॥ १७ ॥
॥ १० ॥ नमंस्तेहरंसेशोचिषेनमंस्तेऽअस्त्वर्च्चिषे ॥ अन्न्याः स्तेअस्म्मत्तंपन्तुहे
तयंः पावकोऽअस्म्मभ्यंर्ठ॰शिवोभंव ॥ १७ ॥ ११ ॥ इतिरीत्याग्न्युत्तारणंकृत्वा

प्र. सं. वास्तुंषोडशोपचारेणपंचोपचारेणवायथाविधिनायथाशक्तिपूजयेत् ॥ ॐभूर्भुवःस्वः वास्तु.
॥ ८२ ॥ वास्तुपुरुषमावाहयामि ॥ ॐ भूः वास्तुपुरुषमावाहयामि ॥ ॐ भुवोवास्तुपुरुषमावा
हयामि ॥ ॐ स्वः वास्तुपुरुषमावाहयामि ॥ तदुत्तरेतत्रैववास्तोष्पतेइतिमंत्रेणवृषवा
स्तुप्रतिमामावाहयेत् वास्तोष्पतेइतिमंत्रस्यवसिष्ठऋषिस्त्रिष्टुप्छंदः वास्तुर्देवता वा
स्तुस्थापनेविनियोगः ॥ ॐवास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोऽअनमीवोभवानः ॥
यत्त्वेमहेप्रतितन्नोजुषस्वशन्नोभवद्विपदेशंचतुष्पदे ॥ ॐवास्तोष्पतयेनमः वास्तोष्प
तिमावाहयामिस्थापयामि सुवर्णस्यरूप्यस्यवाप्रतिमाकर्त्तव्या ॥ ॐ ह्रींनमोभगवन्
वास्तुपुरुष महाबलपराक्रम सर्वदेवताश्रितशरीर ब्रह्मपुत्र सकलब्रह्मांडधारिन् भूम्य
र्पितमस्तकपुरपत्तनप्रासादगृहवापीकूपादिसन्निवेशसान्निध्यकर विश्वंभरपरमपुरुषस्व ॥ ८२ ॥
रूपचक्रशार्ङ्गधनुःकर वरदाभयहस्तवास्तोनमस्ते ॥ एह्येहिभगवन्वास्तोगृहेस्मि

न्सर्वसिद्धये ॥ जानुनीकूर्परासक्तंदिशिवातहुताशयोरितिमंत्रेणेशानशिरसंनैर्ऋत्य
पादमाग्नेयजानुकंवायव्यकूर्परमाकुंचितकरंशुभमुत्तानंवास्तुपुरुषमावाह्यवास्तोष्पतइ
तिपूर्वोक्तेनमंत्रेण ॐ वास्तवेनमइतिनाममंत्रेणवाषोडशोपचारैः संपूज्य ॥ ॐ एह्ये
हिभगवन्वास्तोइमंमयोपनीतंबलिंगृहाणममगृहमच्छिद्रंकुरु सकलदुष्टेभ्योरक्षस्वाहे
तिसतांबूलदक्षिणांबलिंदत्त्वाप्रार्थयेत् ॥ यज्ञभागंप्रतीक्षस्वपूजांचैवबलिंमम ॥ नमोन
मस्तेदेवेशममस्वस्तिकरोभव ॥ अथप्राणप्रतिष्ठा ॥ अस्यश्रीप्राणप्रतिष्ठामंत्रस्यब्रह्मवि
ष्णुरुद्राऋषयः ऋग्यजुःसामानिच्छंदांसि क्रियामयवपुः प्राणाख्यादेवता आंबी
जं क्रौंशक्तिः प्राणप्रतिष्ठायांविनियोगः ॥ ब्रह्मविष्णुरुद्रऋषिभ्योनमः शिरसि
ऋग्यजुःसामच्छंदोभ्योनमः मुखे प्राणाख्यदेवतायैनमः हृदि आंबीजायनमः
गुह्ये क्रौंशक्त्यैनमः पादयोः ॐकंखंगंघंङं अंपृथिव्यप्तेजोवाय्वाकाशात्मने आं

हृदयायनमः ॐचंछंजंझंञंईंशब्दस्पर्शरूपरसगन्धात्मनेईंशिरसेस्वाहा ॐटंठंडंढंणंउं
श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मनेऊंशिखायैवौषट् ॐतंथंदंधंनंएंवाक्पाणिपादपायूपस्था
त्मनेऐंकवचायहुम् ॐपंफंबंभंमम् ओंवचनदानविहरणोत्सर्गानंदात्मने औंनेत्रत्रया
यवौषट् ॐयंरंलंवंशंषंसंहंळंक्षंअं मनोबुद्ध्यहंकारचित्तात्मनेअः अस्त्रायफट् एव
मात्मनिमूर्त्तौंच कृत्वामूर्तिंस्पृष्ट्वाजपेत् ॥ ॐह्रींक्रौंयंरंलंवंशंषंसंहम् देवस्यप्राणाइह
प्राणाः ॐआंह्रींहंसः देवस्यजीवइहस्थितः ॐआंह्रींहंसः देवस्यसर्वेंद्रियाणि
ॐआंह्रींहंसः देवस्यवाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्यस्वस्तयेसुखेनसु
चिरंतिष्ठंतुस्वाहा अर्चाहृद्यंगुष्ठंदत्वाजपेत् ॥ अस्यैप्राणाःप्रतिष्ठंतुअस्यैप्राणाःक्ष
रंतुच ॥ अस्यैदेवत्वमर्चायैमामहेतिचकश्चन प्रणवेनसन्निरुद्ध्यसजीवंध्यात्वाध्रुवाद्यौ
रित्यृचंजप्त्वाकर्णेंगायत्रींदेवमंत्रंचजपेत् ॥ ततःकर्त्तास्वागतंदेवदेवेशमद्भाग्यात्त्वामि ॥ ८३ ॥

हागतः प्राकृतत्वमदृष्ट्वामांबालवत्परिपालयेतिपठेत् ॥ अथसर्वासांवास्तुमंडलदेवतानां
बलिदानप्रकारउच्यते ॥ शिखिनेपायसम् ॥१॥ पर्जन्याय पायसम् ॥ २ ॥ जयंतायपी
तध्वजपैष्टसहितंकूर्म्मम् ॥ ३ ॥ कुलिशायपंचरत्नसहितपिष्टम्॥ ४ ॥ सूर्यायधूम्रवर्णवि
तानंपिष्टशक्तिसमन्वितंरक्तचंदनयुतंपायसम्॥५॥सत्यायघृतयुक्तान्नं गोधूमान्न ॥ ६ ॥
भृशाय पायसम् ॥७॥ आकाशायशष्कुलीः॥८॥सक्तून्वायवे॥९॥ लाजान्पूष्णे ॥१०॥
चणकौदनंवितथाय॥११॥ मधुयुक्तमन्नंगृहक्षताय ॥१२॥ पिशितौदनंयमाय ॥ १३ ॥
गंधयुक्तमोदनंगंधर्वाय ॥ १४ ॥ मेषजिह्वांभृंगराजाय ॥ १५ ॥ यवान्नंमृगाय ॥ १६ ॥
तिलयुक्तमोदनंपितृभ्यः ॥१७॥ पैष्टकृष्णबलिंचदौवारिकाय ॥ १८ ॥ अपूपान्सुग्रीवा
य ॥ १९ ॥ पायसंपुष्पदंताय ॥ २० ॥ कुशयुक्तंसुवर्णपद्मंवर्णवालंवरुणाय ॥ २१ ॥ सु
रासवमसुराय ॥ २२ ॥ घृतौदनंशेषाय ॥ २३ ॥ यवान्नपापाय ॥ २४ ॥ घृतयुक्तान्नमो

दकान्नरोगाय ॥ २५ ॥ नागकेशरंअहये ॥ २६ ॥ भक्ष्यंमुख्याय ॥ २७ ॥ मुद्गौदनंभ
ल्लाटाय ॥ २८ ॥ मधुयुक्तंपायसंसोमाय ॥ २९ ॥ शालितंडुलयुतंपैष्टंनागाय ॥ ३० ॥
विलेपिकामदितये ॥ ३१ ॥ पूरिकांदितये ॥ ३२ ॥ क्षीरमद्भ्यः ॥ ३३ ॥ मरिचकुशोद
कयुक्तान्नमोदकान्सावित्राय ॥ ३४ ॥ घृतचंदनंजयाय ॥ ३५ ॥ बिल्वफलानिरुद्राय ॥ ३६ ॥
शर्करासहितंपायसंअर्य्यम्णे ॥ ३७ ॥ रक्तपुष्पाणिगुडञ्चसवित्रे ॥ ३८ ॥ रक्तचंदनसहित
पायसंविवस्वते ॥ ३९ ॥ आज्यसहितंहरिद्रौदनंविबुधाय ॥ ४० ॥ घृतौदनंमित्राय ॥ ४१ ॥
अपक्वंपक्वंचमांसंराजयक्ष्मणे ॥ ४२ ॥ मांससहितंकूष्मांडंपृथ्वीधराय ॥ ४३ ॥ दधिआ
पवत्साय ॥ ४४ ॥ तिलाक्षतहविर्विविधानिभक्ष्यभोज्यानिब्रह्मणे ॥ ४५ ॥ ततोयथाश
क्त्यासर्वेभ्यःकांचनम् ॥ आचार्यायब्रह्मणेचगांदद्यात् ॥ ततईशानादिकोणक्रमेणमांसौ
दनंघृतसहितंचचरक्यैदद्यात् ॥ १ ॥ मांसौदनसहितंहरिद्रौदनंसरुधिरंबिडाल्यै० ॥ २ ॥

दध्योदनंमत्स्यखंडयुतंपूतनायै० ॥ ३ ॥ मत्स्यमांसंसुरासवंपायसयुक्तंपापराक्षस्यै०
॥ ४ ॥ ततःपूर्वादिदिक्षु मांसौदनंस्कंदाय० ॥ १ ॥ तिलोदकसहितानपूपानर्य्य
म्णे० ॥ २ ॥ सरुधिरंमांसंजृंभृकाय० ॥ ३ ॥ रत्नयुक्तमन्नंपिलिपिच्छाय० ॥ ४ ॥ ततो
भक्ष्यभोज्यैर्दिक्पालेभ्योबलिंदद्यात् निरुक्तविशेषबल्यसंभवेतुसर्वासामपिवास्तुमंडल
देवतानामाज्ययुक्तपायसेनबलिंदद्यात् ॥ तस्याप्यभावेकुशपुष्पघृताक्षतैरपिसर्वेभ्योब
लीन्दद्यात् ततअचभ्याचार्यःस्वकुण्डमागत्यआज्यभागांतंपूर्वप्रदर्शितंकर्म्मकृत्वा अ
ग्निस्थापनानंतरंपूर्वमेववाकृत्वा चरुणावास्तोष्पतेइतिमंत्रेणाष्टोत्तरशतंजुहुयात् वा
स्तोष्पतेइतिमंत्रस्यवसिष्ठऋषिस्त्रिष्टुपूछंदः वास्तुर्देवता वास्तुप्रीत्यर्थेचर्वादिहोमेविनि
योगः ॐवास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोअनमीवोभवानः॥यत्त्वेमंहेप्प्रातितन्नोजु

१५

षस्वशन्नोभवद्विपदेशञ्चतुष्पदेस्वाहा एवमेव मधुसर्पिषा यवैः कृष्णतिलैः क्षीरिवृक्षस
मिद्भिर्घृतमध्वक्ताभिस्तदभावेअपामार्गकुशशमीदूर्वाभिरष्टोत्तरशतमष्टाविंशतिसंख्यं
वाप्रतिद्रव्यंहुत्वावास्तोष्पतेइतिचतसृभिर्वास्तोष्पतेध्रुवास्थूणामित्यनेनच पंचबिल्व
फलानितद्बीजानिवामंत्रपंचकेनजुहुयात् तथाहि वास्तोष्पतेइतिमंत्रस्यवसिष्ठऋषिः
तिसृणांवास्तोष्पतिर्ऋषिस्त्रिष्टुभोंत्यागायत्री वास्तुर्देवता बिल्वहोमेविनियोगः ॥ ॐ
वास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोऽअनमीवोभवानः॥ यत्त्वेमहेप्रतितन्नोजुषस्व
शन्नोभवद्विपदेशञ्चतुष्पदेस्वाहा इदंवास्तोष्पतये० ॥ १ ॥ वास्तोष्पतेप्रतरणोन
एधिगयस्फानोगोभिरश्वेभिरिन्दो॥अजरासस्तेसख्येस्यामपितेवपुत्रान्प्रतिनोजुषस्व
स्वाहा इदंवास्तोष्पतये० ॥ २ ॥ वास्तोष्पतेशग्मयासंसदातेसक्षीमहिरण्मयागातु
मत्या ॥ पाहिक्षेमऽउतयोगेवरन्नोयूयम्पातः स्वस्तिभिःसदानःस्वाहा इदंवास्तोष्प ॥ ८९ ॥

तये० ॥ ३ ॥ अमीवहावास्तोष्पतेविश्वांरूपाण्याविशन्॥सखासुशेवएधिनःस्वाहा इदं वास्तोष्पतये० ॥ ४ ॥ वास्तोष्पतेध्रुवास्थूणामित्यस्यवास्तोष्पतिर्बृहतीछन्दोवास्तु देवताबलिहोमेविनियोगः ॐवास्तोष्पतेध्रुवास्थूणांसत्रंसोम्यानाम्॥द्रप्सोभेत्तापुरांश श्वतीनामिन्द्रोमुनीनांसखास्वाहा इदंवास्तोष्पतये० ॥ ५ ॥ ततः प्रणवाद्यैः स्वाहांतैः शिख्यादिवास्तुदेवतानाममंत्रैर्यथाशक्तितिलैः प्रतिदैवतमष्टोत्तरशतमष्टाविंशतिरष्टसं ख्यायावाहुत्वा वास्तुमर्म्मसंधानायाऽघोरान्नयेऽघोरेभ्योथघोरेभ्यइतिमंत्रेणतिलैरष्टोत्त रशतंहुत्वादिग्बलिं दद्यात् ॥ तथाहि ॐ शिखिने स्वाहा ॥ १ ॥ ॐ पर्जन्याय स्वाहा ॥ २ ॥ ॐ जयंताय स्वाहा ॥ ३ ॥ ॐ कुलिशाय० ॥ ४ ॥ ॐ सूर्यायस्वाहा ॥ ५ ॥ ॐ सत्याय स्वाहा ॥ ६ ॥ ॐ भृशाय स्वाहा ॥ ७ ॥ ॐ आकाशाय० ॥ ८ ॥ ॐ वायवे० ॥ ९ ॥ ॐ पूष्णे० ॥१०॥ ॐ वितथायस्वाहा ॥११॥ गृहक्षतायस्वाहा ॥१२॥

ॐ यमायस्वाहा ॥ १३ ॥ गन्धर्वायस्वाहा ॥ १४ ॥ भृंगराजायस्वाहा ॥ १५ ॥ मृगायस्वाहा ॥ १६ ॥ पितृभ्यः स्वाहा ॥ १७ ॥ दौवारिकायस्वाहा ॥ १८ ॥ सुग्रीवायस्वाहा ॥ १९ ॥ पुष्पदंतायस्वाहा ॥ २० ॥ वरुणायस्वाहा ॥ २१ ॥ असुरायस्वाहा ॥ ॥ २२ ॥ शोषायस्वाहा ॥ २३ ॥ पापायस्वाहा ॥ २४ ॥ रोगायस्वाहा ॥ २५ ॥ अहयेस्वाहा ॥ २६ ॥ मुख्यायस्वाहा ॥ २७ ॥ भल्लाटायस्वाहा ॥ २८ ॥ सोमायस्वाहा ॥ २९ ॥ नागायस्वाहा ॥ ३० ॥ अदितयेस्वाहा ॥ ३१ ॥ दितयेस्वाहा ॥ ३२ ॥ अद्भ्यः स्वाहा ॥ ३३ ॥ सावित्रायस्वाहा ॥ ३४ ॥ जयायस्वाहा ॥ ३५ ॥ रुद्रायस्वाहा ॥ ३६ ॥ अर्य्यम्णेस्वाहा ॥ ३७ ॥ सवित्रेस्वाहा ॥ ॥ ३८ ॥ विवस्वतेस्वाहा ॥ ३९ ॥ विबुधायस्वाहा ॥ ४० ॥ मित्रायस्वाहा ॥ ४१ ॥ राजयक्ष्मणेस्वाहा ॥ ४२ ॥ पृथ्वीधरायस्वाहा ॥ ४३ ॥ आपवत्सायस्वाहा ॥ ४४ ॥

ब्रह्मणेस्वाहा ॥ ४५ ॥ चरक्यैस्वाहा ॥ १ ॥ बिडाल्यैस्वाहा ॥ २ ॥ विदार्य्यैस्वाहा ॥ ॥ ३ ॥ पूतनायैस्वाहा ॥ ४ ॥ पापराक्षस्यैस्वाहा ॥ ५ ॥ उग्रसेनायस्वाहा ॥ ६ ॥ इंद्रायस्वाहा ॥ ७ ॥ महाकालायस्वाहा ॥ ८ ॥ जृंभकायस्वाहा ॥ ९ ॥ पिलिपिच्छायस्वाहा ॥ १० ॥ इंद्रायस्वाहा ॥ १ ॥ अग्नयेस्वाहा ॥ २ ॥ यमायस्वाहा ॥ ३ ॥ निर्ऋतयेस्वाहा ॥ ४ ॥ वरुणायस्वाहा ॥ ५ ॥ वायवेस्वाहा ॥ ६ ॥ सोमायस्वाहा ॥ ॥ ७ ॥ कुबेरायस्वाहा ॥ ८ ॥ ब्रह्मणेस्वाहा ॥ ९ ॥ अनंतायस्वाहा ॥ १० ॥ इतिवास्तुमंडलमध्यवर्तिनांदेवतानांहोमः ॥ अथाघोरमंत्रेणवास्तुमर्म्मसंधानायतिलैरष्टोत्तरशतंजुहुयात् ॐ अघोरेभ्योऽथघोरेभ्योघोरघोरतरेभ्यः ॥ सर्वेभ्यःसर्वशर्वेभ्योनमस्तेऽअस्तुरुद्ररूपेभ्यःस्वाहा अथदिक्पालबलिदानम् पूर्वेइंद्रायइमंदधिमाषभक्तबलिंसमर्पयामीत्यादिरीत्यावाक्यमूहनीयम् ततः कृणुष्वपाजः पुनंतुमेतिमंत्रद्वयाभ्यां

त्रिसूत्र्यामंडपंसंवेष्ट्यपरितोजलदुग्धयोः पृथगविच्छिन्नेधारेदद्यात् तंद्यथा कृणुष्व
पाजः प्प्रसितिन्नपृथ्वींय्याहिराजेवामंवा ९ँ ॥ ऽइभेन ॥ तृष्वीमनुप्प्रासितिन्द्रूणानो
स्तोसिविद्ध्यंरक्षसुस्तपिष्ठैः ॥ १३ ॥९॥ पुनन्तुंमादेवजनाः पुनन्तुमनंसाधियंः॥पुनन्तु
विश्वांभूतानिजातवेदःपुनीहिमां ॥१९॥३९॥ तदनन्तरंमंडलेपीठेवापूजितांहैमींवास्तुप्र
तिमां दधिदूर्वासप्तधान्यशैवालगंधाक्षतयुतेऽपक्कमृद्भांडे संस्थाप्यतंभांडंपिधायचतुः
षष्टिधाभाजितनवधावाभाजिते प्रासादाग्नेयकोणपदादुत्तरे आकाशपदे जानुमात्रंगर्त्तं
कृत्वाजलेनापूर्य्यं गंधपुष्पाणिगर्तेंप्रक्षिप्य निरुक्तमृन्मयभांडंतत्रानिधायगर्त्तंतयैवमृदा
पूरयेत् मृदआधिक्येशुभम् ॥ ॥ इतिवास्तुमंडलपूजाप्रकारः ॥ ॥ अथसूर्यादीनां
नवग्रहाणामावाहनम् ॥ रक्तपुष्पाक्षतैः मध्यवर्त्तुलाकारेचक्रेरविमावाहयेत् ॥ ॐ दि
वाकरंसहस्रांशुंसुरासुरनमस्कृतम् ॥ लोकनाथंविश्वनेत्रंसूर्यमावाहयाम्यहम्॥ ॐआकृ

ष्णेनुरजंसावर्त्तमानोनिवेशयन्नमृतंमर्त्यञ्च ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवं
नानिपश्यन् ॥३३।४३ ॥ॐभूर्भुवः स्वः कलिंगदेशोद्भवकाश्यपगोत्रसूर्यइहागच्छइह
तिष्ठ ॥ आग्नेय्यामर्द्धचंद्राकारेचक्रेश्वेतपुष्पाक्षतैश्चंद्रमावाहयेत् ॥ हिमरश्मिनिशा
नाथंतारकाभिःसमन्वितम् ॥ ओषधीनांतुराजानंसोममावाहयाम्यहम् ॥ ॐइमन्देवाऽ
असपत्नर्ठंसुवद्धम्महतेक्षत्रायमहतेज्ज्यैष्ठ्याय महतेजानंराज्ज्यायेन्द्रस्येन्द्रियाय
इममुमुष्ष्यंपुत्रममुष्ष्यैपुत्रमस्यैविशऽएषवोमीराजा सोमोस्म्माकम्ब्राह्मणानार्ठरा
जा ॥ १० ॥ २८ ॥ ॐभूर्भुवःस्वः यमुनातीरदेशोद्भवआत्रेयसगोत्रचंद्रइहागच्छइहति
ष्ठ ॥ याम्यांत्रिकोणेचक्रेरक्तपुष्पाक्षतैःभौममावाहयेत् धरणीगर्भसंभूतंलोहितांगंसु
वर्चसम् ॥ कुमारंक्रूरकर्माणंभौममावाहयाम्यहम् ॥ ॐ अग्निर्म्मूर्द्धादिवःकुकुत्प
तिः पृथिव्याऽ अयम् ॥ अपांर्ठरेतार्ठसिजिन्न्वति ॥ ३ ॥ १२ ॥

प्र. सं. ॐभूर्भुवः स्वः अवंतिदेशोद्भवभारद्वाजगोत्रभौमइहागच्छइहतिष्ठ ॥ ईशान्यांपी ग्र. स्था.
॥ ८८ ॥ तपुष्पाक्षतैर्बुधमावाहयेत् ॥ बुद्धंबुद्धिप्रदातारंसोमवंशविवर्द्धनम् ॥ यजमा
नहितार्थायबुधमावाहयाम्यहम् ॥ ॐउद्बुध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्त्तेसꣳ
सृजेथामयञ्च ॥ अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत ॥
॥ १५ ॥ ५४ ॥ ॐभूर्भुवः स्वः मगधदेशोद्भवआत्रेयगोत्रबुधइहागच्छइहतिष्ठ ॥ उ
त्तरेसितपुष्पाक्षतैः गुरुमावाहयेत् ॥ बुद्धिश्रेष्ठोंगिरःपुत्रोदेवानांयोगुरुःस्मृतः ॥ तस्मिं
द्रमंत्रिणंभक्त्यागुरुमावाहयाम्यहम् ॥ ॐ बृहस्पतेऽअतियदर्य्योऽअर्हाद्युमद्विभातिक्रतु
मज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्रजाततदस्मासुद्रविणन्धेहिचित्रम् ॥ उपयाम
गृहीतोसिबृहस्पतयेत्वैषतेयोनिर्बृहस्पतयेत्वा ॥ २६ ॥ ३ ॥ ॐभूर्भुवः स्वः सिंधुदेशोद्भ ॥ ८८ ॥
वआंगिरसगोत्रबृहस्पतेइहागच्छइहतिष्ठ ॥ पूर्वेश्वेतपुष्पाक्षतैः भृगुमावाहयेत् ॥ प्र

विष्टेजठरेशंभोर्निःसृतःपुनरेवयः ॥तंसुरारिगुरुंभक्त्याशुक्रमावाहयाम्यहम् ॥ ॐ अन्ना
त्परिस्रुतोरसम्ब्रह्मणाव्यपिबत्क्षत्रम्पयः सोमम्प्रजापतिः ॥ ऋतेनंसत्यमिंद्रियंवि
पानंठं शुक्रमन्धंसइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ १९ ॥ ३५ ॥ ॐ भूर्भु
वः स्वः भोजकटदेशोद्भवभार्गवगोत्रशुक्रइहागच्छइहतिष्ठ ॥ पश्चिमेकृष्णपुष्पाक्ष
तैः शनिमावाहयेत् ॥ धर्मराजानुजंदेवं भिन्नांजनचयोपमम् ॥ छायामार्त्त
ण्डसंभूतंशनिमावाहयाम्यहम् ॥ ॐ शन्नो देवीरभिष्टय आपो भवन्तु पी
तये ॥ शंय्योरभिस्रवन्तुनः ॥ ३६ ॥ १२ ॥ ॐ भूर्भुवः स्वः सौराष्ट्रदेशोद्भव
काश्यपगोत्रशनेइहागच्छइहतिष्ठ ॥ नैर्ऋत्यांधूम्रपुष्पाक्षतैःराहुमावाहयेत् ॥ च
क्रेणछिन्नमूर्द्धानंविष्णुनाचनिरीक्षितम् ॥ सैंहिकेयंमहाकायंराहुमावाहयाम्यहम् ॥
ॐ कयानश्चित्रऽआभुवदूतीसदावृधः सखा ॥ कयाशचिंष्ठयावृता ॥ ३६ । ४ ॥ ॐ भू

प्र. सं. भुंवःस्वःराठिनादेशोद्भवपैठीनसिगोत्रराहोइहागच्छइहतिष्ठ ॥ वायव्यांधूम्रपुष्पाक्ष ग्र. स्था.
॥ ८९ ॥ तैःकेतुमावाहयेत् ॥ अंजनाभंमहारौद्रंबहुरूपंमहाग्रहम् ॥ महाकायंक्रूरकर्माणंके
तुमावाहयाम्यहम् ॥ ॐकेतुंकृण्वन्नकेतवेपेशोमर्याऽअपेशसे ॥ समुषद्भिरजायथाः ॥
॥ २९ । ३७ ॥ ॐभूर्भुवःस्वः अंतर्वेदिसमुद्भवजैमिनिगोत्रकेतोइहागच्छइहतिष्ठ ॥९॥
अथाधिदेवतानामावाहनम् ॥ मध्येरविदक्षिणपार्श्वेश्वेतपुष्पाक्षतैःरुद्रमावाहयेत् ॥ॐ
त्र्यंबकंय्यजामहेसुगन्धिंपुष्टिवर्धनम् ॥ उर्वारुकमिंवबन्धनान्मृत्योर्मुक्षीयमामृतात् ॥
त्र्यंम्बकंय्यजामहेसुगन्धिम्पतिवेदनम् ॥ उर्वारुकमिंवबन्धनादितोमुक्षीयमामुतः
॥ ३ । ६० ॥ शिवइहागच्छइहतिष्ठ ॥ आग्नेय्यांचंद्रस्यदक्षिणेरक्तपुष्पाक्षतैःउमामा
वाहयेत् ॥ ॐश्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ ॥ ८९ ॥
इष्णन्निषाणामुम्मंऽइषाणसर्वलोकम्मंऽइषाण ॥ ३१ ॥ २२ ॥ उमेऽइहागच्छइहतिष्ठ ॥

याम्यांभौमस्यदक्षिणेपीतपुष्पाक्षतैःस्कंदमावाहयेत् ॥ ॐयदक्रन्दःप्रथमञ्जायमा
नऽउद्यन्त्संमुद्रादुतवापुरीषात् ॥ श्येनस्यंपक्षाहरिणस्यंबाहूऽउपस्तुत्त्यंमहिंजात
न्तेऽअर्वन् ॥ २९ । १२ ॥ स्कन्दइहागच्छइहतिष्ठ ॥ ईशान्यांबुधदक्षिणेपी
तपुष्पाक्षतैः विष्णुमावाहयेत् ॥ विष्णोरराटंमसिविष्णोश्श्नप्त्रेस्थोविष्णोस्यूर
सिविष्णोर्ध्रुवोसि ॥ वैष्णवमंसिविष्णवेत्वा ॥ ५ ॥ २१ ॥ विष्णोइहागच्छइहतिष्ठ ॥
उत्तरेगुरुदक्षिणेश्वेतपुष्पाक्षतैः ब्रह्माणमावाहयेत्॥ॐ ब्रह्मंजज्ञानम्प्रथमम्पुरस्ताद्विसी
मतःसुरुचोवेनऽआंवः ॥ सबुध्न्याऽउपमाऽअंस्यविष्ठाः सतश्चयोनिमसंतश्चविवंः ॥
॥ १३।३।५ ॥ ब्रह्मन्इहागच्छइहतिष्ठ ॥ पूर्वेशुक्रदक्षिणेपीतपुष्पाक्षतैःइंद्रमावाहयेत् ॥
ॐत्रातारमिंद्रमवितारमिन्द्रर्ठहवेहवेसुहवर्ठशूरमिन्द्रंम् ॥ ह्वयांमिशक्रम्पुंरुहूतमि
न्द्रर्ठस्वस्तिनोमघवांधात्विन्द्रः ॥ २० ॥ ५० ॥ इन्द्रइहागच्छइहतिष्ठ ॥ पश्चिमेश

 निदक्षिणेकृष्णपुष्पाक्षतैः यममावाहयेत् ॥ ॐ यमायत्वामखायत्वासूर्यस्यत्वात
 पसे ॥ देवस्त्वासविताभ्द्ध्वानक्तपृथिव्याः सर्ठस्पृशस्पाहि ॥ अर्चिरसिशोचिरसि
तपोसि ॥ ३७ ॥ ११ ॥ यमइहागच्छइहतिष्ठ ॥ नैर्ऋत्यांराहुदक्षिणेधूम्रपुष्पाक्षतैः
कालमावाहयेत् ॥ ॐ कार्षिरसिसमुद्रस्यत्वाक्षित्त्याऽउन्नयामि ॥ समापोऽअद्भिर
ग्मतसमोषधीभिरोषधीः ॥ ६ ॥ २८ ॥ कालइहागच्छइहतिष्ठ ॥ वायव्यांकेतुदक्षि
णेरक्तपुष्पाक्षतैः चित्रगुप्तमावाहयेत् ॥ ॐचित्रावसोस्वस्तितेपारमशीय ॥ ३ ॥
॥ १८ ॥ चित्रगुप्तइहागच्छेहतिष्ठ ॥ अथप्रत्यधिदेवतानामावाहनम् ॥ मध्येसूर्य
स्यवामेरक्तपुष्पाक्षतैः अग्निमावाहयेत् ॥ ॐ अग्निंदूतम्पुरोदधेहव्यवाहमुपब्रुवे ॥
देवा ँ ॥ आसादयादिह ॥ २२ ॥ १३ ॥ ७ ॥ अग्नेइहागच्छइहतिष्ठ ॥
आग्नेय्यांचंद्रस्यवामपार्श्वेश्वेतपुष्पाक्षतैः जलमावाहयेत् ॥ ॐ अप्स्वग्नेस

धिष्टवसौषधीरनुरुद्धयसे ॥ गर्भेसञ्जायसेपुनः ॥ १२।३६।१२ ॥ आपइहागच्छत इह
तिष्ठत ॥ दक्षिणेभौमवामपार्श्वेरक्तपुष्पाक्षतैःभूमिमावाहयेत् ॥ ॐस्योनापृथिवीनोभ
वानृक्षरानिवेशनी ॥ यच्छानः शर्म्मसप्रथाः ॥ ३६।१३।३ ॥ पृथिविइहागच्छइहति
ष्ठ ॥ ईशान्यांबुधस्यवामेपीतपुष्पाक्षतैःविष्णुमावाहयेत् ॥ इदंविष्णुर्विचक्रमेत्रेधानि
दधेपुदम् ॥ समूढमस्यपांसुरेस्वाहा ॥५।१५॥४॥ विष्णोइहागच्छइहतिष्ठ॥उत्तरेगुरु
वामेपीतपुष्पाक्षतैःइंद्रमावाहयेत् ॥ ॐत्रातारमिन्द्रमवितारमिन्द्रᳬं हवेहवेसुहवᳬं
शूरमिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमिन्द्रᳬंस्वस्तिनोमघवाधात्विन्द्रः ॥ २० । ५० ॥
॥ ५ ॥ इन्द्रइहागच्छइहतिष्ठ ॥ पूर्वेशुक्रस्यवामेपीतपुष्पाक्षतैःइंद्राणीमावाहयेत् ॥ॐ
अदित्यैरास्नासीन्द्राण्याऽउष्णीषः ॥ पूषासिघर्म्मायदीष्व ॥ ३८ । ३ । ६ ॥ इंद्राणिइ
हागच्छइहतिष्ठ॥पश्चिमेशनेर्वामेश्वेतपुष्पाक्षतैः प्रजापतिमावाहयेत् ॥ ॐप्रजापतेनत्व

प्र. सं. देतान्यन्योविश्वारूपाणिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोऽअस्तुवयंस्यामपतयोरयीणाम् ॥ ग्र. स्था.
॥९१॥ पतयोरयीणाम ॥ २३।६५।७ ॥ प्रजापतेइहागच्छइहतिष्ठ ॥ नैर्ऋत्यांराहोर्वामेकृष्ण
पुष्पाक्षतैः नागमावाहयेत् ॥ ॐ नमोस्तुसर्प्पेभ्योयेकेचपृथिवीमनु ॥ येऽअन्तरिक्षेये
दिवितेभ्यः सर्प्पेभ्योनमः॥१३।६।८॥अष्टकुलीनानागाइहागच्छतइहतिष्ठत॥वायव्यां
केतोर्वामेश्वेतपुष्पाक्षतैः ब्रह्माणमावाहयेत् ॥ ॐब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतः
सुरुचोवेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यविष्ठाःसतश्चयोनिमसतश्चविवः॥१३।३।९॥
अथपंचलोकपालानावाहयेत् ॥ नैर्ऋत्यांराहोरुत्तरभागेपीतपुष्पाक्षतैः गणपतिमावाह
येत् ॥ ॐगणानान्त्वागणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वा
निधिपतिꣳहवामहेवसोमम ॥ आहमजानिगर्भधमात्त्वमजासिगर्भधम् ॥ २३ ॥
॥१९॥१॥ गणेशइहागच्छइहतिष्ठ ॥ पश्चिमेशनेरुत्तरेरक्तपुष्पाक्षतैः दुर्गामावाह ॥९१॥

येत् ॥ ॐ जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः ॥ सनःपर्षदतिदुर्गाणिवि
श्वानावेवसिंधुंदुरितात्यग्निः ॥ २ ॥ दुर्गेइहागच्छइहतिष्ठ ॥ मध्येसूर्य्योत्तरेपीतपुष्पा
क्षतैः वायुमावाहयेत् ॥ ॐ वातोवामनोवागन्धर्वाः सप्तविंशतिः ॥ तेऽअग्रेश्वमयु
ञ्जंस्तेऽअस्मिञ्जवमादधुः ॥ ९ ॥ ७ ॥ ३ ॥ वायोइहागच्छइहतिष्ठ ॥ पूर्वेशुक्रस्य
पूर्वभागेनीलपुष्पाक्षतैः आकाशमावाहयेत् ॥ ॐ घृतंघृतपावानः पिबतवसांवसापावानः
पिबन्तान्तरिक्षस्यहविरसिस्वाहा ॥ दिशःप्रदिशऽआदिशोविदिशऽउद्दिशोदिग्भ्यः
स्वाहा ॥ ६ ॥ २९ ॥ ४ ॥ आकाशइहागच्छइहतिष्ठ ॥ नैर्ऋत्यांराहोर्दक्षिणेश्वेत
पुष्पाक्षतैः अश्विनौआवाहयेत् ॥ ॐ यावाङ्कशामधुमत्यश्विनासूनतावती ॥ तयायज्ञ
म्मिमिक्षतम् ॥ उपयामगृहीतोस्यश्विभ्यान्त्वैषतेयोनिर्म्माध्वीभ्यान्त्वा ॥ ७ ॥
॥ ११ ॥ ५ ॥ अश्विनौइहागच्छतामिहतिष्ठताम् ॥ अथदशदिक्पालानामावाहनम् ॥ पू

प्र. सं. वें ॥ ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम् ॥ ह्वयामि शक्रम्पुरुहूत प्र. स्था.
॥ ९२ ॥ मिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः ॥ २० ॥ ५० ॥ इन्द्र इहागच्छ इह तिष्ठ ॥ आ
ग्नेय्याम् ॥ ॐ त्वन्नोऽअग्ने वरुणस्य विद्वान्देवस्य हेडोऽ अवयासिसीष्ठाः ॥ यजिष्ठो वह्नि
तमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् ॥ २ । ३ । २ ॥ अग्ने इहागच्छ इह
तिष्ठ ॥ याम्ये ॥ ॐ यमाय त्वा मखाय त्वा सूर्य्यस्य त्वा तपसे ॥ देवस्त्वा सविता मध्वा
नक्तु पृथिव्याः सꣳस्पृशस्पाहि ॥ अर्चिरसि शोचिरसि तपोऽसि ॥ ३७ ॥ ११ ॥ ३ ॥ ॐ
यम इहागच्छ इह तिष्ठ ॥ नैर्ऋत्याम् ॥ ॐ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्वि
हि तस्करस्य ॥ अन्यमस्मदिच्छ सा तऽइत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ १२ । ६२ । ४ ॥ नि
र्ऋते इहागच्छ इह तिष्ठ ॥ पश्चिमे ॥ ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो ॥ ९२ ॥
वरुणस्यऽऋतसदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ॥ ४ ॥

॥३६।५॥ वरुणइहागच्छइहतिष्ठ॥वायव्ये॥ ॐ आनोनियुद्भिः शतिनीभिरध्वरꣳसꣳहस्त्रि
णीभिरुपयाहियज्ञम् ॥ वायोअस्मिन्मन्त्सवनेमादयस्वयूयम्पातस्वस्तिभिः सदानः॥
॥२७॥२८॥६॥वायोइहागच्छइहतिष्ठ॥ उत्तरे॥ ॐ वयꣳसोमव्रतेतवमनस्तनूषुबिभ्र
तः॥ प्रजावन्तः सचेमहि॥३॥५६॥७॥ कुबेरइहागच्छइहतिष्ठ॥ ईशान्याम्॥ ॐ तमी
शानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसेहूमहेवयम्॥ पषानोयथावेदसामसद्वृधे
क्षितापायुरदब्धः स्वस्तये।२६।८।८। ईशानइहागच्छइहतिष्ठ॥ ईशानपूर्वयोर्मध्येब्रह्मा
णम्ॐ अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसजोषाः॥ यःशꣳसतेस्तुवतेधायिप
ज्रऽइन्द्रज्येष्ठाऽअस्मा ꣳऽअवन्तुदेवाः॥३३॥५०॥९॥ ब्रह्मन्इहागच्छइहतिष्ठ॥ नैर्ऋ
त्यवरुणयोर्मध्येअनंतम्॥ ॐ स्योनापृथिवीनोभवानृक्षरानिवेशनी॥ यच्छानःशर्म
सप्रथाः॥३६॥३॥१०॥ अनंतइहागच्छइहतिष्ठ॥ अथमंडलमध्यस्थापितानां

ग्र. सं. पितामहादीनामावाहनम् ॥ ॐब्रह्मंजज्ञानम्प्रंथममपुरस्ताद्विसीमतःसुरुचोवेनआवः ॥ ग्र. स्था.
॥ ९३ ॥ सबुध्न्याऽउपमाऽअस्यविष्ठाः सतश्चयोनिमसतश्चविवः ॥ १३ ॥ ३ ॥ इतिब्रह्मा
णम् ॥ ॐत्र्यंबकंयजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्वारुकमिवबंधनान्मृत्योर्मु
क्षीयमामृतात् ॥ त्र्यंबकंयजामहेसुगन्धिम्पतिवेदनम् ॥ उर्वारुकमिवबन्धनादि
तोमुक्षीयमामुतः ॥ ३ ॥ ६० ॥ शिवइहागच्छइहतिष्ठ ॥ ॐइदंविष्णुर्विचक्रमेत्रे
धानिदधेपदम् ॥ समूढमस्यपाᳪसुरेस्वाहा ॥ ५ ॥ १५ ॥ विष्णोइहागच्छइ
हतिष्ठ ॥ ॐ गणानांत्वागणपतिᳪहवामहेप्रियाणांन्त्वाप्रियपतिᳪहवामहेनि
धीनान्त्वांनिधिपतिᳪहवामहेव्वसोमम ॥ आहमजानिगर्भधमात्त्वमजासिगर्भ
धम् ॥ २३ ॥ १९ ॥ गणपतेइहागच्छइहतिष्ठ ॥ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपा ॥ ९३ ॥
श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाण

॥ ३१ ॥ २२ ॥ लक्ष्मिइहागच्छइहतिष्ठ ॥ पंचनुद्यः सरस्वतीमपियन्तिसस्रोतसः ॥
सरस्वतीतुपंचुधासोदेशेभवत्सरित् ॥ ३४ ॥ ११ ॥ सरस्वतिइहागच्छइहतिष्ठ ॥ ॐ
अंबेऽअम्बिकेम्बालिकेनमानयतिकश्चन ॥ ससस्त्यश्श्वकः सुभद्रिकांकाम्पीलवासि
नीम् ॥ २३ ॥ १८ ॥ दुर्गे इहागच्छइहतिष्ठ ॥ ॐनुहिस्पपशमविदन्नन्न्यमुस्म्मा
द्वैश्श्वानुरात्पुरऽएतारंमग्नेः ॥ एमेनमवृधन्नमृताऽअमर्त्यंवैश्श्वानुरंक्षैत्रंजित्याय
देवाः ॥ ३३ ॥ ६० ॥ क्षेत्रपालइहागच्छइहतिष्ठ ॥ ॐभूतायंत्वानारांतयेस्वरभि
विक्ख्येषुन्दृर्ठंहन्तान्दुर्य्याःपृथिव्यामुर्वन्तरिक्षमन्न्वेमि ॥ पृथिव्यास्त्वानाभौसादया
म्म्यदित्त्याऽउपस्थेग्नेहुव्यर्ठंरक्ष ॥ १ ॥ ११ ॥ भूतानिइहागच्छतइहतिष्ठत ॥ ॐवि
श्श्वंकर्म्मन्हविषावर्द्धनेनत्रातारमिन्द्रमकृणोरवध्यम् ॥ तस्मैविशः समनमन्तपूर्वी
ऽयमुग्रोविहव्योयथासत् ॥ १७ ॥ २४ ॥ उपयामगृहीतोसीन्द्रायत्त्वाविश्श्वकर्म्म

 णऽएषतेयोनिरिन्द्रायत्त्वाविश्श्वकर्म्मणे ॥ ८ ॥ ४५ ॥ विश्वकर्मन्निहागच्छइहति
 ष्ठ ॥ अन्येषामपिमंडलमध्यस्थापितानांसर्वेषामावाहनंकुर्यात् ॥ अत्रयेस्थापितादे
वास्तेसर्वेइहागच्छंतुइहतिष्ठंतु ॥तत्रमंत्रः॥ॐमनोजूतिर्जुषतामाज्ज्यस्य बृहस्पतिर्य्य
ज्ञमिमन्तनोत्वरिष्टंय्यज्ञऽसमिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामों३म्प्रति
ष्ठ ॥ २ ॥ १३ ॥ इतिसमस्तदेवानांप्रतिष्ठास्थापनंच ॥ ॥ अथपूजा ॥ अद्येहसकलशु
भप्राप्तिकामःसूर्यादिनवग्रहाणामधिदेवतानांप्रत्यधिदेवतानां पंचलोकपालानांदशदि
क्पालानांसक्षेत्रपालगणेशवरुणादीनांपूजनमहंकरिष्ये ॥ इतिप्रतिज्ञांकृत्वा ॥ पश्चा
त्पुष्पाक्षतचंदनधूपदीपनैवेद्यादिभिर्यस्ययग्रहस्य योवर्णस्तद्वर्णानिवस्त्राणिकुसुमानि
अनुलेपनानिदातव्यानिशेषेभ्यःश्वेतानिभूयःसुरभिचसर्वेभ्योदातव्यमाकृष्णेनेत्यादि
पूर्वोक्तमंत्रैःसूर्यादीन्सर्वान्मंडलमध्यस्थापितान्देवान्प्रपूजयेत् ॥ नैवेद्यम् ॥ आदित्या

यगुडौदनं चँद्रमसेघृतपायसं भौमायसुरान्नं बुधायक्षीरौदनं गुरवेदध्योदनं शुक्राय
घृतौदनं शनैश्चरायतिलपिष्टंकृसरान्नंवा आममांसंराहवे चित्रौदनंकेतुभ्यः एवंनवग्र
हान्नपूजयित्वाअधिदेवतादीन्प्रपूजयेत् सूर्यादिनवग्रहेभ्योनमः रुद्राद्यधिदेवताभ्यो
नमः अग्न्यादिप्रत्यांधिदेवताभ्योनमः विनायकादिपंचलोकपालेभ्योनमः इंद्रादिदश
दिक्पालेभ्योनमः हस्तेनजलमादाय अनेनपंचोपचारपूजनेनननवग्रहाः प्रीयंताम् इति
रीत्याग्रहान्नपूजयित्वा ईशानकोणएवाक्षतपुंजोपरिआजिघ्रकलशमित्यादिमंत्रैर्यथा
विधिकलशंसंस्थाप्य तत्रतीर्थान्यावाह्यतत्रवरुणंपूजयेत् ततऋत्विजःप्रतिग्रहदैवतं
समच्यर्याज्यैरष्टोत्तरसहस्राष्टोत्तरशताष्टाविंशत्यष्टान्यतमसंख्ययाकुंडेषुविभज्ययथा
शक्तिहुत्वाबलिंदत्त्वापूर्णाहुतिंजुहुयुः अत्रमातृकाहोमंकृत्वाअनंतरंसपरिवारदेवताग्रह
होमइतिमतंमान्यानामतस्तयैवरीत्याहोमः प्रदर्श्यंते गणानांत्वेतिमंत्रेणगणपतयेनमः

म. सं. स्वाहा ॥ १ ॥ अथगौर्यादिषोडशमातृकाहोमः ॥ आयंगौःपृश्निरक्रमीदसंदन्मातरं मा. हो.
॥ ९९ ॥ म्पुरः ॥ पितरंचप्प्रयन्त्स्वः गौर्य्यैनमः स्वाहा ॥ १ ॥ हिरण्यरूपाऽउषसो
विरोकऽउभाविन्द्राऽउदिथःसूर्य्यश्च ॥ आरोहतम्वरुणमित्त्रगर्त्तन्ततश्चक्षाथामदितिं
न्दितिंश्चमित्रोसिवरुणोसि ॥ १० ॥ १८ ॥ पद्मायैनमः स्वाहा ॥ २ ॥ कदाचनस्तु
रीरसिनेन्द्रसश्चसिदाशुषे ॥ उपोपेन्नुमघवन्भूयऽइन्नुतेदानन्देवस्यपृच्यतऽआदित्ये
भ्यस्त्वा ॥ ८ ॥ २ ॥ शच्यैनमः स्वाहा ॥ ३ ॥ मेधाम्मेवरुणोददातुमेधामग्निः
प्प्रजापतिः ॥ मेधामिन्द्रश्चवायुश्चमेधान्धातादंदातुमेस्वाहा ॥ ३२ ॥ १५ ॥
मेधायैनमः स्वाहा ॥ ४ ॥ ॐतत्सवितुर्वरेण्यम्भर्गोदेवस्यधीमहि ॥ धियोयोनः
प्प्रचोदयात् ॥ सावित्र्यैनमः स्वाहा ॥ विज्यन्धनुः कपर्द्दिनोविशल्योबाणवाँ२ ॥ ॥ ९९ ॥
ऽउत॥ अनेशन्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः ॥ विजयायैनमःस्वाहा ॥ ६ ॥ याते

रुद्रशिवातनूरघोरापापकाशिनी ॥ तयानस्तन्वाशन्तमयागिरिशन्ताभिचाकशीहि
॥ १६ । २ ॥ जयायैनमःस्वाहा ॥ ७ ॥ देवानांम्भद्रासुमतिर्ऋजूयतान्देवानांᳬराति
रभिनोनिवर्त्तताम् ॥ देवानांᳬसख्यमुपसेदिमावयन्देवानऽआयुःप्प्रतिरन्तुजीवसे
॥ २५ । १५ ॥ देवसेनायैनमःस्वाहा ॥ ८ ॥ पितृभ्यःस्वधायिभ्यःस्वधानमःपितामहेभ्यः
स्वधायिभ्यःस्वधानमःप्रपितामहेभ्यःस्वधायिभ्यःस्वधानमः अक्षन्पितरोमीमदन्त
पितरोतीतृपन्तपितरःशुन्धध्वम् ॥ १९ । ३६ ॥ स्वधायैनमःस्वाहा ॥ ९ ॥ स्वाहायज्ञंमन
सःस्वाहोरोरन्तरिक्षात्स्वाहा द्यावापृथिवीभ्याᳬस्वाहावातादारभेस्वाहा ॥ ४ । ६ ॥ स्वा
हायैनमःस्वाहा ॥ १० ॥ आपोऽअस्मान्मातरःशुन्धयन्तुघृतेननोघृतप्प्वःपुनन्तु ॥ विश्व
ᳬहिरिप्प्रम्प्रवहन्तिदेवीरुदिदाभ्यःशुचिरापूतऽएमि ॥ दीक्षातपसोस्तनूरसितान्त्वां
शिवाᳬशग्माम्परिदधेभद्रंवर्णम्पुष्यन्न् ॥ ४ । २ ॥ मात्रेनमःस्वाहा ॥ १२ ॥ भवंतन्नःस

मंनसौसचैतसावरेपसौं मायज्ञःह्रींःसिष्टम्मायज्ञपतिञ्ज्ञातवेदसौशिवौभंवतमुद्यनः
॥ ५ । ३ ॥ लोकमात्रेनमः स्वाहा ॥ १२ ॥ यत्प्रज्ञानमुतचेतोधृतिश्चयज्ज्योतिरन्तरु
मृतंप्प्रजासु यस्मान्नऽऋतेकिञ्चनकर्म्मक्रियतेतन्मेमनःशिवसंङ्कल्पमस्तु ॥ ३४ ॥ धृत्यै
नमःस्वाहा ॥ ३ ४ तत्त्वायामिब्रह्मणावन्दमानुस्तदाशास्तेयजमानोहविर्भिः ॥ अहे
डमानोवरुणेहबोद्ध्युरुशंशठ॑सुमानआयुः प्प्रमोषीः ॥ २१ ॥ २ ॥ पुष्ट्यैनमः स्वाहा ॥
॥१४॥ बृहस्पतेपरिदीयारथेनरक्षोहामित्र। ॥अपुबाधमानः ॥ प्प्रभञ्जन्त्सेनाःप्रमृणो
युधाजयन्नस्माकमेद्ध्यवितारथानाम् ॥ तुष्ट्यैनमःस्वाहा ॥१५॥ प्राणायस्वाहाऽपा
नायस्वाहाव्यानायस्वाहा अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन ॥ ससंस्त्य
श्वकः सुभद्रिकांकाम्पीलवासिनीम् ॥२२॥१८॥ आत्मनः कुलदेव्यैनमः स्वाहा॥गौ
र्यादिषोडशमातृप्रीतयेयत्कृतम तत्सन्निधिस्थब्राह्मणानां प्रसादात्सर्वंपरिपूर्णमस्तु ॥

अनेनहोमेन श्रीगणपतिसहितगौर्यादिषोडशमातरः सुप्रीताः सत्योवरदाभवंतु ॥
॥ इतिषोडशमातृकाहोमः ॥ ॥ अथवसोर्धाराहोमः॥ ॥ ॐवसोःपुवित्रंमसिशुतधार
म्वसोःपुवित्रंमसिसुहस्रंधारम् ॥ देवस्त्वांसवितापुनातुवसोः पुवित्रेणशुतधांरेणसुप्वा
कामंधुक्षुः स्वाहा ॥१।३॥ इदंवसोर्धाराभ्यः॥इतिवसोर्धाराहोमः ॐवरुणस्योत्तम्भनम
सिवरुणस्युस्कम्भुसर्ज्जनीस्थोवरुणस्यऽऋतुसदंन्न्यासि वरुणस्यऽऋतुसदंनमसिव
रुणस्यऽऋतुसदंनुमासीद ॥४॥३६॥ कलशस्थवरुणायनमः स्वाहा ॥ ॥ अथनवग्रह
होमः ॥ प्रथमंसमिद्धोमंकुर्यात् ॥ अर्कः पलाशः खदिरअपामार्गश्चपिप्पलः॥ उदुंबरः
शमीदूर्वाःकुशाश्चसमिधःक्रमात् ॥ अर्कोनाशयतेव्याधिंपालाशःसर्वकामदः ॥ खादिर
श्चार्थलाभायअपामार्गोबहुप्रजाः ॥ आश्वत्थीचशुभंदद्याद्धनंदद्यादुदुंबरी ॥ शमीशमय
तेपापंदूर्वामंगलवर्द्धिनी ॥ कुशास्तृप्तिकराः प्रोक्ताइत्येताः समिधोनव ॥ अथसूर्याय

॥ ९७ ॥ आकृष्णेनेतिमंत्रेणार्कं जुहुयात् ॥ एवमेवपूर्वश्लोकोक्तक्रमेणतत्तत्समिधस्तत्तन्मंत्रैर
स्मिन्ग्रहवेदिपूजनसमयेनिरुक्तैश्चंद्रादिग्रहेभ्योपिजुहुयात् ॥ प्रतिमंत्रांतेस्वाहापदप्र
क्षेपः कर्त्तव्यः अनंतरमिदंसूर्यायनममेतिवाक्यमुच्चारणीयम् ॥ वल्कलसहिताः स
मिधएवहोतव्याः नकेवलंसमिधएवहोतव्याः घृताक्ताएवसमिधोहोतव्या इत्यपिके
चिद्वदंति ॥ ग्रहहोमांतेहस्तेनजलमादायानेनयथाविधिसंपादितेनहोमेनसूर्यादिनव
ग्रहाः सुप्रीताः संतोवरदाभवंत्वितिपठेत् ॥ ततोयजमानमूर्द्धाभिषेकंकुर्यात् ॥ यथाबा
णप्रहाराणांकवचंभवतिवारणम् ॥ तद्वद्दैवोपघातानांशांतिर्भवतुवारणमित्यनेनमंत्रेण
यजमानंत्रिः सकृद्वाभिषिंचेत् ॥ शांतिरस्तुपुष्टिरस्तुवृद्धिरस्तुयच्छ्रेयस्तदस्तुभूमौज
लमथप्रक्षिपेत् यत्पापंरोगंकष्टंदरिद्रंतत्सर्वंप्रणश्यतु पुनः मूर्द्धनिद्विपदेभ्यश्चतुष्पदे ॥ ९७ ॥
भ्यश्चशांतिर्भवतु ॥ ततः पूर्वोक्तप्रकारेणैवाधिदेवताप्रत्याधिदेवतापंचलोकपालदेवता

दशदिक्पालादिदेवतानामपिपूर्वनिरुक्तैस्तत्तन्मत्रैर्होमंकुर्यात् ॥ ततस्तन्मंडलोक्तदे
वतानांहोमांतेसकलहोमांतेवाअग्निपूजनमपिकर्त्तव्यम् ॥ तद्यथा ॥ ॐअग्नेनयसुपथा
राये॰अस्मान्विश्वानिदेववयुनानिविद्वान् ॥ युयोध्यस्मज्जुहुराणमेनोभूयिष्ठान्ते
नमऽउक्तिम्विधेम ॥ एतानिपाद्यार्घ्याचमनीयानिअग्नयेनमः एवंगंधादिदानमपि ॥
इति ग्रहवेदिकृत्यम् ॥ ॥ अथ चतुःषष्टियोगिनीनामानिनमोन्तानिलिख्यंते ॥
ॐजयायैनमः जयां आवाहयामिस्थापयामि॥१॥ॐविजयायैन॰ विजयां आ॰ ॥२॥
ॐमत्याजयायैन॰ मत्याजयांआ॰ ॥ ३ ॥ ॐअपराजितायैनमः अपराजितां
आ॰ ॥ ४ ॥ ॐदिव्ययोगिन्यैन॰ दिव्ययोगिनींआ॰ ॥ ५ ॥ ॐमहायोगिन्यैन॰ म
हायोगिनींआ॰ ॥ ६ ॥ ॐसिद्धियोगिन्यैन॰ सिद्धियोगिनींआ॰ ॥ ७ ॥ ॐगणेश्व
र्यैनमः गणेश्वरींआ॰ ॥ ८ ॥ ॐप्रेतासनायैनमः प्रेतासनींआ॰ ॥ ९ ॥ ॐडाकिन्यै

प्र. सं. न०डाकिनींआ० ॥ १० ॥ ॐकाल्यैनमः कालींआ० ॥ ११ ॥ ॐकालरात्र्यैनमः का यो. स्था.
॥ ९८ ॥ लरात्रींआ० ॥ १२ ॥ ॐनिशाचर्य्यैनमः निशाचरींआ० ॥ १३ ॥ ॐटंकारिण्यैनमः
टंकारिणींआ० ॥ १४ ॥ ॐरुद्रवेतालिन्यैनमः रुद्रवेतालिनींआ० ॥ १५ ॥ ॐहुंक
रिण्यैनमः हुंकरिणींआ० ॥ १६ ॥ ॐमूर्द्धकेश्यैनमः मूर्द्धकेशिनींआ० ॥ १७ ॥ ॐ
विरूपायैनमः विरूपां आ० ॥ १८ ॥ ॐशुक्लांग्यैनमः शुक्लांगींआ० ॥ १९ ॥
ॐ नरभोजन्यैनमः नरभोजनींआ० ॥ २० ॥ ॐफट्कारिण्यैनमः फट्कारिणींआ०
॥ २१ ॥ ॐवीरभद्रायैनमः वीरभद्रांआ० ॥ २२ ॥ ॐधूम्रायैनमः धूम्रांआ० ॥२३॥
ॐकलहप्रियायैनमः कलहप्रियांआ० ॥ २४ ॥ ॐराक्षस्यैनमः राक्षसींआ० ॥२५॥
ॐरक्ताक्ष्यैनमः रक्ताक्षींआ० ॥ २६ ॥ ॐविश्वरूपायैनमः विश्वरूपांआ० ॥ २७ ॥ ॥ ९८ ॥
ॐभयंकर्य्यैनमः भयंकरींआ० ॥२८॥ ॐवीरकौमार्य्यैनमः वीरकौमारींआ० ॥२९॥

ॐचण्डिकायैनमः चंडिकांआ० ॥ ३० ॥ ॐवाराह्यैनमः वाराहींआ० ॥ ३१ ॥ ॐमु
ण्डधारिण्यैनमः मुंडधारिणींआ० ॥ ३२ ॥ ॐभैरव्यैनमः भैरवींआ० ॥३३॥ ॐध्वां
क्षिण्यैनमः ध्वांक्षिणींआ० ॥ ३४ ॥ ॐधूम्रांग्यैनमः धूम्रांगींआ० ॥ ३५ ॥ ॐप्रेतवा
हिन्यैनमः प्रेतवाहिनींआ० ॥ ३६ ॥ ॐखड्गिन्यैनमः खड्गिनींआ० ॥ ३७ ॥
ॐदीर्घलंबोष्ठ्यैनमः दीर्घलंबोष्ठींआ० ॥ ३८ ॥ ॐमालिन्यैनमः मालिनींआ०
॥ ३९ ॥ ॐमंत्रयोगिन्यैनमः मंत्रयोगिनींआ० ॥ ४० ॥ ॐकालिन्यैनमः कालि
नींआ० ॥ ४१ ॥ ॐचक्रिण्यैनमः चक्रिणींआ० ॥ ४२ ॥ ॐकंकाल्यैनमः कंका
लींआ० ॥ ४३ ॥ ॐभुवनेश्वर्य्यैनमः भुवनेश्वरींआ० ॥ ४४ ॥ ॐत्रोटक्यैनमः त्रोट
कींआ०॥ ४५ ॥ ॐमहामार्य्यैनमः महामारींआ० ॥ ४६ ॥ ॐयमदूत्यैनमःयमदूतीं
आ० ॥ ४७ ॥ ॐकरालिन्यैनमः करालिनींआ० ॥ ४८ ॥ ॐकेशिन्यैनमः केशिनीं

आ० ॥४९॥ ॐमर्द्दिन्यैनमः मर्दिनींआ० ॥ ५० ॥ ॐरोमजंघायैनमः रोमजंघांआ०
॥ ५१ ॥ ॐनिवारिण्यैनमः निवारिणींआ० ॥ ५२ ॥ ॐविशाल्यैनमः विशालींआ०
॥ ५३ ॥ ॐकार्मुक्यैनमः कार्मुकींआ० ॥५४॥ ॐलोलिन्यैनमः लोलिनींआ०॥५५॥
ॐअधोमुख्यैनमः अधोमुखींआ० ॥ ५६ ॥ ॐ मुंडाग्रधारिण्यै० मुंडाग्रधारिणीं
आ० ॥ ५७ ॥ ॐमाध्व्यैनमः माध्वींआ० ॥५८॥ ॐ कांक्षिण्यैनमः कांक्षिणींआवाह
यामि ॥ ५९ ॥ ॐप्रेतरूपिण्यैनमः प्रेतरूपिणींआ० ॥ ६० ॥ ॐधूर्जटिन्यैनमः धूर्ज
टिनींआ० ॥ ६१ ॥ ॐघोरिण्यैनमः घोरिणींआ० ॥ ६२ ॥ ॐकरालिन्यैनमः करा
लिनींआ० ॥ ६३ ॥ ॐविषलंघिन्यैनमः विषलंघिनींआवाहयामिस्थापयामि ॥ ६४ ॥
इति योगिनीनामानि ॥ ॥ अथक्षेत्रपालीयपीठदेवतानांप्रणवादिनमोन्तानिनामानि
लिख्यंते ॥ ॐअजरायनमःअजरंआवाहयामिस्थापयामि ॥ १ ॥ ॐ इंद्रचोरायन०

इद्रचोरंआ० ॥२॥ ॐ व्यापकायनमः व्यापकंआ० ॥३॥ ॐ इंद्रमूर्त्तयेनमःइंद्रमूर्तिं
आ० ॥ ४ ॥ ॐ उक्ष्णायनमःउक्ष्णंआ० ॥५॥ ॐकूष्मांडायनमः कूष्मांडंआ० ॥६॥
ॐवरुणायनमः वरुणंआ०॥७॥ॐकामुकायनमः कामुकंआ० ॥८॥ ॐविमुक्तायनमः
विमुक्तंआ० ॥ ९ ॥ ॐसप्तकायनमः सप्तकंआ० ॥ १० ॥ ॐ लीलालोपायनमः
लीलालोपंआ० ॥ ११ ॥ ॐएकदंष्ट्रायनमः एकदंष्ट्रंआ० ॥ १२ ॥ ॐऐरावताय
नमः ऐरावतंआ० ॥ १३ ॥ ॐओषधिघ्नायनमः ओषधिघ्नंआ० ॥ १४ ॥ ॐबंधना
यनमः बंधनंआ० ॥ १५ ॥ ॐदिव्याकरायनमः दिव्याकरंआ० ॥ १६ ॥ ॐकम्बला
यनमः कंबलंआ० ॥ १७ ॥ ॐक्षोभणायनमः क्षोभणंआ० ॥ १८ ॥ ॐगवयवायन०
गवयवंआ० ॥ १९ ॥ ॐकालायनमः कालंआ० ॥ २० ॥ ॐबलधरायनमः बलधरं
आ० ॥ २१ ॥ ॐमणवेनमः मणुंआ० ॥ २२ ॥ ॐचंद्रवारणायनमः चंद्रवारणंआ०

म. सं. ॥ २३ ॥ ॐफटाटोपायनमः फटाटोपंआ० ॥ २४ ॥ ॐजटिलायनमः जटिलंआ० ॥ क्षे. स्था.
॥१००॥ ॥ २५ ॥ ॐऋतवेनमः ऋतुंआ० ॥ २६ ॥ ॐघंटेश्वरायनमः घंटेश्वरंआ० ॥ २७ ॥
ॐविकटायनमः ॥ विकटंआ० ॥२८॥ ॐअणिमायनमः अणिमंआ० ॥२९॥ ॐगुणबं
धायनमः गुणबंधंआ० ॥ ३० ॥ ॐडामरायनमः डामरंआ० ॥ ३१ ॥ ॐढंढफणाय
नमः ढंढफणंआ० ॥ ३२ ॥ ॐस्थविलायनमः स्थविलंआ० ॥ ३३ ॥ ॐदंतुरायनमः
दंतुरंआ० ॥३४॥ धनदायनमः धनदंआ० ॥३५॥ ॐनागकर्णायनमः नागकर्णआ०
॥३६॥ ॐफोत्करायनमः फोत्करंआ०॥३७॥ॐमहादलायनमः महादलंआ० ॥३८॥
ॐचीरकायनमः चीरकंआ० ॥ ३९ ॥ ॐसिंहायनमः सिंहंआ० ॥ ४० ॥ ॐमृगाय
नमः मृगंआ० ॥ ४१ ॥ ॐयक्षायनमः यक्षंआ० ॥ ४२ ॥ ॐमेघवाहनायनमः मे ॥१००॥
घवाहनंआ० ॥ ४३ ॥ ॐतीक्ष्णोष्ठायनमः तीक्ष्णोष्ठंआ० ॥ ४४ ॥ ॐअनलायनमः

अनलंआ० ॥ ४५ ॥ ॐसुक्रतवेनमः सुक्रतुंआ० ॥४६॥ ॐपुंधापायनमः पुंधापंआ०
॥ ४७ ॥ ॐवक्रकायनमः वक्रकंआ० ॥ ४८ ॥ ॐवातायनमः वातंआ० ॥ ४९ ॥
ॐयापनायनमः यापनंआ० ॥ ५० ॥ इति क्षेत्रपालीयपीठदेवतानामानि ॥ ॥
श्रीरस्तु ॥ ॥ श्रीगणेशायनमः ॥ ॥ अथसर्वतोभद्रप्रयोगोलिख्यते ॥ ॥
विलिखेत्सर्वतोभद्रंवेदिकोपरिसुन्दरम् ॥ तिर्यगूर्ध्वंगतारेखाः कुर्यादेकोनविंशतिम् ॥ १ ॥
खण्डेन्दुस्त्रिपदः कोणेशृंखलाः पंचकोष्ठकाः ॥ एकादशपदावल्लीभद्रन्तुनवभिःपदैः ॥
॥ २ ॥ चतुर्विंशत्पदावापीविंशद्भिः परिधिः पदैः ॥ मध्येषोडशभिः कोष्ठैः पद्मम
ष्टदलंलिखेत् ॥ ३ ॥ श्वेतेन्दुः शृंखलाकृष्णावल्लीनीलेनपूरयेत् ॥ भद्रारुणा
सितावाप्यः परिधिः पीतवर्णकः ॥ ४ ॥ बाह्यान्तरदलैः श्वेतैः कर्णिकाः पीत
वर्णकाः ॥ खंडेन्दुः शृंखलावापीवल्लीभद्रन्तुपंचकम् ॥ ५ ॥ परिध्यावेष्टितंसर्वंबाह्येस

त्वंरजस्तमः ॥ सर्वतंत्रसमुद्दिष्टंसर्वतोभद्रमण्डलम् ॥ ६ ॥ मध्येब्रह्माष्टासुदिक्षुदेवाः
सोमादयः स्मृताः ॥ वायुसोमद्वयोर्मध्येवसूनष्टौतुकारयेत् ॥ ७ ॥ सोमेशानद्वयो
र्मध्येरुद्राएकादशामताः ॥ ईशानशक्रयोर्मध्येआदित्यान्द्वादशालिखेत् ॥ ७ ॥ इ
न्द्राग्न्योर्मध्यदेशेतुअश्विनौपूजयेत्ततः॥आग्नेययमयोर्मध्येविश्वेदेवाः सपैतृकाः॥९॥
याम्यनैर्ऋत्ययोर्मध्येसप्तयक्षांश्चकारयेत् ॥ निर्ऋतिवरुणयोर्मध्येनागभूतांश्चकार
येत् ॥१०॥ वायुपश्चिमयोर्मध्येगंधर्वाप्सरसःकुरु ॥ ब्रह्मसोमद्वयोर्मध्येरुद्रान्देवान्प्र
पूजयेत् ॥ ११ ॥ स्कन्दंनंदीश्वरंशूलंमहादेवंप्रपूजयेत् ॥ तथाब्रह्मेशयोर्मध्येदक्षादिस
प्तकोगणः ॥ १२ ॥ ब्रह्मेन्द्रयोस्तथामध्येदुर्गांविष्णुंतथैवच ॥ ब्रह्माग्निमध्येचतथास्व
धांदेवींप्रपूजयेत् ॥ १३ ॥ ब्रह्मयाम्यद्वयोर्मध्येमरुतांसप्तकोगणः ॥ ब्रह्मनैर्ऋत्ययोर्म
ध्येवसुविघ्नौतुपूजयेत् ॥ १४ ॥ ब्रह्मवरुणयोर्मध्येह्यपांस्थानंविधीयते ॥ ब्रह्मवायुद्वयो

मध्येमरुतांसप्तकोगणः ॥ १५ ॥ ब्रह्मणःपादमूलेतुमरुतांसप्तकोगणः॥नदीस्तत्रपूजये
त् ॥ कावेरीनर्मदाचैवयमुनाचसरस्वती ॥ १६ ॥ गंगाकृष्णातथागोदापूज्यामध्ये
ससागराः ॥ क्षीरक्षारमधुसर्पिन्नीरेक्षुदधिसागराः ॥ १७ ॥ ब्रह्मजज्ञानमित्यादिमंत्रैस्ता
स्तास्तुदेवताः ॥ गंधपुष्पादिभिःपूज्यादद्याद्दीपांश्चसर्वतः ॥ १८ ॥ सर्वत्रभद्रंयस्मा
त्स्यात्सर्वतोभद्रमीरितम् ॥ इतिसर्वतोभद्रमण्डलदेवतानांस्थापनप्रकारः ॥ अ
थसर्वतोभद्रमण्डलस्थापितदेवतानांपूजनम् ॥ गणानांत्वेतिमंत्रेणआग्नेय्यांगणपं
न्यसेत् ॥ गणानांत्वेतिमंत्रस्यप्रजापतिर्ऋषिरनुष्टुप्छंदोगणपतिर्देवतागणपतिस्थाप
नेविनियोगः ॥ ॐगणानांन्त्वागणपतिꣳहवामहेप्प्रियाणांन्त्वाप्प्रियपतिꣳहवामहे
निधीनान्त्वांनिधिपतिꣳहवामहेवसोमम ॥ आहमंजानिगर्भधमात्वमंजासिगर्भध
म् ॥ २३।१९ ॥ श्रीश्चतेइतिमंत्रेणईशान्यामंबिकांन्यसेत् ॥ श्रीश्चतेइतिमंत्रस्यनारा

 यणऋषिस्त्रिष्टुप्छन्दोदुर्गादेवता दुर्गास्थापनेविनियोगः ॥ ॐश्रीश्चंतेलक्ष्मीश्श्चप
 त्न्यांवहोरात्रेपार्श्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मंऽइषाणसर्व्व
लोकम्मंऽइषाण ॥ ३१ ॥ २२ ॥ मध्यस्थानेस्थितोब्रह्माआब्रह्मन्नितिपूजयेत् ॥ आ
ब्रह्मन्नितिमंत्रस्यप्रजापतिर्ऋषिर्यजुश्च्छन्दः प्रजापतिर्देवताब्रह्मस्थापनेविनियोगः ॥
ॐ आब्रह्मन्न्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रेराजन्न्यः शूरऽइषव्योतिव्याधीमहार
थोजायतान्दोग्ध्रीधेनुर्वोढानड्वानाशुः सप्तिः पुरंधिर्य्योषाजिष्णूरथेष्ठाः ॥ सभेयोयुवा
स्ययजमानस्यवीरोजायतान्निकामेनिकामेनः पर्ज्जन्योवर्षतुफलवत्योनऽओषधयः
पच्यन्तांय्योगक्षेमोनःकल्पताम् ॥ २२ । २२ ॥ सोमस्यैवोत्तरेभागेवय ᳪ सोमे
तिमंत्रेणसोमंपूजयेत् ॥ वयᳪसोमेतिवसुर्ऋषिर्गायत्रीछन्दः सोमोदेवता सोम
स्थापनेविनियोगः ॥ ॐवयᳪसोमव्रतेतवमनस्तनूषुबिभ्रतः ॥ प्रजावन्तः सचेमहि ॥

॥ ३ ॥ ५६ ॥ ईशान्यांदिशितमीशानमितिमंत्रेणेशानंपूजयेत् ॥ तमीशानमितिमंत्र 3
स्यगौतमऋषिस्त्रिष्टुप्छन्दः ईशोदेवता ईशस्थापनेविनियोगः ॥ ॐ तमीशानञ्जगत
स्तस्थुषस्प्पतिंन्धियञ्जिन्न्वमवंसेहूमहेव्वयम् ॥ पूषानोयथावेदसामसंद्वृधेरक्षितापा
युरदब्धः स्वस्तये ॥ २५ ॥ १८ ॥ पूर्वस्यान्दिशित्रातारमितिमंत्रेणदेवेंद्रंपूजयेत् ॥
त्रातारमितिमंत्रस्यगर्गऋषिस्त्रिष्टुप्छन्दः इन्द्रोदेवता इन्द्रस्थापनेविनियोगः ॐ त्रा
तारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳ 4
स्वस्तिनोमघवाधात्विन्द्रः ॥ २० ॥ ५० ॥ पूर्वदक्षिणमध्येत्वन्नोऽअग्ने इतिमंत्रेणाग्निं
पूजयेत् ॥ ॐ त्वन्नोऽअग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः ॥ यजि 5
ष्ठोवह्नितमः शोशुचानोविश्वाद्वेषांꣳसिप्प्रमुमुग्ध्यस्मत् ॥ २१ ॥ ३ ॥ याम्यांसुगन्नः
पन्थेतिमंत्रेणधर्मराजंपूजयेत् ॥ सुगन्नःपन्थेतिप्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोयमोदे

१८

वता यमस्थापनेविनियोगः ॥ ॐ सुगन्नुः पन्थांम्प्रदिशन्नएंहिज्योतिष्मद्धेह्यजरं न्नुऽआयुंः॥अपैतुमृत्युरमृतंन्नुऽआगाद्वैवंस्वतोनोअभयंकृणोतुस्वाहा ॥ नैर्ऋत्येअसुन्वेतिमंत्रेणनिर्ऋतिंपूजयेत् ॥ असुन्वेतिमंत्रस्यविवस्वानृषिस्त्रिष्टुपूछन्दोनिर्ऋतिर्देवता निर्ऋतिस्थापनेविनियोगः ॥ ॐ असुंन्न्वन्तुमयंजमानमिच्छस्तेनस्येत्यामन्विंहितस्क्करस्य ॥ अन्न्यमस्मदिच्छसातंऽइत्यानमोदेविनिर्ऋतेतुभ्यंमस्तु ॥ १२ ॥ ६२ ॥ प्रतीच्यांतत्त्वायामीतिमन्त्रेणवरुणंपूजयेत् ॥ तत्त्वायामीतिमंत्रस्यशुनःशेपऋषिस्त्रिष्टुपूछन्दोवरुणोदेवता वरुणस्थापनेविनियोगः ॥ ॐ तत्त्वांयामिब्रह्मंणावन्दंमानुस्तदाशांस्तेयजंमानोहुविर्भिः ॥ अहेंडमानोवरुणेहबोध्युरुंशर्ठ॑सुमानुआयुः॑प्रमोषीः ॥ २१ ॥ २ ॥ वायव्यामानोनियुद्भिरितिमंत्रेणवायुमर्चयेत् ॥ आनोनियुद्भिरितिमंत्रस्यप्रजापतिर्ऋषिस्त्रिष्टुपूछन्दोवायुर्देवता वायुस्थापनेविनियोगः ॥

ॐ आनोनियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुपयाहियज्ञम् ॥ वायोऽअस्मि
न्त्सवनेमादयस्वयूयम्पातस्वस्तिभिः सदानः ॥ २७ ॥ २८ ॥ उत्तरेवयꣳसोमव्रतेइ
तिमंत्रेणकुबेरंपूजयेत् ॥ वयꣳसोमेतिवसुऋषिर्गायत्रीछन्दः कुबेरोदेवता कुबेरस्था
पनेविनियोगः ॥ ॐ वयꣳ सोमव्रतेतवमनस्तनूषुबिभ्रतः ॥ प्रजावन्तः सचेमहि ॥३॥
॥ ५६ ॥ ईशान्यांतमीशानमितिमंत्रेणेशानंपूजयेत् ॥ तमीशानमितिमंत्रस्यगौत
मऋषिस्त्रिष्टुपूछन्दः ईशानोदेवता ईशानस्थापनेविनियोगः ॥ ॐ तमीशानंजगत
स्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयम् ॥ पूषानोयथावेदसामसद्वृधेरक्षितापायु
रदब्धः स्वस्तये ॥ २५ ॥ १८ ॥ ईशानपूर्वयोर्मध्येअस्मेरुद्रेतिमंत्रेणब्रह्माणंपूजयेत् ॥
ॐ अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसजोषाः ॥ यः शꣳसतेस्तुवतेधायिपज्र
इंद्रज्येष्ठाअस्माँ२ अवन्तुदेवाः ॥३३॥५०॥ समीरसोमयोर्मध्येवसवोऽष्टौप्रकीर्तिताः ॥

 ध्रुवोध्वरश्चसोमश्चआपश्चैवानिलोऽनलः ॥ प्रत्यूषश्चप्रभासश्चवसवोष्टौप्रकीर्तिताः ॥
 वसोः पवित्रमंत्रेणध्रुवादीनांचपूजनम् ॥ वसोःपवित्रमितिमंत्रस्यगौतमऋषिर्ज
गतीछन्दः वसवोदेवता वसुस्थापनेविनियोगः ॥ ॐवसोःपवित्रमसिशतधारंवसोः
पवित्रमसिसहस्रधारम् ॥ देवस्त्वांसवितापुनातुवसोःपवित्रेणशतधारेणसुप्वाकामधु
क्षः॥१॥३॥सुधांशवीशानयोर्मध्येरुद्राएकादश स्मृताः॥अजैकपादहिर्बुध्न्योविरूपाक्षो
थरैवतः ॥ हरश्चबहुरूपश्चत्र्यम्बकश्चसुरेश्वरः॥सावित्रश्चजयन्तश्चपिनाकीरुद्रएवच ॥
नमस्तेरुद्रमंत्रेणरुद्रांश्चैवप्रपूजयेत् ॥ नमस्तेरुद्रेतिमंत्रस्यपरमेष्ठीऋषिर्गायत्रीछन्दो
रुद्रोदेवता रुद्रस्थापनेविनियोगः ॥ ॐनमस्तेरुद्रमन्यवऽउतोतइषवेनमः बाहुभ्यामु
तनेनमः ॥ १६ ॥ १ ॥ यातेरुद्रशिवातनूरघोरापापकाशिनी ॥ तयानस्तनुवाशन्तमया
गिरिशन्ताभिचाकशीहि ॥ १६ ॥ २ ॥ ईशदेवेंद्रयोर्मध्येआदित्यान्द्वादशोल्लिखेत् ॥

धातामित्रोर्यमारुद्रोवरुणः सूर्यएवच ॥ भगोविवस्वान्पूषाचसवितादशमस्तथा ॥ ए
कादशस्तथात्वष्टाविष्णुर्द्वादशउच्यते ॥ अदितिर्द्यौरितिमंत्रेणआदित्यान्द्वादशलि
खेत् ॥ अदितिर्द्यौरितिमंत्रस्यप्रजापतिर्ऋषिः त्रिष्टुप्छन्दः सूर्योदेवतासूर्य्यस्थापनेवि
नियोगः॥ॐअदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माताससपितासपुत्रः ॥ विश्वेदेवाऽअ
दितिः पंचजनाऽअदितिर्ज्जातमदितिर्ज्जनित्वम् ॥ २५ ॥ २३ ॥ इंद्राग्न्योर्मध्येअश्वि
नातेजसेतिमंत्रेणाश्विनौपूजयेत् ॥ अश्विनातेजसेतिमन्त्रस्यपरमेष्ठीऋषिरनुष्टुप्छन्दो
श्विनौदेवते अश्विस्थापनेविनियोगः ॥ ॐ अश्विनातेजसाचक्षुः प्राणेनसरस्वती ॥
वीर्य्यम्वाचेन्द्रोबलेनेन्द्रायदधुरिन्द्रियम्॥२०।८०॥ आग्नेययाम्ययोर्मध्येविश्वेदेवाः सपै
तृकाः ॥ क्रतुदक्षौसत्यवसूकामौचध्रुवलोचनौ ॥ पुरूरवावार्द्रवसौविश्वेदेवास्त्रयो
दश ॥ अग्निष्वात्ताः सोमपाश्चबर्हिषदः सुकालिनः॥एकशृंगोशुधश्चैवद्वितीयस्सोमपा

स्तथा ॥ विश्वेदेवा आयंतुश्चताभ्यांतौचप्रपूजयेत् ॥ विश्वेदेवासऽआगतेतिमंत्रस्य
परमेष्ठीऋषिर्गायत्रीछन्दोविश्वेदेवादेवता विश्वेदेवस्थापनेविनियोगः ॥ ॐ विश्वेदे
वासऽआगंतशृणुतामऽइमꣳहवम्॥एदंबर्हिर्न्निषीदत ॥६।३४॥ आयन्तुनइतिमंत्रेणअ 14
ग्नियमयोर्मध्येपितॄन्प्रपूजयेत् ॥ आयन्तुनइतिमन्त्रस्यविवस्वानृषिर्बृहतीछंदः पि
तरोदेवता पितृस्थापनेविनियोगः॥ ॐआयन्तुनःपितरः सोम्यासोग्निष्वात्ताः पथिभि 15
र्देवयानैः॥अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवन्त्वस्मान्॥१९।५८॥ यमनैर्ऋतयोर्म
ध्येसप्तऋषयइतिमंत्रेणऋषीन्सप्तप्रपूजयेत् ॥ गौतमोत्रिर्भरद्वाजोविश्वामित्रोथक
श्यपः ॥ जमदग्निर्वसिष्ठश्चसप्तैतेऋषयःस्मृताः ॥ सप्तर्षयः प्रतिहिताइतिमंत्रस्यगौ
तमऋषिर्जगतीछन्दः सप्तऋषयोदेवताः सप्तऋषिस्थापनेविनियोगः ॥ ॐ
सप्तऋषयः प्रतिहिताःशरीरेसप्तरक्षन्तिसदमप्रमादम् ॥ सप्तापः स्वपतोलोकमी

युस्तत्रं जागृतो ऽअस्वंप्रजौसत्रसदौंचदेवौ ॥ नैर्ऋत्यवरुणयोर्मध्येनागभूतानिपूजये
त् ॥ अनन्तोवासुकिः शेषः कर्कोटस्तक्षकस्तथा ॥ पद्मकश्चमहापद्मःशंखः कंबलएवच ॥
पिशाचोगुह्यकः सिद्धोभूतोमीदेवयोनयः ॥ भूतायत्वेतिमंत्रस्यपराशरऋषिर्विराट्छन्दः
नारायणोदेवता भूतस्थापनेविनियोगः ॥ ॐभूतायंत्वानारातयेस्वरभिविक्ख्यैषुन्दृठं
हंन्तान्दुर्य्याः ॥ पृथिव्यामुर्वंन्तारिक्षमन्न्वैमिपृथिव्यास्त्वानाभौसादयाम्म्यादित्या
ऽउपस्त्थेग्नेहव्यश्ंरक्ष ॥ १ ॥ ११ ॥ नैर्ऋत्यपश्चिमयोर्मध्येनमोस्तुसर्पेभ्यो इति
मंत्रेणसर्पान्प्रपूजयेत् ॥ नमोस्तुसर्पेभ्यइतिमंत्रस्यप्रजापतिर्ऋषिरनुष्टुप्छन्दः सर्पो
देवता सर्पस्थापनेविनियोगः ॥ ॐ नमोस्तुसर्प्पेब्भ्योयेकेचंपृथिवीमनुं ॥ येऽअ
न्तरिक्षेयेदिवितेब्भ्यः सर्प्पेब्भ्योनमः ॥ १३ ॥ ६ ॥ मरुद्वरुणयोर्मध्येगन्धर्वाप्सर
सस्तथा ॥ विश्वावसुश्चगन्धर्वोहाहाहूहूस्तथैवच ॥ घृताचीमेनकारंभाउर्वशीचति

लोत्तमा ॥ सुकेशीमञ्जुघोषाद्याः कथ्यन्तेप्सरसोबुधैः ॥ अयंपुरोहरिकेशोगन्ध
र्वस्त्वेतिमंत्रतः ॥ गन्धर्वस्त्वेतितौपूज्यौसर्वकामार्थसिद्धये ॥ ॐअयंपुरोहरिकेश
इतिमंत्रस्यपरमेष्ठीऋषिः ककुपूछन्दोप्सरसोदेवता अप्सरःस्थापनेविनियोगः ॥ ॐ
अयंम्पुरोहरिकेशुः सूर्य्यरश्मिम्मुस्तस्यरथगृत्सश्चरथौजाश्चसेनानिग्रामुण्यौ पुञ्जि
कस्त्थुलाचंकृतस्त्थुलाचाप्सुरसौदुंक्ष्णवः पुशवोहेतिः पौरुषेयोवुधः प्प्रहेतिुस्तेभ्यो
नमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमेषांजम्भेदध्मः ॥ गन्धर्व
स्त्वेतिमंत्रेणवायुसोमयोर्मध्येगन्धर्वान्प्रपूजयेत् ॥ गन्धर्वस्त्वेतिमंत्रस्यगौतमऋषि
द्विपदाविराट्छन्दः गन्धर्वोदेवता गन्धर्वस्थापनेविनियोगः ॥ ॐगुन्धुर्वस्त्वांविश्वाव
सुःपरिंदधातुविश्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्निरिडऽईडितः ॥ इन्द्रस्यबाहुर
सिदक्षिणोविश्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्निरिडऽईडितः ॥ मित्रावरुणौत्वो

त्तरतः परिधत्तान्ध्रुवेणधर्म्मणाविश्श्वस्यारिष्ट्यैयजमानस्यपरीधिरस्युग्निरिडऽईडि
तः ॥ २॥३॥ ब्रह्मेंद्रयोर्मध्येश्रीश्चतेइतिमंत्रेणदुर्गांदेवींप्रपूजयेत् ॥ श्रीश्चतेइतिमंत्रस्य
नारायणऋषिस्त्रिष्टुप्छन्दोदुर्गादेवता दुर्गास्थापनेविनियोगः ॥ श्रीश्चतेलक्ष्मीश्चप
त्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मंऽइषाणसर्वलो
कम्मंऽइषाण ॥३१॥२२॥ ब्रह्मेंद्रयोर्मध्येअवरुद्रेतिशंकरम् ॥ स्कंदंनंदीश्वरंशूलंमहा
देवंचपूजयेत् ॥ अवरुद्रेतिमंत्रस्यपरमेष्ठीऋषिः ककुप्छंदः रुद्रोदेवता रुद्रस्थापनेवि
नियोगः ॐअवरुद्रमदीमह्यवदेवंत्र्यम्बकम् ॥ यथानोवस्यसस्करद्यथानः श्रेयसस्कर
द्यथानोव्यवसाययात् ॥ ३ ॥ ५८ ॥ ब्रह्मेशानयोर्मध्येश्रियाविष्णुस्तथैवच ॥ सदस
स्पतइतिमंत्रेणविष्णोरराटेतिमंत्रतः ॥ लक्ष्मीःपूज्यासदाभक्त्याविष्णुः पूज्यस्त
थैवच ॥ सदसस्पतिमंत्रस्यनारायणऋषिरुष्णिक्छंदोलक्ष्मीर्देवतालक्ष्मीस्थापने

विनियोगः ॥ सदंसुस्प्पतिमद्भुतंप्प्रियमिन्द्रंस्यकाम्म्यंम् ॥ सनिम्मेधामंयासिषुꣳस्वा
हां ॥३२।१३॥विष्णोरराटमितिमंत्रेणब्रह्मेशानयोर्मध्येविष्णुंपूजयेत्॥विष्णोरराटमिति
मंत्रस्यप्रजापतिर्ऋषिरनुष्टुप्छन्दःविष्णुर्देवता विष्णुस्थापनेविनियोगः ॥ ॐविष्णो
रराटंमसिविष्णोश्नप्त्रेस्त्थोविष्णोः स्यूरंसि ॥ विष्णोर्ध्रुवोऽसिवैष्णवमंसिविष्णंवेत्त्वा ॥
ब्रह्मेन्द्रयोर्मध्येमरुतांसप्तकोगणः शुक्रज्ज्योतिश्चेतिषडनुवाक्येनषड्रश्मीन्परिपूज
येत् ॥ शुक्रज्योतिश्चेतिमंत्रषट्कस्यपराशरऋषिर्विराट्छन्दःमरुतोदेवता मरुतांस्थाप
नेविनियोगः ॥ ॐशुक्रज्ज्योतिश्चंचित्रज्ज्योतिश्चसत्यज्ज्योतिश्चज्ज्योतिष्मांश्च ॥
शुक्रश्चंऽऋतपाश्चात्यंꣳहाः ॥ १७ ॥ ८० ॥ ईदृङ्चांन्यादृङ्चंसदृङ्चप्प्रतिसदृङ्चं ॥
मितश्चसम्मितश्चसभंराः ॥ १७ ॥ ८१ ॥ ऋतश्चंसत्यश्चंध्रुवश्चंधरुणश्चं
धर्त्ताचंविधर्त्ताचंविधारयः ॥ १७ ॥ ८२ ॥ ऋतजिच्चंसत्यजिच्चंसेनजिच्चंसुषेणश्च ॥ अ

न्तिमित्रश्चदूरेऽअमित्रश्चगुणः ॥ १७ ॥ ८३ ॥ ईदृक्षासऽएतादृक्षासऊषुणः सदृक्षा
सः प्रतिसदृक्षासएतन ॥ मितासश्चसम्मितासोनोऽअद्यसभरसोमरुतोयज्ञेऽअ
स्मिन् ॥ १७ ॥ ८४ ॥ स्वतवाँश्चप्रघासीचसान्तपनश्चगृहमेधीच क्रीडीचशा
कीचोज्जेषी ॥ १७ ॥ ८५ ॥ स्वैर्दक्षैरितिमंत्रेणमारुतंपूजयेत् ॥ स्वैर्दक्षैरितिमंत्रस्य
पराशरऋषिर्विराट्छन्दः मारुतोदेवता मारुतस्थापनेविनियोगः ॥ ॐस्वैर्दक्षैर्दक्षपितेह
सीदद्देवानाᳬसुम्नेबृहतेरणाय ॥ पितैवैधिसूनवऽआसुशेवास्वावेशातन्न्वासंविशस्वा
श्विनाध्वर्यूसादयतामिहत्वा ॥१४।३॥ ब्रह्माग्न्योर्मध्येऽग्नेवाजजिदितिमंत्रेणस्वधां
प्रपूजयेत् ॥ अग्नेवाजजिदितिमंत्रस्यमधुऋषिर्बृहतीछन्दोवैश्वानरोदेवता स्वधास्था
पनेविनियोगः ॥ ॐअग्नेवाजजिद्वाजंत्वासरिष्यन्तंवाजजितᳬसम्मार्ज्मिनमो
देवेभ्यःस्वधापितृभ्यःसुयमेमेभूयास्तमस्कन्नमद्य ॥ २ ॥ ७ ॥ ब्रह्मयाम्ययोर्मध्येऽ

न्यवापोऽर्धमासानामितिमंत्रेणमृत्युंचैवपूजयेत् ॥ अन्यवापोऽर्द्धमासानामितिमंत्रस्यसुकेतुर्ऋषिर्जगतीछन्दः मृत्युर्देवता मृत्युस्थापनेविनियोगः॥ ॐ अन्यवापोर्द्धमासानामृश्योमयूरः सुपर्णस्तेगन्धर्वाणामुपामद्गोमासाङ्कश्यपोरोहित्कुण्डृणाचीगोलत्तिकाते प्मरसाम्मृत्यवेसितः ॥ २४ ॥ ३७ ॥ ब्रह्मयाम्ययोर्मध्येएवककुभमितिमंत्रेणरोगमपिपूजयेत् ॥ ककुभमितिमंत्रस्यप्रजापतिर्ऋषिर्यजुश्छंदः रोगोदेवता रोगस्थापनेविनियोगः ॥ ॐ ककुभꣳरूपंवृषभस्यरोचतेबृहच्छुक्रः शुक्रस्यपुरोगाः सोमः सोमस्यपुरोगाः ॥ यत्तेसोमादाभ्यन्नामजागृवितस्मैत्वागृह्णामितस्मैतेसोमसोमायस्वाहा ॥ ॥ ११ ॥ ४९ ॥ ब्रह्मनैर्ऋत्ययोर्मध्येवसुविष्णौतुपूजयेत् ॥ गणानान्त्वेतिमंत्रेणपूज्यावेतौपृक्पृक् ॥ गणानांत्वेतिमंत्रस्यप्रजापतिर्ऋषिरनुष्टुप्छन्दः गणपतिर्देवता गणपतिस्थापनेविनियोगः ॥ ॐ गणानान्त्वागणपतिꣳहवामहेप्रियाणान्त्वाप्रिय

पंतिर्ठ॑हवामहेनिधीनान्त्वानिधिपतिर्ठ॑हवामहेवसोमम ॥ आहमंजानिगर्ब्भधमा
त्वमंजासिगर्ब्भधम् ॥ २३ ॥ १८ ॥ ब्रह्मवरुणयोर्मध्येअपांस्थानंविधीयते ॥ अपो
अद्येतिमन्त्रेणअपश्चैवप्रपूजयेत्॥अपोअद्येतिमंत्रस्यहिरण्यस्तूपऋषिस्त्रिष्टुपूछंदः आ
पोदेवता अपांस्थापनेविनियोगः ॥ ॐअपोऽअद्यान्न्वचारिषुर्ठ॑रसेनसमसृक्ष्महि ॥
पयस्वानग्नऽआगमन्तम्मासर्ठ॑सृजवर्च्चसाप्रजयाचधनेनच ॥ २० ॥ २२ ॥ ब्रह्मवायु
द्वयोर्मध्येमरुतांसप्तकोगणः ॥ समीरमारुतमरुज्जगत्प्राणसमीरणाः ॥ इमेचसप्तम
रुतोमातरिश्वातथानिलः ॥ बृहदिंद्रायमंत्रेणपूज्यास्त्वेतेहिवायवः ॥ बृहदिंद्रायेति
मंत्रस्यपरमेष्ठीऋषिर्बृहतीछन्दोमरुतोदेवता मरुत्स्थापनेविनियोगः ॥ ॐबृहदिंद्राय
गायतमरुतोवृत्रहन्तमम् ॥ येनज्ज्योतिरजनयन्नृतावृधोदेवन्देवायजागृवि ॥ २० ॥
॥ ३० ॥ ब्रह्मणःपादमूलेतुमेदिनींतत्रपूजयेत् ॥ महीद्यौरितिमंत्रेणपृथ्वीपूज्याप्रयत्न

१९

तः ॥ महीद्यौरितिमंत्रस्यमेधातिथिर्ऋषिर्गायत्रीछन्दः पृथिवीदेवता पृथिवीस्थापने
विनियोगः ॥ ॐ मुहीद्यौः पृथिवीचंनऽइमंयज्ञम्मिमिक्षताम् ॥ पिपृतान्नोभरीमभिः ॥
॥ ८ ॥ ३२ ॥ नदीभ्यइतिमंत्रेणनदीपूज्योत्तरेततः ॥ गंगाचयमुनाचैवसरयूश्चस
रस्वती ॥ कौशीवेत्रवतीगंगातापीरेवापयोष्णिका ॥ कृष्णाभीमरथीतुंगभद्राक्षुद्रन
दीतथा ॥ नदीभ्यइतिमंत्रेणपूज्याश्चोत्तरतस्त्वमूः ॥ नदीभ्यइतिमंत्रस्यपरमेष्ठीऋषि
र्यजुश्छन्दः नद्योदेवता नदीस्थापनेविनियोगः ॥ ॐ नुदीभ्यः पौञ्जिष्ठमृक्षीकाभ्यो
नैषादम्पुरुषव्याघ्रायं दुर्म्मदङ्गन्धर्वाप्सरोभ्योव्रात्यम्प्रयुग्भ्युऽउन्नमंत्तꣳसर्पदेवज
नेभ्योप्प्रतिपदमयेभ्यः ॥ कितवमीर्य्यतायाऽअकितवम्पिशाचेभ्योविदलकारीया
तुधानेभ्यःकण्टकीकारीम् ॥ ३० ॥ ८ ॥ लवणेक्षुसुरासर्पिर्दधिक्षीररसजीवनाः॥
समुद्रोसिनभस्वान्वै मंत्रेणानेनचोत्तरे ॥ सप्तसागराः पूज्याः ॥ समुद्रोसीतिमं

त्रस्यप्रजापतिर्ऋषिर्यजुश्छन्दः समुद्रोदेवता समुद्रस्थापनेविनियोगः ॥ समुद्रोऽसि
नभस्वानार्द्रदानुःशम्भूर्म्मयोभूरभिमांवाहिस्वाहामारुतोऽसिमरुतांङ्गणः ॥ शम्भूर्म्मयो
भूरभिमांवाहिस्वाहावस्यूरसिदुवस्वाञ्छम्भूर्म्मयोभूरभिमांवाहिस्वाहा ॥ १८ ॥ ४५ ॥
आदित्यश्चंद्रमाभौमोबुधजीवसितार्कजाः ॥ सर्वेग्रहास्तुसंपूज्याराहुकेतू क्रमे
णच ॥ अथाग्निंदूतमित्यादिमंत्रैस्तान्परिपूजयेत् ॥ अग्निंदूतमितिमंत्रस्यमेधातिथि
ऋषिर्गायत्रीछंदः सवितादेवता सवितृस्थापनेविनियोगः ॥ ॐ अग्निन्दूतम्पुरोदधे
हव्यवाहमुपंब्रुवे ॥ देवा २ ऽआसादयादिह ॥ २२ ॥ १७ ॥ अप्स्वग्नेइतिमंत्रेण
चंद्रंचपरिपूजयेत् ॥ अप्स्वग्नेइतिमंत्रस्यप्रजापतिर्ऋषिर्गायत्रीछंदः सोमोदेवता
सोमस्थापनेविनियोगः ॥ ॐ अप्स्वग्नेसधिष्टवसौषधीरनुरुध्यसे ॥ गर्ब्भेसञ्जायसे
पुनः ॥ १२ । ३६ ॥ स्योनापृथिवीतिमंत्रेणभौमंचपरिपूजयेत् ॥ स्योनापृथिवीतिमंत्र

स्यदध्यङ्ङाथर्वणऋषिर्गायत्रीछंदः अंगारकोदेवता अंगारकस्थापनेविनियोगः ॥
ॐस्योनापृंथिवीनोभवानृक्षरानिवेशनी ॥ यच्छानः शर्म्मसप्रथाः ॥ ३६ ॥ १३ ॥ इदंविष्णु
रितिमंत्रस्यमेधातिथिर्ऋषिर्गायत्रीछंदःबुधोदेवता बुधस्थापनेविनियोगः ॥ ॐ इदंविष्णु
र्विचक्रमेत्रेधानिदंधेपदम् ॥ समूढमस्यपांसुरेस्वाहा ॥ ५ । १५ ॥ महाँइंद्रेतिमंत्रेणगु
रुंचपरिपूजयेत् ॥ महाँइंद्रइतिमंत्रस्यहिरण्यगर्भऋषिर्गायत्रीछंदोबृहस्पतिर्देवता बृह
स्पतिस्थापनेविनियोगः ॥ ॐ महाँइंद्रोवज्रहस्तइतियजुः ॥ ॐ महाँ२इन्द्रोवज्रहस्तः
षोडशीशर्म्मयच्छतु ॥ हन्तुपाप्मानंयोस्मान्द्वेष्टि ॥ उपयामगृहीतोसिमहेन्द्रायत्वैष
तेयोनिर्म्महेन्द्रायत्वा ॥ २६ ॥ १० ॥ शुक्रज्योतिश्चमंत्रेणभार्गवंपरिपूजयेत् ॥
शुक्रज्योतिश्चेतिमंत्रस्यवामदेवऋषिरुष्णिक्छंदः शुक्रोदेवता शुक्रस्थापनेविनियो
गः ॥ ॐ शुक्रज्ज्योतिश्चचित्रज्ज्योतिश्चसत्यज्ज्योतिश्चज्योतिष्मांश्च शुक्रश्च

ऽऋतुपाश्चात्त्यंर्ठंहाः ॥ १७ ॥ ८० ॥ प्रजापतेतिमंत्रेणशनिंचपरिपूजयेत् ॥ प्रजाप
तइतिमंत्रस्यहिरण्यगर्भऋषिस्त्रिष्टुप्छंदः शनैश्चरोदेवता शनैश्चरस्थापनेविनियोगः ॥
ॐ प्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरिताबंभूव ॥ यत्कामास्तेजुहुमस्तन्नोऽअ
स्तुवयथंस्यामपतयोरयीणाम् ॥ २३ ॥ ६५ ॥ आयंगौरितिमंत्रेणराहुंचपरिपूजयेत्॥
आयंगौरितिमंत्रस्यसार्पराज्ञीऋषिर्गायत्रीछन्दोराहुर्देवता राहुस्थापनेविनियोगः ॥ॐ
आयंगौःपृश्निरक्रमीदसंदन्मातरम्पुरः ॥ पितरञ्चप्रयन्त्स्वः ॥ ब्रह्मजज्ञानमंत्रेणकेतुं
पूज० ॥ब्रह्मजज्ञानमितिमंत्रस्यवामदेवऋषिस्त्रिष्टुप्छन्दःकेतुर्देवताकेतुस्थापनेवि० ॥ॐ
ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोवेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यवि
ष्ठाः सतश्चयोनिमसतश्चविवः ॥१३॥३॥ समख्यइतिमंत्रेणपूजयेत्सप्तमातरः॥ब्राह्मी
माहेश्वरीचैवकौमारीवैष्णवीतथा ॥ वाराहीचैवमाहेंद्रीचामुंडासप्तमातरः ॥ समख्य

इतिमंत्रस्यवामदेवऋषिः पंक्तिछन्दोमातरोदेवतामातृस्थापनेविनियोगः ॥ ॐसमंख्ये
देव्याधियासन्दक्षिणयोरुचक्षसा ॥ मामऽआयुःप्प्रमोषीम्मोऽअहन्तवंवीरंविदेयुतव
देविसन्दृशि ॥ ४ ॥ २३ ॥ दुर्गांपूज्याततोबाह्येवज्रादीन्यायुधानिच ॥ वज्रंशक्तिंचदं
डंचखड्गंपाशांकुशौतथा ॥ गदांत्रिशूलंचक्रंचपद्मंचैतेक्रमाद्दश ॥ ॐ दुर्गायैनमः इति
मध्ये ॐ शक्तयेनमः ॐदंडायनमः ॐखड्गायनमः ॐपाशायनमः ॐअंकुशाय
नमः ॐ गदायैनमः ॐ त्रिशूलायनमः ॐ चक्रायनमः ॐ पद्मायनमः ततोधूपदी
पनैवेद्यतांबूलदक्षिणायज्ञोपवीतपूगीफलवासांसिसमर्प्प्य कृतैतच्छिवादिप्रतिष्ठांगभूते
स्मिन्कर्मणि यथासंपादितसामग्र्याकृतेनानेनपूजनेन सर्वतोभद्रमंडलस्थापितदेवताः
सुप्रीतावरदाः संतु आयुःकर्त्तारः क्षेमकर्त्तारः शुभकर्त्तारः कल्याणकर्त्तारो
भवंतु ॥ ॥ इतिसर्वतोभद्रमंडलदेवतानां समंत्रकपूजनम् ॥ अथतन्मंडल

स्थदेवतानांनाममंत्रेणावाहनंपूजनंचोच्यते ॥ तथाहि–मध्येब्रह्मणेनमः ब्रह्माणमावाह
यामिस्थापयामि ॥ १ ॥ उत्तरेसोमायनमः सोमंआ० ॥ २ ॥ ईशाने इशानायनमः
ईशानंआ० ॥ ३ ॥ पूर्वे इन्द्रायनमः इंद्रंआ० ॥४ ॥ आग्नेयेअग्नयेनमः अग्निंआ०॥५॥
दक्षिणे यमायनमः यमंआ० ॥ ६ ॥ नैर्ऋत्ये निर्ऋतयेनमः निर्ऋतिंआ० ॥ ७ ॥ पश्चि
मे वरुणायनमः वरुणंआ०॥८॥वायव्येवायवेनमः वायुंआ०॥९॥ वायुसोममध्येअष्टव
सुभ्योनमः अष्टवसून्आ०॥१०॥ सोमेशानमध्येएकादशरुद्रेभ्योनमः एकादशरुद्रा
न्आ० ॥ ११ ॥ ईशानेंद्रमध्ये द्वादशादित्येभ्योनमः द्वादशादित्यान्आ०॥ १२ ॥ इं
द्राग्निमध्येअश्विभ्यांनमः अश्विनौआ० ॥ १३ ॥ अग्नियममध्येविश्वेभ्योदेवेभ्यः
सपैतृकेभ्योनमः विश्वान्देवान्सपैतृकान्आ० ॥ १४ ॥ यमनिर्ऋतिमध्ये सप्तऋषि
भ्योनमः सप्तऋषीन्आ० ॥ १५ ॥ निर्ऋतिवरुणमध्ये भूतनागेभ्योनमः भूतनागा

 ना० ॥१६॥ वरुणवायुमध्ये गंधर्वाप्सरोभ्योनमः गंधर्वाप्सरसआ०॥१७॥ ब्रह्मसोमम
 ध्ये स्कंदायनमः स्कंदंआ० ॥१८॥ उत्तरेऋषभायनम ऋषभंआ०॥१९॥तदुत्तरे शूल
महाकालाभ्यांनमः शूलमहाकालौआ० ॥ २० ॥ब्रह्मेशानयोर्मध्येदक्षादिसप्तगणेभ्यो
नमः दक्षादिसप्तगणाना० ॥ २१ ॥ ब्रह्मेन्द्रयोर्मध्ये दुर्गायैनमः दुर्गांआ०॥ २२ ॥ पूर्वे
विष्णवेनमः विष्णुंआ० ॥२३॥ ब्रह्माग्न्योर्मध्ये स्वधायैनमः स्वधांआ० ॥ २४ ॥ ब्रह्म
यमयोर्मध्येमृत्युरोगेभ्योनमः मृत्युरोगाना०॥२५॥ ब्रह्मनैर्ऋतयोर्मध्ये गणपतयेनमः
गणपतिंआ० ॥२६॥ ब्रह्मवरुणयोर्मध्ये अद्भ्योनमः अपः आ०॥२७॥ ब्रह्मवायुमध्ये
मरुद्भ्योनमः मरुतः आ० ॥२८॥ ब्रह्मणः पादमूलेकर्णिकायां पृथिव्यैनमः पृथ्वींआ०
॥२९॥ तत्रैव सप्तसागरेभ्योनमःसप्तसागराना० ॥ ३० ॥ तत्र गंगादिसप्तसरिद्भ्योनमः
गंगादिसप्तसरितः आ० ॥३१॥ उत्तरे मेरवेनमः मेरुंआ०॥३२॥बाह्यपरिधौसोमादिस

न्निधौक्रमेणायुधानामावाहनम् गदायैनमःगदांआ०॥३३॥त्रिशूलायनमः त्रिशूलंआ०
॥ ३४ ॥ वज्रायनमः वज्रंआ० ॥ ३५ ॥ शक्तयेनमः शक्तिंआ० ॥ ३६ ॥ दंडा
यनमः दंडंआ० ॥ ३७ ॥ खड्गायनमः खड्गं आ० ॥ ३८ ॥ पाशायनमः पाशंआ०
॥ ३९ ॥ अंकुशायनमः अंकु० ॥ ४० ॥ तद्बाह्येउत्तरादौ गौतमायनमः गौ० ॥ ४१ ॥
भारद्वाजायनमः भा० ॥ ४२ ॥ विश्वामित्रायनमः वि० ॥ ४३ ॥ कश्यपायनमः
कश्य० ॥४४॥ जमदग्नयेनमः जम० ॥ ४५ ॥ वसिष्ठायनमः व० ॥ ४६ ॥ अत्रयेनमः
अ० ॥४७॥ अरुंधत्यैनमः अरुंधतीं०॥४८॥तद्बहिः पूर्वादिदिक्षु अग्निकौम्र्यैनमः अ०
॥ ४९ ॥ ब्राह्म्यैनमः ब्रा० ॥५०॥ वाराह्यैनमः वा० ॥५१ ॥ वैष्णव्यैनमः वै० ॥ ५२ ॥
माहेश्वर्यैनमः मा० ॥ ५३ ॥ इंद्राण्यैनमः इंद्राणींआवाहया० ॥ ५४ ॥ चामुंडायैनमः
चामुंडामा० ॥ ५५ ॥ अथवेदिमध्येकलशस्थापनंतस्मिन्कलशेगणेशंवरुणंचावाह्य

पूजयेत् अथवाप्रधानदेवतामूर्तिंस्वर्णमयींषोडशोपचारैः पंचोपचारैर्वातत्रावाह्यपू
जयेत् ॥ शिवप्रतिष्ठायांतुलिंगतोभद्रमंडलेषोडशोपचारैः पंचोपचारैर्वाप्रधानदेवतामू
र्तिंपूजयेदितिबोध्यम् ॥ ॥ अथद्वादशलिंगतोभद्रपूजनपद्धतिर्लिख्यते ॥ मनोहरं
लिखेच्चक्रंलिंगैर्द्वादशभिर्युतम् ॥प्रागुदीच्यांपंचत्रिंशद्रेखाःकार्याःप्रयत्नतः ॥१॥ कोणेन्दु
स्त्रिपदाश्वेताः शृंखलापंचभिःपदैः ॥ वल्लीकार्यातुनवभिर्भद्रंचैवचतुःपदे॥२॥भद्रपार्श्वे
तथारुद्रोऽष्टाविंशतिपदैर्भवेत्॥त्यक्त्वाचद्विपदंतद्वद्रुद्रंकुर्याच्चपूर्ववत्॥३॥द्विपदंतुतथात्य
क्त्वातृतीयंरुद्रमालिखेत्॥ईषद्वल्ल्यन्तरालेतुसप्तकोष्ठाश्चपीतकाः॥लिंगानांस्कंधतः को
ष्ठाश्चतुर्विंशतयः सिताः ॥४॥ तेषामुपरिसंस्थाप्याः पदाद्वादशवैसिताः ॥ लिंगशृंखल
योर्मध्येचत्वारोरक्तवर्णकाः ॥५॥ तथैवलिंगयोर्मध्येकुर्याद्रक्तंचतुष्पदम्॥मध्यस्थंसर्व ॥११३॥
तोभद्रंलिंगंद्वादशसंमितम् ॥६॥ शृंखलाकृष्णधान्यैश्चवापीश्वेतान्नपूरिता॥तथारुद्रास्तु

कृष्णान्नैरेवंकुर्याद्विचित्रकम् ॥ ७ ॥ ततः संपूजनंकुर्यात्तद्विधानमथोद्भवे ॥ तत्रमध्ये
ऽष्टदलकमलोपरिब्रह्माणंस्थापयेत् ॥ ८ ॥ एह्येहिसर्वाधिपतेसुरेन्द्रमदीययज्ञेपितृ
देवताभिः ॥ सर्वस्यधातास्यमितप्रभावविशत्वमन्तःसततंशिवायेतिध्यात्वा ॥ ब्रह्मज
ज्ञानमितिमंत्रेणब्रह्माणमावाह्यपूजयेत् ॥ ब्रह्मजज्ञानमितिमंत्रस्यवामदेवऋषिस्त्रिष्टुप्
छन्दः ब्रह्मादेवता ब्रह्मावाहनेविनियोगः ॐ ब्रह्मंजज्ञानम्प्रथमंपुरस्ताद्विसीमतः
सुरुचोवेनआवः ॥ सबुध्न्या ऽउपमा ऽअस्यविष्ठाः सतश्चयोनिमसंतश्चविवः ॥
॥ १३ ॥ उत्तरेसोमं ॐएह्येहियज्ञेश्वरयज्ञरक्षांविधत्स्वनक्षत्रगणेनसार्द्धम् ॥ सर्वौषधी
पितृगणेनसार्द्धंगृहाणपूजाम्भगवन्नमस्ते ॥ इतिध्यात्वा आप्यायस्वेतिमंत्रेणसोममा
वाह्यपूजयेत् ॥ आप्यायस्वेतिमंत्रस्यगौतमऋषिर्गायत्रीछन्दः सोमोदेवता सोमावाहने
विनियोगः॥ॐआप्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यम् ॥ भवावाजस्यसंगथे ॥ १२॥

॥ ११२ ॥ ततईशानेईशानं एह्येहियज्ञेश्वरयज्ञसिद्ध्यैगृहाणपूजाम्भगवन्नमस्ते ॥
॥११४॥ इतिध्यात्वा तमीशानमितिमंत्रेणेशानमावाह्यपूजयेत् ॥ तमीशानमितिमंत्रस्यगौतम
ऋषिः जगतीछन्दः ईशानोदेवता ईशानावाहनेविनियोगः ॥ ॐतमीशानञ्जगतस्तस्थु
षुस्पतिन्धियंजिन्वमर्वसेहूमहेवयम् ॥ पषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धः
स्वस्तये ॥ २५ ॥ १८ ॥ पूर्वेइन्द्रम् ॥ ॐएह्येहिसर्वामरसिद्धसाध्यैरभिष्टुतोव
ज्रधरामरेश ॥ संवीज्यमानोप्सरसांगणेनरक्षाध्वरंनोभगवन्नमस्ते इतिध्यात्वा त्राता
रमितिमंत्रेणेन्द्रमावाह्यपूजयेत् त्रातारमिंद्रमितिमंत्रस्यगौतमऋषिस्त्रिष्टुप्छन्दः
इन्द्रोदेवता इन्द्रावाहनेविनियोगः ॥ ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुह
वꣳशूरमिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्विन्द्रः ॥ २० ॥ ॥११४॥
॥ ५० ॥ इन्द्रायनमः इति पाद्यादिभिरर्चयेत् ॥ ततआग्नेये खंडेंदुत्रिपदंश्वेतंतत्राग्नि

म् ॥ एह्येहिसर्वामरहव्यवाहमुनिप्रवीरैरभितोभिगुप्तम् ॥ तेजोबलैर्लोकगणेनसार्द्धममा
ध्वरंरक्षनमोऽस्तुतेग्ने ॥ इतिध्यात्वा अग्निन्दूतमितिमंत्रेणाग्निमावाह्यपूजयेत् ॥ अग्नि
न्दूतमितिमंत्रस्यकाण्वोमेधातिथिर्ऋषिर्गायत्रीछंदः अग्निर्देवता अग्न्यावाहनेविनियो
गः ॥ ॐ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रुवे ॥ देवाँ२आसादयादिह ॥ २२ ॥ १७ ॥
अग्नयेनमः पाद्यादिभिरर्चयेत् ॥ याम्येचतुर्विंशतिपदस्वरूपयोर्गोक्षीरसदृशयोर्मध्ये
यमंपूजयेत् ॥ एह्येहिवैवस्वतधर्मराजसर्वामरैरर्चितधर्ममूर्ते ॥ शुभाशुभानंदशुचामधी
शशिवायनःपाहिमखंनमस्ते ॥ इतिध्यात्वा सुगन्नःपंथेतिमंत्रेणयममावाह्यपूजये
त् ॥ सुगन्नःपंथेतिमत्रस्यपार्श्वपतऋषिस्त्रिष्टुप्छन्दः यमोदेवता यमावाहनेविनियो
गः॥ ॐ सुगन्नः पन्थामप्रदिशन्नऽएंहिज्योतिष्मद्धेह्यजरंन्नऽआयुः ॥ अपैतुमृत्युरमृतंन्न
आगन्वैवस्वतोनोऽअभयंकृणोतुस्वाहा॥यमायनमःपाद्यादिभिरर्चयेत् ॥ नैर्ऋत्येखण्डे

62

न्दुः त्रिपदंश्वेतंतत्रनिर्ऋतिमावाहयेत् ॥ ॐ एह्येहिरक्षोगणनायकत्वंविशालवेताल
पिशाचसंघैः ॥ ममाध्वरंपाहिशुभादिनाथलोकेश्वरत्वांप्रणमामिनित्यम् ॥ इतिध्यात्वा
असुन्वन्तमितिमंत्रेणनिर्ऋतिमावाह्यपूजयेत्॥ॐ असुन्वन्तुमयजमानमिच्छस्तेनस्ये
त्यामन्विहितस्करस्य ॥ अन्यमस्मदिच्छसातइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु
॥ १२ ॥ ६२ ॥ निर्ऋतयेनमः पाद्यादिभिरर्चयेत् ॥ ततःपश्चिमेवरुणं० एह्येहि
यज्ञेममरक्षणाययादोगणैः सार्धमपामधीश ॥ झषाधिरूढत्वमिहप्रभोमाणिरत्नप्र
भाभास्वरपाशपाणे ॥ इतिध्यात्वा तत्त्वायामीति मंत्रेणावाहयेत् ॥ तत्त्वायामीति
मंत्रस्यशुनःशेपऋषिर्वरुणोदेवतात्रिष्टुप्छंदःवरुणावाहनेवि० ॥ ॐ तत्त्वायामिब्रह्म
णा वंदमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानो वरुणेहबोध्युरुशंसमानआ
युःप्रमोषीः ॥ वरुणायनमः इतिपाद्यादिभिः पूजयेत् ॥ ततोवायव्येखण्डेदुस्त्रिपदंश्वे

तंतत्रवायुमावाहयेत् ॥ एह्येहियज्ञेममरक्षणायमृगाधिरूढः सहसिद्धसंघैः ॥ प्राणाधिपोहव्यभुजः सहायगृहाणपूजां भगवन्नमस्ते इतिध्यात्वा ॥ आनोनियुद्भिरिति मंत्रेणवायुमावाह्यपूजयेत् ॥ आनोनियुद्भिरितिमंत्रस्यवसिष्ठऋषिस्त्रिष्टुपूछन्दः वायुर्देवता वाय्वावाहनेविनियोगः ॥ ॐआनोनियुद्भिः शतिनींभिरध्वुरर्ठंसहस्रिणींभिरुपयाहियज्ञम्॥वायोऽअस्मिन्त्सवनेमादयस्वयूयम्पातस्वस्तिभिः सदानः ॥ २७ ॥ २८ ॥ वा०न० पाद्यादिभिरर्चयेत् वायुसोमयोर्मध्येचतुष्पदंबंधुजीवपुष्पोपमंभद्रंतत्रवसूनावाहयेत्॥एह्येहिवस्वीशमहानिधीशरत्नाकरःसर्वसहस्रतेजाः॥ धनस्वरूपोममयज्ञपोतोगृहाणपूजांभगवन्नमस्ते॥इतिध्यात्वा वसोः पवित्रेतिमंत्रेणवसूनावाह्यपूजयेत् ॥वसोःपवित्रमसीतिमंत्रस्यवसिष्ठऋषिस्त्रिष्टुपूछन्दः वसवोदेवताः वस्वावाहनेविनियोगः ॐ वसोः पवित्रंमसिशतधारंवसोः पवित्रंमासिसहस्रंधारम् ॥ देवस्त्वांसवितापुनातुवसोः पवित्रें

णशुतधांरेणसुप्वाकामंधुक्षः ॥ १ ॥ ३ ॥ पाद्यादिभिरर्चयेत् तत्रैवनाममंत्रेणध्रुवम् ॥ १ ॥ अध्वरम् ॥ २ ॥ सोमम् ॥ ३ ॥ अपः ॥ ४ ॥ अनलम् ॥ ५॥ अनिलम् ॥ ६ ॥ प्रत्यूषम् ॥७॥ प्रभासम्॥८॥चावाहयेत् ॥ ततः सोमेशानयोर्मध्येकरवीरपुष्पोपमंचतुष्पदंभद्रंतत्ररुद्रान्स्थापयेत् ॥ एह्येहियज्ञेश्वरभोत्रिशूलकपालखट्वांगकरेणसार्द्धम् ॥ लोकेनविश्वेश्वरयज्ञसिद्ध्यैगृहाणपूजांभगवन्नमस्ते ॥ इतिध्यात्वा ॥ यातेरुद्रेतिमंत्रेणरुद्रानावाह्यपूजयेत् ॥ यातेरुद्रेतिमंत्रस्यपरमेष्ठीऋषिरनुष्टुप्छन्दः रुद्रोदेवता रुद्रावाहनेविनियोगः ॥ ॐ यातेरुद्राशिवातनूरघोरापापकाशिनी ॥ तयानस्तुन्वाशन्तमयागिरिशन्ताभिचाकशीहि ॥ १६ ॥ २ ॥ तत्रैवनाममंत्रेणान्यानेकादशरुद्रानावाह्यपूजयेत् तेचरुद्राः—सोमेशानयोर्मध्येरुद्राएकादश स्मृताः ॥ अजैकपादहिर्बुध्न्यो

१ इंद्रवंतवीरभद्रशंभुगिरीशमहाशयअजपिनाक्यहिर्बुध्न्यकपालिदिशांपतिभर्गभवान्यश्रीशइत्येतेऽपिरुद्राः कुत्रचित्पुस्तकादौ संतीतिबोध्यम् ।

साद्ध्यैरभिष्टुतोवज्रधरामरेश ॥ संवीज्यमानोप्सरसांगणेनरक्षाध्वरंनोभगवन्नमस्ते ॥
इतिध्यात्वा विश्वेदेवाआयंतुन इतिमंत्राभ्यांसपैतृकान्विश्वेदेवानावाह्यपूजयेत् ॥ वि
श्वेदेवासआगतेतिमंत्रस्य परमेष्ठीऋषिर्गायत्रीछंदो विश्वेदेवादेवता विश्वेदेवस्थापने
वि० ॥ ॐविश्वेदेवासऽआगंतुशृणुतामइम७ंहवम् ॥ एदंबर्हिर्निषीदत ॥ आयन्तुनइतिमंत्रे
णआग्नेययमयोर्मध्येपितॄन्प्रपूजयेत् ॥ आयन्तुनइतिमंत्रस्यविवस्वानृषिर्बृहतीच्छन्दः
पितरोदेवता पितृस्थापनेविनियोगः ॥ ॐ आयन्तुनः पितरः सोम्यासोग्निष्वात्ताःपथि
भिर्देवयानैः ॥ अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवन्त्वस्मान् ॥ ततः सपैतृकान्विश्वे
देवान्पाद्यादिभिः पूजयेत् ॥ यमनिर्ऋतिमध्येमसूरान्नसदृशंचतुष्पदंभद्रंतत्रयक्षान्
स्थापयेत् ॥ ॐएह्येहिरक्षोगणनायकस्त्वंविशालवेतालपिशाचसंघैः ॥ ममाध्वरंपाहिशि
वाधिनाथलंकेश्वरत्वंभगवन्नमस्ते ॥ इतिध्यात्वाअभित्यमितिमंत्रेणयक्षानावाह्यपूज

दंभद्रंतत्राश्विनौ स्थापयेत् ॥ द्विभुजौदेवभिषजौकर्त्तव्यौदेवसंयुतौ ॥तयोरोषधयःका
र्यादिव्यादक्षिणहस्तयोरितिध्यात्वा अश्विनातेजसेतिमंत्रेण यावांकशेतिमंत्रेणवाऽ
श्विनावावाह्यपूजयेत् ॥ अश्विनातेजसेतिमंत्रस्यपरमेष्ठीऋषिरनुष्टुप्छंदोऽश्विनौदेव
तेऽश्विनोःस्थापनेविनियोगः ॐ अश्विनातेजसाचक्षुः प्राणेनसरस्वतीवीर्य्यम् ॥
वाचेन्द्रोबलेनेन्द्रायदधुरिन्द्रियम् ॥ यावांकशेतिमंत्रस्यमेधातिथिर्ऋषिर्गायत्रीछन्दः
अश्विनौदेवतेऽश्व्यावाहनेविनियोगः ॐ यावांकशामधुमत्याश्विनासूनृतावती ॥ तया
यज्ञंमिमिक्षतम् ॥ अग्नियमयोर्मध्ये कुसुंभपुष्पोपमंचतुष्पदं भद्रंतत्रविश्वेदेवाः
सपैतृकाः स्थाप्याः ॥ क्रतूदक्षौसत्यवसूकामौच ध्रुवलोचनौ ॥ पुरूरवावार्द्रवसौविश्वे
देवास्त्रयोदश ॥ अग्निष्वात्ताः सोमपाश्च बर्हिषदः सुकालिनः ॥ एकशृंगोथशुद्धश्चाद्वि
तीयस्सोमपास्तथा ॥ विश्वेदेवाआयन्तुश्चता–यांतौचत्रपूजयेत् ॥ एह्येहिसर्वामरसिद्ध

साद्ध्यैरभिष्टुतोवज्रधरामरेश ॥ संवीज्यमानोप्सरसांगणेनरक्षाध्वरंनोभगवन्नमस्ते ॥
इतिध्यात्वा विश्वेदेवाआयंतुन इतिमंत्राभ्यांसपैतृकान्विश्वेदेवानावाह्यपूजयेत् ॥ वि
श्वेदेवासआगतेतिमंत्रस्य परमेष्ठीऋषिर्गायत्रीछंदो विश्वेदेवादेवता विश्वेदेवस्थापने
वि० ॥ ॐ विश्वेदेवासुऽआगंतुशृणुतामइम ᳪं हवम्॥एदंबुर्हिर्निषीदत॥आयन्तुनइतिमंत्रे
णआग्नेययमयोर्मध्येपितृन्प्रपूजयेत् ॥आयन्तुनइतिमंत्रस्यविवस्वानृषिर्बृहतीच्छन्दः
पितरोदेवता पितृस्थापनेविनियोगः ॥ ॐ आयन्तुनः पितरः सोम्यासोग्निष्वात्ताःपथि
भिर्देवयानैः ॥ अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवंत्वस्मान्॥ततः सपैतृकान्विश्वे
देवान्पाद्यादिभिः पूजयेत् ॥ यमनिर्ऋतिमध्येमसूरान्नसदृशंचतुष्पदंभद्रंतत्रयक्षान्
स्थापयेत् ॥ ॐ एह्येहिरक्षोगणनायकस्त्वंविशालवेतालपिशाचसंघैः॥ममाध्वरंपाहिशि
वाधिनाथलंकेश्वरत्वंभगवन्नमस्ते ॥ इतिध्यात्वाअभित्यमितिमंत्रेणयक्षानावाह्यपूज

प्र. सं. येत्॥अभित्यमितिमंत्रस्यवामदेवऋषिःपंक्तिच्छन्दः यक्षादेवता यक्षावाहनेविनियोगः लिं. भ.
॥११८॥ ॐअभित्यंदेवꣳ सवितारमोण्योः कविक्रतुमर्चामिसत्यसवꣳरत्नधामभिप्रियंमतिं
कविम् ॥ ऊर्ध्वायस्यामतिर्भाअदिद्युतत्सवीमनिहिरण्यपाणिरमिमीतसुक्रतुः कृपाः
स्वः ॥ प्रजाभ्यस्त्वाप्रजास्त्वानुप्राणन्तुप्रजास्त्वमनुप्राणिहि ॥ २५ ॥ २ ॥
निर्ऋतिवरुणयोर्मध्येसिंदूरवर्णचतुष्पदंभद्रंतत्रसर्पान्स्थापयेत् ॥ अक्षसूत्रधराःसर्पाः
कुण्डिकापुच्छसंयुताः॥ एकगोत्राःत्रिभोगावासर्पाः कार्याश्चभीषणा इतिध्यात्वा आ
यंगौरितिमंत्रेणसर्पानावाह्यपूजयेत् ॥ आयंगौरितिमंत्रस्यसर्पराजऋषिर्गायत्री छन्दः
सर्पादेवताःसर्पावाहनेविनियोगः ॥ ॐआयंगौःपृश्निरक्रमीदसदन्मातरम्पुरः ॥ पि
तरञ्चप्रयन्त्स्वः ॥ ३ ॥ ६ ॥ पाद्यादिभिरर्चयेत् ॥ ततोवरुणवाय्वोर्मध्येरक्तवर्णं च ॥११८॥
तुष्पदंभद्रंतत्रगंधर्वाप्सरसः स्थापयेत् ॥ आवाहयेऽहंसुरदेवसेव्याः स्वरूपतेजोमु

खपद्मभासः ॥ सर्वामरेशाःपरिपूर्णकामाःपूजांग्रहीतुंममयज्ञभूमौ ॥ इतिध्यात्वा गं
धर्वस्त्वेतिमंत्रेणगंधर्वानावाह्यपूजयेत् ॥ गंधर्वस्त्वेतिमंत्रस्यचतुरशनासप्तऋषिर्द्दृं
गोगंधर्वाप्सरसोऋषिस्त्रिष्टुप्छंदोगंधर्वाप्सरसोदेवता गंधर्वाप्सरआवाहनेविनियोगः ॥
ॐ गुंधुर्वस्त्वांविश्वावसुः परिदधातुविश्वस्यापरिष्टचैयजमानस्यपरिधिरस्यग्निरि
डऽईडितः ॥ इन्द्रस्यबाहुरसिदक्षिणोविश्वस्यारिष्टचैयजमानस्यपरिधिरस्यग्निरिडऽ
ईडितः ॥ मित्रावरुणौत्वोत्तरतःपरिधत्तान्ध्रुवेणधर्म्मणाविश्वस्यारिष्टचैयजमानस्यप
रिधिरस्यग्निरिडईडितः ॥ ततोष्टवसुसोमयोर्मध्येऽष्टाविंशतिपदंमषीसदृशंलिंगंतत्र
सोमंस्थापयेत् ॥ एह्येहियज्ञेममसोमनाथसौराष्ट्रदेशस्थितपार्षदैःस्वैः॥गौर्याचदेव्यास
हयज्ञसिद्ध्यैगृहाणपूजांभगवन्नमस्ते इतिध्यात्वा नमःशंभवायेतिमंत्रेणसोममावाह्य
पूजयेत् ॥ नमःशम्भवायचमयोभवायचनमःशङ्करायचमयस्करायचनमः शिवाय

चशिवतंरायच ॥ तस्मात्पूर्वेंद्विपदान्तरेअष्टाविंशतिपदंकृष्णातिलोपमंलिंगन्तत्रम
ल्लिकार्जुनंस्थापयेत् ॥ एह्येहिदेवश्रीशैलवासिन्देव्याभवान्यासहमल्लिकार्ज्जुन ॥ म
दीययज्ञस्याशिवायनूनंगृहाणपूजाम्भगवन्नमस्ते ॥ इतिध्यात्वा यातेरुद्रेतिमंत्रेणम
ल्लिकार्ज्जुनमावाह्यपूजयेत् ॥ यातेरुद्रशिवातनूरघोरापापकाशिनी ॥ तयानस्तन्वाशं
तंमयागिरिशन्ताभिचांशीहि पाद्यादिभिरर्च्चयेत् ॥ तदनन्तरंसोमैकादशरुद्रमध्ये
अष्टाविंशतिपदाविष्णुक्रान्तापुष्पोपमंलिङ्गन्तत्रमहाकालंस्थापयेत् एह्येहिगौर्य्या
भगवन्नाशिवायतेह्यवन्तिवासिन्महाकालदेव ॥ मदीययज्ञस्याशिवायनूनं गृहाणपूजां
भगवन्नमस्ते ॥ इतिध्यात्वा मानोमहान्तेतिमंत्रेणमहाकालमावाह्यपूजयेत् ॥ ॐ
मानोमहान्तमुतमानोऽअर्भकम्मानउक्षंतमुतमानंउक्षितम् ॥ मानोवधीः पितर
म्मोतमातरम्मानः प्रियास्तन्वोरुद्ररीरिषः ॥ ततः पाद्यादिभिरर्च्चनम् तदन

न्तरन्द्वादशादित्यद्वयोर्मध्ये अष्टाविंशतिपदं कज्जलसदृशंलिंगं तत्रअमरेश्वरंस्थाप
येत् ॥ एह्येहि देवेश्वरविश्वनाथ ॐकारवासिन्भगवन्भवान्या ॥ सर्वैःस्वकीयैरपिपार्ष
दैर्भवान्गृहाणपूजांभगवन्नमस्ते ॥ इतिध्यात्वा एषतेरुद्रभागेतिमंत्रेणामरेश्वरमावाह्य
पूजयेत् ॥ एषतेरुद्रभागः सहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषतेरुद्रभागऽआखुस्तेप
शुः ॥ ३ । ५७ ॥ पाद्यादिभिरर्चनम् ॥ तद्दक्षिणभागेअष्टाविंशतिपदमिन्द्रनीलोपमंलिंगं
तत्रवैद्यनाथंस्थापयेत् ॥ एह्येहियज्ञेममवैद्यनाथसर्वामरैरर्चितपादपद्म ॥ गृहाणपूजांभग
वन्शिवायनः शिवासमेतायनमोऽस्तुतुभ्यमितिध्यात्वा नमोनीलग्रीवायेतिमं
त्रेणवैद्यनाथमावाह्यपूजयेत् ॥ नमोऽनीलग्रीवायचाशितिकण्ठायचनमः कपर्द्दिने
चव्युप्तकेशायचनमः ॥ सहस्राक्षायचशतधन्वनेचनमोगिरिशायचाशिपिविष्टायचन
मोमीढुष्टमायचेषुमतेचनमोह्रस्वाय ॥ पाद्यादिभिरर्चनम् ॥ ततइन्द्राश्विन्योर्मध्येऽष्टावि

शतिपदंमहामरकतसदृशंश्यामंलिंगंतत्रभीमशंकरंस्थापयेत् एह्येहिभीमेशस्वपार्ष
दैर्भवान्पूजांगृहीतुंममयज्ञभूमौ ॥ गौर्याभवान्यासहदेवदेवगृहाणपूजांभगवन्नमस्ते ॥
इतिध्यात्वा ॥ नमोस्तुरुद्रेभ्यइतिमंत्रेणभीमशंकरमावाह्यपूजयेत् ॥ नमोऽस्तुरुद्रे
भ्योयेदिवियेषांवर्षमिषव स्तेभ्योदशप्राचीर्दशदक्षिणादशप्रतीचीर्दशोदीचीर्दशो
र्ध्वाः तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमेषां
जम्भेदध्मः ॥ पाद्यादिभिरर्चनम् ॥ तदनंतरमग्नियमयोर्मध्येऽष्टाविंशतिपदंनवीननीर
दवत्श्यामंलिंगंतत्ररामेशंस्थापयेत् ॥ एह्येहिरामेश्वररामनाथरामेणसंस्थापितसेतु
मध्ये ॥ मदीययज्ञस्यशिवायनूनंगृहाणपूजांभगवन्नमस्ते इतिध्यात्वा नमःसभाभ्यइ
तिमंत्रेणरामेश्वरमावाह्यपूजयेत् नमः सभाभ्यः सभापतिभ्यश्चवोनमोनमोऽश्वे
भ्योऽश्वपतिभ्यश्चवोनमोनमः ऽआव्याधिनीभ्योविविध्यन्तीभ्यश्चवोनमोनमऽउग

णाभ्यस्तृर्ठंहुतीभ्यंश्श्चवोनमोनमोंगुणेभ्यः॥ततः पाद्यादिभिरर्चनम् ॥ तत्पश्चिमेऽष्टा
विंशतिपदंकृष्णांलिंगं तत्रनागेशंस्थापयेत् ॥ एह्येहिनागेश्वरदारुकावनेस्थितप्रभोमु
ख्यगणैर्वृतोभवान् ॥ शिवायनःपाहिमदीययज्ञंगृहाणपूजांभगवन्नमस्ते ॥ इतिध्यात्वा
परितेधन्वनइतिमंत्रेणनागेशमावाह्यपूजयेत् ॥ ॐपरितेधन्न्वनोहेतिरस्मान्वृणक्तुवि
श्वतः ॥ अथोयऽइषुधिस्तवारेअस्मन्निधेहितम् ॥ पाद्यादिभिःपूजनम् ॥ यमनिर्ऋ
त्योर्मध्येऽष्टाविंशतिपदांलिंगं तत्रकेदारंस्थापयेत् ॥ एह्येहिकेदारहिमालयस्थितगौ
र्याभवान्यासहपार्षदैश्च ॥मदीययज्ञस्यशिवायभूमन्गृहाणपूजांभगवन्नमस्ते इतिध्या
त्वा एतत्तेरुद्रावसंतेनेतिमंत्रेणकेदारमावाह्यपूजयेत् ॥ ॐएतत्तेरुद्रावसन्तेनंपरो
मूजंवतोतीहि ॥ अवततधन्न्वापिनाकावसःकृत्तिवासाऽअहिंठंसन्नःशिवोतीहि ॥
पाद्यादिभिरर्चनम् ॥ ततोनिर्ऋतिवरुणयोर्मध्येऽष्टाविंशतिपदं श्यामांलिंगम् ॥

तत्रघुश्मेशंस्थापयेत् ॥ एह्येहिघुश्मेश्वरदेवदेवशिवालयेसंस्थितसर्वपूज्य ॥ गौर्याभ
वान्यासहपार्षदैरपिगृहाणपूजां भगवन्नमस्ते ॥ इतिध्यात्वा नमःपार्यायचेतिमं
त्रेणघुश्मेशमावाह्यपूजयेत् ॥ नमःपार्य्यायचावार्य्यायच नमः प्रतरणायचोत्तर
णायचनमस्तीर्थ्यायचकूल्यायचनमः शष्प्यायचफेन्यायचनमः सिकत्यायच ॥
ततःपाद्यादिभिरर्चनम् ॥ तदुत्तरेअष्टादशपदंश्यामंलिंगन्तत्रविश्वेशंस्थापयेत् ॥ ॐए
ह्येहिविश्वेश्वरविश्वनाथवाराणसीवासकृतप्रभोभवान् ॥ गौर्याभवान्यासहदेवदेवगृ
हाणपूजाम्भगवन्नमस्ते इतिध्यात्वा नमःकपर्दिनइतिमंत्रेणविश्वेशमावाह्यपूजये
त् ॥ ॐनमःकपर्दिनेचव्युप्तकेशायचनमःसहस्राक्षायचशतधन्वनेचनमोगिरिशयाय
चशिपिविष्टायचनमोमीढुष्टमायचेषुमतेचनमोह्रस्वायच ॥ ततःपाद्यादिभिरर्चयेत् ॥
ततोवरुणवाय्वोर्मध्येअष्टादशपदंश्यामंलिंगं तत्रत्र्यम्बकंस्थापयेत् ॥ ॐ एह्येहिदेवश्री

त्र्यम्बकेश्वरगौर्य्यांभवान्यासहपार्षदैरपि ॥मदीययज्ञस्याशिवायनूनंगृहाणपूजांभगवन्न
मस्ते इतिध्यात्वा नमःसेनाभ्यइतिमंत्रेणत्र्यंबकमावाह्यपूजयेत् ॥ ॐनमःसेनाभ्यःसे
नानिभ्यंश्चवोनमोनमोरथिभ्योऽअरथेभ्यंश्चवोनमोनमःक्षत्तृभ्यः सङ्ग्रहीतृभ्यंश्च
वोनमोनमोमहद्भ्योऽअर्भकेभ्यंश्चवोनमः ॥ ततः पाद्यादिभिः पूजनम् ॥ उत्तरवायव्य
न्तरालेरुद्रादिगणान्स्थापयेत् ॥ कुमारञ्चतत्रैवस्थापयेत् ॥ भास्वत्कर्पूरगौरं
गिरिवरतनयाप्राणनाथंमहेशंनानाभोगीन्द्रभूषंकलितशशिकलंपञ्चवक्त्रंत्रिनेत्रम् ॥शक्तिं
शूलंकपालंसुललितडमरुंबीजपूरंचसर्पान्खट्वाङ्गं चारुपद्माभयवरदयुतंधारयन्तंभजेऽ
हम् ॥ इतिध्यात्वा एषतेरुद्रभागइतिमंत्रेणरुद्रानावाह्यपूजयेत् ॥ ॐएषतेरुद्रभागःसह
स्वस्राम्बिकयातञ्जुषस्वस्वाहैषतेरुद्रभागऽआखुस्तेपशुः ॥ ३।५७ ॥यदक्रन्देतिमंत्रेण
कुमारञ्चावाह्यअत्रैवपूजयेत् ॥ ॐयदक्रन्दः प्रथमंजायमानउद्यन्त्समुद्रादुतवापुरीषा

त् ॥ श्येनस्यपक्षाहरिणस्यबाहूउपस्तुत्यंमहिजातंतेअर्वन् ॥ ततः पाद्यादिभिर्द्वयोरर्च्च
नम् ॥ ब्रह्मसोमयोर्मध्येवाप्यांऋषभंस्थापयेत्॥यज्ञोपवीतीहंसस्थएकवक्त्रश्चतुर्भुजः ॥
अक्षसूत्रंकरेबिभ्रत्कुंडिकांचप्रजापतिः इतिध्यात्वा ऋतवस्थेतिमंत्रेणऋषभमावाह्य
पूजयेत् ॥ ऋतवस्थेतिमंत्रस्यविराट्‌ऋषिरनुष्टुप्छन्दःऋषभोदेवता ऋषभावाहनेविनि
योगः ॐऋतवस्थऋतावृधंऋतुष्ठास्थंऋतावृधः॥ घृतश्चुतोमधुश्चुतोविराजोनामकाम
दुघाअक्षीयमाणाः ॥१७॥३॥ ततः पाद्यादिभिरर्चनम् ॥ तत्रैवशूलंमहाकालंचनाममंत्रे
णार्चयेत् ॥ ब्रह्मेशानयोर्मध्येशृंखलायांमहींस्थापयेत् ॥ शुक्लवर्णामहीकार्यादिव्याभर
णभूषिता ॥ चतुर्भुजासौम्यवपुः प्रचंडासहशम्बरा ॥ इतिध्यात्वा महीद्यौरितिमंत्रेणम
हीमावाह्यपूजयेत् ॥ महीद्यौरितिमंत्रस्यमेधातिथिर्ऋषिर्गायत्रीछन्दः पृथ्वीदेवता ॥१२२॥
पृथिवीस्थापनेविनियोगः ॥ ॐ महीद्यौः पृथिवीचनइमंयज्ञम्मिमिक्षताम् ॥ पिपृ

तान्नो भरीमभिः ॥ ततः पाद्यादिभिरर्चनम् ॥ प्रजापतेनत्वदेतिमंत्रेणदक्षानावाह्य
पूजयेत् ॥ प्रजापतेइतिमंत्रस्यहिरण्यगर्भऋषिस्त्रिष्टुपूछन्दः दक्षादेवता दक्षस्थापने
विनियोगः ॥ ॐ प्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरिताबभूव ॥
यत्कामास्ते जुहुमस्तन्नो अस्तुवयथ्ंस्यामपतयो रयीणाम् ॥ २३ ॥
॥ ६५ ॥ ब्रह्मेन्द्रमध्येवाप्यांदुर्गां स्थापयेत् ॥ एह्येहिदुर्गे दुरितौघनाशिनिप्रचं
डदैत्यौघभुजप्रहारिणि ॥ शिवेमहेशार्द्धशरीरधारिणिस्थिराभवत्वंममयज्ञकारिणी ॥
इतिध्यात्वा श्रीश्चतइतिमंत्रेणदुर्गामावाह्यपूजयेत् ॥ श्रीश्चतइतिमंत्रस्यउत्तर
नारायणऋषिस्त्रिष्टुपूछन्दः दुर्गादेवता दुर्गावाहनेविनियोगः ॥ ॐ श्रीश्चतेलक्ष्मीश्च
पत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाणसर्वलो
कम्मंइषाण ॥ ३१ ॥ २२ ॥ ततः पाद्यादिभिरर्चनम् ॥ तत्रैवइदंविष्णुरितिमंत्रेणवि

ष्णुमावाह्यपूजयेत् ॥ इदंविष्णुः काण्वोमेधातिथिर्विष्णुर्गायत्री विष्णवाहने
विनियोगः ॥ ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाꣳसुरेस्वाहा ॥ ब्र
ह्माग्निमध्येशृंखलायां स्वधांस्थापयेत् ॥ ॐपितॄणामपि दिव्यानांया जिह्वात्वेनसं
स्थिता वाग्धेनुस्तनरूपांतां स्वधामावाहयाम्यहम् ॥ इतिध्यात्वा उदीरतामवरे
तिमंत्रेण स्वधामावाह्यपूजयेत् ॥ उदीरतामितिमंत्रस्यशंखऋषिस्त्रिष्टुप्छन्दः
स्वधादेवता स्वधावाहनेविनियोगः ॥ ॐ उदीरतामवरउत्परासउन्मध्यमाः
पितरः सोम्यासः ॥ असुंयईयुरवृकाऋतज्ञास्तेनोवंतुपितरोहवेषु ॥ १९ ॥ ४९ ॥
ततः पाद्यादिभिरर्च्चनम् ॥ ब्रह्मयमयोर्मध्येवाप्यांमृत्युंस्थापयेत् अत्रध्याननास्ति प

---

१ पितृभ्यइत्यादिमंत्रेणवास्वधामावाह्यपूजनम् ॐपितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः अक्षन्पितरोमीमदन्तपितरोतीतृपन्तपितरः पितरः शुन्धध्वम् ॥ १९ ॥ ३६ ॥ ३ ॥

रंमृत्योइतिमंत्रेणमृत्युमावाह्यपूजयेत् ॥ परंमृत्योइतिमंत्रस्यशंखऋषिस्त्रिष्टुप्छन्दः मृत्युर्देवता मृत्योरावाहनेविनियोगः ॥ ॐ परंमृत्यो अनुपरेहिपंथांयस्तेस्वइतरोदेवया नात् ॥चक्षुष्मतेशृण्वतेतेब्रवीमिमानःप्रजांरीरिषोमोतवीरान् ॥३५ ।७॥ ततः पाद्यादि भिरर्चनम् ॥ ब्रह्मनिर्ऋतिमध्येशृंखलायांगणपतिंस्थापयेत् ॥ ॐ एह्येहिविष्णवाधिप तेसुरेंद्रब्रह्मादिदेवैरभिवन्द्यपाद ॥ गजास्यविद्यालयविश्वमूर्त्तेगृहाणपूजांभगवन्नमस्ते इतिध्यात्वा ॥ गणानांत्वेतिमंत्रेणगणपतिमावाह्यपूजयेत् ॥ ॐ गणानांत्वेतिमंत्रस्य गृत्समदऋषिर्जगतीछन्दः गणपतिर्देवता गणपत्यावाहनेविनियोगः ॥ ॐगणानान्त्वा गणपतिंहवामहेप्प्रियाणान्त्वाप्प्रियपतिंहवामहे निधीनान्त्वांनिधिपतिंहवामहेव

---

१ अन्यवायोर्द्धमाशानामितिमंत्रेणवामृत्युमावाह्यपूजनम् अन्यवायोर्द्धमाशानामितिमंत्रस्यसुकेतुऋषिर्जगतीछंदः मृत्युर्देवता मृत्युस्थापनेविनियोगः ॥ अन्यवायोर्द्धमाशानामृश्योमयूरः सुपर्णस्तेगन्धर्वाणामपामुद्धोमासांकश्यपोरोहित्कुण्डृणाचीगोलत्तिका तेशरसांमृत्यवोसितः ॥ २४ । ३७ ॥

प्र. सं. सोमम ॥ अहमंजानिगर्भधमात्वमंजासिगर्भधम् ॥ ततःपाद्यादिभिरर्चनम् ॥ लिं. भ.
॥१२४॥ ब्रह्मवरुणयोर्मध्येवाप्यांकालंस्थापयेत् ॥ कालःकरालवदनोनित्यमप्यतिभीषणः ॥
पाशहस्तोदंडहस्तः सर्प्पवृश्चिकरोमवान् इतिध्यात्वा ॥ शन्नोदेवीतिमंत्रेणकाल
मावाह्यपूजयेत् ॥ शन्नोदेवीतिमंत्रस्यआंबरीषःसिंधुद्वीपऋषिर्गायत्रीछंदः आपोदेवता
अवावाहनेविनियोगः ॐशन्नोदेवीरभिष्टयआपोभवन्तुपीतये ॥ शंय्योरभिस्रवन्तुनः
॥ ३६ ॥ १२ ॥ ततः पाद्यादिभिरर्चनम् ॥ ब्रह्मवाय्वोर्मध्येशृंखलायांमरुतंस्थापयेत् ॥
ॐएह्येहियज्ञेशमभीक्षणायमृगाधिरूढः सहसिद्धसंघैः ॥ प्राणाधिपः कालकवेः सहा
यगृहाणपूजांभगवन्नमस्ते ॥ इतिध्यात्वा आनोनियुद्भिरितिमंत्रेणमरुतआवाह्य
पूजयेत आनोनियुद्भिरितिमंत्रस्यवसिष्ठऋषिस्त्रिष्टुपछंदः मरुतोदेवता मरुदावाहनेवि ॥१२४॥
नियोगः ॥ ॐआनोनियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुपयाहियज्ञम् ॥ वायोऽ

अस्मिन्त्सर्वनेमादयस्वयूयम्पातस्वस्तिभिः सदा नः ॥ २७ ॥ २७ ॥ ततः पाद्यादि
भिरर्चनम् ॥ ततोमध्यस्थानेब्रह्मणः पादमूले भूमिंस्थापयेत् ॥ ॐ एह्येहिपातालधरा
मरेन्द्रनागांगनाकिन्नरगीयमाने ॥ रक्षोरगेन्द्रामरलोकसंघैरनंतरक्षाध्वरमस्मदीय
म् ॥ इतिध्यात्वा स्योनापृथिवीतिमंत्रस्यमेधातिथिर्ऋषिर्गायत्रीछन्दः भूमिर्देवता भू
म्यावाहनेविनियोगः ॥ॐस्योनापृथिवीनोभवानृक्षुरानिवेशनी ॥ यच्छानः शर्म्मसप्र
थाः ॥ ३६ ॥ १३ ॥ ततः पाद्यादिभिरर्चनम् तत्रैवमध्यस्थानेब्रह्मणः पाद
मूलेसप्तनदीःस्थापयेत् ॥ॐएह्येहिगंगेदुरितौघनाशिनिझषाधिरूढेउदकुम्भहस्ते ॥ श्री
विष्णुपादाब्जसमुद्भवेत्वंपूजांग्रहीतुंशुभदेनमस्ते इतिध्यात्वा इमंमेगंगेयमुनेइति
मंत्रेणसप्तनदीरावाह्यपूजयेत् ॥ इमंमेगंगेयमुने इति मंत्रस्यसिंधुद्वीपऋषिस्त्रिष्टु
पछन्दःसर्वानद्यो देवताः सर्वनद्यावाहने विनियोगः ॐ इमंमेगंगेयमुनेसर

 स्वतिशुतंद्रिस्तोमंंसचतापरुष्ण्या ॥ असिक्न्यामंरुद्वृधेवितस्तयाजीँकीयेशृणुह्यासु
 षोमंया॥ततःपाद्यादिभिरर्चनम् ॥ ततोब्रह्मणःपादमूलेसप्तसमुद्रान्स्थापयेत्॥लवणेक्षुसु
रासर्पिर्दधिक्षीरसजीवनाः ॥ ॐएह्येहियादोगणवारिधीनांगणेनपर्जन्यसहाप्सरोभिः ॥
विद्याधरेन्द्रामरगीयमानपाहित्वमस्मान्भगवन्नमस्ते इतिध्यात्वा समुद्रोसीतिमंत्रे
णसप्तसमुद्रानावाह्यपूजयेत् ॥ सप्तसमुद्रोसीतिमंत्रस्यप्रजापतिर्ऋषिर्यजुश्छन्दः
समुद्रोदेवता समुद्रावाहनेविनियोगः ॥ ॐ समुद्रोसिनभस्वानार्द्रदानुः शम्भूर्म्म
योभूरभिमांवाहिस्वाहा ॥ मारुतोसिमरुतांगणः शम्भूर्म्मयोभूरभिमांवाहिस्वाहा ॥
वस्यूरसिदुवस्वाञ्छम्भूर्म्मयोभूरभिमांवाहिस्वाहा ॥ १८ । ४५ ॥ ततः
पाद्यादिभिरर्चनम् ॥ ब्रह्मरुद्रयोर्मध्येऽष्टदलबाह्येपरितश्चाग्नेइतिमंत्रेण हेमाद्यामेरवः
स्थाप्याः ॥ मध्येऽष्टदलमध्ये आकृष्णेनेतिमंत्रेणरविमावाह्यपूजयेत् ॐ आकृष्णे

नरजंमावर्तमानोनिवेशयंन्नमृतम्मर्त्यंच ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवना
निपश्यंन् ॥ ३३ । ४३ ॥ ॐ भूर्भुवः स्वः कलिंगदेशोद्भवकाश्यपगोत्रसूर्यइ
हागच्छेहतिष्ठ सूर्यायनमः ॥ पाद्यादिभिरर्चनम् ॥ ततोविश्वेदेवस्वधयोर्मध्येएका
दशपदरूपायांनीलवर्णायांवल्यां इमंदेवाइतिमंत्रेणचंद्रमावाह्यपूजयेत् ॥ इमन्देवाऽ
असपत्नꣳसुवद्ध्वम्महतेक्षत्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्येन्द्रियायइम
ममुष्ष्यपुत्रममुष्ष्यैपुत्रमस्यै विशऽएषवोमीराजा सोमोस्म्माकम्ब्राह्मणानाꣳराजा
॥ १० ॥ १८ ॥ ॐ भूर्भुवः स्वः यमुनातीरदेशोद्भवआत्रेयगोत्रचंद्रइहागच्छेहतिष्ठ
चंद्रायनमः पाद्यादिभिरर्चनम् ॥ ततोवसुविष्णुपक्षयोर्मध्येएकादशपदरूपायांवल्यां
नीलायां अग्निर्मूर्द्धेतिमंत्रेणभौममावाह्यपूजयेत् ॥ ॐअग्निर्म्मूर्द्धादिवःककुत्पतिः पृथि
व्याऽअयम् ॥ अपाꣳरेताꣳसिजिन्न्वति इन्द्रस्यत्वौजसासादयामि ॥ १३ ॥ १४ ॥

प्र. सं. ॐ भूर्भुवः स्वःअवंतिदेशोद्भव भारद्वाजगोत्रभौमेहागच्छेहतिष्ठ भौमायनमः ॥ पा लिं. भ.
॥१२६॥ द्यादिभिरर्चनम् ॥ ततोदक्षादित्ययोर्मध्ये एकादशपदात्मिकायांनीलवल्यांउद्बुद्ध्य
स्वेतिमंत्रेणबुधमावाह्यपूजयेत् ॥ ॐ उद्बुध्यस्वाग्नेप्प्रतिजागृहित्वमिष्टापूर्तेसꣳसृजे
थामयञ्च॥अस्मिन्त्सधस्थेऽअद्ध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत॥१५॥५४॥
ॐभूर्भुवः स्वः मगधदेशोद्भवआत्रेयगोत्रबुधइहागच्छेहतिष्ठ बुधायनमः पाद्यादि
भिरर्चनम् ॥ ततोदक्षरुद्रयोर्मध्येएकादशपदरूपायांनीलवल्यां बृहस्पतइतिमंत्रेणबृ
हस्पतिमावाह्यपूजयेत् ॥ ॐ बृहस्प्पतेऽअतियदर्य्योऽअर्हाद्युमद्विभातिक्रतुमज्जनेषु ॥
यद्दीदयच्छवसऽऋतप्प्रजाततदस्मासुद्रविणन्धेहिचित्रम् ॥ उपयामगृहीतोसिबृहस्प्प
तयेत्वैषतेयोनिर्बृहस्प्पतयेत्वा ॥२६॥ ३ ॥ ॐ भूर्भुवः स्वःसिन्धुदेशोद्भवआङ्गिरसगो ॥१२६॥
त्रबृहस्प्पतेइहागच्छइहतिष्ठ बृहस्पतयेनमः पाद्यादिभिरर्चनम् ॥ स्वधाऽश्विन्योर्म

ध्ये एकादशपदरूपायांनीलवल्यां अन्नात्परिस्रुतइतिमंत्रेणभृगुमावाह्यपूजयेत् ॥ ॐ
अन्नात्परिस्रुतोरसम्ब्रह्मणाव्यपिबत्क्षत्रम्पयः सोमं प्रजापतिः ॥ ऋतेनसत्यमिन्द्रियं
विपानंꣳशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ १८ । ७५ ॥ ॐभूर्भुवःस्वः
भोजकटदेशोद्भवभार्गवगोत्रशुक्रइहागच्छइहतिष्ठ शुक्रायनमः॥ पाद्यादिभिरर्चनम् ॥
ततोगन्धर्ववाय्वोर्म्मध्ये एकादशपदरूपायां नीलवल्यां शन्नोदेवीतिमंत्रेणशनि
मावाह्यपूजयेत् ॥ ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शंयोरभिस्रवन्तुनः
॥ ३६ । १२ ॥ ॐ भूर्भुवःस्वः सौराष्ट्रदेशोद्भवकाश्यपगोत्रशनेइहागच्छइहतिष्ठ शनये
नमः ॥ पाद्यादिभिरर्चनम्॥ वसुविष्णवोर्मध्ये एकादशपदरूपायांनीलवल्यां कयानश्चि
त्रेतिमंत्रेणराहुमावाह्यपूजयेत् ॥ ॐकयानश्चित्रऽआभुवदूतीसदावृधः सखा॥कयाश
चिष्ठयावृता ॥२६॥ ४ ॥ ॐभूर्भुवःस्वःराठिनदेशोद्भवपैठिनसगोत्रराहोइहागच्छइहति

छराहवेनमः ॥ पाद्यादिभिरर्चनम् ॥ वसुसमीरयोर्मध्ये एकादशपदरूपायांनीलवल्यां केतुंकृण्वन्निति मंत्रेणकेतुमावाह्यपूजयेत् ॥ ॐ केतुंकृण्वन्नकेतवेपेशोमर्याऽअपेशसे ॥ समुषद्भिरजायथाः ॥ २८ ॥ ३७ ॥ ॐभूर्भुवःस्वः अन्तर्वेदिदेशोद्भवजैमिनिगोत्रकेतो इहागच्छइहतिष्ठ केतवेनमः ॥ पाद्यादिभिरर्चनम् ॥ ततोमंडलाद्बहिस्सत्त्वरजस्तमोरूपासुवप्रासु प्रथमादिक्रमेणइदंविष्णुरितिमंत्रेणाविष्णुम् ॥ द्वितीयेब्रह्मजज्ञानमितिमंत्रेण ब्रह्माणम् ॥ तृतीयेयातेरुद्रेतिमंत्रेण शिवञ्चावाह्यपूजयेत् ॥ इदम्विष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपा ꣳ सुरेस्वाहा ॥ १५ ॥ विष्णवेनमः ॥ पाद्यादिभिरर्चनम् ॥ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोवेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यविष्ठाः सतश्चयोनिमसतश्चविवः ॥ १३ ॥ ३ ॥ ब्रह्मणेनमः ॥ पाद्यादिभिरर्चनम् ॥ यातेरुद्रशिवातनूरघोरापापकाशिनी ॥ तयानस्तन्वाशंतमयागिरिशन्ताभिचाकशीहि ॥ १६ ॥

॥२॥ रुद्रायनमः पाद्यादिभिरर्चयेत् ॥ तदनंतरंमंडलाद्बहिर्वपूर्वादिदिक्षुविदिक्षुचक्रमे
णवज्रादिपूजनम् ॥ पूर्वेवज्रायनमः आग्नेय्यांशक्तयेनमः दक्षिणेदंडायनमः नैर्ऋत्यां
खड्गायनमः पश्चिमेपाशायनमः वायव्येअंकुशायनमः उत्तरेगदायैनमः ऐशान्यांशूला
यनमः नैर्ऋत्यवरुणयोर्मध्येपद्मायनमः ईशानेंद्रयोर्मध्ये चक्रायनमः इतिनाममंत्रेण
पूजनम् ॥ तदनन्तरंमंडलाद्बहिर्वप्राच्यादिदिक्षुब्राह्म्यादिपूजनम् ॥ तथाहि ॥ पूर्वेब्रा
ह्म्यैनमः आग्नेय्यांमाहेश्वर्यैनमः दक्षिणेकौमार्य्यैनमः नैर्ऋत्यांवैष्णव्यैनमः पश्चिमे
वाराह्यैनमः वायव्येइन्द्राण्यैनमः उत्तरेचामुंडायैनमः ईशान्यांमहालक्ष्म्यैनमः एवं
पूर्वादिक्रमेणैवगौतमादीनांपूजनम् ॥ गौतमायनमः अत्रयेनमः भरद्वाजायनमः वि
श्वामित्रायनमः कश्यपायनमः जमदग्नयेनमः वसिष्ठायनमः अरुन्धत्यैनमः सर्वा
न्नाममंत्रेणपूजयेत् ॥ अथनाममंत्रेणापिलिङ्गतोभद्रस्थदेवतानामावाहनंपूजनंचोच्य

ते ॥ मध्येब्रह्मणेनमः ब्रह्माणमावाहयामिस्थापयामि ॥ उत्तरेसोमायनमः सोमंआ० ॥
ऐशान्यांईशानायनमः ईशानमा० ॥ पूर्वेइंद्रायनमः इन्द्रमा० ॥ आग्नेयेअग्नयेनमः
अग्निमा० ॥ दक्षिणेयमायनमः यममा० ॥ नैर्ऋत्येनिर्ऋतयेनमःनिर्ऋतिमा० ॥ पश्चिमेव
रुणायनमःवरुणमा० ॥ वायव्येवायवेनमःवायुमा० ॥वायुसोमयोर्मध्येवसुभ्योनमः वसू
ना० ॥ तत्रैवध्रुवायनमःअध्वरायनमःसोमायनमःअद्भ्योनमःअनलायनमःअनिलाय
नमःप्रत्यूषायनमःप्रभासायनमःसोमेशानयोर्मध्ये रुद्रेभ्योनमःरुद्राना० ॥इंद्रवंतम् १ ॥
वीरभद्रम् ॥ २ ॥ शंभुम् ॥ ३ ॥ गिरीशम् ॥ ४ ॥ महायशसम् ॥ ५ ॥ अजम् ॥ ६ ॥ पिनाकिनम् ॥ ७ ॥
अहिर्बुध्न्यम् ॥ ८ ॥ कपालिनम् ॥ ९ ॥ दिशांपतिम् ॥ १० ॥ गंर्गम् ॥ ११ ॥ भुवनाधीशंच १२ तत्रै
वावाह्यपूजयेत् ॥ ईशानेन्द्रयोर्मध्येआदित्येभ्योनमः ॥ आदित्याना० तत्रैवअरुणम् ॥ १ ॥ ॥१२८॥
सूर्यं ॥ २ ॥ वेदांगम् ॥ ३ ॥ भानुम् ॥ ४ ॥ इंद्रम् ॥ ५ ॥ रविम् ॥ ६ ॥ गभस्तिम् ॥ ७ ॥ अर्यमणम् ॥ ८ ॥

स्वर्णरेतसं ॥ ९ ॥ दिवाकरम् ॥ १० ॥ मित्रम् ॥ ११ ॥ विष्णुं ॥ १२ ॥ चावाह्यपूजयेत्
इन्द्राग्न्योर्मध्ये चतुष्पदे भद्रेऽश्विभ्यांनमः अश्विनौ० अग्नियमयोर्मध्ये चतुष्पदे भद्रे
विश्वेभ्योदेवेभ्योनमः विश्वान्देवानावा० तत्रैवपितृभ्योनमः पितॄना० यमनिर्ऋ
तिमध्येचतुष्पदेभद्रेयक्षेभ्योनमः यक्षाना० निर्ऋतिवरुणयोर्मध्येचतुष्पदेभद्रेसर्पे
भ्योनमः सर्पाना० वरुणवाय्वोर्मध्येचतुष्पदभद्रेगंधर्वाप्सरोभ्योनमः गंधर्वाप्सरस
आ० वसुसोममध्येऽष्टादशपदेकृष्णलिंगेसोमनाथायनमः सोमनाथमा० तस्मात्पूर्वे
द्विपदांतरेऽष्टादशपदेकृष्णेमल्लिकार्ज्जुनायनमः मल्लिकार्ज्जुनमावाहयामि० सोमरुद्र
मध्येऽष्टादशपदेकृष्णेमहाकालायनमः महाकालमा० द्वादशादित्यरुद्रयोर्मध्येऽष्टा
दशपदेकृष्णेऽमरेश्वरायनमः अमरेश्वरमा० (?) तस्माद्दक्षिणभागेऽष्टादशपदेकृष्णे
वैद्यनाथायनमः वैद्यनाथमा० इंद्राश्विन्योर्मध्येऽष्टादशपदेकृष्णेभीमशंकरायनमः

भीमशंकरमावाह० ॥ अग्नियमयोर्मध्ये अष्टादशपदेकृष्णेरामेशायनमः रामेशमा० ॥ तत्पश्चिमेऽष्टाशपदेकृष्णेनागेशायनमःनागेशमा० ॥ यमनिर्ऋतिमध्येऽष्टादशपदेकृष्णे केदारायनमः केदारमा० ॥ निर्ऋतिवरुणयोर्मध्ये ऽष्टादशपदेकृष्णेघुश्मेशायनमः घुश्मेशमा० ॥ तदुत्तरेऽष्टादशपदेकृष्णेविश्वेश्वरायनमः विश्वेश्वरमा० ॥ वरुणवाय्वो र्मध्येऽष्टादशपदेकृष्णेत्र्यंबकायनमः त्र्यंबकमा० ॥ तदुत्तरेवाप्यांरुद्रादिगणेभ्योनमः रुद्रादिगणाना० ॥ ब्रह्मसोमयोर्मध्येवाप्यांऋषभायनमः ऋषभमा० ॥ तत्रैवशूलाय नमः महाकालायनमः ॥ ब्रह्मेशानयोर्मध्ये शृंखलायांभूम्यैनमः भूमिमावा० ॥ तत्रैव दक्षेभ्योनमः द० ॥ ब्रह्मेन्द्रमध्येवाप्यांदुर्गायैनमः दु० ॥ तत्रैव विष्णवेनमः वि० ॥ ब्रह्माग्निमध्येशृंखलायां स्वधायैनमःस्व० ॥ब्रह्मयमयोर्मध्ये वाप्यां मृत्यवेनमः मृ०॥ रोगायनमः रोगं० ॥ ब्रह्मनिर्ऋतिमध्ये गणपतयेनमः ग० ॥ ब्रह्मवरुणयोर्मध्यवाप्यां

कालायनमः का० ॥ ब्रह्मवाय्वोर्मध्ये शृंखलायांमरुद्भ्योनमः म० ॥ ब्रह्मणः पादमूले
मध्ये अनंतायनमः अ० ॥ तत्रैवमध्येसप्तनदीभ्योनमःसप्तनदीः० ॥ ब्रह्मणः पादमूले
सप्तसमुद्रेभ्योनमः स० ॥ ब्रह्मरुद्रमध्येऽष्टदलबाह्येहेमाद्रयेनमः हे० ॥ मध्येष्टदलपीठे
सूर्यायनमः सू०॥ मध्ये एकादशपदवल्यांचंद्रायनमः चं०॥वसुविष्णुपदयोर्मध्येएका
दशपदवल्यांभौमायनमः भौ०॥दक्षादित्ययोर्मध्येएकादशपदवल्यांबुधायनमः बु०॥
दक्षरुद्रयोर्मध्येएकादशपदात्मिकायांवल्यांबृहस्पतयेनमः बृ० ॥ स्वधाश्विन्योर्मध्ये
एकादशपदरूपायांवल्यांशुक्रायनमः शु० ॥ गंधर्ववाय्वोर्मध्येएकादशपदवल्यांशन
येनमः श० ॥वसुविष्णुभूतायांमध्येएकादशपदवल्यांकेतवेनमः के० ॥ मंडलाद्बहिः
प्रथमायांसत्त्वरूपायांवप्रायांविष्णवेनमः वि०॥ द्वितीयायांरजोगुणात्मिकायांवप्रायांब्र

ह्मणेनमः ब्र० ॥ तमोरूपायांतृतीयायांरुद्रायनमः रु० मंडलाद्बहिरेवपूर्वादिदिक्षुविदिक्षुच्चव
ज्रायनमः वज्रंआ० शक्तयेनमः द० दंडायनमः नै० खड्गायनमः पश्चिमेपाशायनमः वा०
अंकुशायनमः उत्तरेगदायैनमः गदां० ईशानेशूलायनमः नैर्ऋत्यवरुणयोर्मध्येपद्मायन
मः ईशानेंद्रयोर्मध्येचक्रायनमः एवंक्रमेणपूर्वेब्राह्म्यैनमः आ० माहेश्वर्यैनमः द०
कौमार्यैनमः नै० वैष्णव्यैनमः प० वाराह्यैनमः वायव्येइंद्राण्यैनमः उत्तरेचामुंडा
यैनमः ईशानेमहालक्ष्म्यैनमः एवंक्रमेणैव पूर्वेगौतमायनमः आग्नेयेअत्रयेनमः
दक्षिणेभरद्वाजायनमः नैर्ऋत्येविश्वामित्रायनमः पश्चिमेकश्यपायनमः वायव्येज
मदग्नयेनमः उत्तरेवसिष्ठायनमः ईशान्यांअरुंधत्यैनमः ॥ इतिद्वादशलिंगतोभद्र
पूजनम् ॥ इतिश्रीगौडवंशोद्भवनानकचंदात्मजरामलालपंडितविरचितेप्रतिष्ठासंग्रहेमं
डपमध्यवेदिपूजनप्रकारोपवर्णननामद्वितीयः किरणः ॥ २ ॥ ॥ छ ॥

श्रीगणेशायनमः ॥अथमंडपपूजनं तत्रादौभूम्यादीनांपूजनम्॥तत्रपूर्वंयथाविधिनागण
पतिंसंपूज्यअनंतरं पृथिव्यादीनांपूजनंकुर्यात् ॥ प्रक्षालितपाणिपादः शिखांबध्वाआ
चम्यकुशोत्तरेयज्ञियदारुमयेआसनेप्राङ्मुखउपविश्य गणपतिंशिवंचनत्वादेशकालौ
संकीर्त्यकरिष्यमाणमंडपप्रतिष्ठांगभूतं निर्विघ्नतासिद्ध्ये पृथिवीकूर्मानंतादीनांपूज
नमहंकरिष्ये एवंसंकल्प्य कूर्मपृष्ठोपरिसंस्थितांशुक्लवर्णांचतुर्भुजांशंखचक्रपद्मशूलध
रांसुप्रसन्नांपृथिवींध्यात्वापुष्पांजलिमादायावाहयेत् ॥ आगच्छसर्वकल्याणिवसुधेलो
कधारिणि ॥ पृथिविब्रह्मदत्तासिकाश्यपेनाभिवंदिता ॥ रत्नाकरेविष्णुनात्वंधृतावाराह
रूपिणा ॥ आगच्छवरदेधात्रियज्ञेस्मिन्शुभदायिनी॥इतिभूमिमावाह्यभूम्यैनमः इतिपु
ष्पांजलिंक्षिपेत्॥ततोभूम्यैआसनंसमर्पयामि॥भूम्यैपाद्यंस०॥ भूम्यैअर्घ्यंस० ॥ भूम्यै
आचमनंस०॥भूम्यैस्नानंस० भूम्यैपुनराचमनीयंस०॥भूम्यैचंदनंस०भूम्यैपुष्पंस०॥

भूम्यैधूपंस० ॥ भूम्यैदीपंस० ॥ भूम्यैनैवेद्यंस० ॥ भूम्यैपुनराचमनीयंस० ॥ प्रदक्षिणांस० ॥
 एवंसंपूज्यसंस्तुत्यनमस्कुर्यात् ॥ शेषमूर्ध्निस्थितांरम्यांनानासुखप्रदायिनीम् ॥ विश्व
धात्रींमहापुण्यांविश्वस्यजननींपराम् ॥ यज्ञभागंप्रतीच्छस्वसुखार्थंप्रणमाम्यहम् ॥ तवोप
रिकरिष्यामिमंडपंशुभलक्षणम् ॥ क्षंतव्यंचत्वयादेविसानुकूलामखेभव ॥ भूमेत्वंरत्नगर्भा
सिसप्तसागरसंस्थिता ॥ बीजानिविविधानीहप्ररोहंतिसदात्वयि ॥ नानाकर्मसुकुशले
शेषस्यशिरसिस्थिता ॥ धरणीकाश्यपीक्षोणीरसाविश्वंभराचभूः ॥ जगत्प्रतिष्ठेवसु
धेत्वंहिमातर्नमोस्तुते ॥ उद्धृतासिवराहेणकृष्णेनशतबाहुना ॥ दंष्ट्राग्रेलीलयादेवियज्ञा
र्थंप्रणमाम्यहम् ॥ मातर्भूमिजगन्मातासर्वाधाराहरिप्रिया ॥ भूयाःप्रपुत्रैःपशुभिर्योनोद्व
ष्टिसभीवृतः ॥ निर्विघ्नंममकर्मेदंयथास्यात्त्वंतथाकुरु ॥ एवंसंप्रार्थ्यस्वाभीष्टमानांभूमिं
स्वीकृत्यदशद्वादशचतुर्दशषोडशाष्टादशसहस्रान्यतममानमितं चतुरस्रं मंडपंविधाय

पुनस्तमेवनवधाविभज्य मंडपस्तंभखातस्थानानिनिश्चित्यदर्भैः खातस्थानानि
मार्जयेत् ॥ इदंमंडपचतुरस्रादिसंपादनंपूर्वमेवविधायानंतरंतदंगपूजनमितिप्रयोगसौ
कर्यम् ॥ स्योनापृथिवीतिमंत्रस्यमेधातिथिर्ऋषिः पुरउष्णिक्छंदः पृथिवीदेवता मा
र्जनेविनि० ॐस्योनापृथिवीनोभवानृक्षरानिवेशनी ॥ यच्छानःशर्मसप्रथाः ॥ ३६ ॥
॥ १३ ॥ इत्यनेनमंत्रेणसर्वाणिखातस्थानानिसंमार्ज्य ॥ सिञ्चन्तिपरिषिञ्चन्त्युत्सिञ्चन्ति
पुनन्तिच ॥ सुरायैब भ्रौमदेकिन्त्वोवदतिकिन्त्वः ॥ २० ॥ २८ ॥ अनेनमंत्रेणसर्वत्रपंच
गव्यैः पंचामृतैः सिंचेत् ॥ सर्वत्रगंधाद्यैः संपूज्यअर्घ्यपात्रेजलपुष्पाक्षतान्कृत्वाहस्ता
भ्यांपात्रमादायअर्घ्यंदद्यात् ॥ तत्रमंत्राः ॥ वसुधेपूजितासित्वंविष्णुनाशंकरेणच ॥ पार्वत्या
चैवगायत्र्यास्कंदवैश्रवणादिभिः ॥ इंद्राद्यैः पूजितासित्वंसधर्मंजिगीषया ॥ सौभाग्यंदे
हिपुत्रांश्चधनंधान्यंशुभांमतिम् ॥ गृहाणार्घ्यमिदंदेविकर्मसिद्धिंप्रयच्छमे ॥ इत्यर्घ्यंदत्वा

पुष्पांजलिमादाय उपचारानिमांस्तुभ्यंददामिपरमेश्वरि ॥ भक्त्यागृहाणदेवेशित्वाम
हंशरणंगतः ॥ ततः पायसापूपसक्त्वादिद्रव्यंपात्रेकृत्वासंस्थाप्यसपरिवारायैभूम्यै
इमंबलिंसमर्पयामिनमम ॥ इतिबलिंदद्यात् ॥ ततः खनित्रपूजा॥त्वष्ट्राविनिर्मितःपूर्वंलो
कानांहितकाम्यया ॥ पूजितोसिखनित्रत्वंसिद्धिदोभवमेधुना ॥ ततःसूत्राधारंसंपूज्य
नमामिविश्वकर्माणंसर्वसूत्रप्रवर्त्तकम् ॥ मंडपादिप्रसिद्ध्यर्थंसर्वसिद्धिसमृद्धिदम् ॥ अं
गुलनिर्माणंपूजयेत् ॥ अंगुलादिप्रमाणार्थंनिर्मितोविश्वकर्मणा॥अतस्त्वांपूजयामीहमं
डपेष्टंप्रसाधय ॥ततःखनननांगमाधारशक्त्यादीनांपूजनम् ॥ आधारशक्तयेनमः कूर्माय
नमः अनंतायनमः पृथिव्यैनमः वास्तुपुरुषायनमः स्वस्वदिक्षुइंद्रादीन्पूजयेत् ॥ इंद्रा
य० अग्नये० यमाय० निर्ऋतये० वरुणाय० वायवे० कुबेराय० ईशानाय० अनंताय० ॥१३२॥
ब्रह्मणे० ततोबलिमुपनीयवास्तुपुरुषायेमंबलिंस० ॥ द्वितीयंबलिमुपनीयइंद्रादिदिक्प

तिभ्य इमंबलिंसमर्पयामि ॥ ततः पृथिव्यैपुष्पांजलिः ॥ त्वंदेविश्वननार्थंतुपूजांगृहाणमे
मखे ॥ पूजनाच्छेषकूर्माभ्यांशुद्धांवृद्धिंप्रयच्छमे ॥ ततः समाचारात्तिलकं आशिषो नै
गमाः ॥ ततोमध्यस्तंभचतुष्टयांतरालेइष्टकाभिर्वेदिः कार्या ॥ तत्रेष्टकानांपूजापूर्वकंप्रा
र्थना यथा ॥ पूजासाधनसामग्रीमानीयोपविश्याचम्यप्राणानायम्यदेशकालौस्मृ
त्वा इष्टकादिभिर्वेदिकरणार्थंइष्टकानांप्रार्थनापूर्वकंपूजनमहंकरिष्ये इतिसंकल्प्य
पुष्पांजलिहस्तः सन् प्रार्थयेत् ॥ नंदिनीदेविवासिष्ठेवसुभिःपूजितासती ॥ जयेभार्ग
वदायादेप्रजानांजयमावह ॥ पूर्णेगिरीशदायादेपूर्णान्कामान्कुरुष्वमे ॥ भद्रिकेश्याम
दायादेकुरुभद्रांमतिंमम ॥ प्रजापतिसुतेदेविचतुरस्रेमहीसुते ॥ सुभगेसुव्रतेदेविगृहेभा
र्गविरम्यताम् ॥ अव्यंगेधिबलेपूर्णेनमोस्त्वंगिरसःसुते ॥ इष्टदेवप्रतिष्ठासुत्वांप्रति
ष्ठापयाम्यहम् ॥ देशग्रामपुरक्षेत्रगृहस्वामिषुसौख्यदा॥मनुष्यपशुहस्त्यश्ववधनवृद्धिक

रीभव ॥ इतिसंप्रार्थ्य चंदनादिभिः संपूज्य नैवेद्यादिबलिदानांतंकुर्यात् ॥ अद्यपूर्वो
च्चरित० पुण्यतिथौ इष्टकानांकृतपूजनविधेः सर्वंपरिपूर्णमस्तु ॥ ततोवेदिकोणेषुइष्टका
प्रक्षेपः ॥ ततस्तांचतुरस्रांसमांवेदिं विस्तारात्रिचतुःपंचसप्तनवैकादशान्यतमभागो
च्छ्रितांविदध्यात् ॥ मंडपस्येशानभागेहोमानुसारेणयथोक्तंकुंडंकार्य्यम् ॥ ईशानभा
गेचेद्वेदिस्तदामध्यभागेकुंडम् ॥ ततोयजमानोमंडपस्यपश्चिमद्वारेप्राङ्मुखउपविश्य
गुरुगणपतिशिवान्नत्वादेशकालौसंकीर्त्यश्रीमहारुद्रप्रीतयेमंडपस्तंभद्वारतोरणत्रिशूल
दिक्पालध्वजपताकावेदिस्तंभानांस्थापनप्रतिष्ठापूर्वकंपूजनमहंकरिष्ये ॥ ततोमध्यवे
द्यामाग्नेयादिस्तंभचतुष्टयेषुतथैवबाह्यवेद्यामाग्नेयादिद्वादशस्तंभेषु स्योनापृथिवीतिख
ननम् ॐ स्योनापृथिवीनोभवानृक्षरानिवेशनी ॥ यच्छानःशर्म्मसप्रथाः ॥ ३६ ॥
॥ १३ ॥ ततः सिंचंतीत्यनेनजलसेकः ॥ ॐ सिञ्चंतिपरिषिञ्चन्त्युत्सिञ्चन्तिपुनन्तिच ॥

सुरांयैबुध्नैवमदेकिन्त्वोवंदतिकिन्त्वः ॥ २० ॥ २८ ॥ ततोदधिक्रावण इतिदधिसे
चनम्॥ ॐदधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्यवाजिनंः॥सुरभिनोमुखाकरत्प्राणऽआ
यूंषितारिषत् ॥ २३ ॥ ३२ ॥ ततः धानावंतमितियवप्रक्षेपः ॐ धानावन्तङ्करम्भिणं
मपूपवन्तमुक्थिनंम्॥इंद्रंप्रातर्ज्जुषस्वनः ॥२०।२९॥ हिरण्यगर्भ इतिहिरण्यम्ॐहिर
ण्यगर्भःसमवर्त्तताग्रेभूतस्यंजातःपतिरेकंऽआसीत् ॥ सदाधारपृथिवींद्यामुतेमाङ्क
स्मैदेवायहविषांविधेम ॥१३॥४॥ ॐ काण्डात्काण्डादितिदूर्वाप्रक्षेपः ॥ ॐ काण्डां
त्काण्डात्प्ररोहंन्तीपरुषःपरुषस्परि॥ एवानोदूर्व्वेप्प्रतंनुसहस्रेणशतेनंच ॥१२॥ २० ॥
ॐऊर्द्ध्वऊषुण इतिस्तंभरोपणम् ॥ ॐ ऊर्द्ध्वऽऊषुणऽऊतयेतिष्ठादेवोनसविता ॥
ऊर्द्ध्वोव्वाजस्यसनितायदञ्जिभिर्व्वाघद्भिर्विह्वयांमहे ॥११॥ ४२ ॥ वसोःपवित्रमसीति
स्तंभेसूत्रबंधनम्॥ ॐवसोःपवित्रंमसिशतधारंवसोःपवित्रमसिसहस्रधारम् ॥ देवस्त्वा

सवितापुनातुवसोःपवित्रेणशतधारेणसुप्वाकामधुक्षः ॥ १ ॥ ३ ॥ एवमेवसर्वेषांषोडश
स्तंभानांस्थापनम् ॥ ततोमध्यस्तंभचतुष्टयमाग्नेयादौतत्तन्नामभिः स्थापयेत् ॥ आग्ने
य्यांविजयंस्थापयामि नैर्ऋत्यांकेदारंस्थापयामि वायव्यांश्रीमंतंस्था० ऐशान्यांसु
भद्रंस्थापयामि बाह्यवेद्यामप्याग्नेयादिक्रमेणैवस्थापनम् ॥ आग्नेय्यांधनदंस्थापयामि
कल्याणंस्था० शुभंस्था० शांतंस्था० मनोरमंस्था० ऋद्धिंस्था० सिद्धिंस्था० विचित्रं
स्था० महायशसंस्था० मंगलंस्था० गुणंस्थाप० जयंस्था०॥एवंषोडशस्तंभान्संस्था
प्य ततोऽग्निमीळेइतिमंत्रेणबहुमंगलनाम पूर्वद्वारंस्थापयामि ॥ ॐ अग्निमीळेपुरोहि
तंयज्ञस्यदेवमृत्विजम् ॥ होतारंरत्नधातमम् ॥ इषेत्वेतिमंत्रेणधर्मिष्ठनाम दक्षिणद्वारं
स्थापयामि ॥ ॐ इषेत्वोर्जेत्वावायवस्थदेवोवः सवितापार्पयतुश्रेष्ठतमायकर्म्मणे ॥१३४॥
ऽआप्यायध्वमघ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशतमाघ

शंऽसो ध्रुवाऽअस्मिन्न्गोपतौस्यातबह्वीर्य्यजमानस्यपशून्न्पाहि ॥ १ । १ ॥ अग्नआ
याहिवीतयइतिजयाभिधंपश्चिमद्वारंस्थापयामि ॥ ॐ अग्ग्नऽआयाहिवीतयेगृणानो
हव्यदातये ॥ निहोतासत्सिबर्हिषि ॥ शन्नोदेवीरितिमंत्रेणकल्याणनाम उत्तरद्वारंस्था
पयामि॥ॐशन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये॥शँय्योरभिस्रवन्तुनः॥३६॥१२॥एवं
द्वाराणिसंस्थाप्य एभिरेवमंत्रैश्चतुर्दिक्षुतोरणानिस्थापयेत् ॥ पूर्वेसुहृढनामकंआश्वत्थं
तोरणंस्थापयामि तस्यमस्तकेमंगलाख्यंवैष्णवंत्रिशूलंस्थापयामि ॥ एवंदक्षिणेविक
टाख्यंऔदुंबरंतोरणंस्थपयामि ॥ तस्यमस्तकेशत्रुघ्ननामकंरौद्रंत्रिशूलंस्थापयामि ॥ प
श्चिमेभीमाख्यंप्लाक्षंतोरणंस्थापयामि ॥ तस्यमस्तकेपुत्रप्रदनामानंब्राह्मंत्रिशूलंस्था
पयामि ॥ उत्तरेसुप्रभाख्यंवटतोरणंस्थापयामि तस्यमस्तके उत्तमाभिधंसौम्यंत्रिशू
लंस्थापयामि ॥ एवंतोरणानिसंस्थाप्य वेदीनांस्थापनंकुर्यात् मध्यवेदिंशिवप्रदांस्था

पया॥मि एवमेवापरवेदीनामपिस्थापनंज्ञेयम् ॥ अनंतरं पूर्वादिदिक्षु ब्रह्मविष्णुरुद्रदेवां
श्चपूजयेत्॥पूर्वेब्रह्मजज्ञानमितिमंत्रेणब्रह्माणमावाह्यपूजयेत् ॥ॐब्रह्मजज्ञानम्प्रथमम्पुर
स्ताद्विसीमुतःसुरुचोवेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यविष्ठाःसतश्चयोनिमसतश्च
विवः ॥१३॥३॥ दक्षिणेइदंविष्णुरितिमंत्रेणविष्णुमावाह्यपूजयेत् ॥ ॐइदंविष्णुर्विचक्रमे
त्रेधानिदधेपदम् ॥ समूढमस्यपांसुरेस्वाहा॥५।१५॥पश्चिमेत्र्यंबकमितिमंत्रेणरुद्रमा
वाह्यपूजयेत्॥ॐत्र्यम्बकंयजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्वारुकमिवबन्धनान्मृ
त्योर्मुक्षीयमामृतात्॥३॥६०॥एवंरुद्रंसंपूज्यप्रार्थयेत् ॥ पंचवक्त्रवृषारूढत्रिलोचनसदा
शिव॥चंद्रमौलेमहादेवममस्वस्तिकरोभव ॥ ततोदेवमंत्रेणदेवानावाह्यपूजयेत् ॥ ततः
आधारइतिमंत्रेणअपआवाह्यपूजयेत्॥ आधारःसर्वभूतानामापोजीवनहेतवः ॥प्रवर्त्तंते
शुभंयांतितादेव्यःशुभदास्तुनः ॥ ततोइष्टकादेवताआवाह्यपूजयेत् ॥ तासांअभिधाना

नि पूर्वस्यांशिवांस्थापयामि इन्द्रायनमः आग्नेय्यांगंगांस्थापयामि अग्नयेनमः दक्षि
णेमहापुण्यांस्थापयामि यमायनमः निर्ऋत्यांविशालांस्थापयामि निर्ऋतयेनमः पश्चि
मेसरस्वतींस्थापयामि वरुणायनमः वायव्यांतुष्टिंस्थापयामि वायवेनमः उत्तरेपुष्टिं
स्थापयामिसोमायनमः ईशान्यांमाहेश्वरींस्थापयामि ईशानायनमः ॥ एवंसांगं मंडप
स्थापनंकृत्वाऋत्विग्भिराचार्येणसहितोयजमानोर्घहस्तः शांतिसूक्तंपठन् पश्चिमद्वा
रेस्थित्वा चतुर्भुजांशुक्लवर्णांकूर्म्मपृष्ठोपरिस्थिताम् ॥ पद्मशंखचक्रशूलधरांसुप्रसन्नांध्या
त्वा आगच्छसर्वकल्याणिवसुधेलोकधारिणि ॥ पृथिविब्रह्मदत्तासिकाश्यपेनाभिवंदिता॥
उद्धृतासिवराहेणकृष्णेनशतबाहुना ॥ दंष्ट्राग्रेलीलयादेवियज्ञार्थंप्रणमाम्यहम् ॥ इत्यर्घ्यं
दत्वा कलशंगृहीत्वागीतवाद्यादिनासह भद्रंकर्णेभिरित्यादिमंत्रंपठन् मंडपंप्रदक्षिणी
कृत्यतेनैवपश्चिमद्वारेणमंडपंप्रविशेत् ॥ भद्रंकर्णेभिःशृणुयामदेवाभद्रम्पश्येमाक्षभिर्य

म. सं.

॥१३६॥

जन्नाः स्थिरैरङ्गैस्तुष्टुवाᳬस्तनूभिर्व्यशेमहिदेवहितंयदायुः ॥ २५।२१ ॥ ततः आचा म. पू.
र्यः सर्षपानादाय अपक्रामंतुभूतानिपिशाचाः सर्वतोदिशम् ॥ सर्वेषामविरोधेनब्रह्मकर्मस
मारभे ॥ पूर्वेरक्षतुगोविंद आग्नेय्यांगरुडध्वजः ॥ याम्यांरक्षतुवाराहोनारसिंहस्तुनैर्ऋते ॥ वा
रुण्यांकेशवोरक्षेद्वायव्यांमधुसूदनः ॥ उत्तरे श्रीधरोरक्षेदीशान्यांतुगदाधरः ॥ ऊर्ध्वंगोवर्ध
नोरक्षेदधस्ताच्चत्रिविक्रमः ॥ एवंदशदिशोरक्षेद्वासुदेवोजनार्दनः ॥ शंखोरक्षतुयज्ञाग्रेपृष्ठे
खड्गस्तथैवच ॥ वामपार्श्वेगदारक्षेद्दक्षिणेतुसुदर्शनः ॥ ब्रह्माणंमाधवोरक्षेत्त्वाचार्यंपातुमा
धवः ॥ अच्युतोवतुऋग्वेदंयजुर्वेदमधोक्षजः कृष्णश्चसामसंरक्षेदाथर्वकंचमाधवः ॥ उपद्र
ष्टातुयोविप्रस्तंरुद्रोवतुसर्वदा ॥ यजमानंसपत्नीकंकमलाक्षश्चरक्षतु ॥ रक्षाहीनंतुयत्स्था
नंतत्सर्वंरक्षतांहरिः ॥ वेदमंत्रैश्चकर्तव्यारक्षासूत्रैश्चसर्षपैः ॥ ॐ गुणानांत्वागणपतिंᳬहवाम ॥१३६॥
हे प्रियाणांत्वाप्रियपतिंᳬहवामहेनिधीनांत्वानिधिपतिंᳬहवामहेवसोमम ॥ आहम

जानिगर्भंधमात्वमंजासिगर्भंधम् ॥२३।१८॥ ॐ जातवेदसेसुनवामसोममरातीयतो निर्दहातिवेदः॥सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः॥ इत्युक्त्वासर्षपान्वि कीर्य देवाआयांतुयातुधानाअपयांतु विष्णोदेवयजनंरक्षस्वेति रक्षांकृत्वा पंचगव्येन मंडपप्रोक्षणंकुर्यात्॥तत्रक्रमः॥गायत्र्यागोमूत्रेणप्रोक्षणंॐ भूर्भुवःस्वःतत्सवितुर्वरेण्यंभ र्गोदेवस्यधीमहि॥धियोयोनःप्रचोदयात् ॥ ३६ ॥ ३॥ गंधद्वारामितिगोमयेनप्रोक्ष णम्॥गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम्॥ ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम्॥ आप्यायस्वेतिक्षीरेणप्रोक्षणम् ॥ आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यम् ॥ भवावा जस्यसङ्गथे॥ १२ । ११२ ॥दधिक्राव्णेतिदध्नाप्रोक्षणम् दधिक्राव्णोऽअकारिषंजिष्णो रश्वस्यवाजिनः॥ सुरभिनोमुखाकरत्प्रणआयूंषितारिषत् ॥ २३ ॥ ३२ ॥ शुक्रम सीत्याज्येनप्रोक्षणम् ॥ शुक्रमसिचन्द्रमस्यमृतमसिवैश्वदेवमसि ॥ ४ ॥ १८ ॥ देव

प्र. सं. स्यत्वेतिकुशोदकेनप्रोक्षणम् ॥ देवस्यंत्त्वासवितुः प्प्रसवेऽश्विनोर्ब्बाहुब्भ्यांम्पूष्णोहस्ता मं. पू.
॥१३७॥ ब्भ्याम् ॥ सरस्वत्त्यैव्वाचोयन्तुर्य्यन्त्रेणाग्नेः साम्म्राज्ज्येनाभिषिंञ्चामि ॥ १८ ॥
॥ ३७ ॥ ततोंऽजलौपुष्पाण्यादाय ॥ ब्रह्माद्याःस्तंभदेवायेद्वारतोरणसंस्थिताः ॥ पता
कासुचयेदेवाध्वजाग्रेषुचसंस्थिताः ॥ आवाहयामितान्सर्वान्यज्ञरक्षार्थहेतवे ॥ गृ
ह्णंतुपूजनं सर्वेक्रतुंरक्षंतुसर्वतः ॥ इतिमंत्रंपठित्वा अस्मिन्मंडपेस्तंभद्वारतोरणात्रिशूल
पताकाध्वजानांदेवान्आवाहयामि इत्यावाह्य ॥ अक्षतानादाय मनोजूतिरितिमं
त्रेण मंडपप्रतिष्ठांकुर्यात् ॥ ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्प्पतिर्य्यज्ञमिमन्त
नोत्वरिष्टंय्यज्ञꣳसमिमंदधातु ॥ विश्श्वेदेवासऽइहमादयन्तामोम्प्रतिष्ठ ॥ २ ॥ ॥१३७॥
॥ १३ ॥ ततोद्यसमस्तपुण्यकालावयवयोगेषुएवंगुणविशेषणविशिष्टायांतिथौ अ
स्मिन्मंडपस्तंभद्वारतोरणत्रिशूलपताकाध्वजानांदेवास्तत्रतत्रसुप्रतिष्ठितावरदाभवंतु ॥

इतिअक्षतान्प्रक्षिपेत् ॥ ततोमध्यवेदिकास्थपीठेकलशंसंस्थाप्यअंबिकासहितंश्री
रुद्रंषोडशोपचारैरभ्यर्च्यमंडपस्तंभदेवानांपूजनंकुर्यादितिकेचित् ॥ वस्तुतस्तुमंडपपू
जनानंतरं वेद्यादिदेवानांपूजनं तदनंतरंमध्यवेदिस्थकलशोपरिप्रधानदेवतापूजनंज्ञे
यम् ॥ ४ ॥ षोडशोपचारपूजनप्रकारस्तु वेदोक्तमार्गेणपुराणोक्तमार्गेणचप्रदर्श्यंते ॥
आवोदेवासऽईमहेवामम्प्रयत्यध्वरे ॥ आवोदेवासऽआशिषोयज्ञियासोहवामहे ॥
॥ ४ ॥ ५ ॥ इत्यनेन मंत्रेणावाहनम् ॥ एषोहदेवःप्प्रदिशोनुसर्व्वाःपूर्वोहजातःसऽउग
र्भेऽअन्तः ॥ सऽएव जातःसजनिष्यमाणःप्प्रत्यङ्जनास्तिष्ठति सर्वतोमुखः
॥ ३२ ॥ ४ ॥ इत्यनेनदेवस्यसंमुखीकरणम् ॥ पुरुषऽएवेदꣳसर्वंयद्भूतंयच्चभाव्यम् ॥
उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥ ३१ ॥ २ ॥ इत्यनेनपाद्यम् एतावानस्यम
हिमातोज्ज्यायाꣳश्चपूरुषः ॥ पादोस्यविश्श्वाभूतानित्रिपादस्यामृतन्दिवि ॥ ३१ ॥

प्र. सं. ॥ ३ ॥ इत्यनेनार्घ्यम् वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्यऽऋत मं. पू.
॥१३८॥ सदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ॥ ४ ॥ ३६ ॥ इत्यनेनस्ना
नम् पयः पृथिव्याम्पयऽओषधीषु पयो दिव्यन्तरिक्षे पयोधाः ॥ पयस्वतीः प्रदिशः सन्तु
मह्यम् ॥ १८ ॥ ३६ ॥ इत्यनेनमंत्रेणपयःस्नानम् ततःशुद्धोदकेनस्नानम् दधिक्राव्णो
ऽअकारिषञ्जिष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाकरत्प्राणऽआयूंषितारिषत ॥
॥ २३ ॥ ३२ ॥ इत्यनेनदधिस्नानम् पुनर्वरुणस्येत्यनेनशुद्धोदकेनस्नानम् घृतङ्घृ
तपावानः पिबतवसांवसापावानः पिबतान्तरिक्षस्यहविरसिस्वाहा ॥ दिशःप्रदिश
ऽआदिशोविदिशऽउद्दिशोदिग्भ्यः स्वाहा ॥६॥१९॥ इत्यनेनघृतस्नानम् पुनस्तथैवशु
द्धोदकेनस्नानम् अपांरसमुद्वयसंसूर्य्येसन्तंसमाहितम् अपांरसस्ययोर ॥१३८॥
सस्तंवोगृह्णाम्म्युत्तममुपयामगृहीतोसीन्द्रायत्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्रायत्वाजु

ष्टंतमम् ॥ ८॥३ ॥ इत्यनेनशर्करास्नानम् ॥ पुनः शुद्धोदकस्नानम् ॥ मधुवाताऽऋतायु
तेमधुंक्षरन्तिसिन्धवः ॥ माध्वीर्न्नः सुन्त्वोषधीः॥१३॥२७॥ इत्यनेनमधुस्नानम् ॥ पुन
स्तथैवशुद्धोदकस्नानम् ॥पञ्चनद्यः सरस्वतीमपियन्तिसस्रोतसः॥सरस्वतीतुपञ्चधासो
देशेभवत्सरित् ॥ ३४।११ ॥ इत्यनेनपञ्चामृतस्नानम् ॥ पुनःपूर्ववत्शुद्धोदकस्नानम् ॥
ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतःसुरुचोवेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यवि
ष्ठाःसतश्चयोनिमसतश्चविवः ॥१३॥३॥ इत्यनेनयज्ञोपवीतम् ॥ वसोःऽपवित्रमसिद्यौ
रसिपृथिव्यसिमातरिश्वनोघर्म्मोसिविश्वधाऽअसिपरमेणधाम्नादृंहस्वमाह्वार्म्मा
तेयज्ञपतिर्ह्वार्षीत् ॥ १ ॥ २ ॥ इत्यनेनवस्त्रम् ॥ युञ्जन्तिब्रध्नमरुषञ्चरन्तंपरितस्थुषः॥
रोचन्तेरोचनादिवि ॥ २३ ॥ ५ ॥ युञ्जन्त्यस्यकाम्म्याहरीविपक्षसारथे ॥ शोणा
धृष्णूनृवाहसा ॥ २३ ॥ ६ ॥ आभ्यांमंत्राभ्यांगन्धम् ॥ अक्षन्नमीमदन्तह्यवप्रियाऽ

प्र. सं. अंधूषत ॥ अस्तोषतस्वभानवोविप्रानविष्ठयामतीयोजान्निन्द्रतेहरी ॥ ३ ॥ ५१ ॥ इ मं. पू.
॥१३९॥ त्यनेनाक्षतान् ॥ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौ
व्यात्तम् ॥ इष्णन्निषाण मुम्मइषाण सर्वंलोकम्मइषाण ॥ ३१ ॥ २२ ॥ इत्यनेनपुष्प
म् ॥ नमोबिल्मिनेचकवचिनेचनमोवर्म्मिणेच वरूथिनेचनमः श्रुतायचश्रुत
सेनायचनमोदुन्दुभ्यायचाहनन्यायचनमोधृष्णवे ॥ १६ ॥ ३५ ॥ इत्यनेनबिल्वप
त्रम् ॥ काण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषस्परि ॥ एवानोदूर्वेप्रतनुसहस्रेणशतेनच
॥ १३ ॥ २० ॥ इत्यनेनदूर्वाम् ॥ धूरसिधूर्वधूर्वन्तन्धूर्वतंय्योस्मान्धूर्वतितन्धूर्वयंवय
न्धूर्वामः ॥ देवानामसिवह्नितमंसस्नितमम्पप्रितमञ्जुष्टतमन्देवहूतमम् ॥ १ ॥ ८ ॥ इ
त्यनेनधूपम् ॥ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहासूर्य्योज्योतिर्ज्योतिःसूर्य्यः ॥१३९॥
स्वाहा ॥ अग्निर्वर्चोज्योतिर्वर्चः स्वाहासूर्य्योवर्चोज्योतिर्वर्चः स्वाहा ज्योतिः

सूर्य्यः सूर्य्योज्ज्योतिः स्वाहा ॥ ३ ॥ ९ ॥ इत्यनेनदीपम् ॥ यजमानेन हस्तप्रक्षालनं
चदीपदानानंतरं कर्तव्यम् ॥ नाभ्याऽआसीदन्तरिक्षꣳशीर्ष्णोद्यौः समवर्तत ॥ पु
द्भ्याम्भूमिर्द्दिशः श्रोत्रात्तथालोकाँ॥ऽअकल्पयन् ॥ ३१ ॥ १३ ॥ इत्यनेननै
वेद्यम् ॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥ वसन्तोस्यासीदाज्ज्यङ्ग्रीष्मऽइध्मश्श
रद्धविः ॥ ३१ ॥ १४ ॥ इतिमंत्रेणाचमनम् ॥ याः फलिनीर्य्याऽअफलाऽअपुष्पायाश्च
पुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वꣳहसः ॥ १२ ॥ ८९ ॥ इत्यनेन पूगीफल
म् ॥ हिरण्यगर्भःसमवर्त्तताग्रेभूतस्यजातः पतिरेकऽआसीत् ॥ सदाधारपृथिवी
न्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम ॥ १२ ॥ ४ ॥ इत्यनेनदक्षिणाम् ॥ येतीर्थानि प्रचर
न्तिसृकाहस्तानिषङ्गिणः ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ १६ ॥ ६१ ॥ इत्यने
नप्रदक्षिणाम् ॥ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् ॥ तेहनाकम्महि

प्र. सं. मानं॑सचन्तुयत्रपूर्वेसाध्याःसन्तिदेवाः ॥ ३१ ॥ १६ ॥ इत्यनेनपुष्पांजलिंदद्यात् ॥ मं. पू.
॥१४०॥ अथपुराणोक्तरीत्यापिपार्वतीसहितरुद्रपूजनमुच्यते ॥ पृथक्पृथक्स्थापनीयंकलशेप्र
तिमाद्वयम् ॥ आपोहिष्ठादिभिर्मंत्रैस्तथात्रैयम्बकैरपि ॥ अभिषिच्यप्रयत्नेनपूजयेत्प्र
तिमाद्वयम् ॥ ध्यायेत्ततोमहादेवमुमादेहार्धधारिणम् ॥ मुक्तामालपरीतांगंदुकूलपरि
वेष्टितम् ॥ पञ्चाननमुमाकान्तमनलेन्दुरविप्रभम् ॥ चंद्रार्धशेखरंनित्यंजटामुकुटमण्डि
तम् ॥ त्रिपुंड्रलेखाविलसद्भालभागमनामयम् ॥ भस्मोद्धूलितसर्वांगंरुद्राक्षाभरणान्वितम् ॥
मन्दस्मितमनाधारमाधारंजगतांप्रभुम् ॥ देवैरनन्तैरनिशंस्तूयमानमनेकधा ॥ देवात्म
कंदेववन्द्यंविष्णुब्रह्मादिवंदितम् ॥ विष्णुनेत्रांचितारक्तपादपङ्कजमुत्तमम् ॥ अप्रतिच्छ
न्नमच्छिन्नंसर्ववृन्दारकार्चितम् ॥ सर्वोत्तममनाद्यन्तंसर्ववेदनिवेदितम् ॥ सत्यंशुद्धंपरंब्रह्म
पुरुषंकृष्णपिंगलं। ऊर्ध्वरेतंविरूपाक्षंविश्वरूपंचिदात्मकं। निष्कलंनिर्गुणंशान्तंनिरवद्यंनिरं ॥१४०॥

जनम्॥ अप्रमेयंजगन्मध्येस्थितिसंहारकारिणं।विश्वबाहुंविश्वपादंविश्वाक्षंविश्वभूर्भुवं
विश्वंनारायणाराध्यमक्षरंपरमंपदं॥विश्वतःपरमंनित्यंविश्वस्येशमनामयं॥एवंध्यात्वा
महादेवंसर्वदेवोत्तमोत्तमं।ध्यायेत्ततःपरंगौरीमादिविद्यामनामयीं।लक्ष्मीसेवितपादाब्जां
शचीसेवितपादुकां। सरस्वत्यादिभिर्नित्यंस्तूयमानपदाम्बुजाम्।अधरोष्ठपराभूतपक्वबि
म्बफलासुमाम्॥मुखकान्तिकलोपेतांपूर्णचंद्रनिभाननाम्॥तिरस्कृतालिमालांतामलका
वलिभिःसदा।पीनवक्षोजनिर्भातचक्रवाकवरांगनाम् ।नित्यंतिरस्कृतांभोजांनयनाभ्याम
निन्दिताम्॥सीमन्तधिक्कृताशेषकामभल्लामहर्निशम् ।भृकुटीधिक्कृताशेषमारचापामना
कुलांबाहुतालकलोद्भूतहेममालांविलासिनीम्॥रोमावलितिरोभूतभ्रमलभ्रमरालिकाम्॥
नाभिरन्ध्रतिरोभूतनद्यावर्तसुवर्तुलाम्॥उत्तमोरुतिरोभूतरंभास्तम्भांशुभावहाम्॥पादयु
गमनखाकान्तिनिर्जितारुणपङ्कजाम्।ब्रह्मेंद्रोपेन्द्रजननींमहेशार्द्धांगभागिनीं।महेशाश्लि

म. सं. ष्ट्वामांगावरदाभयदांसदा ॥ प्रसन्नवदनांशान्तांस्मितपूर्वाभिभाषिणीम् ॥ पूर्णचन्द्र मं. पू.
॥१४१॥ दुकूलाढ्यांनानाभरणभूषिताम् ॥ स्तूयमानांसदादेवैर्यज्ञैर्दानैश्चकोटिशः ॥ एवंध्या
त्वाततःसम्यगुपचारान्प्रकल्पयेत् ॥ ततःपुष्पाणिसंगृह्यशिवमावाहयेच्छिवाम् ॥ म
हादेवदयासिंधोविष्णुब्रह्मादिवंदित ॥ आवाहयामिदेवत्वांप्रसीदपरमेश्वर ॥ लक्ष्म्या
दिदेववनितापरिसेवितपादुके ॥ आवाहयामिदेवित्वांप्रसीदपरमेश्वरि ॥ इत्यावाह
नम् ॥ गृहाणसोमविश्वात्मन्नासनंरत्ननिर्मितम् ॥ अनन्तासनविश्वेशकरुणासागरप्र
भो ॥ उमेसोमकराश्लिष्टेसोमार्धकृतशेखरे ॥ नानारत्नसमाकीर्णमासनंप्रतिगृह्यताम्॥
आसनम्॥ पाद्यंगृहाणगौरीशहेमपात्रस्थितंनवम् ॥ गृहाणदेविपाद्यंत्वंवेदवेदाङ्गसंस्तु
ते॥पाद्यम्॥ अर्घ्यंगृहाणदेवेशसपुष्पंगन्धसंयुतम् ॥ शिवानन्तगुणग्रामसर्वाभीष्टप्रदाय ॥१४१॥
क॥गृहाणार्घ्यंशिवेनित्येसर्वावयवशोभिनि॥ शिवप्रियेशिवाकारेनित्यंभक्तवरप्रदे ॥ अ

र्घ्यं० ॥ गृहाणाचमनंशम्भोशुचिभूतांशिवाप्रिय ॥ गृहाणाचमनंदेविशुचिभूतेशिवप्रिये ॥
आचमनम्॥ मधुपर्कंगृहाणेशसर्वदामधुपर्कद॥ मधुपर्कप्रदानेनप्रीतोभवहरेश्वर। मधुपर्क
मिदंदेविस्वीकुरुप्रियशङ्करे ॥ मधुपर्कप्रदानेनसुप्रीताभवशोभने ॥ मधुपर्कं० शंभोपञ्चा
मृतस्नानंस्वीकुरुष्वकृपानिधे ॥ सर्वतीर्थमयंस्नानंनित्यशासनपावन शिवेपंचामृतस्ना
नंस्वीकुरुष्वसदाप्रिये॥ सृष्टितीर्थोत्तमेशुद्धेतीर्थराजनिषेविते ॥ पंचामृतस्नानं० शंभोशु
द्धोदकस्नानंस्वीकुरुष्वसुरोत्तम॥ प्रसीदपरमंभक्तंपाहिमांकरुणानिधे ॥ शिवेशुद्धोदक
स्नानंस्वीकुरुष्वाशिवप्रिये ॥प्रसीददेविदीनोहंपाहिमांशरणागतम्॥स्नानं० सोत्तरीयंगृहा
णेशदुकूलमिदमुत्तमम् ॥ पाहिमांकृपयादेवकरुणाकरशङ्कर॥ सोत्तरीयंगृहाणेदंदुकूलं
शंकरप्रिये ॥ प्रसीदपाहिमांदीनमनन्यशरणंशिवे वस्त्र० ॥उपवीतंगृहाणेशशंभोसर्वामरो
त्तम॥उपवीतंगृहाणत्वंशिवसंश्लिष्टविग्रहे उपवीत० ॥गृहाणचंदनंरम्यंसुगंधेनविराजितं॥

प्रसीदपार्वतीनाथशरणागतवत्सल ॥ गृहाणचंदनंदेविचंद्रभागविराजितम् ॥ विश्वविश्वा
त्मकेपाहि विश्वनाथप्रियेसदा गंधं० रक्तचंदनसंमिश्रैरक्षतैः पूजयाम्यहम् ॥ सर्वभूतहि
तर्थायभूताध्यक्षायतेनमः ॥ इत्यक्षतान्० गृहाणाभरणानीशनिराश्रितसमाश्रय ॥ वि
श्वाभरणविश्वेशरत्नाभरणभूषित ॥ गृहाणाभरणान्येवसर्वाभरणभूषिते ॥ सर्वप्रियेज
गद्वंद्येजगदानंददेशिवे ॥ आभरणानि० गृहाणबिल्वपत्राणिसमोदानिशिवप्रिये॥सुगन्ध
बिल्वमन्दारमल्लिकासमलंकृते ॥ बिल्वपत्राणि० दशांगंगुग्गुलंधूपंसगोघृतमनुत्तमं ॥
गृहाणपार्वतीनाथप्राणतर्पणमादरात् ॥दशांगंगुग्गुलंधूपंसगोघृतमनुत्तमम्॥गृहाणभक्त
वरदेलक्ष्मीदेव्यादिसेवितेधूपं०कार्पासवर्तिसंयुक्तंगोघृतेनसमन्वितं गृहाणचन्द्रसूर्याग्नि
प्रभाधामनमोस्तुते ॥ साज्यंत्रिवर्तिविस्फूर्तिंदीपमीशानवल्लभे ॥ गृहाणचंद्रसूर्याग्निम
ण्डलादिकसुप्रभे ॥दीपं० शंभोगोघृतसंयुक्तंपरमान्नंमनोहरम्॥ सशर्करंगृहाणांबेपरमा

न्नप्रदायिनि नैवेद्यं० शंभोगृहाणगंधाढ्यमिदमाचमनीयकम् ॥ कृताचमनदेवेशस्वतः शु
द्धशिवापते ॥ शिवेगृहाणगन्धाढ्यमिदमाचमनीयकम् ॥ शुद्धेशुद्धिप्रदेदेविशिवभूषितवि
ग्रहे आचमनीयम् ॥ शंभोगृहाणतांबूलंपूगकर्पूरसंयुतं ॥ प्रसीदभगवन्शंभोसर्वज्ञामित
विक्रम ॥ शिवेगृहाणतांबूलमेलाकर्पूरसंयुतम् ॥ प्रसीदसस्मितेदेविसोमालिंगितविग्रहे ॥
तांबूलं० नीराजनंगृहाणेशबहुदीपविराजितम् ॥ स्वप्रकाशप्रकाशात्मन् प्रकाशितदिगंब
र ॥ नीराजनंगृहाणांबेसूर्य्यनीराजितप्रभे ॥ इत्यनेननीराजनम् ॥ गृहाणपरमेशानसरले
छत्रचामरे ॥ दर्पणंव्यजनंत्वीशसर्वदुःखविनाशक ॥ गृहाणोमेसुराराध्येसरलेछत्रचामरे ॥
दर्पणंव्यजनंचाद्येविद्याधारेनमोस्तुते ॥ इतिछत्रचामरादि ॥ इदंफलंमयादेवस्थापितंपुरत
स्तव ॥ तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि ॥ अनेनपूगीफलम् ॥ हिरण्यगर्भगर्भस्थं
हेमबीजंविभावसोः ॥ अनंतपुण्यफलदमतःशान्तिंप्रयच्छमे ॥ इत्यनेनदक्षिणाम् ॥ प्रद

क्षिणानमस्कारान्गृहाणपरमेश्वरि ॥ नर्तनंचमहादेवीशिवनाट्याप्रियेशिवे ॥ इतिप्रद
क्षिणानमस्काराः ॥ एवंप्रयत्नतःकार्यंशिवयोःपूजनंशिवम् ॥ शिवायाश्चप्रयत्नेनपूर्वो
क्तमपिपूजनम् ॥ यथा—उक्तमन्त्रंसमुच्चार्य्यपूर्वंयथाक्रमंशिवायनमः शिवंपूजयामि ॥
आवाहयामीतिमन्त्रस्तु भवान्याः परिकीर्तितः ॥ कपर्दिनेकपर्दंपूजयामि ॥ भाललो
चनाय॰भालंपू॰ सोमसूर्याग्निलोचनाय॥त्रिनेत्राणिपू॰ सुश्रोत्राय श्रोत्राणिपू॰ घ्राणगं
धाय घ्राणंपू॰ स्मृतिदन्ताय॰ दन्तान्पू॰ श्रुतिजिह्वाय॰ जिह्वांपू॰ कपोलाय॰
कपोलानिपू॰ ज्ञानोष्ठाय॰ ओष्ठान्पू॰ नीलकण्ठाय॰कण्ठंपू॰ भूरिवक्षसे॰वक्षांसिपू॰
हिरण्यबाहवे॰बाहून्पू॰ विश्वोदराय॰उदरंपू॰ विश्वोरवेन॰ ऊरूपू॰ विश्वजंघायनमः
जंघां॰ विश्वपदे॰ पादान्पू॰ विश्वनखायनमः नखान्पू॰ सर्वात्मकायनमः सर्वांगं
पूजयामि शिवायैनमः शिरःपूजयामि पृथुवेण्यै॰वेणीं॰सीमंतकुंकुमभालायै॰भालं॰॥

सोमसूर्याग्निलोचनायै॰लोचनानि॰ ॥ स्तुतिस्तोत्रायै॰ श्रोत्राणि॰ ॥ गंधप्रियायै॰घ्रा
णं॰॥ सुभगकपोलायै॰ कपोलौ॰॥ कुड्मलदंतायै॰दंतान्॰॥विद्याजिह्वायै॰ जिह्वां॰॥
बिंबोष्ठायै॰ओष्ठौ॰॥वृत्तकंठायै॰कण्ठं॰॥पृथुलकुचायै॰कुचौ॰ ॥विश्वगर्भायै॰उदरं॰
सुभगकट्यै॰ कटिं॰॥ दिव्योरुदेशायै॰ ऊरूं॰॥ वृत्तजंघायै॰ जंघां॰॥ लक्ष्म्या सेवित
पादुकायै॰ पादौ॰ ॥ महेश्वरप्रियायै॰ नखान्॰ ॥ शोभनविग्रहायै॰ सर्वांगंपूजयामि
इत्यंगपूजा ॥ अथषोडशस्तंभपूजा ॥ तत्रयजमानः प्राङ्मुखउपविश्यप्राणानायम्य
देशकालौस्मृत्वा श्रीमहारुद्रादिदेवताप्रीतये मंडपस्तंभदेवानांद्वारतोरणत्रिशूलपता
काध्वजसहितानांदिक्पतीनांचपूजनमहंकरिष्ये ॥ इतिसंकल्प्य मध्यवेद्याईशान
स्तंभे ॥ एह्येहिविप्रेंद्रपितामहेश हंसाधिरूढत्रिदशैकवंद्य ॥ श्वेतोत्पलाभासकुशां
बहस्तगृहाणपूजांभगवन्नमस्ते ॥ हंसपृष्ठसमारूढदेवतागणपूजित ॥ ईशकोणस्थितंस्तं

प्र. सं. भमलंकुरुजगत्पते ॥ ॐभूर्भुवः स्वः ब्रह्मन्निहागच्छइहतिष्ठ ॥ ब्रह्मणस्पते इतिऋक् ॥ मं. पू.
॥१४४॥ ॐ ब्रह्मणस्पतेत्त्वमुस्ययुन्तासूक्तस्यबोधितनयञ्चजिन्न्व ॥ विश्श्वन्तद्भद्रंयदवन्ति
देवाबृहद्वदेमविदथेसुवीराः ॥ यऽइमाविश्श्वा विश्श्वकर्म्मयोनः पितान्नपतेन्नस्यनो
देहि ॥ ३४॥५८ ॥ ब्रह्मजज्ञानमितियजुः॥ब्रह्मयज्ज्ञानम्प्रथमम्पुरस्ताद्विसीमतःसुरुचोवे
नऽआवः ॥ सबुध्न्याऽउपमाऽअस्य विष्ठाः सतश्श्चयोनिमसतश्चविवः ॥ १३ ॥
॥ ३ ॥ ब्रह्मब्राइतिसाम ॥ ब्रह्मयज्ञानमित्यनेनैवमंत्रेण ब्रह्मणः स्थापनम् ॥
ब्रह्मन् इहतिष्ठ ॥ गंधम् पुष्पम् धूपम् दीपम् नैवेद्यम् ॥एतानिगंधपुष्पधूपदीपनैवेद्यांता
निब्रह्मणेनमः ॥ एवंसंपूज्य प्रार्थयेत् ॥ वेदाधारायदेवायज्ञानगम्यायसूरये ॥ कमं
डलक्षमालाधृक्स्त्रुवहस्तायतेनमः ॥ ततः प्रार्थना ॥ कृष्णाजिनांबरधर पद्मा ॥१४४॥
सनचतुर्मुख ॥ जटाधरजगद्धातः प्रसीद कमलोद्भव सावित्र्यैनमः ॥ वास्तुदेवतायै

नमः ब्राह्मयैनमः गंगायैनमः ॥ स्तंभमालभ्य ऊर्ध्वऊषुणइतिपठेत् ॥ ऊर्द्ध्वऽऊषुणं
ऽऊतयेतिष्ठादेवोनसंविता ॥ ऊर्द्ध्वोवाजस्यसनितायदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥
॥ ११ । ४२ ॥ स्तंभशिरसिनागमात्रेनमः। आयंगौरितिमंत्रेणशाखाबंधनानिपूजयेत् ॥
आयङ्गौःपृश्निरक्रमीदसदन्मातरम्पुरः॥पितरञ्चप्प्रयन्त्स्वः ॥ ३ । ६ ॥ यतोयतः
समीहसेइतिमंत्रपाठः ॥ यतोयतःसमीहसेततोनोऽअभयंकुरु ॥ शन्नःकुरुप्प्रजाभ्योऽ
भयन्नःपशुभ्यः ॥ ६ । २२ ॥ अथआग्नेयमध्यस्तंभे ॥ आवाहयेत्तंगरुडोपरिस्थितं
मार्द्धदेहंसुरराजवंदितम् ॥ कंसांतकंचक्रगदाब्जहस्तंभजामिदेवंवसुदेवसूनुम् ॥ पद्मा
सनहृषीकेशकंसचाणूरमर्दन ॥ आगच्छभगवन्विष्णोस्तंभेस्मिन्सन्निधोभव ॥ भू
र्भुवः स्वः विष्णोइहागच्छइहतिष्ठ ॥ विष्णोर्नुकंवीर्याणीतिऋक् ॥ विष्णोर्नुकंवीर्य्याणि
प्प्रवोचंयः पार्थिवानिविममेरजांसि ॥ योऽअस्कभायदुत्तरंसधस्थंविचक्रमाण

 त्रेधोरुगायोविष्णवेत्त्वा ॥ ५ ॥ १८ ॥ इदंविष्णुरितियजुः ॥ इदंविष्णुर्विचक्रमेत्रेधानि
 दधेपदम् ॥ समूढमस्यपांसुरेस्वाहा ॥ ५ ॥ १५ ॥ इदादमेइतिसाम ॥ नमस्तेसर्वदे
वेशनमस्तेपुरुषोत्तम ॥ नमस्तेसर्वलोकायविष्णवेतेनमोनमः ॥ इतिनत्वाप्रार्थयेत् ॥
देवदेवजगन्नाथविष्णोयज्ञपतेविभो ॥ पाहिदुःखांबुधेरस्मान्भक्तानुग्रहकारक ॥ लक्ष्म्यै
नमः ॥ आदित्यनंदायैनमः ॥ वैष्णव्यैनमः ॥ ततोनिर्ऋतिमध्यस्तंभे ॥ एह्येहिगौरी
शपिनाकपाणेशशांकमौलेवृषभाधिरूढ ॥ देवाधिदेवेशमहेशनित्यंगृहाणपूजांभगव
न्नमस्ते ॥ गंगाधरमहादेवपार्वतीप्राणवल्लभ ॥ आगच्छभगवन्नीशस्त्वंभोस्मिन्संन्निधोभ
व ॥ भूर्भुवःस्वः शंकरइहागच्छइहतिष्ठ ॥ परिनोरुद्रस्येतिऋक् परिणोरुद्रस्यहेतिर्वृण
क्तुपरित्वेषस्यदुर्मतिरघायोः ॥ अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोकायतनयाय
मृड ॥ १६ ॥ ५० ॥ नमःशंभवायचेतियजुः ॥ नमःशंभवायचमयोभवायचनमः

शङ्कुरायंचमयस्कुरायंचु नमः शिवायंच शिवतंरायच ॥ १६ ॥ ४१ ॥ अं
वोराजेतिसाम ॥ नमस्तेऽस्त्वायुधेत इतिस्थापनम् ॥ शंकरायनमः ॥ इत्यादि
पूजनम् ॥ वृषवाहायदेवाय पार्वतीपतये नमः ॥ वरदायार्द्धकामाय नमश्चंद्रार्द्धमौ
लिने ॥ इतिनमस्कारः ॥ प्रार्थना ॥ पंचवक्त्रवृषारूढ त्रिलोचनसदाशिव ॥ चं
द्रमौलेमहादेवममस्वस्तिकरोभव ॥ गौर्यैनमः ॥ माहेश्वर्यैनमः ॥ शोभनायैनमः ॥
ततोवायव्यमध्यस्तंभे ॥ एह्येहिवृत्रघ्नगजाधिरूढसहस्रनेत्रत्रिदशैकराज ॥ शचीपते
शक्रसुरेशनित्यंगृहाणपूजांभगवन्नमस्ते ॥ शचीपतेमहाबाहो सर्वाभरणभूषित ॥
आगच्छभगवन्निंद्रस्तंभेस्मिन्सान्निधोभव ॥ इन्द्रइहागच्छ ॥ त्रातारमिंद्रमितिऋ
क् ॥त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमि
न्द्रꣳस्वस्तिनोमघवाधात्विन्द्रः ॥ २० ॥ ५० ॥ महाँइन्द्रोवज्रहस्तइतियजुः ॥

म. सं. मुहाँ२ऽइन्द्रोवज्रहस्तः३ षोडशीशर्म्मयच्छतु ॥ हन्तुपाप्मानय्योस्म्मान्द्वेष्टि ॥ मं. पू.
॥१४६॥ उपयामगृहीतोसिमहेन्द्रायत्वैषतेयोनिर्म्महेन्द्रायत्वा ॥ २६ ॥ १० ॥ इंद्रंनारइ
तिसाम ॥ इंद्रमहंवाणिजमितिस्थापनम् ॥ इंद्रायनमः इतिपूजनम् ॥ पुरंदरनमस्तेस्तु
वज्रहस्तनमोस्तुते ॥ शचीपतेनमःस्तेस्तुनमस्तेमेघवाहन ॥ इतिनमस्कारः॥प्रार्थना ॥
देवदेवगजारूढ पुरंदर शतक्रतो ॥ वज्रहस्त महाबाहो वाञ्छितार्थप्रदो भव ॥
इंद्राण्यैनमः ॥ आनंदायैनमः ॥ विभूत्यैनमः ॥ ततोबाह्यद्वादशस्तंभेषु ईशानकोणा
दारभ्यद्वादशदेवताःपूजयेत् ॥ आवाहयेत्तंद्विभुजंदिनेशंसप्ताश्ववाहंद्युमणिंग्रहेशम् ॥
सिंदूरवर्णप्रतिमावभासंभजामिसूर्यंकुलवृद्धिहेतुम् ॥ पद्महस्तमहाबाहोसप्तश्वेताश्ववा
हन ॥ आगच्छभगवन्भानो स्तंभेस्मिन्सन्निधोभव ॥ भूर्भुवः स्वः सूर्यइहागच्छ ॥ ॥१४६॥
चित्रंदेवानामितिऋक् ॥ चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यवरुणस्याग्नेः॥आप्रा

द्यावांपृथिवीऽअन्तरिक्षुर्ठंसूर्य्यंऽआत्माजगतस्तुस्थुषश्चुस्वाहा ॥४॥ ४२ ॥ आकृ
ष्णेनरजसेतियजुः ॥ आकृष्णेनुरजंसावर्त्तमानोनिवेशयन्नमृतुम्मर्त्यंञ्च ॥ हिरुण्ययें
नसविताथेनादेवोयातिभुवनानिपश्यन् ॥ ३३ ॥ ४३ ॥ उदुत्यमितिसाम ॥ उदुत्य
ञ्जातवेदसंदेवंवहन्तिकेतवंः ॥दृशेविश्वायुसूर्य्यर्ठस्वाहा ॥ ७ ॥ ४१ ॥ अदृश्रमस्यं
केतवइतिस्थापनम् ॥ ॐ अदृश्रमस्यकेतवोविरश्मयोजना ॥ ऽअनु ॥ भ्राजन्तोऽ
अग्नयोयथा ॥ उपयामगृहीतोसिसूर्यायत्त्वाभ्राजायैषतेयोनिःसूर्य्यायत्त्वाभ्राजाय
सूर्य्यंभ्राजिष्ठभ्राजिष्ठस्त्वन्देवेष्वसिभ्राजिष्ठोहम्मनुष्येषुभूयासम् ॥ ८ ॥ ४० ॥
सूर्यायनमः इतिपूजनम् ॥ नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे ॥
त्रयीमयायत्रिगुणात्मधारिणेविरंचिनारायणशंकरात्मने ॥ इतिनमस्कारः ॥ पद्मह
स्तरथारूढपद्मासनसुमंगल ॥ कृपांकुरुदयालोत्वंग्रहराजनमोस्तुते ॥ प्रार्थना ॥ गौ

प्र. सं. य्यैनमः॥भूत्यैनमः॥ सावित्र्यैनमः॥मंगलायैनमः ॥ ईशानपूर्वयोरंतरालस्तंभे ॥ आवा मं. पू.
॥१४७॥ हयेत्तंगणराजदेवंरक्तोत्पलाभासमशेषवंद्यम् ॥ विघ्नांतकंविघ्नहरंगणेशंभजामिरौद्रंस
हितंचसिध्द्या ॥ लंबोदरमहाकायगजवक्रचतुर्भुज ॥ आगच्छत्वंजगन्नाथस्तंभे
स्मिन्सन्निधोभव ॥ भूर्भुवः स्वः गणपतेइहागच्छ ॥ गणानांत्वाइतिऋक् ॥ गणा
नांत्वागणपतिꣳहवामहेप्प्रियाणान्त्वा प्प्रियपतिꣳहवामहे निधीनान्त्वांनिधिप
तिꣳऽहवामहेव्वसोमम ॥ आहमंजानिगर्ब्भधमात्वमंजासिगर्ब्भधम् ॥ २३ ॥
॥ १९ ॥ गणानांत्वाइत्यैवयजुः ॥ आतूनआइतिसाम ॥ गणास्त्वापगायंतुइति
स्थापनम् ॥ गणपतयेनमः पूजनम् ॥ नमस्तेब्रह्मरूपायविष्णुरूपायतेनमः ॥ नमस्ते
रुद्ररूपायकरिरूपायतेनमः ॥ इतिनमस्कारः ॥ लंबोदरमहाकायसततंमोदकप्रिय ॥ ॥१४७॥
गौरीसुतगणेशत्वंविघ्नराजप्रसीदमे ॥ प्रार्थना ॥ सरस्वत्यैनमः ॥ विघ्नहारिण्यैनमः

जयायैनमः ॥ विजयायैनमः ॥ ततः पूर्वाग्न्योरंतरालस्तंभे एह्येहिदंडायुधधर्म
राजकालांजनाभासविशालनेत्र ॥ विशालवक्षस्थलरुद्ररूपगृहाणपूजांभगवन्नमस्ते ॥
चित्रगुप्तादिसंयुक्तदंडमुद्गरधारक ॥ आगच्छभगवन्धर्मस्तंभेस्मिन्संन्निधोभव ॥
भूर्भुवः स्वः यमइहागच्छ ॥ यस्मिन्वृक्षेतिऋक् ॥ यमायत्वाइतियजुः ॥यमायत्वा
मुखायत्त्वासूर्य्यस्यत्त्वातपसे ॥ देवस्त्वासवितामद्ध्वानक्तुपृथिव्याः॑सꣳस्पृशस्पाहि ॥
अर्चिरसिशोचिरसितपोसि ॥ ३७ ॥ ११ ॥ नाकेसुपर्णइतिसाम ॥ यमोमृत्युर
थामाराइतिस्थापनम् ॥ यमायनमःपूजनम् ॥ ईषत्पीननमस्तेस्तुदंडहस्तनमोस्तुते ॥
महिषस्थनमस्तेस्तुधर्मराजनमोस्तुते ॥ इतिनमस्कारः ॥ धर्मराजमहाकायदक्षि
णाधिपते नमः ॥ रक्तेक्षणमहाबाहोममपीडांनिवारय ॥ प्रार्थना ॥ पूर्वसंध्यायैनमः ॥
जन्यैनमः ॥ क्रूरायैनमः ॥ नियंत्र्यैनमः ॥ ततोबाह्याग्निकोणस्तंभे एह्येहिनागें

द्रधराधरेशसर्वामरैर्वंदितपादपद्म ॥ नानाफणामंडलराजमान गृहाणपूजांभगवन्नम
स्ते ॥ आशीविषसमोपेत नागकन्याविराजित ॥ आगच्छनागराजेंद्र स्तंभे
स्मिन्सन्निधोभव ॥ भूर्भुवःस्वः नागराजइहागच्छ ॥ कालिकोनामसर्पइतिऋक् ॥
नमोस्तुसर्पेभ्यइतियजुः ॥ नमोस्तु सुर्प्पेभ्योयेकेचंपृथिवीमनु ॥ येऽअन्तरिक्षे
येदिवितेभ्यः सुर्प्पेभ्योनमः ॥ १३ ॥ ६ ॥ अभायिमाहेइतिसाम ॥ स्वप्नःस्वप्नाधिकरणे
इतिस्थापनम् ॥ नागराजायनमइतिपूजनम् ॥ नमः खेटकहस्तेभ्यस्त्रिभोगेभ्योनमो
नमः ॥ नमोभीषणदेहेभ्यःखड्गधृग्भ्योनमोनमः ॥ इतिनमस्कारः ॥ प्रार्थना ॥ खड्गखेट
धराः सर्पाःफणामंडलमंडिताः ॥ एकभोगाः साक्षसूत्रावरदाः संतुमेसदा ॥ मध्यमसं
ध्यायैनमः ॥ धरायैनमः ॥ पद्मायैनमः ॥ महापद्मायैनमः ॥ आग्नेयदक्षिणयोरंतरालस्तं
भे ॥ आवाहयामिदेवेशंषण्मुखंकृत्तिकासुतम् ॥ रुद्रतेजःसमुत्पन्नंदेवसेनासमन्वितम् ॥ ॥१४८॥

मयूरवाहनंशक्तिपाणिंवैब्रह्मचारिणम् ॥ आगच्छभगवन्स्कंदस्तंभेस्मिनन्सन्निधोभव ॥
भूर्भुवः स्वः स्कंदइहागच्छ ॥ बलित्थापर्वतानामितिऋक् ॥ यदक्रंदइतियजुः ॥ यद
क्रन्दः प्रथमञ्जायमान ऽउद्यन्त्समुद्रादुतवापुरीषात् ॥ श्येनस्यपक्षाहरिणस्यबाहू
ऽउपस्तुत्यंमहिंजातन्तेऽअर्वन् ॥ २८ ॥ १२ ॥ राजानइतिसाम ॥ अग्निरिवमन्योइति
स्थापनम् ॥स्कंदायनमःइतिपूजनम् ॥नमःस्कंदायशैवायघंटाकुक्कुटधारिणे॥पताकाश
क्तिहस्तायषण्मुखायनमोनमः ॥ इतिनमस्कारः ॥ मयूरवाहनस्कंदगौरीसुतषडान
न ॥ कार्तिकेयमहाबाहोदयांकुरुदयानिधे ॥ इतिप्रार्थना ॥ पश्चिमसंध्यायैनमः ॥
दक्षिणनिर्ऋत्यंतरालस्तंभे ॥ आवाहयामिदेवेशंभूतानांदेहधारिणम् ॥ सर्वाधारंमहावे
गमेघवाहनमीश्वरम् ॥ गंधर्वैःसहगंतारंत्रैलोक्यांतरचारिणम्॥आगच्छभगवन्वायोस्तं
भेस्मिनन्सन्निधोभव ॥ भूर्भुवःस्वः वायोइहागच्छ ॥ वायवायाइतिऋक ॥ तववायवृ

तस्पतेइतियजुः ॥ तवंवायवृतस्पतेत्वष्टुर्ज्जामातरद्भुत ॥ अवाᳫंस्यांवृणीमहे ॥
॥ २७ ॥ ३४ ॥ वातआवातुइतिसाम ॥ आनोनियुद्भिरितिस्थापनम् ॥ आनोंनियु
द्भिःशतिनींभिरध्वरᳫं सहस्रिणींभिरुपंयाहियज्ञम् ॥ वायोऽअस्मिन्त्सवंनेमादय
स्वयूयम्पांतस्वस्तिभिःसदांनः ॥ २७ ॥ २८ ॥ वायवेनमः पूजनम् ॥ नमोहरिणपृ
ष्ठस्थसमीरणनमोस्तुते ॥ धूम्रवर्णनमस्तेस्तुशीघ्रगामिन्नमोस्तुते ॥ इतिनमस्कारः ॥
धावद्धरिणपृष्ठस्थध्वजहस्तसमीरण ॥ दंडहस्तमृगारूढवरंदेहिवरप्रद ॥ प्रार्थना ॥
वायव्यैनमः ॥ गायत्र्यैनमः ॥ मध्यमसंध्यायैनमः ॥ ततोनिर्ऋतिस्तंभे ॥
आवाहयामिदेवेशंशशांकंरजनीपतिम् ॥ क्षीरोदधिसमुद्भूतंहरमौलिविभूषणम् ॥ सुधा
करंद्विजाधीशंत्रैलोक्यहिमकारकम् ॥ ओषध्याप्यायनकरंसोमकंदर्पवर्द्धनम् ॥ आग ॥१४९॥
च्छभगवन्सोमस्तंभेस्मिन्सन्निधोभव ॥ भूर्भुवःस्वः सोमइहागच्छ ॥ आप्यायस्व

तित्रिक ॥ आप्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यम् ॥ भवावाजस्यसंगथे॥१२।११२
इदमेवयजुः ॥ चन्द्रमाआऊचाइतिसाम॥इमंदेवाअसपत्नमितिस्थापनम् ॥ इमन्देवा
ऽअसपत्नठंसुवद्ध्वम्महतेक्षत्राय ॥ महतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्येन्द्रिया
य॥ इमममुष्यपुत्रममुष्यैपुत्रमस्यैविशऽएषवोमीराजासोमोस्म्माकंब्राह्मणानाᳪराजा
॥ १० ॥१८ ॥ सोमायनमइतिपूजनम् ॥ अत्रिपुत्रनमस्तेस्तुनमस्तेशशलांछन॥श्वेतां
बरनमस्तेस्तुतारापतेनमोस्तुते ॥ इतिनमस्कारः ॥ अत्रिपुत्रनिशानाथद्विजराज
निशाकर ॥ सोमत्वंसौम्यभावेनग्रहपीडांनिराकुरु ॥ प्रार्थना ॥ सावित्र्यैनमः ॥ अमृत
कलायैनमः ॥ विजयायैनमः॥पश्चिमसंध्यायैनमः॥ततोनिर्ऋतिपश्चिमयोर्मध्यस्तंभे ॥
आवाहयामिदेवेशंसलिलस्याधिपंप्रभुम् ॥ शंखपाशधरंसौम्यंवरुणंयादसांपतिम् ॥
कुंभीरथसमारूढंमाणिरत्नसमन्वितम् ॥ आगच्छदेववरुणस्तंभेस्मिन्सन्निधोभव ॥ भू

र्भुवः स्वः वरुणइहागच्छ ॥ तत्त्वायामीतिऋक् ॥ तत्त्वांयामिब्रह्मणावन्दमानस्तदा
शांस्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशंसमानऽआयुः प्रमोषीः ॥
॥ २१ ॥ इमंमेवरुणेतियजुः ॥ इमम्मेवरुणश्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके
॥ २१ ॥ १ ॥ यदाकदाइतियजुः ॥ तत्त्वायामीतिपूर्वोक्तेनैवमंत्रेणस्थापनम् ॥वरुणायन
मः॥ पूजनम् ॥ वरुणायनमस्तेस्तुनमःस्फटिकदीप्तये ॥ नमस्तेश्वेतहारायजलेशायन
मोनमः ॥ इतिनमस्कारः ॥ शंखस्फटिकवर्णाभश्वेतहारांबरावृत ॥ पाशहस्तमहाबा
होदयांकुरुदयानिधे ॥ प्रार्थना ॥ वारुण्यैनमः ॥ पाशधारिण्यैनमः ॥ बृहस्पतयेनमः॥
ततःपश्चिमवायव्यांतरालस्तंभे ॥ अष्टवसून्आवाहयेत् ॥ ध्रुवोध्वरश्चसोमश्चआपश्चैवा
निलोनलः ॥ प्रत्यूषश्चप्रभासश्चवसवोष्टौप्रकीर्तिताः ॥ आवाहयामिदेवेशान्वसूनष्टौ
महाबलान् ॥ सौम्यमूर्तिधरान्देवान्दिव्यायुधकरान्वितान् ॥ शुद्धस्फटिकसंका

शान् नानावसुविराजितान् ॥ अश्वारूढान्दिव्यवस्त्रान्सर्वालंकारभूषितान् ॥ आ
वाहयामिस्तंभेस्मिन् वसवोष्टौसुखावहान् ॥ ॐभूर्भुवःस्ववसवइहागच्छत ॥ सुगावोदे
वाइतिऋक् ॥सुगावोदेवाःसदनाअकर्म्मयऽआजग्मेदंसवनञ्जुषाणाः ॥ भरमाणावह
मानाहवीᳫंष्यस्मेधत्तवसवोवसूनिस्वाहा ॥८।१८॥ वसवस्त्वाकृण्वंतुइतियजुः॥वस
वस्त्वाकृण्वन्तुगायत्रेणच्छन्दसाङ्गिरस्वद्ध्रुवासि पृथिव्यसिधारयामयिप्रजाᳫं रा
यस्पोषङ्गौपत्यᳫंसुवीर्य्यᳫं सजातान्यजमानाय रुद्रास्त्वाकृण्वन्तुत्रैष्टुभेनच्छन्द
साङ्गिरस्वद्ध्रुवास्यन्तरिक्षमसिधारयामयिप्रजाᳫंरायस्पोषङ्गौपत्यᳫं सुवीर्य्यᳫं स
जातान्न्यजमानायादित्यास्त्वाकृण्वन्तु जागतेनच्छन्दसाङ्गिरस्वद्ध्रुवासिद्यौरसि
धारयामयिप्रजाᳫं रायस्पोषङ्गौपत्यᳫं सुवीर्य्यᳫं सजातान्न्यजमानायविश्वेत्त्वा
देवावैश्वानराःकृण्वन्त्वानुष्टुभेनच्छन्दसाङ्गिरस्वद्ध्रुवासिदिशोसिधारयामयिप्रजा

ध्रु रायस्पोषंङ्गौपुत्यर्ठ॰सुवीर्य्यंर्ठसजातान्यजमानाय ॥ ११ ॥ ५८ ॥ इदंवसाऊ इ
तिसाम॥ वसोःपवित्रमितिमंत्रेणाष्टवसूनांस्थापनम् ॥ वसोः॑ पुवित्रंमसिशतधा॑रंवसोः॑
पुवित्रंमसिसुहस्रंधारम् ॥ देवस्त्वांसविताप्पुनातुवसोः॑पुवित्रेणशुतधा॑रेणसुप्प्वाकाम
धुक्षः॑॥ १ ॥ ३ ॥वसुभ्योनमः ॥ पूजनम् ॥ नमस्करोमिदेवेशान्नानावसुविराजितान्॥
शुद्धस्फटिकसंकाशान्दिव्यायुधकरान्वसून् ॥ इतिनमस्कारः ॥ दिव्यवस्त्रादिव्यदे
हाः पुष्पमालाविभूषिताः ॥ वसवोष्टौमहाभागा वरदाः संतुमेसदा ॥ प्रार्थना ॥ विन
तायैनमः ॥ अणिम्नेनमः ॥ भूत्यैनमः ॥ गरिम्णेनमः ॥ ततोवायव्यस्तंभे आवाहया
मिदेवेशंधनदंपदपूजितम् ॥ महाबलंदिव्यदेहंनरयानगतंविभुम् ॥ दिव्यमालांबरधरंग
दाहस्तंमहाभुजम् ॥ आगच्छयक्षराजत्वंस्तंभेस्मिन्सन्निधोभव ॥ धनदइहागच्छ ॥
सोमोधेनुमितिऋक् ॥ सोमोधेनुर्ठसोमोऽअर्वन्तमाशुर्ठ॰सोमोवीरङ्कर्म्मण्यन्ददाति ॥

सादुन्न्यंविदुत्थ्यर्ठ-सुमेयंम्पितृश्श्रवणंय्योददांशदस्म्मै ॥ ३४ ॥ २१ ॥ इदमेवयजुः॥
हर्ठ-सइति साम ॥ हर्ठ-सः शुचिषद्वसुरन्तरिक्षसद्धोतांवेदिषदतिथिर्दुरोणसत् ॥ नृष
द्वरसदृतसद्योमसदब्जागोजाऽऋतजाऽअद्रिजाऽऋतम्बृहत् ॥ १० ॥ २४ ॥ सोमो
राजाइत्यनेनवयर्ठसोमव्रतेइत्यनेनवा स्थापनम् ॥ वयर्ठ-सोमव्रतेतवमनंस्तनूषुबिभ्र
तः ॥ प्रजावन्तः सचेमहि ॥ ३ ॥ ५६ ॥ धनदायनमः इति पूजनम् ॥ यक्षराजनमस्ते
स्तुगदापाणेनमोस्तुते ॥ इतिनमस्कारः ॥ दिव्यदेहधनाध्यक्षपीतांबरगदाधर ॥ उत्त
रेशमहाबाहोवांछितार्थफलप्रद ॥ प्रार्थना ॥ अदित्यैनमः ॥ लघिन्यैनमः ॥ सिनीवा
ल्यैनमः ॥ ततो वायव्योत्तरयोरंतरालस्तंभे आवाहयामिदेवेशंगुरुंत्रिदशपूजितम् ॥
हेमगोरोचनावर्णपीनस्कंधंसुवक्षसम् ॥ शंखंचकलशंचैवपाणिभ्यामिहबिभ्रतम् ॥ बृह
स्पतेसमागच्छस्तंभेस्मिन्सन्निधोभव ॥ बृहस्पतेइहागच्छ॥इन्द्रआसान्नेताइतिऋक्॥

प्र. सं. इन्द्रं॑ऽआसान्नेताबृह॒स्प्पति॒र्द्दक्षि॑णाय॒ज्ञः पु॒रऽए॑तु॒सोम॑÷ ॥ दे॒वसे॒नाना॑मभिभञ्जन्ती॒नांज मं. पू.
॥१५२॥ यं॑तीनाम्म॒रु॒तौ॑य॒न्त्वग्रं॑म् ॥१७॥४॥ बृहस्पतेअ॑तियद॒र्य्यंइतिय॒जुः ॥ बृहं॑स्प्पते॒अ॒ति॒यद्
य्यों॑ऽअर्हा॑द्द्युम॒द्विभा॑ति॒क्रतु॑म॒ज्जने॑षु ॥ यद्दीद॒य॒च्छव॑सऽऋतप्प्र॒जातु॒तद॒स्म्मासु॒द्द्रवि॑ण
न्धेहिचि॒त्रम् ॥ उ॒प॒या॒मगृ॑हीतो॒सिबृ॒ह॒स्प्पु॒त॑येत्वै॒षते॒यो॒निर्बृ॑ह॒स्प्पत॑येत्वा ॥ २६ ॥३॥ इ
न्द्रआसान्नेता इदमेव साम ॥ अर्यमणंबृहस्पातिमित्यनेनमंत्रेण बृहस्पतेअतियदर्य्य
इत्यनेनवा स्थापनम् ॥ बृहस्पतयेनमः पूजनम् ॥ ब्रह्मपुत्रनमस्तेस्तुपीतध्वजनमोस्तु
ते ॥ त्रिदशार्चितदेवेशसिंधूद्भवनमोस्तुते ॥ इतिनमस्कारः ॥ पूजितोसियथाशक्त्यादंड
हस्तबृहस्पते ॥ क्रूरग्रहाभिभूतस्यशांतिंदेवगुरोकुरु ॥ प्रार्थना ॥ पूर्णमास्यैनमः ॥ सा
वित्र्यैनमः ॥ उत्तरेशानयोरंतरालस्तंभे आवाहयामिदेवेशंविश्वकर्माणमीश्वरम् ॥ ॥१५२॥
मूर्त्तामूर्त्तकरंदेवंसर्वकर्त्तारमीश्वरम् ॥ त्रैलोक्यसूत्रकर्त्तारंद्विभुजंसर्वदर्शिनम् ॥ आगच्छ

विश्वकर्मस्त्वंस्तंभेस्मिन्सन्निधोभव ॥ भूर्भुवः स्वः विश्वकर्मन्इहागच्छ ॥ विश्वक
र्मन्हविषाइतिऋक् ॥ विश्वकर्म्मन्हविषावर्धनेनत्रातारमिन्द्रमकृणोरवध्यम् ॥ त
स्मैविशः समनमन्तपूर्वीरयमुग्रोविहव्योयथासत् ॥ १७ ॥ २४ ॥ इदमेवयजुः ॥ उ
पयामगृहीतोसीतिस्थापनम् ॥ उपयामगृहीतोसीन्द्रायत्वाविश्वकर्मणऽएषतेयो
निरिन्द्रायत्वाविश्वकर्म्मणे ॥ ८ ॥ ४५ ॥ विश्वकर्मणेनमः पूजनम् ॥ नमामिवि
श्वकर्माणंद्विभुजंसर्वदर्शिनम्॥ त्रैलोक्यसूत्रकर्त्तारंमहाबलपराक्रमम्॥इतिनमस्कारः॥
प्रसीदविश्वकर्मस्त्वंशिल्पशास्त्रविशारद ॥ सुदंडपाणेद्विभुजतेजोमूर्तिधरप्रभो ॥
प्रार्थना ॥ सिनीवाल्यैनमः ॥ वास्तुदेवतायैनमः ॥ सावित्र्यैनमः ॥ ततः पुष्पांजलिंगृही
त्वा ॥ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः ॥ सर्वेभ्यः सर्वशर्वेभ्योनमस्तेअस्तुरुद्र
रूपेभ्यः ॥ इतिमंत्रेण मंडपेपुष्पांजलिंविकिरेत् ॥ इति षोडशस्तंभपूजा ॥ ॐनाग

81

मात्रेनमः ॥ इतिवलिकाकाष्ठानिपूजयेत् ॥ ॐ सर्वेभ्योनमः ॥ इति शाखोद्बंधना
निपूजयेत् ॥ ततः पश्चिमद्वारेणनिर्गत्यपूर्वदिक्प्रभृतिद्वारतोरणपूजामारभेत ॥ अ
थद्वारतोरणपूजा ॥ मंडपस्यपुरोद्वाराद्धस्तमात्रोपरिन्यस्ततोरणस्यपार्श्वेयथाविधि
नाकलशद्वयंसंस्थाप्य ॥ कयानश्चित्रइतिमंत्रेणराहुमावाहयेत् ॥ कयानश्चित्रऽ
आभुवदूतीसदावृधुःसखा ॥ कयाशचिष्ठयावृता ॥ २६ ॥ ४ ॥ बृहस्पतेअतियदर्यं
इतिमंत्रेणबृहस्पतिमावाहयेत् ॥ बृहस्पतेऽअतियदर्योऽअर्हाद्युमद्विभातिक्रतुमज्ज
नेषु । यद्दीदयच्छवसऽऋतप्रजाततदस्मासुद्रविणन्धेहिचित्रम् ॥ उपयामगृहीतो
सिबृहस्पतयेत्वैषतेयोनिर्बृहस्पतयेत्वा ॥ २६ ॥ ३ ॥ बृहस्पतयेनमः ॥ राहवेन
मः ॥ इतिचंदनादिभिः संपूज्य कलशे ध्रुवाद्यौरितिमंत्रेणध्रुवं आवाहयेत् ॥ ध्रुवाय
नमः इतिपूजनम् ॥ अथतोरणस्यावाहनम् ॥ प्राचीदिशंसमाश्रित्यसुदर्शनामतोरणम् ॥

महावीर्यंमहाकायमिंद्रायुधसमप्रभम् ॥ अस्मिन्महोत्सवेयज्ञेक्रतूनांप्रवरेशुभे॥एह्येहि अश्वत्थतोरणऋग्वेदाधिष्ठितइंद्रदैवत्यमहातोरण एनंयज्ञंरक्षसर्वविघ्नान्निवारय ॥ अथतोरणध्यानम् ॥ पूर्वस्यांदिशियज्ञस्यसुदृढंनामतोरणम्॥शुक्लवस्त्रपरिच्छन्नंशुक्लमाल्यविभूषितम् ॥ महावीर्यंमहाकायंसिंदूरसदृशंशुभम् ॥ इतिध्यात्वा ॥ सुदृढतोरणायनमः ॥ इतिपाद्यादिभिःपूजनम्॥ततःकृतयुगायनमः ॥ इतिकृतयुगमावाह्यपूजयेत् ॥ अग्निमीळेइतिमंत्रेणऋग्वेदमावाह्यपूजयेत् ॥ ॐ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजम् ॥ होतारंरत्नधातमम् ॥ ऋग्वेदःपद्मपत्राक्षोगायत्रःसोमदैवतः ॥ अत्रिगोत्रस्तुविप्रेंद्रऋत्विक्त्वंममखेभवेतिध्यानम् ॥ दक्षिणशाखायांधात्रेनमः ॥ इत्यावाह्यपूजयेत् ॥ उत्तरशाखायांविधात्रेनमः ॥ इत्यावाह्यपूजयेत् ॥ ऊर्ध्वंगणेशायनमः ॥ इत्यावाह्यपूजयेत् ॥ अधोदेहल्यांद्वारश्रियैनमइत्यावाह्यपूजयेत् ॥ देहलीमध्यभूमौवास्तुपुरुषाय

नमः ॥ इतिवास्तुपुरुषमावाह्यपूजयेत् ॥ त्रातारमितिमंत्रेणइंद्रमावाह्यपूजयेत् ॥ त्रा
तारमिन्द्रमवितारमिन्द्रꣳ हवेहवेसुहवꣳशूरमिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳ
स्वस्तिनोमघवाधात्विन्द्रः ॥ २० ॥ ५० ॥ अथत्रिशूलपूजा ॥ मंगलाभिधत्रिशूलाय
विष्णुदैवतायनमः ॥ इदंविष्णुरितिमंत्रेणविष्णुमावाह्यपूजयेत् ॥ इदंविष्णुर्विचक्रमे
त्रेधानिदधेपदम् ॥ समूढमस्यपाꣳसुरेस्वाहा ५ । १५ ॥ अथत्रिशूलशृंगेषुप्रदक्षिणक्रमेण
आदित्यन्यासः ॥ प्रथमेशृंगेइंद्रंद्वितीयेशृंगेधातारं तृतीयेशृंगेभगं एवंसंपूज्यप्रार्थयेत् ॥
पूजयामीहदेवेशशिवोभववरप्रद ॥ रिपून्निवारयाशुत्वंयज्ञरक्षाकरोभव ॥ इतिपूर्वतोरण
पूजा ॥ अथदक्षिणतोरणपूजा ॥ तत्रकलशंसंस्थाप्य ॥ तत्रस्योनापृथिवीतिमंत्रेणपृथि
वीमावाह्य पृथिव्यैनमः इतिपूजयेत् ॥ स्योनापृथिवीनोभवानृक्षरानिवेशनी ॥ यच्छा
नःशर्म्मसप्रथाः ॥ ३६ ॥ १३ ॥ आकृष्णेनेतिसूर्यमावाह्यपूजयेत् ॥ आकृष्णेनरज

साव्वर्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यं
न् ॥ ३३ ॥ ४३ ॥ अग्निर्मूर्द्धादिवइतिमंत्रेणमंगलमावाह्यपूजयेत् ॥ अग्निर्म्मूर्
द्धादिवः ककुत्पतिः पृथिव्याऽअयम् ॥ अपाꣳरेताꣳसिजिन्वति ॥ इन्द्रस्य
त्वौजसासादयामि ॥ १३ । १४ ॥ अथतोरणध्यानम् ॥ दक्षिणांदिशमाश्रित्यविकटंना
मतोरणम् ॥ महावीर्यमहाकायंभिन्नांजनसमप्रभम् ॥ एह्येहिअस्मिन्औदुंबरतोरणय
ज्ञंरक्षसर्वविघ्नान्निवारयइत्यावाह्य ॥ इषेत्वेतिमंत्रेणतोरणमालभ्य विकटतोरणायनम
इतिपूजयेत् ॥ इषेत्त्वोर्ज्जेत्त्वावायवस्थदेवोवः सविताप्रार्प्पयतुश्रेष्ठतमायकर्म्मणऽ
आप्यायद्ध्वमघ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशतमाघशं
ꣳसोध्रुवाऽअस्मिन्गोपतौस्यातबह्वीर्य्यजमानस्यपशून्पाहि ॥ १ । १ ॥ विंध्या
द्रयेनमः ॥ त्रेतायुगायनमः ॥ यमायत्वेतियमंआह्यपूजयेत् ॥ यमायत्वामुखाय

त्वासूर्य्यस्यत्वातपेस ॥ देवस्त्वांसवितामद्ध्वानक्तुपृथिव्याःसꣳस्पृशस्पाहि ॥ अ
र्चिरसिशोचिरसितपोसि ॥३७॥ ११ ॥ दक्षिणशाखायांधात्रेनमः ॥ वामशाखायांविधा
त्रेनमः ॥ उत्तरांगेगणेशायनमः ॥ अधोदेहल्यांद्वारश्रियैनमः ॥ देहलीमध्यभूमौ
वास्तुपुरुषायनमः ॥ अथत्रिशूलपूजा ॥ शत्रुघ्ननाम्नेरुद्रदैवतायत्रिशूलायनमः ॥
मानस्तोके इतिमंत्रेणरुद्रमावाह्यपूजयेत् ॥ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमा
नोऽअश्वेषुरीरिषः ॥ मानोवीरारुद्रभामिनोवधीर्हविष्मन्तःसदमित्वाहवामहे
॥ १६ ॥ १६ ॥ त्रिशूलश्रृंगेषुप्रदक्षिणक्रमेणपूष्णेनमः ॥ मित्रायनमः ॥ वरुणायनमः
इत्यादित्यन्यासः ॥ एवंसंपूज्यप्रार्थयेत् ॥ वृषस्कंधसमारूढशूलहस्तवरप्रद ॥
यज्ञघ्नान्वारयाशुत्वंपूजितोसिमयाप्रभो ॥ इति दक्षिणतोरणपूजा ॥ अथपश्चिमतो
रणपूजा ॥ तत्रकलशद्वयंसंस्थाप्य ॥ अन्नात्परिस्रुतइतिशुक्रमावाह्यपूजयेत् ॥

अन्नात्परिस्रुतोरसम्ब्रह्मणा व्यपिबत्क्षत्रम्पयः सोमम्प्रजापतिः ॥ ऋतेनसत्यमि
न्द्रियंविपानꣳशुक्रमन्धसऽइन्द्रस्येंद्रियमिदम्पयोमृतम्मधु ॥ १८ ॥ ७५ ॥ उद्बु
ध्यस्वेतिमंत्रेणबुधमावाह्यपूजयेत् ॥ उद्बुध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्त्तेसꣳसृजे
थामयञ्च ॥ अस्मिन्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत॥१५॥
॥ ५४ ॥ अथध्यानंआवाहनंच ॥ प्रतीचींदिशमाश्रित्यसुभीमंनामतोरणम् ॥ महा
वीर्यंमहाकायंसुवर्णसदृशप्रभम् ॥ एह्येहिसामवेदाधिष्ठितप्लक्षतोरणवरुणदैवतएनं
यज्ञंरक्ष सर्वविघ्नान्निवारय ॥ अग्नआयाहीतिमंत्रेण तोरणालंभः ॥ अग्नऽआयाहि
वीतयेगृणानोहव्यदातये॥निहोतासत्सिबर्हिषि ॥ भीमाख्यतोरणायनम इतिपूजनम् ॥
हेमकूटाचलायनमः ॥ द्वापरयुगायनमः ॥ दक्षिणशाखायांधात्रेनमः ॥ वामशा
खायांविधात्रेनमः ॥ उत्तरांगेगणेशायनमः ॥ अधोदेहल्यां द्वारश्रियैनमः ॥ देह

लीमध्येवास्तुपुरुषायनमः ॥ अथत्रिशूलपूजा ॥ पुत्रप्रदाभिधायब्रह्मदैवतायत्रिशूला
यनमः ॥ त्रिशूलशृंगेषु प्रदक्षिणक्रमेण आदित्यान्पूजयेत् ॥ ॐ अर्यम्णेनमः ॥ ॐ
अंशवेनमः ॥ ॐविवस्वतेनमः ॥ ब्रह्मजज्ञानमितिमंत्रेणब्रह्माणमावाह्यपूजयेत् ॥ ब्रह्म
जज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोवेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यविष्ठाः
सतश्चयोनिमसतश्चविवः ॥ १३ ॥ ३॥ एवंसंपूज्यप्रार्थयेत् ॥ हंसपृष्ठसमारूढकमं
डलुधरप्रभो॥ यज्ञघ्नान्वारयाशुत्वंपूजितोसिमयाप्रभो॥ इतिपश्चिमतोरणपूजा ॥ अथो
त्तरतोरणपूजा ॥ तत्रकलशद्वयंसंस्थाप्य ॥ इमंदेवाइतिमंत्रेणसोममावाह्यपूजयेत् ॥
इमन्देवाऽअसपत्नꣳसुवध्वम्महते क्षत्रायमहतेज्ज्यैष्ठ्याय महतेजानराज्ज्यायेन्द्र
स्येन्द्रियाय ॥ इममुमुष्ष्यपुत्रममुष्ष्यैपुत्रमस्यैविशऽएषवोमीराजासोमोऽस्म्माकं
म्ब्राह्मणानाꣳराजा ॥ १० ॥ १८॥ शन्नोदेवीरितिमंत्रेणशनिमावाह्यपूजयेत् ॥ श

न्नोंदेवीरभिष्टंयुऽआपोभवन्तुपीतयें ॥ शय्योरभिस्रवन्तुनः ॥ ३६ ॥ १२ ॥ अथ
तोरणध्यानमावाहनंच ॥ उत्तरांदिशमाश्रित्यसुप्रभंनामतोरणम् ॥ महावीर्यंमहा
कायंशुद्धस्फटिकसन्निभम् ॥ एह्येहिअथर्वाधिष्ठितन्यग्रोधतोरणसोमदैवतएनंयज्ञंरक्ष
सर्वविघ्नान्निवारय ॥ शन्नोदेवीतिमंत्रेण तोरणालंभः ॥ शन्नोंदेवीरभिष्टंयुऽआपो
भवन्तुपीतयें ॥ शय्योरभिस्रवन्तुनः ॥ ३६ ॥ १२ ॥ सुप्रभतोरणायनमः ॥ इति
पूजनम् ॥ हिमाचलायनमः ॥ कलियुगायनमः ॥ सोमायनमः ॥ दक्षिणशाखायांधात्रे
नमः ॥ वामशाखायांविधात्रेनमः॥उत्तराङ्गगणेशायनमः॥अधोदेहल्यांद्वाराश्रियैनमः॥
देहलीमध्येवास्तुपुरुषायनमः ॥ अथत्रिशूलपूजा ॥ उत्तमनाम्नेसोमदैवतायत्रिशूलाय
नमः त्रिशूलशृंगेषुप्रदक्षिणंसोममावाह्यपूजयेत् ॥हुंऽसः शुचिषद्वसुरन्तरिक्षसद्धोता
वेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऽऋतजाऽअद्रिजाऽऋ

तम्बूहत् ॥ १० ॥ २४ ॥ एवंसंपूज्यप्रार्थयेत् ॥ नरयानसमारूढगदाहस्तवरप्रद ॥
विघ्नान्निवारयाशुत्वं पूजितोसिमयाप्रभो ॥ देवास्तोरणरूपेण संस्थितायज्ञमंडपे ॥
विघ्नविध्वंसनार्थंवैरक्षार्थंत्वध्वरस्यच ॥ इतिसंप्रार्थ्य नमस्कुर्यात् ॥ इतितोरणपू
जा ॥ अथसादिक्पालद्वारपूजा ॥ तत्रपूर्वद्वारदेवतावाहनम् ॥ आयाहिवज्रसंघा
तपूर्वद्वारकृपाधिप ॥ ऋग्वेदाधिपतेनाम्ना सुशोभननमोस्तुते ॥ द्वारशाखयोर्ध्रु
वंअध्वरंचेतिवसुद्वयमावाह्यपूजयेत् ॥ शृंगेषुशाखयोश्चवस्त्राणिबध्वा शाखामूलयो
र्धान्यपुंजोपरिवारिपूर्णौ प्रशांताशिशिरनामानौ जातबीजांकुरशरावपिहितौ कलशौ
आजिघ्रेतिमंत्रेणप्रतिष्ठाप्यगंधादिनासंपूज्यद्वारदेशेइंद्रमावाह्यपूजयेत् ॥ ॐइंद्रःसुरप
तिः श्रेष्ठोवज्रहस्तोमहाबलः ॥ सर्वयज्ञाधिपोदेवस्तस्मैनित्यंनमोनमः ॥ इंद्रायाहि ॥१६७॥
चित्रभानोइतिमंत्रेणपीतांपताकांपीतंध्वजंचआलभ्य ॥ त्रातारमिन्द्रमितिमंत्रेणतोर

णोपरिनिधानम् ॥ इन्द्रायांहिचित्रभानोसुताऽइमेत्त्वायवः ॥ अण्वीभिस्तनांपूतासः ॥२०॥२८॥ त्रातारमिन्द्रंमवितारमिन्द्रꣳ हवेहवेसुहवꣳ शूरमिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्विन्द्रः ॥ २०॥५०॥ योमेदंडइतिसर्वत्रदंडोच्छ्रयणम् ॥ योमेदण्डः परापतद्वैहायसोधिभूम्यान्तमहंपुनरादद ॥ आयुषेब्रह्मणेब्रह्मवर्चसाय सुमंगलनाम्नेगणेशाधिष्ठितायपूर्वद्वारायनमः ॥ शाखयोर्गंगायैनमः ॥ यमुनायैनमः ॥ द्वारशाखयोरेव ॐ भूर्लोकायनमः ॥ ॐ भुवर्लोकायनमः ॥ आदित्यायनमः ॥ सोमायनमः ॥ दक्षिणशाखायांधात्रेनमः ॥ वामशाखायांविधात्रेनमः ॥ उत्तरांगेगणेशायनमः ॥ अधोदेहल्यांद्वारश्रियैनमः ॥ देहलीमध्येवास्तुपुरुषायनमः ॥ ध्वजेकुमुदायनमः ॥ पताकायाम् ॐ हैतुकायनमः ॥ ॐ क्षेत्रपालायनमः ॥ तत्रैव ब्रह्मणेनमः ॥ रुद्रायनमः ॥ देवेभ्योनमः ॥ सिद्धेभ्योनमः ॥ विद्याधरेभ्योनमः ॥

पन्नगेभ्योनमः ॥ द्वारशाखयोः नंदिनेनमः ॥ महाकालायनमः ॥ इति द्वारयोः ॥
एवंद्वारंसंपूज्य द्वारस्थितकलशेद्वारेवा इन्द्रमावाहयेत् ॥ एह्येहिसर्वामरसिद्धसा
ध्यैरभिष्टुतोवज्रधरोमहेशः ॥ संवीज्यमानोप्सरसांगणेन रक्षाध्वरं नोभगवन्नम
स्ते ॥ भो इन्द्रइहागच्छइहातिष्ठ इतिआवाह्य ॥ ॐ इंद्रंपरेवरेमध्यमासुः इन्द्रंयांतो
वसितामइंद्रम् ॥ इन्द्रंक्षियंतउतयुध्यमाना इन्द्रंनरोवाजयंतोहवंते ॥ इत्यनेनइन्द्र
सन्निधानम् ॥ ततः त्रातारमिंद्रमिति मंत्रेण इन्द्रायसामगायत इतिमंत्रेण वा
इन्द्रस्यसर्वोपचारैः पूजनम् ॥ ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमि
न्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳ स्वस्तिनोमघवाधात्विन्द्रः ॥ २० ॥
॥ ५० ॥ इन्द्रायसामंगायतविप्रायबृहतेबृहत ॥ धर्म्मकृतेविपश्चितेपनस्यवे ॥
अथ बलिदानम् ॥ इन्द्रायसांगायसपरिवारायसशक्तिकाय इमं घृतौदनबलिं सम

र्प्पयामि ॥ भोइन्द्र अस्ययजमानस्यसकुटुंबस्यसपरिवारस्य आयुःकर्ताक्षेमकर्त्ता तुष्टिकर्ता पुष्टिकर्ता वरदोभव ॥ इतिबलिंसमर्प्प्यआचामेत् ॥ अथनमस्कारः ॥ इंद्रः सुरपतिः श्रेष्ठोवज्रहस्तोमहाबलः ॥ शतयज्ञाधिपोदेवस्तस्मैन्नित्यंनमोनमः ॥ इतिनत्वाप्रार्थयेत् ॥ शचीपतेगजारूढवज्रहस्तसुराधिप ॥ पूर्वावकाशंयुष्माभीरक्षणीयंप्रयत्नतः ॥ इतिप्रार्थना ॥ अग्निमीळेइतिमंत्रेणऋग्वेदमावाह्यपूजयेत् ॥ अग्निमीळेपुरोहितंयज्ञस्य देवमृत्विजंम् ॥ होतारंरत्नधातमम् ॥ ऋग्वेदःपद्मपत्राक्षोगायत्रः सोमदैवतः ॥ अत्रिगोत्रस्तुविप्रेन्द्रऋत्विक्त्वंमेमखेभवेतिध्यानम् ॥ ऋग्वेदप्रतिनिधित्वेनऋग्वेदीयंब्राह्मणं गंधादिनापूजयेत् ॥ तत्रपूर्वद्वारे श्रीसूक्तंपवमानंच पौरुषंरुद्रसूक्तंचवामदेव्यंतथैवचेति ब्राह्मणकर्तृकोद्वारपालजपः ॥ इतिपूर्वद्वारपूजा ॥ अथाग्नेयकोणेगत्वा ॥ तत्रकलशंसंस्थाप्य ॥ पुंडरीकायनमः ॥ इतिसंपूज्य ॥ छाग

प्र. सं. स्थमग्निंरक्तवर्णंध्यात्वा कलशेआवाहयेत् ॥ एह्येहिसर्वामरहव्यवाहमुनिप्रवर्यैरभि मं. पू.
॥१५९॥ तोभिजुष्ट ॥ तेजोवनीलोकगणेनसार्द्धममाध्वरंपाहिकवेनमस्ते ॥ भोअग्नेइहागच्छे
हतिष्ठेत्यावाह्य ॥ अग्निस्तिग्मेतिमंत्रेणअग्निंप्रपूजयेत् ॥ अग्निस्तिग्मेनशोचिषा
यासद्विश्वंन्यत्रिणम् ॥ अग्निर्नोवनतेरयिम् ॥ १७ ॥ १६ ॥ अथनमस्कारः ॥ सर्व
देवमयोदेवोरक्तोवह्निर्महाबलः ॥ सप्तजिह्वोमहावीर्यस्तस्मैनित्यंनमोनमः ॥ आग्ने
यः पुरुषोरक्तः सर्वदेवमयोव्ययः ॥ धूम्रकेतूरजोध्यक्षस्तस्मैनित्यंनमोनमः ॥ इतिन
मेत् ॥ ततःअग्नआयाहीतिमंत्रेणरक्तध्वजपताकालंभः ॥ त्वंनोअग्नेइतिमंत्रेणध्वज
पताकोच्छ्रायः ॥ अग्नऽआयाहिवीतयेगृणानोहव्यदातये ॥ निहोतासत्सिबर्हिषि ॥ त्व
न्नोऽअग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमःशोशुचानो ॥१५९॥
विश्वाद्वेषांसिप्रमुमुग्ध्यस्मत् ॥ २१ ॥ ३ ॥ धामंतेइतिमंत्रेणध्वजपताकयोः पू

जनम्॥ धामन्तेविश्वंभुवनमधिश्रितमन्तः समुद्रेहृन्तरायुषि॥ अपामनीकेसमिथेय
आभृतस्तमश्यामुमधुमन्तन्तऽऊर्मिम्॥ १७॥ ९९॥ ध्वजेकुमुदायनमः॥ योमेदं
डइतिमंत्रेणदंडालंभः॥ त्रिपुरघ्नायक्षेत्रपालायनमः॥ नमस्तेत्वग्निरूपायपिंगलाय
महात्मने॥ चंडायचंडरूपायरक्षत्वंहव्यवाहन॥ इतिनत्वा अग्निंदूतमितिमंत्रेणघृतौ
दनबलिदानम्॥ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रुवे॥ देवाँ२ आसादयादिह॥ २२॥
॥ १७॥ अग्नयेसांगायसपरिवारायइमंबलिंसमर्पयामि॥ भोअग्नेदिशंरक्ष बलिंभक्ष अ
स्ययजमानस्यसकुटुंबस्यसपरिवारस्य आयुःकर्ता क्षेमकर्ता तुष्टिकर्ता पुष्टिकर्ता
वरदोभवेत्युक्त्वा आचम्यदक्षिणद्वारंपूजयेत्॥ इत्याग्नेयकोणकृत्यम्॥ अथद
क्षिणद्वारपूजा॥ नमस्तेधर्मराजाय त्रेतायुगाधिपायच॥ यजुर्वेदाधिदेवाय सुभद्रद्वा
ररक्षिणे॥ इत्यनेनद्वारदेवतावाहनम्॥ धर्म्मिष्ठाभिधायश्रीधात्र्याधिष्ठितायदक्षिणद्वा

रायनमः ॥ शाखयोर्वस्त्राणिबध्वा ॥ शाखामूलयोर्धान्यपुंजोपरिपर्जन्याशोकनामानौ कलशौपूर्ववत्संस्थाप्य गंधादिनापूजयेत् ॥ तत्रैववामनायनमः ॥ गोदावर्यैनमः ॥ कृष्णायैनमः ॥ रुद्रायनमः ॥ द्वारशाखयोः ॐस्वर्लोकायनमः ॥ॐमहर्लोकायनमः ॥ ॐभौमायनमः ॥ ॐबुधायनमः ॥ ऊर्ध्वंयजुर्वेदायनमः॥दक्षिणशाखायांचंडायनमः॥ वामशाखायां प्रचंडायनमः ॥ तत्रव धात्रेनमः ॥ विधात्रेनमः ॥ उत्तरांगेगणपतये नमः ॥ अधोदेहल्यां द्वारश्रियैनमः ॥ देहलीमध्ये वास्तुपुरुषायनमः ॥ तत्रैव गायत्र्यैनमः ॥ श्रियैनमः ॥ सरस्वत्यैनमः ॥ दक्षिणवामशाखयोर्गणेशायनमः ॥ वृषभाय नमः ॥ अग्न्यास्वक्षेत्रपालायनमः॥ एवंद्वारंसंपूज्य द्वारदेशेयमंश्यामंदंडहस्तंमहिषारूढंध्यात्वा ॥ आवाहयेत् ॥ एह्येहिवैवस्वतधर्मराजसर्वामरैरर्चितधर्ममूर्ते ॥ शुभाशुभानंदशुचामधीश रक्षाध्वरं नोभगवन्नमस्ते ॥ भोयम इहागच्छेहतिष्ठेत्यावाह्य

यमायत्वेतिमंत्रेणयमंसर्वोपचारैरर्चयेत् ॥ यमायत्वामखायत्वासूर्य्यस्यत्वातपसे ॥
देवस्त्वासविताम‍द्ध्वानक्तुपृथिव्याःसꣳस्पृशस्पाहि ॥ अर्चिरसिशोचिरसितपोसि ॥ ३७ ॥
॥ ११ ॥ अनेनैवमंत्रेणश्यामध्वजपताकालंभः ॥ यमायत्वांगिरस्वतेइतिमंत्रेणतो
रणोपरिनिधानम् ॥ यमायत्त्वाङ्गिरस्वतेपितृमतेस्वाहा ॥ स्वाहाघर्म्मायस्वाहाघर्म्मः
पित्रे ॥ ३८ ॥ ९ ॥ योमेदंडइतिदंण्डालंभः ॥ योमेदण्डः परापतद्वैहायसोधिभू
म्यान्तमहंपुनराददे ॥ आयुषेब्रह्मणेब्रह्मवर्च्चसाय ॥ दंडहस्तोयमोदेवोधर्मराजोमहाबलः ॥
आवाहयेद्धर्मराजंतस्मैनित्यंनमोनमः ॥ इतिनत्वाप्रार्थयेत् ॥ महामहिषमारूढदं
डहस्तमहाबल ॥ आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतामितिप्रार्थ्य ॥ सुगन्नःपंथामि
तिगृह्यसूत्रमंत्रेणमाषभक्तबलिदानम् ॥ सुगन्नुःपंथांप्रदिशन्नएहिज्योतिष्मद्धेह्यजरन्नआ
युः ॥ अपैतुमृत्युरमृतंमआगाद्वैवस्वतोनोअभयंकृणोतुस्वाहा ॥ इतिपठित्वा ॥ यमा

यसांगायसायुधायसशक्तिकायइमंबलिंसमर्पयामि इत्युक्त्वा भो यमदिशंरक्षबलिं
भक्ष अस्ययजमानस्यसकुटुंबस्य आयुःकता क्षेमकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदोभ
वेत्युक्त्वाप्रार्थयेत् ॥ वैवस्वतमहादेवनमस्तेधर्मसाक्षिक ॥ शिवाज्ञापिहितोदेवदिशंरक्ष
भवानिह ॥ इतिसंप्रार्थ्य आचामेत् ॥ ततःइषेत्वेतिमंत्रेणयजुर्वेदंपूजयेत् ॥ इषेत्वोर्ज्जे
त्वांवायवस्थदेवोवं÷ सवितापप्रार्प्पयतुश्रेष्ठतमायकर्म्मणऽआप्यायध्वमघ्न्याइन्द्रा
यभागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेनईशतमाघशंठ·सोध्रुवाऽअस्मिन्गोपतौ
स्यातबह्वीर्य्यजमानस्यपशून्पाहि ॥ १ ॥ १ ॥ इतिपठित्वा यजुर्वेदप्रतिनिधित्वेनय
जुर्वेदीयंब्राह्मणंगंधादिनापूजयेत् ॥ अथयजुर्वेदध्यानम् ॥ कातराक्षोयजुर्वेदस्त्रैष्टुभो
विष्णुदैवतः ॥ काश्यपेयस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभवेतियजुर्वेदध्यानम्॥तत्रआनोभ
द्रानुवाकश्चआशुःशिशानकस्तथा ॥ यद्देवास्त्रीणिचपठेत्ततोष्टौचपुनंतुमाम् ॥ अभि

धाअसिसप्तैवदीर्घायुस्तेऋचंपठेत् ॥ आप्यायस्वषट्रनमोस्तुसर्पेभ्यआकृष्णएवच ॥
नमःशंभवायचेत्येकामेकाग्निर्देवता क्रमात् ॥ त्रातारमिंद्रमित्येकां सोमंराजानमे
कया ॥ अभयंतेमहाँइंद्रःऋचंवाचंसमग्रंपठेत् ॥ अथैतेमन्त्राःक्रमेणप्रदर्श्यंते ॥
आनोभद्राःक्रतवोयन्तु विश्वतोदब्धासोऽअपरीतासऽउद्भिदः ॥ देवानोयथा
सदमिद्वृधेऽअसन्नप्रायुवोरक्षितारोदिवेदिवे ॥ २५ ॥ १४ ॥ १ ॥ आशुः शिशानोवृ
षभोन भीमोघनाघनः क्षोभणश्चर्षणीनाम् ॥ संक्रन्दनोनिमिषऽएकवीरः शतꣳ
सेनाऽअजयत्साकमिन्द्रः ॥ १७ ॥ १ ॥ अथ यद्देवाइत्यादित्रयोमंत्राः ॥ यद्देवादे
वहेडनन्देवासश्चकृमावयम् ॥ अग्निर्म्मातस्म्मादेनसोविश्वस्मान्मुञ्चत्वꣳहसः ॥२०॥
॥ १४ ॥ यदिदिवा यदिनक्तमेनाꣳसिचकृमावयम् ॥ वायुर्म्मातस्म्मादेनसो
विश्वस्मान्मुंचत्वꣳहसः ॥ २० ॥ १५ ॥ यदिजाग्रद्यदिस्वप्नऽएनाꣳसिचकृमा

वुयम् ॥ सूर्य्योमातस्मादेनंसोविश्श्वांन्मुंचुत्त्वर्ठ॰हंसः ॥ २० ॥ १६ ॥ अथपुनं
तुमेत्यादयोऽष्टमंत्राः ॥ पुनंतुमादेवजुनाः ॥ पुनन्तुमनंसाधियंः ॥ पुनन्तुवि
श्श्वांभूतानि ॥ जातंवेदः पुनीहिमां ॥ १९ ॥ ३९ ॥ पुवित्त्रेणपुनीहिमा ॥ शुक्रेणदेव
दीद्यंत् ॥ अग्नेक्रत्त्वाक्रतूँ २ रनुं ॥ १९ ॥ ४० ॥ यत्तेंपुवित्रमुर्चिषि ॥अग्नेवितंतम
न्तुरा ॥ ब्रह्मतेनंपुनातुमा ॥१९॥४१॥ पवंमानः सोऽअद्यनंःपुवित्रेणुविचंर्षणिः॥यःपो
तासपुंनातुमा॥१९॥४२॥उभाब्भ्यांन्देवसवितःपुवित्रेणसुवेनंच ॥ माम्पुंनीहिविश्श्वतंः
॥१९॥४३॥ वैश्श्वदेवीपुंनतीदेव्व्यागाद्यस्यामिमाबुह्व्यस्तुन्वोवीतपृष्ठाः॥तयामदंन्तः
सधमादेषुवुयथ्ठंस्यांमुपतंयोरयीणाम् ॥ १९ ॥ ४४ ॥ येसंमानाः समंनसः पितरों
यमुराज्ज्ये ॥ तेषांल्लोकः स्वधानमोंयुज्ञोदेवेषुंकल्प्पताम् ॥ १९ ॥ १४५ ॥ येसंमानाः
समंनसोजीवाजीवेषुंमामुकाः ॥ तेषुाश्रीर्मयिंकल्प्पतामुस्मिँल्लोकेशतर्ठ॰समाः ॥

॥१९॥४६॥ अथअभिधाअसि इत्याद्याःसप्तमंत्राः॥ अभिधाऽअसिभुवनमसियन्तासि धुर्त्ता ॥ सत्वमग्निंवैश्वानरंसप्रथसङ्गच्छस्वाहाकृतः ॥ २२ ॥ ३ ॥ स्वगात्वादेवेभ्यः प्रजापतये ब्रह्मन्नश्वम्भन्त्स्यामिदेवेभ्यः प्रजापतयेतेनराद्ध्यासम् ॥ तम्बधानदेवेभ्यः प्रजापतयेतेनराद्ध्नुहि ॥ २२ ॥ ४ ॥ प्रजापतयेत्वाजुष्टम्प्रोक्षामीन्द्राग्निभ्यान्त्वाजुष्टम्प्रोक्षामिवायवेत्वाजुष्टम्प्रोक्षामिविश्वेभ्यस्त्वादेवेभ्योजुष्टम्प्रोक्षामिसर्वेभ्यस्त्वादेवेभ्योजुष्टम्प्रोक्षामि ॥ योऽअर्वन्तञ्जिघांसतितमभ्यमीतिवरुणःपरोमर्त्तः परःश्वा ॥ २५ ॥ ५ ॥ अग्नयेस्वाहासोमायस्वाहापाम्मोदायस्वाहासवित्रेस्वाहा वायवेस्वाहा विष्णवेस्वाहेन्द्रायस्वाहा बृहस्पतयेस्वाहा मित्रायस्वाहा वरुणायस्वाहा ॥ २२ । ६ ॥ हिङ्कारायस्वाहा हिङ्कृतायस्वाहा क्रन्दतेस्वाहावक्रन्दायस्वाहाप्प्रोथतेस्वाहा ॥ प्रप्प्रोथायस्वाहागन्धायस्वाहा घ्रातायस्वाहा

प्र. सं. निविष्टायस्वाहोपविष्टायस्वाहा सन्दितायस्वाहा वल्गतेस्वाहासीनायस्वाहा शयां मं. पू.
॥१६३॥ नायस्वाहा स्वपतेस्वाहा जाग्रतेस्वाहा कूजतेस्वाहा ॥ प्रबुद्धायस्वाहा विजृम्भमा
णायस्वाहा विचृत्तायस्वाहा सꣳहानायस्वाहोपस्थितायस्वाहायनायस्वाहा प्रायं
णायस्वाहा ॥ २२ ॥ ७ ॥ यतेस्वाहा धावतेस्वाहोद्द्रावायस्वाहोद्द्रुतायस्वाहाशूका
रायस्वाहाशूकृतायस्वाहा निषण्णायस्वाहोत्थितायस्वाहा जवायस्वाहा बलायस्वा
हा विवर्तमानायस्वाहा विवृत्तायस्वाहा विधून्वानायस्वाहा विधूतायस्वाहा शुश्रू
षमाणायस्वाहा शृण्वतेस्वाहेक्षमाणायस्वाहेक्षितायस्वाहा वीक्षितायस्वाहा निमे
षायस्वाहा यदत्तितस्मैस्वाहा यत्पिबतितस्मैस्वाहा यन्मूत्रंकरोति तस्मैस्वा
हा कुर्वतेस्वाहा कृतायस्वाहा ॥ २२ ॥ ८ ॥ तत्सवितुर्वरेण्यम्भर्गोदेवस्यधी ॥१६३॥
महि ॥ धियोयोनः प्रचोदयात् ॥ २२ ॥ ९ ॥ अथ दीर्घायुस्तेइत्यकमंत्रः ॥

दीर्ग्घायुंस्तुऽओषधेखनितायस्म्मैचत्त्वाखनाम्म्यहम् ॥ अथोत्वन्दीर्ग्घायुंर्भूत्वा
शतवंल्शाविरोहतात् ॥ १२ ॥ १०० ॥ अथआप्यायस्वेत्यादिषणमंत्राः ॥ ॐ आ
प्प्यायस्वसमेंतुतेविश्श्वतंः सोमवृष्ण्यंम् ॥ भवावाजंस्यसंगथे ॥ १२ ॥ ११२ ॥
सन्तेपयांसि सिसमुंयन्तुवाजाः संवृष्ण्यान्न्यभिमातिषाहंः ॥ आप्प्या
यंमानोऽअमृतांयसोमदिविश्श्रवांस्युत्तमानिंधिष्ष्व ॥ १२ ॥ ११३ ॥ आप्प्यांय
स्व मदिन्तमसोमविश्श्वेंभिरुठ्शुभिंः ॥ भवांनः सप्प्रथंस्तमः सखांवृधे ॥ १२ ॥
॥ ११४ ॥ आतेंवत्सोमनोंयमत्त्परमाच्चित्त्सधस्त्थांत् ॥ अग्ग्नेत्त्वांकांमयागिरा ॥
॥ १२ ॥ ११५ ॥ तुब्भ्यन्ताऽअंगिरस्तमविश्श्वाः सुक्षितयः प्पृथंक् ॥ अग्ग्नेकामांययेमिरे ॥
॥ १२ ॥ ११६ ॥ अग्निः प्प्रियेषुधामंसुकामोंभूतस्यभव्यंस्य ॥ सम्म्राडेकोविराजति ॥
॥ १२ ॥ ११७ ॥ अथनमोस्तुसर्प्पेब्भ्यइतिमंत्रः ॥ नमोंस्तु सर्प्पेब्भ्योयेकेचंपृथिवीमनुं ॥ येऽ

अन्तरिक्षेयेदिवितेभ्यः सुर्प्पेभ्योनमः ॥ १३ ॥ ६ ॥ अथआकृष्णेनइत्यादिमंत्रः ॥
॥१६४॥ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेनसवितारथेनादेवोया
तिभुवनानिपश्यन् ॥ ३३ ॥ ४३ ॥ अथनमः शंभवायचेत्येकोमंत्रः ॥ नमः शम्भवाय
चमयोभवायचनमः शङ्करायच मयस्करायचनमः शिवायचशिवतरायच ॥ १६ ॥
॥४१॥ अथाग्निर्देवताइत्यादिमंत्रः ॥ अग्निर्देवतावातोदेवतासूर्य्योदेवताचन्द्रमादेवता
वसवोदेवतारुद्रादेवतादित्यादेवता मरुतोदेवताविश्वेदेवादेवता बृहस्पतिर्देवतेन्द्रोदेव
तावरुणोदेवता ॥ १४ ॥ ४० ॥ अथत्रातारमिंद्रमित्यादिमंत्रः ॥ त्रातारमिन्द्रमवि
तारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवा
धात्विन्द्रः ॥ २० ॥ ५० ॥ अथसोमꣳराजानमितिमंत्रः ॥ सोमꣳराजानमवसेग्निम ॥१६४॥
न्वारभामहे ॥ आदित्यान्विष्णुꣳसूर्य्यम्ब्रह्माणञ्चबृहस्पतिꣳस्वाहा ॥ ९ ॥ २६ ॥

अथ महाँइंद्रइतिमंत्रः ॥ मुहाँ२ऽइन्द्रोवज्रंहस्तः षोडुशीशर्म्मयच्छतु ॥ हन्तुंपा
प्मानुँय्योस्म्मान्द्वेष्टि ॥ उपयामगृहीतोसिमहेन्द्रायंत्त्वैषतेयोनिर्म्महेन्द्रायंत्वा ॥२६॥
॥ १० ॥ अथऋचंवाचमित्यादिसमग्राश्चतुर्विंशतिमंत्राः ॥ ऋचंवाचुम्प्रपद्येम
नोयजुः प्प्रपद्येसामंप्प्राणम्प्रपद्येचक्षुः श्रोत्रम्प्रपद्ये ॥ वागोजः सुहौजोमयिंप्प्राणा
पानौ ॥ ३६ ॥ १ ॥ यन्मेछिद्रंञ्चक्षुषोहृदयस्य्युमनसोवातितृणंबृहस्पतिर्म्मेतद्दधातु ॥
शन्नोभवतुभुवनस्य्ययस्पतिः ॥ ३६ ॥ २ ॥ भूर्भ्भुवःस्वः तत्सवितुर्वरेण्यम्भर्गोदेवस्य
धीमहि ॥ धियोयोनः प्प्रचोदयात् ॥ ३६ ॥ ३ ॥ कयानश्चित्रऽआभुवदूतीसदावृधः
सखा ॥ कयाशचिष्ठयावृता॥३६॥४॥ कस्त्त्वा सुत्त्योमदानाम्मंहिष्ठोमत्सुदन्धसः॥
दृढाचिदारुजेवसु ॥ ३६ ॥ ५ ॥ अभीषुणः सखीनामविताजरितृणाम् ॥ शतम्भवास्यू
तिभिः ॥ ३६ ॥ ६ ॥ कयात्त्वन्नऽऊत्त्याभिप्प्रमन्दसेवृषन् ॥ कयास्तोतृभ्यऽआभ

२ ॥ ३७ ॥ ७ ॥ इन्द्रोविश्श्वस्यराजति ॥ शन्नोऽअस्तुद्विपदेशञ्चतुष्पदे ॥ ३६ ॥८॥
शन्नोमित्रःशंवरुणःशन्नोभवत्त्वर्य्यमा ॥ शन्नऽइन्द्रोबृहस्प्पतिःशन्नोविष्णुरुरुक्रमः ॥
॥ ३६ ॥ ९ ॥ शन्नोवातःपवताᳯशन्नस्तपतुसूर्य्यः ॥ शन्नःकनिक्रदद्देवःपर्ज्जन्न्योऽ
अभिवर्षतु ॥ ३६ ॥ १० ॥ अहानिशम्भवन्तुनःशᳯरात्रीःप्प्रतिधीयताम् ॥ श
न्नऽइन्द्राग्नीभवतामवोभिःशन्नऽइन्द्रावरुणारातहव्या ॥ शन्नऽइन्द्रापूषणावाजसा
तौशमिन्द्रासोमासुवितायशंय्योः ॥ ३६ ॥ ११ ॥ शन्नोदेवीरभिष्टयऽआपोभवन्तु
पीतये ॥ शंय्योरभिस्रवन्तुनः ॥ ३६ ॥ १२ ॥ स्योनापृथिवीनोभवानृक्षरानिवेश
नी ॥ यच्छानःशर्म्मसप्प्रथाः ॥ ३६ ॥ १३ ॥ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदं
धातन ॥ महेरणायचक्षसे ॥ ३६ ॥ १४ ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ ॥१६५॥
उशतीरिवमातरः ॥ ३६ ॥ १५ ॥ तस्म्माऽअरङ्गमामवोयस्यक्षयायजिन्न्व

थ ॥ अपोंजनयंथाचनः ॥ ३६ ॥ १६ ॥ द्यौःशान्तिरन्तरिक्षुठं·शान्तिःपृथिवी
शान्तिरापः शान्तिरोषधयःशान्तिः ॥ वनस्पतयःशान्तिर्विश्वेदेवाःशान्तिर्ब्रह्मशा
न्तिःसर्वुठं·शान्तिःशान्तिरेवशान्तिःत्सामाशान्तिरेधि ॥ ३६ ॥ १७ ॥ दृतेदृठं·हं
मामित्रस्यंमाचक्षुंषासर्वाणिभूतानिसमीक्षन्ताम् ॥ मित्रस्याहञ्चक्षुंषासर्वाणिभूतानि
समीक्षे ॥ मित्रस्यचक्षुंषासमीक्षामहे॥३६॥१८॥दृतेदृठं· हंमा ॥ ज्ज्योक्तेंसन्दृशिंजी
व्यासन्ज्ज्योक्तेंसन्दृशिंजीव्यासम् ॥ ३६ ॥ १९ ॥ नमंस्तेहरंसेशोचिषेनमं
स्तेऽअस्त्वर्चिषें ॥ अन्याँस्तेंऽअस्मत्तंपन्तुहेतयंःपावकोऽअस्मभ्यंठं· शिवोभं
व ॥ ३६ ॥ २० ॥ नमंस्तेऽअस्तुविद्युतेस्तनयित्नवें ॥ नमंस्तेभगवन्नस्तुयतः
स्वःसमीहंसे ॥ ३६ ॥ २१ ॥ यतोंयुतःसमीहंसेततोंनोऽअभंयंकुरु ॥ शन्नंःकुरुप्र
जाभ्योभंयन्नःपशुभ्यंः ॥ ३६ ॥ २२ ॥ सुमित्रियानऽआपऽओषंधयः सन्तुदुर्म्मि

प्र. सं. त्रियास्तस्म्मैसन्तुय्योस्मान्द्वेष्टियञ्चवयन्द्विष्मः ॥ ३६ ॥ २३ ॥ तच्चक्षुर्द्देवहितं प्र. पू.
॥१६६॥ म्पुरस्ताच्छुक्क्रमुच्चरत् ॥ पश्येमशरदः शतञ्जीवेमशरदः शतꣳशृणुयामशरदः
शतंप्रब्ब्रवामशरदः शतमदीनाः स्यामशरदः शतम्भूयश्चशरदः शतात् ॥
॥ ३६ ॥ २४ ॥ इतिदक्षिणद्वारपूजा ॥ अथनैर्ऋत्यांगत्वातत्रकलशंसंस्थाप्य ॥ कु
मुदायनमः ॥ इतिसंपूज्य ॥ नरारूढंखड्गहस्तंनिर्ऋतिमसुन्वंतमयजमानमितिमंत्रे
णावाहयेत् ॥ असुन्न्वन्तमयजमानमिच्छस्तेनस्येत्यामन्विहितस्क्करस्य ॥ अन्यम
स्म्मदिच्छसातऽइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥१२॥६२॥एह्येहिरक्षोगणनायकस्त्वं
विशालवेतालपिशाचसंघैः॥ममाध्वरंपाहिपिशाचनाथलोकेश्वरत्वंभगवन्नमस्ते ॥ भोनि
र्ऋतेइहागच्छेहतिष्ठेत्यावाह्यनिर्ऋतयेनमः॥इतिसंपूज्यनमस्कारंकुर्यात् ॥ सर्वप्रेताधि
पोदेवोनिर्ऋतिनीललोहितः ॥ करेखड्गधरोनित्यंनैर्ऋतायनमोनमः॥अथप्रार्थना ॥ नि ॥१६६॥

र्ऋतिंखड्गहस्तंचसर्वलोकैकपावनम् ॥ आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यताम् ॥
यंतेदेवीनिर्ऋतिरितिमंत्रेणकृष्णध्वजपताकालंभः ॥ एषतेनिर्ऋतेभागइतिमंत्रेणध्वज
पताकोच्छ्रयः ॥ यन्तेदेवीनिर्ऋतिराबबन्धपाशंग्रीवास्वविचृत्त्यम् ॥ तन्तेविष्याम्यायु
षोनमद्ध्यादथैतम्पितुमंद्धिप्रसूतः॥नमोभूत्यैयेदञ्चकार ॥ १२॥६५॥एषतेनिर्ऋते
भागस्तञ्जुषस्वस्वाहाग्निनेत्रेभ्योदेवेभ्यः पुरः सद्भ्यः स्वाहायमनेत्रेभ्योदेवेभ्यो
दक्षिणासद्भ्यः स्वाहाविश्वदेवनेत्रेभ्योदेवेभ्यः पश्चात्सद्भ्यः स्वाहामित्रावरुण
नेत्रेभ्योवामरुन्नेत्रेभ्योवादेवेभ्यऽउत्तरासद्भ्यः स्वाहासोमनेत्रेभ्योदेवेभ्यऽउ
परिसद्भ्योदुवस्वद्भ्यः स्वाहा ॥९॥ ३५॥ मोषुणइंद्रेतिमंत्रेणकृष्णव्रीह्यन्नंघृतसहितंबलिं
दद्यात् ॥ मोषुणऽइन्द्रात्रपृत्सुदेवैरस्तिहिष्मातेशुष्मिन्नवयाः ॥ महश्चिद्यस्यमीढुष
युव्याहविष्मतोमरुतोवन्दतेगीः ॥ ३ ॥ ४६ ॥ इतिमंत्रंपठित्वा ॥ निर्ऋतयेसांगाय

सशक्तिकायसायुधायेमंबलिंसमर्पयामि ॥ भोनिर्ऋते दिशंरक्षबलिंभक्षअस्ययजमानस्यसकुटुंबस्यसपरिवारस्य आयुःकर्ता क्षेमकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदोभवेत्युक्त्वाआचामेत् ॥ ध्वजे वामनायनमः ॥ योमेदंडइतिदंडालंभः ॥ अग्निजिह्वायक्षेत्रपालायनमः ॥ राक्षसेभ्योहिरक्षार्थंभवानत्रप्रतिष्ठितः ॥ निर्विघ्नांयज्ञभूमिंत्वं कुरुष्वशववाहन ॥ इतिप्रार्थयेत् ॥ इतिनैर्ऋत्यदिक्कृत्यम् ॥ अथपश्चिमद्वारपूजा ॥ नमोस्तुकामरूपायपश्चिमद्वारपायच ॥ सामवेदाधिपत्वंहिनाम्नाकल्याणकारक अनेनद्वारदेवतावाहनम् ॥ द्वारशाखयोः अनिलायनमः ॥ अनलायनमः ॥ इति वसुद्वयं नाममंत्रैःपूजयेत् ॥ शृंगेषुशाखयोर्वस्त्राणिबध्वा ॥ शाखामूलयोर्धान्यपुंजोपरिभूतसंजीवनामृतनामानौकलशौपूर्ववत्संस्थाप्य ॥ अंजनायनमः ॥ कलशद्वये ॥१६७॥
रेवायैनमः ॥ ताप्यैनमः ॥ इतिसंपूज्य ॥ जयसामाभिधायअच्युताधिष्ठितायप

श्रिमद्वारायनमः ॥ इदंविष्णुरितिमंत्रेणविष्णुंतत्रावाह्यपूजयेत् ॥ इदंविष्णुर्विच
क्रमेत्रेधानिदंधेपुदम् ॥ समूढमस्यपांसुरेस्वाहा ॥ ५ ॥ १५ ॥ द्वारशाखयोर्धात्रे
नमः ॥ विधात्रेनमः ॥ किरीटिनेनमः ॥ स्कंदायनमः ॥ इतिद्वारयोः ॥ द्वारशा
खयोरेव ॥ ॐ जनलोकायनमः ॥ ॐ तपोलोकायनमः ॥ बृहस्पतयेनमः ॥ शुक्रा
यनमः॥ ऊर्ध्वसामवेदायनमः ॥ द्वारशाखयोरेव ॥ ॐ नर्म्मदायैनमः ॥ ॐगोदावर्य्यै
नमः ॥ उत्तरांगेगणेशायनमः ॥ अधोदेहल्यांद्वारश्रियैनमः ॥ देहलीमध्येवास्तुपुरुषा
यनमः ॥ एवंसंपूज्यपाशहस्तंशुक्लवर्णकिरीटिनंवरुणंध्यात्वा ॥ कलशेआवाहयेत् ॥
पाशहस्तात्मकोदेवोजलराश्यधिपोमहान् ॥ निम्नगामीतिविख्यातोवरुणायनमो
नमः ॥ एह्येहियादोगणवारिधीनांगणेनपर्जन्यसहाप्सरोभिः ॥ विद्याधरेंद्रामरगीयमा
नपाहित्वमस्मान्भगवन्नमस्ते ॥ भोवरुणइहागच्छेहतिष्ठेत्यावाह्य ॥ तत्त्वायामीतिमं

त्रेणवरुणंसर्वोपचारैः प्रपूजयेत् ॥ तत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानो हविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशꣳसमानआयुः प्रमोषीः ॥ २१ ॥ २ ॥ अनेनैवमंत्रेणश्यामध्वजपताकालंभः ॥ उदुत्तमंवरुणेतिमंत्रेणतोरणोपरिनिधानम् ॥ उदुत्तमंवरुणपाशमस्म्मदवाधमंविमध्यमꣳश्रथाय ॥ अथावयमादित्यव्रतेतवानागसोऽअदितयेस्याम ॥१०॥१२॥ त्वन्नोअग्नइतिमंत्रेणनवनीतौदनबलिदानम् ॥ त्वन्नोऽअग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्म्मत् ॥ २१॥ ३ ॥ इतिपठित्वा ॥ वरुणायसांगायसशक्तिकायइमंनवनीतौदनबलिंसमर्पयामि इत्युक्त्वा ॥ भोवरुणदिशंरक्षबलिंभक्ष ॥ अस्ययजमानस्यसकुटुंबस्यसपरिवारस्यआयुःकर्त्ता क्षेमकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदोभवेतिपठित्वा ॥आचम्यवरुणंप्रार्थयेत् ॥ पाशहस्तंचवरुणमंर्णसांपतिमीश्वरम् ॥आवाहया

मियज्ञेस्मिन्वरुणायनमोनमः इतिसंप्रार्थ्यध्वजेशंकुकर्णायनमः ॥ योमेदंडइतिदंडा
लंभः॥ योमेदन्डःपरापतद्वैहायसोधिभूम्यांतमहंपुनरादद ॥ आयुषेब्रह्मणेब्रह्मवर्च्चसाय
ध्वजे कालायक्षेत्रपालायनमः ॥ इतिनाममंत्रेणसंपूज्य ॥ अग्नआयाहीतिमंत्रेणसाम
वेदंपूजयेत् ॥ अग्नऽआयाहिवीतयेगृणानोहव्यदातये ॥ निहोतासत्सिबर्हिषि॥ सामवे
दस्तु पिंगाक्षोजागतःशुक्रदैवतः ॥ भारद्वाजस्तुविप्रेन्द्रऋत्विक्त्वंममखेभवेतिपठि
त्वा सामवेदप्रतिनिधित्वेनसामवेदीयंब्राह्मणंगंधादिनापूजयेत् ॥ तत्रब्राह्मणद्वयकर्तृ
कोमंत्रपाठः ॥ इन्द्रायसामगायत इत्येकम् ॥ अहमस्मिन्नितिद्वितीयम्॥प्रथमजाइति
तृतीयम् ॥ सेतुस्तरइतिचतुर्थम् ॥ स्वादिष्ठयाइतिपंचमम् ॥ गायंतित्वागायत्रिणइति
षष्ठम् ॥ ज्येष्ठमासइतिसप्तमम् ॥ अथैतेमंत्राः क्रमेणप्रदर्श्यंते ॥ अथवायव्ये ॥
तत्रकलशंसंस्थाप्य तस्मिन्कलशे पुष्पदंतायनमः ॥ इतिसंपूज्य ॥ आनोनियु

प्र. सं. द्धिरित्यावाहनम् ॥ आनोंनियुद्भिः शतिनींभिरध्वरं सहस्रिणींभिरुपंयाहियज्ञम् ॥ मं. पू.
॥१६९॥ वायोंऽअस्म्मिन्त्सवनेमादयस्वयूयम्पांतस्वस्तिभिः सदानः ॥ २७ ॥ २८ ॥
इतिपठित्वा ॥ मृगाधिरूढंधूम्रवर्णवायुंध्यात्वाआवाहयेत् ॥ एह्येहियज्ञेममरक्ष
णायमृगाधिरूढः सहासिद्धसंघैः ॥ प्राणाधिपः कालकवेः सहायगृहाणपूजां भ
गवन्नमस्ते ॥ भोवायोइहागच्छेहतिष्ठेत्यावाह्य वायोयेतेइतिमंत्रेणधूम्रध्वजपताका
लंभनंकुर्यात् ॥ वायोयेतेसहस्रिणोरथासस्तेभिरागंहि ॥ नियुत्वान्त्सोमपीतये ॥
॥ २७ ॥ ३२ ॥ तववायोइतिमंत्रेणध्वजपताकोच्छ्रयः ॥ तववायवृतस्पतेत्वष्टुर्ज्जामात
रद्भुत ॥ अवांस्यावृणीमहे ॥ २० ॥ ३४ ॥ आनोनियुद्भिरितिमंत्रेणपूजयेत् ॥
आनोंनियुद्भिः शतिनींभिरध्वरंसहस्रिणींभिरुपंयाहियज्ञम् ॥ वायोंऽअस्म्मिन्त्स ॥१६९॥

वनेमादयस्वयूयम्पांतस्वस्तिभिः सदानः ॥ २७ ॥ २८ ॥ इतिसंपूज्यनमेत् ॥ सर्वं

प्राणात्मकोनित्यंसर्वंप्राणायुरुच्यते ॥ ध्वजहस्तोमहाप्राणस्तस्मैप्राणात्मनेनमः ॥
अनाकारोमहौजाश्चपश्चाद्दृष्टिर्गतिर्दिवि ॥ तस्मैपूज्यायमहतेवायुमहंनमामिचेतिन
त्वा ॥ ध्वजेसार्वभौमायनमः॥योमेदंडइतिदंडारोपणम् ॥ योमेदंडःपरापतद्वैहायसोधि
भूम्यांतमहंपुनरादद॥दंडेसर्वनेत्रायक्षेत्रपालायनमः ॥ इतिनत्वा ॥ यवौदनेनबलिंदद्या
त् ॥ वायवेसांगायसायुधायसशक्तिकायेमंयवौदनबलिंसमर्प्पयामि ॥ भोवायोदिशंर
क्षबलिंभक्षअस्ययजमानस्यसकुटुंबस्यसपरिवारस्यआयुःकर्ताक्षेमकर्ता तुष्टिकर्ता
पुष्टिकर्तावरदोभवेत्युक्त्वा आचम्यप्रार्थनांकुर्यात् ॥ प्राणिनांप्राणरूपोयोमहाबल
पराक्रमः ॥ महावेगसमारूढदिशंरक्षप्रभंजन ॥ इतिवायव्यादिक्कृत्यम्॥अथोत्तरद्वारकृ
त्यम् ॥ नमस्तेदिव्यरूपायत्वथर्वाधिपतेप्रभो ॥ कलेरधिपतिर्नाम्नामंगलंचोत्तरानन ॥
इतिद्वारदेवतामावाह्य कल्याणनाम्निधायप्रद्युम्नाधिष्ठितायोत्तरद्वारायनमः ॥ इतिपू

जयेत् ॥ ॐप्रद्युम्नायनमः ॥ द्वारशाखयोः ॐप्रत्यूषायनमः ॥ ॐप्रभासायनमः॥इति
वसुद्वयंनाममंत्राभ्यांपूजयेत् ॥ शृंगेषुशाखयोर्वस्त्राणिबध्वा शाखामूलयोर्धान्यपुंजो
परिधनदश्रीप्रदनामानौकलशौपूर्ववत्संस्थाप्य ॥ धनदायनमः ॥ श्रीप्रदायनमः ॥
सार्वभौमायनमः ॥ इतिदिगीशंसंपूज्यकलशद्वये वेण्यैनमः ॥ इतिसंपूज्य कल्याणा
भिधायप्रद्युम्नाधिष्ठितायोत्तरद्वारायनमः ॥ प्रद्युम्नायनमः ॥ शाखयोःजयायनमः ॥
विजयायनमः ॥ पुनः ॥ धात्रेनमः ॥ विधात्रेनमः ॥ ॐसत्यलोकायनमः ॥ ध्रुवलो
कायनमः ॥ पुनःशनैश्चरायनमः ॥ राहवेनमः ॥ ऊर्ध्वंअथर्ववेदायनमः ॥ द्वारशाखयो
रेव वेण्यैनमः ॥ पयोष्ण्यैनमः॥उत्तरांगेगणेशायनमः ॥ अधोदेहल्यांद्वाराश्रियैनमः ॥
देहलीमध्येवास्तुपुरुषायनमः ॥ पार्वतीशायनमः ॥ चंडेश्वरायनमः इतिद्वारयोः ॥
द्वारदेशे हंसःइतिमंत्रेणसोममावाह्यपूजयेत् ॥ हंसःशुचिषद्वसुरन्तरिक्षसद्धोता

वेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऽऋतजाऽअद्रिजाऽऋ
तम्बृहत् ॥ १० ॥ १४ ॥ ततोनरयुतविमानस्थंकुबेरंध्यात्वाआवाहयेत् ॥ एह्येहि
यज्ञेश्वरयज्ञरक्षांविधत्स्वनक्षत्रगणेनसार्द्धम् ॥ सर्वौषधीभिः पितृभिः सहैवगृहाणपूजां
भगवन्नमस्ते ॥ भोकुबेरइहागच्छइहतिष्ठेत्यावाह्यपूजयेत् ॥ ततःसोमोधेनुमितिमंत्रेण
सुवर्णवर्णध्वजपताकालंभः ॥ वयᳬसोमेतिमंत्रेणतोरणोपरिनिधानम् ॥ सोमोधेनुᳬ
सोमोऽअर्वन्तमाशुᳬसोमोवीरङ्कर्म्मण्यन्ददाति ॥ सादन्न्यंविदत्थ्यᳬसभेयम्पितृ
श्रवणंय्योददाशदस्मै ॥ ३४ ॥ २१ ॥ वयᳬसोमव्रतेतवमनस्तनूषुबिभ्रतः ॥ प्रजा
वन्तः सचेमहि ॥ ३ ॥ ५६ ॥ योमेदंडइतिदंडालंभः ॥ योमेदन्डः परापतद्वैहायसोधि
भूम्यांतमहंपुनरादद० ॥ वयᳬसोमइत्यव्यवहितपूर्वोक्तेनमंत्रेणपूजनं ॥ ध्वजेसुमुखाय
नमः ॥ एकपादायक्षेत्रपालायनमः ॥ ततः पैयंगवबलिदानं सोमायसांगायसायुधा

यसशक्तिकायइमंबलिंसपर्य्ययामिइत्युक्त्वा ॥ भोसोमदिशंरक्षबलिंभक्ष अस्ययजमानस्यसकुटुंबस्यसपरिवारस्य आयुःकर्ता क्षेमकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदोभवेतिपठित्वा आचम्यसोमंनमेत् ॥ नक्षत्राणांचसर्वेषांसोमोराजाप्रकीर्तितः ॥ रत्नाधिपोमहाहस्तःसोमराजायतेनमः ॥ इतिनत्वाप्रार्थयेत् ॥ सर्वनक्षत्रमध्येतुसोमोराजाव्यवस्थितः ॥ तस्मैसोमायदेवायनक्षत्रपतयेनमः इतिनत्वा ॥ शन्नोदेवीतिमंत्रेणअथर्ववेदंपूजयेत् ॥ शन्नोदेवीरभिष्टयऽआपो भवन्तुपीतये ॥ शंय्योरभिस्रवन्तुनः ॥ ३६ ॥ १२ ॥ सुवर्णनयनोथर्वानुष्टुप्छंदः पुरंदरः ॥ वेदोवैश्वानगोत्रस्तुऋत्विक्त्वंममखेभवेति ध्यात्वा ॥ अथर्वणवेदप्रतिनिधित्वेन अथर्वणवेदीयंब्राह्मणंगंधादिनापूजयेत् ॥ ततो ब्राह्मणद्वयकर्तृकोद्वारपालमंत्रपाठः ॥ ॥१७१॥

अथर्वांगिरसंचैवअथर्वाशिरसंतथा ॥ देवाचमधुसूक्तिंचराधसंशांतिमेवच ॥ आ

र्थवणौद्वारपालौपठेतामुत्तरस्थितौ ॥ इत्युत्तरद्वारपूजा ॥ अथईशान्यांगत्वा
कलशंसंस्थाप्य ॥ तत्रसुप्रतीकायनमः ॥ इतिसंपूज्य ॥ तस्मिन्कलशेवृषारू
ढंत्रिनेत्रंशुक्लवर्णईशानंध्यात्वाआवाहयेत् ॥ एह्येहियज्ञेशहरत्रिशूलकपालखटांगग
णेनसार्द्धम् ॥ लोकेशयज्ञेश्वरयज्ञसिद्धयैगृहाणपूजांभगवन्नमस्ते ॥ भोईशानइहागच्छे
हतिष्ठेत्यावाह्यसंस्थाप्यच ॥ अभित्वाशूरेतिमंत्रेणईशानंपूजयित्वा नमस्कारंकुर्या
त् ॥ अभित्वांशूरनोनुमोदुंग्धाऽइवधेनवंः ॥ ईशांनमस्यजगंतः स्वर्दृशमीशां
नमिन्द्रतुस्थुषंः ॥२७॥ ३५ ॥ सर्वविद्याधिपोदेवईशानोनामनामतः ॥ शूलपाणे महा
देवत्रैलोक्याधिपतेनमः ॥ नमः शंभवायचेतिमंत्रेणरक्तध्वजपताकालंभः॥नमंः शम्भ
वायंच मयोभवायंच नमंः शंकरायंच मयस्करायंच नमंः शिवायंच शिवतंरायच ॥
॥ १६ ॥ ४१ ॥ तमीशानमितिमंत्रेणध्वजपताकोच्छ्रयः ॥ तमीशानञ्जगतंस्तस्थुष

प्र. सं. स्पतिंन्धियञ्जिन्वमवसेहूमहेव्वयम् ॥ पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धः मं. पू.
॥१७२॥ स्वस्तये ॥ २५ ॥ १८ ॥ पताकायांपुष्टयैनमः ॥ ध्वजेसुमुखायनमः ॥ सुप्रतिष्ठि
तायनमः ॥ क्षेमायक्षेत्रपालायनमः ॥ योमेदंडइतिदंडालंभः ॥ योमेदण्डः परापत
द्वैहायसोधिभूम्यांतमहंपुनरादद ॥ पुनर्नमस्कारः ॥ रक्षणंकुरुमेदेवत्रिनेत्रायत्रि
शूलिने ॥ वृषध्वजाययज्ञायनमस्तुभ्यमुमापते॥वृषस्कंधसमारूढशूलहस्तत्रिलोचन॥
आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यताम् ॥सर्वाधिपोमहादेवःकृशानुःशुक्रईश्वरः॥शूल
पाणिर्विरूपाक्षस्तस्मैनित्यंनमोनमः ॥ ततः गोधूमगवेधुकबलिंदद्यात्॥इशानायसांगा
यसपरिवारायसायुधायसशक्तिकायेमंबलिंसमर्प्पयामि ॥ भोईशानदिशंरक्षबलिंभ
क्षअस्ययजमानस्यसकुटुंबस्यसपरिवारस्य आयुःकर्ता क्षेमकर्ता तुष्टिकर्ता पुष्टिक ॥१७२॥
र्ता वरदोभवेत्युक्त्वा आचामेत् ॥ इतिईशानदिक्कृत्यम् ॥ अथईशानपूर्वयोर्मध्येअनं

तमावाह्यपूजयेत् ॥ अनंतंशयनीयेसमासीनंनीलवर्णंध्यात्वा ॥ एह्येहिपातालधराम्महें
द्रनागांगनाकिन्नरगायमान ॥ रक्षोरगेंद्रामरलोकसंघैरनंतरक्षाध्वरमस्मदीयम् ॥ भो
अनंतइहागच्छेहतिष्ठेत्यावाह्य ॥ अनंतायनमः ॥ इत्यनंतंसर्वोपचारैःपूजयेत् ॥ ततो
नमस्कारः ॥ पन्नगाधिपतिर्देवअनंतोनामनामतः ॥ पातालेवसतेनित्यंनागराजा
यतेनमः ॥ नमोस्तुसर्पेभ्यइतिमंत्रेणमेघवर्णध्वजपताकालंभः ॥ नमोस्तुसुर्प्पेभ्यो
येकेचंपृथिवीमनुं ॥ येऽअन्तरिक्षेयेदिवितेभ्यंःसुर्प्पेभ्योनमंः ॥ १३ ॥ ६ ॥ तद्वि
ष्णुरितिमंत्रेणध्वजपताकोच्छ्रयः ॥ तद्विष्णोःपरुमम्पुदर्ठं सदांपश्यन्ति सूरयंः ॥
दिवींवचक्षुराततम् ॥ ६ ॥ ५ ॥ योमेदंडइतिदंडालंभः ॥ योमेदन्डःपरापतद्वैहायसो
धिभूम्यांतमहंपुनरादद ॥ ध्वजेभैरवायक्षेत्रपालायनमः विष्णोर्नुकमितिमंत्रेणध्वजप
ताकयोःपूजनंपयसोबलिदानंचकुर्यात ॥ विष्णोर्नुकंवीर्य्याणिप्र वोचुंयःपार्त्थिवा

९।

निविमुमेरजांथ्ंसि ॥ योऽअस्कंभायदुत्तरं थ्ं सुधस्त्थंविचक्रमाणस्त्रेधोरुंगायोविष्णं
वेत्वा ॥ ५ ॥ १८ ॥ अनंतायसांगायसपरिवारायसायुधायसशक्तिकायेमंबलिंसमर्प
यामि ॥ भो अनंतादिशंरक्षबलिंभक्ष अस्ययजमानस्यसकुटुंबस्यसपरिवारस्यआ
युःकर्ता क्षेमकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदोभवेत्युक्त्वा आचम्यप्रार्थयेत् ॥ अनं
तत्वादनंतस्त्वंफणींद्राधिपतेहरे ॥ त्वयात्ररक्षणंकार्यंकृष्णनेत्रायतेनमः ॥ योसा
वनंतरूपेणब्रह्मांडंसचराचरम् ॥ पुष्पवद्धारयेन्मूर्ध्नितस्मैनित्यंनमोनमः ॥ इतीशान
पूर्वयोर्मध्यकृत्यम् ॥ अथनिर्ऋतिपश्चिमयोर्मध्येगत्वाब्रह्माणमावाह्यपूजयेत् ॥ हंस
स्थंरक्तवर्णंब्रह्माणंध्यात्वा ॥ एह्येहिसर्वाधिपतेसुरेंद्र लोकेनसार्द्धंपितृदेवताभिः ॥
सर्वस्यधातास्यमितप्रभावोविशाध्वरंनःसततंशुभायभो ॥ आगच्छभगवन्ब्रह्मन्सर्व ॥१७३॥
लोकहितायच ॥ पद्मयोनिश्चतुर्वेदमूर्तिर्वासःपितामहः ॥ आयाहिब्रह्मलोकात्त्वंतस्मै

ब्रह्मात्मनेनमः ॥ इत्यावाह्यब्रह्मजज्ञानमितिमंत्रेण ब्रह्माणंपूजयेत् ॥ ब्रह्मंजज्ञानं
म्प्रंथुमम्पुरस्ताद्विसीमुतःसुरुचौवेनऽआंवः ॥सबुध्न्या॥उपुमाऽअंस्यविष्ठाःसुतश्श्चुयो
निमसंतश्श्चविवं÷ ॥ १३ ॥ ३ ॥ यद्देवेतिमंत्रेणरक्तध्वजपताकालंभः ॥ यद्देवादेवुहेडं
नुन्देवांसश्चकमावुयम् ॥ अग्निम्मुतस्म्मादेनंसोविश्वान्म्मुञ्चुत्वर्ठ॰हंसः ॥ २० ॥
॥ १४ ॥ ब्रह्मजज्ञानमितिमंत्रेणध्वजपताकोच्छ्रयः ॥ ब्रह्मंजज्ञानम्प्रंथुमम्पुरस्ताद्वि
सीमुतः सुरुचोवेनऽआंवः ॥ सबुध्न्याऽउपुमाऽअंस्यविष्ठाः सुतश्चुयोनिमसंतश्चुवि
वं÷ ॥१३॥३॥ गायत्र्यैनमः ॥ इतिपताकांसंपूज्यसुप्रभायनमः ॥इतिध्वजंसंपूज्यब्रह्मा
णंनमेत् ॥ पद्मयोनिश्चतुर्मूर्तिर्वेदावासःपितामहः ॥ यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मैनित्यं
नमोनमः ॥ इतिनत्वाध्वजेसुप्रभायनमः ॥भूतनाथायक्षेत्रपालायनमः ॥ योमेदंडइति
दंडालंभः ॥ योमेदण्डःपरापतद्वैहायसोधिभूम्यांतमहंपुनराददे॥ततः सनोभुवनस्यइ॥

तिमंत्रेणपायसबलिंदद्यात् ॥ सनोभुवनस्यपतेप्रजापतेतुयस्यंतऽउपरिगृहायस्यंवेह ॥
अस्म्मैब्रह्मणेस्मैक्षत्रायमहिशर्म्मयच्छस्वाहा ॥ १८ ॥ ४४ ॥ इतिपठित्वाब्रह्मणेसांगा
यसायुधायसशक्तिकायेमंबलिंसमर्प्पयामि ॥ भोब्रह्मन्दिशंरक्षबलिंभक्ष ॥ अस्य
यजमानस्यसकुटुंबस्यसपरिवारस्य आयुःकर्ता क्षेमकर्ता तुष्टिकर्ता पुष्टिकर्ता वरदो
भवेत्युक्त्वाआचम्य ब्रह्माणंप्रार्थयेत् ॥ पितामहजगत्स्रष्टःकृष्णेशव्योमरूपिणे ॥ व्यो
मस्थायनमस्तुभ्यं रक्षस्वेदंमहाप्रभो ॥ अथमंडपमध्येब्रह्मजज्ञानमितिमंत्रेणमहा
ध्वजंसंपूज्यवंशेकिन्नरेभ्योनमः इतिपूजयित्वा इन्द्रस्यवृष्णोरितिमंत्रेणमंडपमध्ये
स्थापयेत्॥ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमुतःसुरुचोवेनऽआवः ॥ सबुध्न्याऽउपमा
अस्यविष्ठाःसुतश्चयोनिमसतश्चविवः ॥ १३ ॥ ३ ॥ ॐ इन्द्रस्यवृष्णोवरुणस्यराज्ञऽ ॥१७४॥
आदित्यानाम्मरुताछंशर्द्धऽउग्रम् ॥ महामनसाम्भुवनच्च्यवानाङ्घोषोदेवानाञ्जय

तामुदंस्तथात् ॥ १७ ॥ ४१ ॥ ततः प्राच्यां गणानांत्वेतिमंत्रेणगणपतिंपूजयेत् ॥ ततः
नमोस्तुरुद्रेभ्यः अस्मेरुद्रा इतिमंत्रद्वयेनमंडपबाह्यादिक्विदिक्षुरुद्रान्संस्थाप्यतेभ्योब
लिंदद्यात्॥ ॐनमोस्तुरुद्रेभ्योयेदिवियेषांवर्षमिषवः तेभ्योदशप्प्राचीर्दशदक्षिणादश
प्प्रतीचीर्दशोदीचीर्दशोर्द्ध्वाः तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तु तेयन्द्विष्मोय
श्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ १६ ॥ ६४॥ ॐ अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभ
रंहूतौसुजोषाः ॥यः शंसंतेस्तुवतेधायिपज्रऽइन्द्रज्ज्येष्ठाऽअस्म्मा २ अवन्तुदेवाः ॥
॥ ३३ ॥ ५० ॥ अथसर्वभूतेभ्योबलिदानम्॥ अधश्चैवतुयेलोकाअसुराश्चैवपन्नगाः ॥ सपत्नी
परिवाराश्चप्रतिगृह्णंत्विमंबलिम् ॥ नक्षत्राधिपतिश्चोर्ध्वनक्षत्रैःपरिवारितः ॥ स्थानंचैवपि
तृणांतुसर्वेगृह्णंत्विमंबलिम्॥ईशानोत्तरयोर्मध्येक्षेत्रपालोमहाबलः ॥भीमनामामहादंष्ट्रः
सर्वेगृह्णंत्विमंबलिम्॥येकेचिदिहलोकेतुह्यागताबलिकांक्षिणः ॥ तेभ्योबलिंप्रयच्छामिन

प्र. सं. मस्कृत्यपुनःपुनः ॥ बलिंगृह्णंत्विमेदेवाआदित्यावसवस्तथा ॥ मरुतोप्यश्विनौरुद्राःसु मं. पू.
॥१७५॥ पर्णाः पन्नगाग्रहाः ॥ असुरायातुधानाश्चपिशाचामातरोनगाः ॥ शाकिन्योयक्षवेताला
योगिन्यःपूतनाः शिवाः ॥ जृंभकाः सिद्धगंधर्वाआलाविद्याधरानराः ॥ दिक्पाललोक
पालाश्चयेचविघ्नविनायकाः ॥ सौम्याभवंतुतेतृप्तादेवासुरगणास्तथा ॥ इति ईशानभा
गेबलिंदद्यात् ॥ ततोमंडपात्पूर्वस्यांदिशिकिंचिद्भूमिमुपलिप्य तत्रोपविश्य त्रैलोक्ये
यानिभूतानिस्थावराणिचराणिच ॥ ब्रह्मविष्णुशिवैः सार्द्धंरक्षांकुर्वंतुतानिमे ॥ देवदा
नवगंधर्वायक्षराक्षसपन्नगाः ॥ ऋषयोमुनयोगावोदेवमातरएवच ॥ सर्वेममाध्वरेरक्षां
प्रकुर्वंतुमुदान्विताः ॥ ब्रह्माविष्णुश्चरुद्रश्चक्षेत्रपालोगणैःसह ॥ रक्षंतुमंडपंसर्वेघ्नं ॥१७५॥
तुरक्षांसिसर्वतः ॥ एवंसंप्रार्थ्यश्लोकोक्तान् देवान्नाममंत्रैस्तस्यामेव भूमौपूजयेच्चंदना
दिभिः त्रैलोक्येभ्यः स्थावरेभ्योभूतेभ्योनमः त्रैलोक्यचरेभ्यश्चरेभ्योभूतेभ्योनमः ब्र

ह्मणेनमः विष्णवेनमः शिवायनमः दानवेभ्योनमः गंधर्वेभ्योनमः यक्षेभ्योनमः
राक्षसेभ्योनमः पन्नगेभ्योनमः ऋषिभ्योनमः मुनिभ्योनमः गोभ्योनमः देवमा
तृभ्योनमः एवंप्रत्येकमेतान्संपूज्यएतैरेवनाममंत्रैस्तस्यांभूमौतेभ्यएवबलिंदद्यात् ॥
त्रैलोक्यस्थेभ्यस्थावरेभ्योभूतेभ्यइमंबलिंसमर्प्पयामि ॥ त्रैलोक्यस्थेभ्यश्चरेभ्योभूते
भ्यइमं० ॥ ब्रह्मणेनमः इमं० ॥ विष्णवेनमः इमं० ॥ रुद्रायनमः इमं० ॥ देवेभ्योनमः
इमं० ॥ दानवेभ्योनमः इमं० ॥गंधर्वेभ्योनमः इमं० ॥ यक्षेभ्योनमःइमं०॥राक्षसेभ्यो
नमः इमं० ॥ पन्नगेभ्योनमः इमं० ॥ ऋषिभ्योनमः इमं० ॥ मुनिभ्योनमः इमं० ॥
गोभ्योनमः इमं० ॥ देवमातृभ्योनमः इमंबलिं समर्पयामि इतिबलिंदत्त्वा पाणि
पादंप्रक्षाल्ययजमानः प्राग्द्वारेणसर्त्विक् मंडपंप्रविश्य शिवादिदेवसमीपमागत्य
उपविश्यपूजापरिपूर्णतांप्रार्थयेत ॥ अद्यपूर्वोच्चरितएवंगुणविशेषेणविशिष्टायांतिथौ

मंडपस्तंभदेवानां तोरणद्वारत्रिशूलपताकाध्वजानां कृतस्यपूजनविधेर्यंन्न्यूनमतिरि
क्तंचतत्सर्वं श्रीसदाशिवादिदेवानांप्रसादात् सन्निधिस्थानां ब्राह्मणानांप्रसादात्परि
पूर्णमस्तु॥ततोआशिषोनैगमाः॥एवंसांगंमंडपंसंपूज्यात्मानंकृतार्थंमन्वीत॥ इतिश्रीगौ
डवंशोद्भवराज्ञीयरायपुरनिवासिश्रीयुक्तनानकचंदात्मजश्रीयुक्तरामलालपंडितविरचि
तेसर्वदेवप्रतिष्ठासंग्रहेमंडपपूजोपवर्णनंनामतृतीयः किरणः ॥ ३ ॥ ॥ छ ॥
अथजलयात्रालिख्यते ॥ ॥ ततोयजमानः सपत्नीकः सुप्रक्षालितपाणिपादः कस्तू
र्यादिचर्चितः शुक्लांबरधरः शुक्लमालाविभूषितः अलंकरणानिधारयित्वासंभारान् गृ
हीत्वा तथाहि–दधिमधुघृतदुग्धशर्करागंधाक्षतपुष्पधूपदीपनैवेद्यपूगीफलतांबूलदक्षि
णांताश्चपूजोपहाराः सुदृढकनककुंभाः पंचरत्नानिपंचपल्लवदूर्वाआर्द्रचणकव्रीहिमा
षाश्चपक्काः ॥ ततः सुवासिनीभिर्जीवत्पुत्रीभिः पतिव्रताभिर्महादोषरहिताभिः

सर्वब्राह्मणसुहृत्सहितः सन् ध्वजपताकालंकृतानिगजरथाश्वादीन्यन्यानिचनरया
नानिचतुरस्त्रविमानानिशिबिकादीनिशकटादीनिवासमारुह्यशंखभेरीमृदंगादिचतुर्विध
वादित्रवादितदिङ्मंडलोमागधचारणादिप्रगीतवंशप्रशस्तिः सन् मार्गे आनोभद्रा
इत्यादिशांतिपाठसूक्तानिब्राह्मणेभ्यःशृण्वन् ॐ आनोभद्राः क्रतवोयन्तुविश्श्वतोद
ब्धासोऽअपरीतासऽउद्भिदः ॥ देवानोयथासदमिद्वृधेऽअसन्नप्रायुवोरक्षितारोदिवे
दिवे ॥ २५ ॥ १४ ॥ देवानांम्भद्रा सुमतिर्ऋजूयतान्देवाना ᳪ रातिरभिनोनिवर्त्तताम् ॥
देवाना ᳪ सख्यमुपसेदिमाव्वयन्देवानऽ आयुः प्रतिरन्तुजीवसे ॥ २५ ॥ १५ ॥
तान्पूर्वयानिविदाहूमहेव्वयम्भगम्मित्रमदितिन्दक्षमस्रिधम् ॥ अर्य्यमणंवरुण ᳪ
सोमंमश्श्विनासरस्वतीनःसुभगामयस्करत् ॥ २५ ॥ १६ ॥ तन्नोवातो मयोभु
वांतुभेषजन्तन्मातापृथिवीतत्पिताद्यौः ॥ तद्ग्रावाणःसोमसुतोमयोभुवस्तदश्श्व

93.

नाशृणुतन्धिष्ण्यायुवम् ॥ २५ ॥ १७ ॥ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जि
न्वमवसेहूमहेवयम् ॥ पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धः स्वस्तये ॥ २५ ॥
॥ १८ ॥ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽ
अरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ॥ २५ ॥ १९ ॥ पृषदश्वामरुतः पृश्नि
मातरः शुभंयावानोविदथेषुजग्मयः ॥ अग्निजिह्वामनवः सूरचक्षसोविश्वेनोदेवाऽ
अवसागमन्निह ॥ २५ ॥ ॥ २० ॥ भद्रङ्कर्णेभिः शृणुयामदेवाभद्रम्पश्येमाक्षभिर्य
जत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहिदेवहितंयदायुः ॥ २५ ॥ २१ ॥
शतमिन्नुशरदोऽअन्तिदेवायत्रानश्चक्राजरसन्तनूनाम् ॥ पुत्रासोयत्रपितरोभवन्ति
मानोमध्यारीरिषतायुर्गन्तोः ॥ २५ ॥ २२ ॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्मातासपि
तासपुत्रः ॥ विश्वेदेवाऽअदितिः पञ्चजनाऽअदितिर्जातमदितिर्जनित्वम् ॥ २५ ॥ २३ ॥

समुद्रमहानदीवापीकूपसरस्तडागादीनामन्यतमे जलाशयेगत्वा तत्तीरे इंद्रघो
षस्त्वाचित्पतिर्मेइतियजुर्द्वयेनपंचगव्येनकुंकुमेनसंप्रोक्ष्य ॥ इंद्रघोषस्त्वावसुभिःपुर
स्तात्पातुप्रचेतास्त्वारुद्रैःपश्चात्पांतुमनोजवास्त्वापितृभिर्दक्षिणतः पांतुविश्वक
र्मात्वादित्यैरुत्तरतःपात्विदमहन्तप्तंवार्बहिर्द्धायज्ञान्निःसृजामि ॥ ५ ॥ ११ ॥
चित्पतिर्म्मापुनातुवाक्पतिर्म्मापुनातुदेवोमांसवितापुनात्वच्छिद्रेणपवित्रेणसूर्य्यस्य
रश्मिभिः ॥ तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामः पुनेतच्छकेयम् ॥ ४ ॥ ४ ॥
भूमौस्थापितसंभारः उदङ्मुखः स्वयमुपविश्यदक्षिणतःपत्नीमुपवेश्य कृताचमन
प्राणायामः कीर्त्तितदेशकालः पत्न्यासमन्वारब्धश्चिकीर्षितस्यहोमात्मकादिमहा
रुद्रादियागस्यसमाप्तिपरिपूर्त्तिद्वाराश्रीवरुणजलदेवताप्रीत्यर्थंगणेशपूजनपूर्वकजलमा
तृजीवमातृक्षेत्रपालवरुणपूजनंकरिष्ये ॥ इतिसंकल्पयेत ॥ पट्टवस्त्रेऽष्टदलेवापू

जयेत् ॥ हस्तेअक्षतान्गृहीत्वा एहिभालघृतबालसुधांशोविघ्नवारणविदारणसिंह॥एक
दंतविपदंतकरत्नंश्रीगणेशजगदीशनमस्ते ॥ १ ॥ ॐ भूर्भुवः स्वः गणेशइहागच्छेह
तिष्ठगणेशायनमः गणेशमावाहयामि ॥ गणानांत्वेतिमंत्रेणगणेशंपूजयेत् ॥ ॐ गुणा
नांत्वागुणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳ हवामहेनिधीनांत्वानिधिपतिꣳहवाम
हेव्वसोमम ॥ आहमंजानिगर्ब्भधमात्वमंजासिगर्ब्भधम् ॥२३॥१९॥ प्रबलांतरायहत
येजगतांवरमूषकस्फुरितसद्गतये ॥ गणनायकायविलसत्तनवेहरसूनवेममचिरेणन
मः ॥२॥ इतिनमस्कारः ॥ हस्तेमाषतंडुलबलिंगृहीत्वा ॥ ॐनमोमूषकवाहनायपाशां
कुशवराभयपाणयेसिद्धिबुद्धिसहितायअमुंसदीपमाषभक्तबलिंसमर्पयामि ॥ इतिगणप
तयेबलिंदद्यात् ॥ अथजलमातृपूजनंतच्चजलमध्ये ॥ कुमारीधनदानंदाविमलामंगलाब
ला॥त्वमेवजलनाथाचमत्स्यित्वांपूजयाम्यहम्॥१॥कुंभोद्भवंनिपुर्जंनितुताशचीभिर्यस्मिन्न ॥१७८॥

ग्रेषोन्याङ्गभोऽअन्तः ॥ ह्वाशिव्यक्तः शतधारऽउत्सोदुहेनकुम्भीस्वधाम्पितृभ्यः ॥
ॐभूर्भुवः स्वः मत्स्यइहागच्छ इहतिष्ठ मत्स्यैनमः॥मत्सीमावाहयामिस्थापयामिगं
धादिबलिदानंच॥१॥धृतपृष्ठगरिष्ठभूतलामरुणाक्षींजलकेलिलालसाम् ॥ चतुरागमसच्च
तुष्पदामिहतांकच्छपिकामहंभजे ॥ कच्छपिइहागच्छइहतिष्ठ कच्छप्यैनमः कच्छ
पीमावाहयामि गंधादिबलिदानांतम् ॥२॥ रणेदुर्जयैर्दानवैर्हन्यमानान्सुरान्पायितुंयासु
धांस्वस्यपृष्ठे ॥ अधान्मंदरंतद्धराद्भूध्रनेत्रांनमस्कुर्महेकूर्मितांधर्मरूपाम् ॥३॥वृष्णऽऊ
र्म्मिरसि राष्ट्रदाराष्ट्रम्मेदेहिस्वाहावृष्णऽऊर्म्मिरसि राष्ट्रदाराष्ट्रममुष्मै देहिवृषसेनोसि
राष्ट्रदाराष्ट्रम्मेदेहिस्वाहा वृषसेनोसिराष्ट्रदाराष्ट्रममुष्मैदेह्यर्थेतरस्त्य॥१०॥२॥ ॐभूर्भु
वः स्वः कूर्मिइहागच्छइहतिष्ठकूर्म्यैनमः कूर्म्मीमावाहयामि ॥ गंधादिबलिदानांतम् ॥
॥ ३ ॥ वाराहींप्रवरांवराहतुल्यरूपांदंष्ट्राग्रोद्धृतवसुंधरांसुधाच्छादितांसक्रोधादितित

नुजेकरपद्महस्तांपद्मायांविमलसद्दशंभृशंवंदे ॥ ॐ मनसः कामुमाकूंतिंवाचः सुत्यमं
शीय ॥ पुशूनाᳬरूपमन्नस्युरसोयशुः श्रीःश्रयतांम्मयिस्वाहा ॥ ३९ ॥४॥ ॐ भूर्भुवः
स्वः वाराहिइहागच्छइहतिष्ठ वाराह्यैनमः वाराहीमावाहनम् गंधादिबलिदानांतम्॥४॥
दर्दुरींदर्दुरावर्णींदेवतावंदितांमंदिरानंदिताम् ॥ सौम्यरूपामहंवारिमूर्तिंशुभांवारिरिसं
स्थितांपूजयेत्प्रत्यहम् ॥ ॐ भूर्भुवः स्वः दर्दुरिइहागच्छइहतिष्ठ दर्दुर्यैनमः॥दर्दुरीमावा
हयामि स्थापयामि ॥ ॐवरुणस्योत्तम्भनमसिवरुणस्यस्कम्भसर्ज्जनीस्थोवरुणस्यऽ
ऋतुसदन्यसिवरुणस्यऽऋतुसदनमसिवरुणस्यऽऋतुसदनुमासीद ॥ ४ ॥ ३६ ॥ गंधा
दिबलिदानांतम्॥अतिदीर्घमुखींविशालपुच्छामरुणांभोजविराजदक्षयुग्मम्॥तरुणार्क
समानकायकांतिंशिशुमारीमुररीकरोमिपूजाम् ॥ ॐ घृतङ्घृतपावानःपिबतुव्वसां ॥१७९॥
वसापावानः पिबतान्तरिक्षस्यहविरसिस्वाहा ॥ दिशःप्प्रदिशऽआदिशोविदिशउ

द्दिशोदिग्भ्यःस्वाहा ॥ ६ ॥ १९ ॥ शिशुमारिइहागच्छइहतिष्ठशिशुमार्यैनमः शि
शुमारीमावाहयामिस्थापयामि गंधादिबलिदानांतम् ॥ सागरस्वर्णदीमानसाद्यंभसां
यादसांचेश्वरींपाशभृद्वल्लभाम् ॥ पुंडरीकच्छविंपुंडरीकाननामीश्वरींतामहंपूजयेमा
तरम् ॥ रयिश्चमेरायश्चमेपुष्टञ्चमेपुष्टिश्चमेविभुचमेप्प्रभुचमेपूर्णंचमेपूर्णतरञ्चमे
कुयवंचमेक्षितंचमेन्नंचमेक्षुञ्चमेयज्ञेनकल्पन्ताम् ॥ १८ ॥ १० ॥ भूर्भुवःस्वः
ईश्वरिइहागच्छ इहतिष्ठ ॥ ईश्वर्यैनमः ईश्वरीमावाहयामि स्थापयामि गंधा
दिबलिदानांतम् ॥७॥ इतिजलमातृपूजनम् ॥ अथजलपूजनम् ॥ आद्याःपूताःसृष्टिक
र्त्रीर्विचित्राधात्रीः सर्वप्राणिनांधान्यपुंजैः ॥ त्रैलोक्यस्यव्यापकावृष्टिहेतुर्वंदेदेवीस्ता
अपः सर्वदाहि ॥ ॐगर्भोऽअस्योषधीनांगर्भोवनस्प्पतीनाम् ॥ गर्भोविश्वस्य
भूतस्याग्नेगर्भोऽअपामसि ॥ १२॥३७॥ ॐभूर्भुवः स्वः आपः इहागच्छतइहतिष्ठत

अद्भ्योनमः अपः आवाहयामि स्थापयामि ॥ गंधादिबलिदानांतम् ॥ इतिजलपूजा ॥
अथजीवमातृपूजनम् ॥ ततोहरिद्राशालिचूर्णरंगेनसप्तरेखाहस्तमात्राः कुर्यात्॥ पूजये
न्नमातंगींपृथुरोमाणंपुच्छांदोलितवारिधिम् ॥ मत्सींमत्स्यसमानांगींवारिण्यावाहया
म्यहम् ॥ ॐसमुद्रोसिनभस्वानार्द्रदानुःशम्भूर्म्मयोभूरभिमावाहिस्वाहा मारुतोसिम
रुतांगणः शम्भूर्म्मयोभूरभिमावाहिस्वाहा वुस्यूरसिदुवस्वाञ्छम्भूर्म्मयोभूरभिमावा
हिस्वाहा ॥१८॥४५॥ ॐभूर्भुवः स्वः मत्सिइहागच्छइहतिष्ठ गंधादिबलिदानांतम् ॥
कूर्मोद्भवांहृदिंदेवींगंभीरांसर्वकर्मसु ॥ पातालतलसंस्थानांहृदिमावाहयाम्यहम् ॥ ॐ
यस्यांस्तेघोरआसञ्जुहोम्म्येषाम्बन्धानामवसर्ज्जनाय॥यान्त्वाजनोभूमिरितिप्प्रमन्दे
तेनिर्ऋतिन्त्वाहम्परिवेदविश्वतः॥१२॥६४॥ ॐभूर्भुवः स्वः ॥ हृदिइहागच्छ
इहतिष्ठ ॥ हृद्यैनमःहृदिमावाहयामि स्थापयामि गंधादिबलिदानांतम् ॥२॥ गोवंश

जातामतिदीर्घगात्रींशोणारविंदप्रतिमाक्षियुग्मामम् ॥ सरत्नभूषामसितांचगोधामाधार
भूतांजगतोहमीडे ॥ ॐ गोमद्रूषुणासुत्याऽश्वावद्यातमश्विना ॥ वृर्त्तीरुद्रानृपाय्य
म् ॥ २० ॥८१॥ ॐ भूर्भुवः स्वः गोधेइहागच्छइहतिष्ठगोधायैनमः गोधामावाहयामि
स्थापयामि ॥ गंधादिबलिदानांतम् ॥ ३ ॥ मदनकेतुगतांमकराकृतिंविततगात्रयुताम
तिमेदुराम् ॥ प्रबलमारुतधूतसुमंचकांबुजवृषांमकरीमहमर्चये ॥ ॐमापोमौषधीर्हिंठं
सीर्द्धाम्नोधाम्नोराजँस्ततोवरुणनोमुञ्च॥ यदाहुरघ्न्याऽइतिवरुणेतिशपामहेततोवरुण
नोमुञ्च ॥ सुमित्रियानऽआपऽओषधयःसन्तु दुर्मित्रियास्तस्मैसन्तुयोऽस्मान्द्वे
ष्टियञ्चवयन्द्विष्मः ॥ ६ ॥ २२ ॥ ॐ भूर्भुवः स्वः मकरिइहागच्छ इहतिष्ठ मकर्यै
नमः मकरीमावाहयामिस्थापयामि गंधादिबलिदानांतम् ॥ ४ ॥ अंधकारसमुत्पन्नांडुं
डुभींबिलमध्यगाम्॥अतिलंबतनुंवंदेसततंडुंडुभाकृतिम् ॥ ॐ तेऽआचरन्तीसमनेवयो

२१

षांमुतेवंपुत्रम्बिभृतामुपस्त्थें ॥ अपुशत्रूंन्विद्ध्यताथ्वंसंविदुानेआत्नींऽइमेविष्फुरन्ती
ऽअमित्रांन् ॥ २९ ॥ ४१ ॥ ॐ भूर्भुवःस्वः डुंडुभिइहागच्छइहतिष्ठ डुंडुभ्यैनमः
डुंडुभीमावाहयामिस्थापयामि गंधादिबलिदानांतम् ॥ ५ ॥ चतुरशीतिकलक्षसुयो
जनप्रमितदीर्घतनुंघनरोमशाम् ॥ सजलमेघधरांजलदाकृतिंसविलयांहृदिदर्दुरिकांभ
जे ॥ ॐ वरुणः प्प्राविताभुवन्मित्रोविश्श्वांभिरुतिभिः ॥ करंतान्नःसुराधंसः ॥३३॥
॥ ४६ ॥ ॐ भूर्भुवः स्वः दर्दुरिइहागच्छइहतिष्ठ दर्दुर्य्यैनमः दर्दुरीमावाहयामि गं
धादिबलिदानांतम् ॥६॥ अंभोद्भवांसिद्धिदात्रींनीलांभोरुहलोचनाम् ॥ जलीमावाहयाम्य
त्रदेवींविश्वगतांशुभाम् ॥ ॐपयः पृथिव्याम्पयुऽओषधीषुपयोंदिव्यन्तारिक्षेपयोंधाः ॥
पयंस्वतीः प्प्रदिशंः सन्तुमह्यम् ॥ १८ ॥ ३६ ॥ ॐभूर्भुवः स्वः जलिइहागच्छइहतिष्ठ ॥१८१॥
जल्यैनमः जलीमावाहयामि गंधादिबलिदानांतम् ॥ ॥ इतिजीवमातृपूजनम् ॥ अथ

चतुःषष्टिजलयोगिनीपूजनम् ॥ जलादिपूजासुविशेषपूज्येवंदेचतुःषष्टिसुयोगिनित्वाम् ॥
दिव्योपचारैर्बलिभिश्चसम्यगाराद्धुमिच्छामिनमोनमस्ते ॥ इतिकुंकुमाक्षतान्जलेप्र
क्षिप्य चतुःषष्टिजलयोगिनीभ्योनमः ॥ इतिगंधादिनासंपूज्य बलिंदत्त्वा नमस्कारंकु
र्यात् ॥ इतिसंक्षिप्तचतुःषष्टियोगिनीपूजा ॥ ततोवायवींदिशंगत्वासाक्षतहस्तः कुंकुमेनपु
रुषाकृतिंक्षेत्रपालंविलिख्यपूजयेत् ॥ डमरुत्रिशूलहस्तंघंटाघोरारवोद्दंडम् ॥ कुंडलिसद्रुप
वीतंक्षेत्रपतिंरुंडमालिनंवंदे ॥ इतिध्यात्वा ॥ क्षेत्रपालमहीपालबलिंभुंक्ष्वमयार्पितम् ॥ प्र
सन्नःपूरयाशुत्वंवांछितान्मेमनोरथान् ॥ ॐक्षुत्रस्ययोनिरसिक्षुत्रस्यनाभिरसि ॥ मात्वांहि
ꣳसीन्मामाहिꣳसीः ॥ २० ॥ १ ॥ क्षेत्रपालइहागच्छइहतिष्ठ क्षेत्रपालायनमः क्षेत्र
पालमावाहयामि ॥ गंधादिभिः संपूज्य कुंकुमदीपयुक्तंदधिमाषभक्तबलिंदद्यात् ॥ इति
क्षेत्रपालपूजा ॥ ततः प्रक्षालितपाणिपादः कृताचमनः पूर्णवासांसित्यक्त्वा तस्माद्दे

 शादुपक्रम्यवस्त्रांतरंपरिधायपूर्वासनेउपविश्य साक्षतहस्तोजलेक्षीरादिसप्तसागरान् ॥
 मानसादिसरांसिपुष्करादितीर्थानिनदीश्चावाहयेत् ॥ तद्यथा-नानारत्नविराजमान
मुकुटान्वैडूर्यसत्कुंडलान्प्रफुल्लांभोजविलोचनान् स्मितमुखान्मुक्ताप्रवालाधरान् ॥
मंदारप्रसुनस्त्रजः शुचितनून्मुक्ताक्षमालाकरान् मौंजीदंडसुमेखलादिललितान्सद्ब्र
ह्मचारिप्रभान् ॥ १ ॥ गंभीरांगान्शुभांगान् सुबहुसलिलोत्पीडमूर्धांसुखाभद्वीपाना
वर्तकर्णांततनिकटलसद्विद्रुमोष्ठान्सुपुष्टान् ॥ शैवालोदारकेशानहिग्रहजठरान्वी
चिहस्तान्नदीशान्कूर्मादिस्थान्सुपादान्विविधमणिगणप्रीणितस्वर्गवृंदान् ॥ २ ॥ वि
कटमकरवृंदैर्भीषणान्मानहीनान् सकलमखिलमेघैरर्थ्यमानाज्जलार्थम् ॥ युवतिभिर
पिगंगाद्याभिरुच्चैः कृतार्चानहमिहहृदिदुग्धाद्यंबुधीन्सप्तवंदे ॥ ३ ॥ इतिदुग्धादि
सप्तसागरानावाहयेत् ॥ ॐसमुद्रादूर्मिर्मधुमाँऽउदारदुपाꣳशुनासममृतत्वमानट् ॥

घृतस्यनामगुह्यंयदस्तिजिह्वादेवानाममृतस्यनाभिः ॥ १७ ॥ ८९ ॥ ॐभूर्भुवः स्वः
दुग्धादिसप्तसागराः इहागच्छतइहतिष्ठत दुग्धादिसप्तसागरेभ्योनमः दुग्धादिसप्त
सागरान् आवाहयामि गंधादिबलिदानांतंपूजयेत् ॥ मानसंहंसकंपंपाकुरुक्षेत्रंचपु
ष्करम् ॥ प्रयागोभद्रतीर्थंचमार्कंडामरकंटकम् ॥ १ ॥ गंगाभानुसुताविरिंचितनयासिं
धुर्वितस्तातथा गोदागोमतिकासशोणशरयूचंद्राविपाशाअपि ॥ क्षिप्रामेकलकन्यका
तपनजापूर्णाप्रणीतातथा भीमाकृष्णनदीसुवेत्रवतिकाचर्मण्वतीगंडकी ॥ २ ॥ का
वेरीतमसाशतद्रुमुरलादुग्धातथाभास्वतीवेणापुण्यजलामहीनसरितः पुण्याइमाआ
पगाः ॥ ब्रह्मर्षिश्रिततीरकाः सुविमलागंधांभसः पुण्यदाः स्नानेनापहृतांहसस्त्रि
जगतामावाहयाम्यंभसि ॥ ३ ॥ अमृतकुंभकरांसितवाससंवृषगतिंविमलांहरि
पादजाम् ॥ तुहिनभूधरमूर्द्धविहारिणींसगरपुत्रगतिंभजजाह्नवीम् ॥ ४ ॥ कमठ

राजगतिंसुकलिंदजामतसिभासमञ्जुभ्रवरांबराम् ॥ कुवलयाभदृशंहरिसौख्यदांहृ
दिभजेयमुनांरविनंदिनीम् ॥ ५ ॥ प्रवरमत्तमरालगतिंवरामरुणभासमथारुणवास
सम्॥ विधिसुतामृषिसंश्रितसत्तटामिहसरस्वतिकांहृदिभावये॥ॐइमम्मेव्वरुणश्रुधीह
वंमद्याचंमृडय ॥ त्वामवस्युराचके ॥ २१ ॥ १ ॥ ॐभूर्भुवः स्वः मानसादिसरां
सिपुष्करादितीर्थानिगंगादिमहानद्यश्चइहागच्छत इहतिष्ठत मानसादिसरोभ्यः पु
ष्करादितीर्थेभ्योगंगादिमहानदीभ्योनमः मानसादिसरांसि पुष्करादितीर्थानि गंगा
दिमहानदीः आवाहयामि गंधादिबलिदानांतम् ॥ ततःसाक्षतहस्तः दिशःप्रतीच्याअ
धिपंजलानांनाथंलसत्पाशकरंसितांगम् ॥ सुहासवक्त्रंसितचारुहारंमहाबलंतंवरुणंप्रव
दे ॥ ७ ॥ ॐ तत्त्वांयामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेड
मानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः ॥ २१ ॥ २ ॥ ॐभूर्भुवःस्वः वरुण

इहागच्छ इहतिष्ठ वरुणायनमः वरुणमावाहयामि ॥ गंधादिबलिदानांतम् ॥ कुंदे
न्दुशंखस्फटिकांगकांतेवारांपतेनिर्मलहारवस्त्र ॥ सत्पाशपाणेभवतःप्रसादात्करोमि
यज्ञंभवसन्निधिस्थः॥ इतिनमस्कृत्यप्रार्थयेत् ॥ इतिवरुणपूजा॥ ततःपंचामृतंहस्तेगृही
त्वा पयःपृथिव्यामित्यादिस्वस्वमंत्रेणजलेप्रक्षिपेत् ॥ ॐपयं॑ पृथि॒व्याम्पय॒ऽओष॑धी
षु॒पयो॑दि॒व्यन्तरि॑क्षे॒पयो॑धाः ॥ पय॑स्वतीः॒ प्प्रदिशः॑सन्तु॒मह्य॑म् ॥१८॥ ३६ ॥ इतिमंत्रे
णदुग्धंक्षिपेत्॥ॐद॒धि॒क्राव्णो॑ऽअकारिषञ्जि॒ष्णोरश्व॑स्यवा॒जिनः॑॥सु॒र॒भिनो॒मुखा॑क
र॒त्प्रण॒ऽआयूं॑षितारिषत् ॥ २३ ॥ ३२ ॥ इत्यनेनदधिप्रक्षिपेत् ॥ घृतङ्घृतपावनः॒पि
बतवसांवसापावनः॒ पिबतान्तरि॑क्षस्यहविरसिस्वाहा ॥ दिशः॑प्प्रदिशऽआदिशोविदि
शऽउद्दिशोदिग्भ्यः॒स्वाहा॥६॥१९॥इत्यनेनघृतंप्रक्षिपेत्॥ अपा॒र्ठ॑ रस॒मुद्व॑यस॒र्ठ॑सूर्ये॑
सन्त॒र्ठ॑ स॒माहि॑तम् ॥ अपा॒र्ठ॑रस॒स्ययोरस॒स्तंवो॑गृह्णाम्युत्तममुपयामगृहीतोसीन्द्रा

यत्वाजुष्टंङ्गृह्णाम्म्येषतेयोनिरिन्द्रायत्वाजुष्टंतमम् ॥९॥३॥ इत्यनेनशर्करांप्रक्षिपेत् ॥
मधुवाताऽऋतायतेमधुंक्षरन्तिसिन्धवः ॥ माध्वीर्न्नः सन्त्वोषधीः ॥ १३ ॥ २७ ॥
इत्यनेनमंत्रेणमधुप्रक्षिपेत् ॥ पञ्चनद्यः सरस्वतीमपियन्तिसस्रोतसः ॥ सरस्वतीतुप
चधासोदेशेभवत्सरित् ॥ ३४ ॥ ११ ॥ इत्यनेनमंत्रेणपंचामृतंक्षिपेत् ॥ अथघृ
ताहुतीर्जलेजुहुयात् ॥ ॐ अद्भ्यः स्वाहा ॥ १ ॥ ॐ वार्भ्यः स्वाहा ॥ २ ॥ ॐ उद
कायस्वाहा ॥ ३ ॥ ॐ तिष्ठंतीभ्यः स्वाहा ॥ ४ ॥ ॐ स्रवन्तीभ्यः स्वाहा ॥ ५ ॥ ॐ
स्यन्दमानाभ्यः स्वाहा ॥ ६ ॥ ॐ कूप्याभ्यः स्वाहा ॥ ७ ॥ ॐ सूद्याभ्यः स्वाहा ॥
॥ ८ ॥ ॐ धार्य्याभ्यः स्वाहा ॥ ९ ॥ ॐ अर्णवायस्वाहा ॥ १० ॥ ॐ समुद्रा
यस्वाहा ॥ ११ ॥ ॐ सरिरायस्वाहा ॥ १२ ॥ केचित्प्रतिमंत्रंत्यागमिच्छंति ॥ ततोहस्ते
जलंगृहीत्वा ॥ ब्राह्मणमद्येतियजुषासर्वजलाधिपतयेसपरिवारायवरुणायेदंप्रीयता

मितिवदेत् ॥ ब्राह्मणमुद्यव्विदेयंपितृमन्तंम्पैतृमुत्यमृषिंमार्षेयंयठंसुधातुंदक्षिणम् ॥
अस्मद्दातादेवत्राग्ंच्छतप्प्रदातारमाविशत ॥ ७ ॥ ४६ ॥ जलंक्षिपेच्च ततः अर्घ्यपात्रं
हस्तेगृहीत्वा॥तत्रगंधाक्षतपुष्पाणिप्रक्षिप्य॥ उदारद्युतेनिर्मलोदारहासस्फुरत्पाशपाणे
दिगीशादिवंद्यः ॥ पतेयादसांसार्द्रपीयूषदृष्टेनमस्तेनमस्तेंबुनाथप्रचेतः ॥ वरुणस्योत्तं
भनमितित्रिरर्घ्यंदद्यात् ॥ ॐवरुणस्योत्तम्भंनमसिवरुणस्यस्कम्भसर्जनीस्थोवरुण
स्यऽऋतुसदंन्यसिवरुणस्यऽऋतुसदंनमसिवरुणस्यऽऋतुसदंनुमासीद ॥ श्रीफला
दीनि याः फलिनीरितिमंत्रेणजलेप्रक्षिपेत् ॥ ॐयाः फुलिनुीर्य्याऽअंफुलाऽअंपुष्पायाश्च
पुष्पिणीः॥ बृहुस्पतिंप्रसूतास्तानोंमुंचुन्त्वठं हंसः ॥१२॥८९॥ ततः कलशस्थापनम् ॥
विदिक्षुचत्वारोमध्येएकइतिपंच ॥ तद्यथा अष्टदलानिकृत्वा ॥ यदेतन्मंडलमितिमंड
लस्पर्शनम् ॥ यदेतन्मंडलंतपतितन्महदुक्थयन्ताऽऋचःसऽऋचाल्लोकोथयदेतदर्चिर्दी

प्यते ॥ तन्महाव्रतंतानिसामानिससाम्नांल्लोकोथऽयऽवषऽएतस्मिन्मंडलेपुरुषः सोग्नि
स्तानियजूꣳषिसयजुषान्लोकः॥ओषधयः समितिमंडलेयवान्स्थाप्य॥ॐ ओषधयः
समंवदन्तुसोमेनसहराज्ञा ॥ यस्मैकृणोतिब्राह्मणस्तꣳ राजन्पारयामसि॥१२।९६॥आ
जिघ्रकलशमिति अकालवर्णमव्रणंबहिर्दध्यक्षतविभूषितंकलशपंचकंस्थापयेत् ॥ ॐ
आजिघ्रकलशंम्मह्यात्वाविशन्त्विन्दवः ॥ पुनरूर्ज्जानिवर्त्तस्वसानः सहस्रंधुक्ष्वोरुधा
रापयस्वतीपुनर्माविशताद्रयिः ॥८॥४२॥ आपोहिष्ठेतिजलमापूर्य ॐ आपोहिष्ठामयो
भुवस्तानऽऊर्ज्जेदधातन ॥ महेरणायचक्षसे ॥ ११ ॥ ५० ॥ अꣳशुनातइतिगंधं
अꣳशुनातेऽअꣳशुःपृच्यतांपरुषापरुः ॥ गंधस्तेसोमंमवतुमदायरसोऽअच्युतः ॥
॥ २० ॥ २७ ॥ याऽओषधीरित्योषधीः ॥ याऽओषधीःपूर्वाजातादेवेभ्यस्त्रियुगम्पुरा॥ ॥१८९॥
मनैनुबभ्रूणामहꣳशतन्धामानिसप्तचं ॥ १२ ॥ ७५ ॥ ओषधयः समितियवान् ॥

ओषधयः सम० मसि ॥ देवस्यत्वेतिकुशोदकम् ॥ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहु
भ्याम्पूष्णोहस्ताभ्याम् ॥ पंचामृतमंत्रैःपंचामृतम्॥ पंचनद्यः सरस्वतीमपियन्तिसस्रो
तसः ॥ सरस्वतीतुपंचधासोदेशेभवत्सरित् ॥ काण्डात्काण्डादितिदूर्वाः ॥ ॐकाण्डा
त्काण्डात्प्ररोहन्तीपरुषःपरुषस्परि ॥ एवानोदूर्वेप्रतनुसहस्रेणशतेनच ॥ अश्वत्थेवइति
पंचपल्लवान् ॥ ॐअश्वत्थेवोनिषदनंपर्णेवोवसतिष्कृता ॥ गोभाजइत्किलासथयत्सन
वथपूरुषम् ॥ स्योनापृथिवीतिसप्तमृदः ॥ ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी ॥
यच्छानःशर्म्मसप्रथाः॥याःफलिनीरितिफलम्॥ॐयाः फलिनीर्या अफलाअपुष्पाया
श्चपुष्पिणीः॥बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वंहसः॥परिवाजपतिरितिपंचरत्नानि॥ॐप
रिवाजपतिःकविरग्निर्हव्यान्यक्रमीत् ॥ दधद्रत्नानिदाशुषे ॥ ११॥२५॥ हिरण्यगर्भइति
हिरण्यम्॥ॐहिरण्यगर्भः समवर्त्तताग्रेभूतस्य जातःपतिरेकऽआसीत्॥सदाधारपृथिवी

प्यते ॥ तन्महाव्रतंतानिसामानिससाम्नांल्लोकोथऽयऽवषऽएतस्मिन्मंडलेपुरुषः सोग्नि
स्तानियजूᳫंषिसयजुषान्ल्लोकः॥ओषधयः समितिमंडलेयवान्स्थाप्य॥ॐ ओषधयः
समंवदन्तुसोमेनसहराज्ञा ॥ यस्मैकृणोतिब्राह्मणस्तᳫं राजन्पारयामसि॥१२॥९६॥आ
जिघ्रकलशमिति अकालवर्णमव्रणंबहिर्दध्यक्षतविभूषितंकलशपंचकंस्थापयेत् ॥ ॐ
आजिघ्रकलशम्मह्यात्वाविशन्त्विन्दवः ॥ पुनरूर्ज्जानिवर्त्तस्वसानः सहस्रंधुक्ष्वोरुधा
रापयस्वतीपुनर्माविशताद्रयिः ॥८॥४२॥ आपोहिष्ठेतिजलमापूर्य ॐ आपोहिष्ठामयो
भुवस्तानऽऊर्ज्जेदधातन ॥ महेरणायचक्षसे ॥ ११ ॥ ५० ॥ अᳫंशुनातइतिगंधं
अᳫंशुनातेऽअᳫंशुः पृच्यतांपरुषापरुः ॥ गंधस्तेसोममवतुमदायरसोऽअच्युतः ॥
॥ २० ॥ २७ ॥ याऽओषधीरित्योषधीः ॥ याऽओषधीः पूर्वाजातादेवेभ्यस्त्रियुगम्पुरा॥
मनैनुबभ्रूणामहᳫंशतन्धामानिसप्तचं ॥ १२ ॥ ७५ ॥ ओषधयः समितियवान् ॥

ओषधयः समं० मसि ॥ देवस्यत्वेतिकुशोदकम् ॥ देवस्यंत्वासवितुःप्रंसवेश्विनोर्बाहु
भ्यांम्पूष्णोहस्ताभ्याम् ॥ पंचामृतमंत्रैःपंचामृतम्॥ पंचनद्यः सरस्वतीमपियन्तिसस्रो
तसः ॥ सरस्वतीतुपंचधासोदेशेभवत्सरित् ॥ काण्डात्काण्डादितिदूर्वाः ॥ ॐकाण्डा
त्काण्डात्प्ररोहन्तीपरुषः परुषस्परि ॥ एवानोदूर्वेप्रतनुसहस्रेणशतेनच ॥ अश्वत्थेवइति
पंचपल्लवान् ॥ ॐअश्वत्थेवोनिषदनंपर्णेवोवसतिष्कृता ॥ गोभाजइत्किलासथयत्सन
वथपूरुषम् ॥ स्योनापृथिवीतिसप्तमृदः ॥ ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी ॥
यच्छानःशर्म्मसप्रथाः॥याःफलिनीरितिफलम्॥ॐयाः फलिनीर्या अफलाअपुष्पाया
श्चपुष्पिणीः॥बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वंहसः॥परिवाजपतिरितिपंचरत्नानि॥ॐप
रिवाजपतिःकविरग्निर्हव्यान्यक्रमीत् ॥ दधद्रत्नानिदाशुषे ॥ ११॥२५॥ हिरण्यगर्भइति
हिरण्यम्॥ॐहिरण्यगर्भः समवर्त्ततांग्रेभूतस्य जातःपतिरेकआसीत्॥सदाधारपृथिवी

प्र. सं. न्द्यामुतेमांकस्मैदेवायहविषाविधेम ॥ १३ ॥ ४ ॥ युवासुवासा इति वस्त्रयुग्मेनवे ज. या.
॥१८६॥ ष्टनम् ॥ ॐ युवासुवासाः परिवीत आगात्सऽउश्रेयान्भवति जायमानः ॥ तन्धी
रासः कवयऽउन्नयन्तिस्वाध्योमनसादेवयन्तः ॥ गंधद्वारामितिगंधम् ॥ ॐगंधद्वारा
न्दुराधर्षान्नित्यपुष्टांकरीषिणीम् ॥ ईश्वरींसर्वभूतानां तामिहोपह्वयेश्रियम् ॥ ॐअ
क्षन्नमीमदन्तह्यवप्रियाऽऽअधूषत ॥ अस्तोषतस्वभानवोविप्रानविष्ठयामती योजा
न्विन्द्रतेहरी ॥ याः फलिनीरितिपुष्पम् ॥ ॐ याः फलिनीर्याऽअफलाऽअपुष्पायाश्च
पुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुंचन्त्वंहसः ॥१२॥८९॥ वसवस्त्वेतिधूपम्॥ॐ
वसवस्त्वाधूपयंतुगायत्रेणच्छन्दसाँगिरस्वद्रुद्रास्त्वाधूपयन्तुत्रैष्टुभेनच्छन्दसांगिरस्व
दादित्यास्त्वाधूपयंतुजागतेनच्छन्दसांगिरस्वद्विश्वेत्वादेवावैश्वानराधूपयन्त्वानुष्टुभे ॥१८६॥
नच्छन्दसाङ्गिरस्वदिन्द्रस्त्वाधूपयतुवरुणस्त्वाधूपयतुविष्णुस्त्वाधूपयतु ॥ ११ ॥६०॥

अग्निर्ज्ज्योतिरितिदीपम्॥ ॐ अग्निर्ज्ज्योतिर्ज्ज्योतिरग्निः स्वाहासूर्य्योज्योतिर्ज्ज्योतिः
सूर्य्यःस्वाहा ॥ अग्निर्वर्च्चोज्योतिर्व्वर्च्चःस्वाहासूर्य्योव्वर्च्चोज्योतिर्व्वर्च्चःस्वाहा ॥ ज्योतिः
सूर्य्यः सूर्य्योज्योति स्वाहा ॥ ३ ॥ ९ ॥ अन्नपते इति नैवेद्यम् ॥ ॐ अन्नपतेन्न
स्यनोदेह्यनमीवस्यशुष्मिणः ॥ प्रप्रदातारन्तारिषऽऊर्ज्जन्नोधेहिद्विपदेचतुष्पदे ॥११॥
॥ ८३॥ नमःपर्णायेतितांबूलम्॥ॐ नमःपर्ण्यायचपर्णशदायचनमऽउद्गुरमाणायचाभि
घ्नतेचनमऽआखिदतेचप्रखिदतेचनमऽइषुकृद्भ्योधनुष्कृद्भ्यश्चवोनमोनमोवः किरि
केभ्योदेवानाꣳहृदयेभ्योनमोविचिन्वत्केभ्योनमोविक्षिणत्केभ्योनमऽआनिर्हतेभ्यः॥
॥ १६ ॥ ४६ ॥ हिरण्यगर्भइतिहिरण्यं दक्षिणांचकलशेसमर्पयेत् ॥ ॐ हिरण्यगर्भः
समवर्त्ततागे्रभूतस्यजातः पतिरेकआसीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवाय
हविषाविधेम ॥ १३ ॥ ४ ॥ समुद्राचमनयेनचक्रेयेनचबुद्धिमान् ॥ सूर्यमार्गस्यसरो

९८

द्वाविंध्याद्रिः स्ववशीकृतः ॥ १ ॥ तस्यागस्त्यस्यतातस्त्वंमंगलादिषुवंदितः ॥ वरुण
स्यपरंस्थानंतस्मैकलशतेनमः ॥२॥ सोमः पवतेइतिनमस्कुर्यात्॥ ॐ सोमःपवतेसोमः
पवतेस्मैब्रह्मणेस्मैक्षत्रायास्मैसुन्वतेयजमानायपवतऽइषऽऊर्ज्जेपवतेद्भ्यऽओषधीभ्यः
पवतेद्यावापृथिवीभ्याम्पवतेसुभूतायपवतेविश्वेभ्यस्त्वादेवेभ्यऽएषतेयोनिर्विश्वेभ्यस्त्वा
देवेभ्यः ॥ ७ ॥ २१ ॥ ततोगंधपुष्पाक्षतैराचार्यादीन् सुवासिनीश्चहरिद्राकुंकुमांजन
कंकणाद्याभरणादिभिःपूजयेत्॥ तांबूलचणकादिकंदद्यादिति ॥ तत उत्थाय ॥ उत्तिष्ठ
ब्रह्मणस्पतेइतिकलशानुत्थाप्यआप्याय स्वेतिमस्तकोपरिधारयेत् ॥ ॐ उत्तिष्ठब्र
ह्मणस्पतेदेवयन्तंस्त्वेमहे ॥ उपप्रयन्तुमरुतःसुदानवऽइन्द्रप्राशूर्भवासचा ॥ ३४ ॥
॥ ५६ ॥ ॐ आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यम् ॥ भवावाजस्यसङ्गथे ॥ ततोमं
त्रवाद्यघोषेणअर्द्धमार्गेवसेत् ॥ स्थानेस्वल्पांभूमिंसिंचेत् ॥ ततइन्द्रादिलोकपालेभ्योनम

इतिगंधादिभिः संपूज्य बलिंदद्यात् ॥ ततः क्षेत्रपालंपूजयेत् ॥ आवाहयामिदेवेशंभैरवंक्षे
त्रपालिनम् ॥ दिव्यरूपंमहाकायंनानाभरणभूषितम् ॥ ॐभूर्भुवःस्वः क्षेत्रपालइहागच्छइ
हतिष्ठ क्षेत्रपालायनमः क्षेत्रपालमावाहयामि क्षत्रस्योल्बमितिमंत्रेणक्षेत्रपालंपूज
येत् ॥ ॐक्षत्रस्योल्बमसिक्षत्रस्यजरायवसिक्षत्रस्ययोनिरसिक्षत्रस्यनाभिरसीन्द्रस्य
वार्त्रघ्नमसिमित्रस्यासिवरुणस्यासित्वयायंवृत्रंवधेत् ॥ दवासिरुजासिक्षुमासि ॥ पातै
नंप्राञ्चं पातैनंप्रत्यञ्चं पातैनंतिर्य्यञ्चंदिग्भ्यः पात ॥ १० ॥ ८ ॥ गंधादिपूजा ततोगंधपुष्पा
क्षतमाषभक्तकुंकुमाकृतिबलिंहस्तेगृहीत्वा प्रार्थयेत् ॥ कौलीरेचित्रकूटेहिमगिरिविवरे
शस्त्रजालांधकारेसौराष्ट्रेसिंधुदेशेमगधपुरवरेकौसलेवाकलिंगे ॥ कर्णाटेकोंकणेवाभृगु
सुतनगरेकान्यकुब्जेस्थितेवा सर्वस्मात्सर्वदावाह्यपमृतिभयतः पातुवः क्षेत्रपालः ॥
॥ १ ॥ क्षेत्रपालमहाबाहोमहाबलपराक्रम ॥ क्षेत्राणांरक्षणार्थायबलिंगृह्णनमोनमः ॥ २ ॥

ॐ नमः क्षेत्रपालायमहाबलपराक्रमाय बबरकेशायसमस्तव्यापकायचतुःषष्टिरू
पायनगरग्रामक्षेत्रवनव्यापिनेसकलजगत्पूजिताय ॥ ॐ ह्राँह्रीँ हूँ क्षेत्रपालबलिंगृह्ण
णभैरवरूपेणकुरुकुरु क्रूँक्रूँफाँफाँह्रींह्रीं डमरुडमरुकुरुते यमदंडहस्ते ह्रूँह्रूँह्रूँरूपादि
रूपादिकिलिकिलिकिलितंपातुनः क्षेत्रपालः ॥ यंयंयं यक्षरूपंदशदिशिवदनंभूमिकं
पायमानं संसंसंहारमूर्त्तिंशिरसिधृतजटाशेखरंचंद्रबिंबम् ॥ दंदंदंदीर्घकेशंकृतनरवपुषं
ऊर्ध्वरेखाकरालंपंपंपंपापनाशंप्रणतपशुपतिंभैरवंक्षेत्रपालम् ॥ १ ॥ ॐहिङ्कारायस्वा
हाहिङ्कृतायस्वाहाक्रन्दंतेस्वाहा वक्रुन्दायस्वाहा प्रोथंतेस्वाहा प्रप्रोथायस्वाहागुन्धा
यस्वाहा घ्रातायस्वाहा निविष्टायस्वाहोपविष्टायस्वाहासंदितायस्वाहावल्गंतेस्वा
हासीनायस्वाहाशयानायस्वाहा स्वपंतेस्वाहा जाग्रतेस्वाहा कूजंतेस्वाहा प्रबुद्धया
स्वाहाविजृम्भमाणायस्वाहा विचृतायस्वाहासंहानायस्वाहोपस्थितायस्वाहायनाय

स्वाहा प्रायणायस्वाहा ॥ २२ ॥ ७ ॥ यथावैहविषोहुतस्यस्कंदे ॥ भोक्षेत्रपालबलिंगृह्ण
गृह्णविघ्नंनिवारयनिवारयस्वाहा ॥ अनेनबलिंदद्यात् ॥ ध्रुवक्षितिरित्यादिचतुर्भिर्नम
स्कृत्य पुष्पांजलिंक्षिपेत् ॥ ध्रुवक्षितिर्ध्रुवयोनिः ॥ ॐध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासिध्रुवंय्यो
निमासीदसाधया ॥ उक्ख्यस्यकेतुम्प्रंथमञ्जुषाणाश्विनाध्वुर्य्यूसांदयतामिहत्वां ॥
॥ १४॥ १ ॥ कुलायिनीघृतवंतीपुरंन्धिः स्योनेसीदसदनेपृथिव्याः ॥ अभित्वारुद्रावसं
वोगृणन्तिवमाब्रह्मपीपिहिसौभंगायाश्विना ध्वुर्य्यूसांदयतामिहत्वां ॥१४॥२॥ स्वैर्द्दक्षैः॥
ॐस्वैर्द्दक्षैर्दक्षपितेहसीददेवाना ७ँ सुम्म्नेबृहतेरणाय ॥ पितेवैधिसूनवऽआसुशेवास्वा
वेशातन्वासंविशस्वाश्विनाध्वुर्य्यूसांदयतामिहत्वां ॥ १४ ॥ ३ ॥ पृथिव्याः पुरीषम् ॥
ॐपृथिव्याःपुरीषमस्यप्सोनामतान्त्वाविश्वेऽअभिगृणन्तुदेवाः ॥ स्तोमंपृष्ठाघृतवंती

हसीदप्प्रजावंदुस्मेद्रविणायंजस्वाशिश्वनांध्वुर्य्यूंसादयतामिहत्वा ॥ १४ ॥ ४ ॥ पा
णिपादंप्रक्षाल्याचम्य मंडपसमीपमागत्य मंडपंप्रदक्षिणीकृत्य पश्चिमेस्थित्वाआ
जिघ्रमितिमंत्रेणकलशंस्थाप्य॥ॐआजिघ्रकुलशंम्मह्यात्वाविशन्त्विन्दवः॥पुनरूर्ज्जा
निवर्त्तस्वसानः सहस्रंधुक्ष्वोरुधारापयस्वतीपुनर्माविशताद्रयिः॥८।४२। अंजलिंबद्धाप
ठेत्॥ सुराणामधियज्ञेशामंडपेस्थापितामया॥तस्ययज्ञेमहामंत्रीत्वंसौख्यंमांचदेहिमे॥
इतिपठित्वा नमस्कारंकुर्यात् ॥ इतिजलयात्राविधिः ॥ ७ ॥ अथाचार्य्योयजमानेन
सहऋत्विग्भिः ॥ स्नपनमंडपमागत्यस्नपनद्रव्यसंभृतिंकृत्वा तत्रवेदिकात्रयंभूमिंच
ॐ नमोनारायणायेत्यभिमंत्र्यतेनपंचगव्येनसंप्रोक्ष्य ॥ तत्रदक्षिणवेदिकायामास्तृत
वालुकायामक्षतैः स्वस्तिकमालिख्य तत्रसप्तधान्यकृताधारमुदगग्रंभद्रपीठंनिधाय ॥१८९॥

१ अत्रकुत्रचिद्ग्रंथेविश्वकर्म्मणोध्यानंपूजनंचोक्त–विश्वकर्मातुकर्त्तव्यः श्मश्रुलोमतवचाधरः।सदंडपाणिर्द्विभुजस्तेजोमूर्तिंधरोविभुरिति।

वेदिकायाः पश्चाद्वारिपूर्णान्सपल्लवान्त्रिसूत्रीवेष्टितान्षट्कलशान् मृत्तिकागोमयक षायगोमूत्रभस्मगंधोदकैः प्रपूर्यापरान्पंचदेवतासंज्ञांश्चचिह्नयित्वा गन्धोदकेनापूर्य उदक्संस्थंपंक्तिरूपेणासादयेत् ॥ तत्रांत्यः स्थपतिकलशः ॥ कलशेषुमृत्तिकादिप्रमा णंतुइत्थंबोध्यम् ॥ मृत्तिकाप्रमाणंषट्पलं गोमयप्रमाणंचदशपलानि मुष्टिसंमितंभस्मप्र माणम् ॥ त्रिपलंपंचगव्यप्रमाणम् ॥ क्षीरप्रमाणंषोडशपलम् ॥ दधिप्रमाणंपंचविंशतिप लम् ॥ सप्तपलंघृतप्रमाणम् ॥ त्रिपलंमधुप्रमाणं त्रिपलंशर्कराप्रमाणंबोध्यम् ॥ भद्रपीठयुत मध्यमवेदिपाश्चिमेप्येवंस्थपतिकलशातिरिक्तास्तएवैकादश ॥ भद्रपीठयुतोत्तरवेद्यां तुपरितोष्टौकलशान्पूर्वादिक्रमेण क्षारोदक १ क्षीर २ दधि ३ सर्पिः ४ सुरा ५ इक्षु रस ६ दूर्वोदक ७ दर्भोदक ८ युतान्हिरण्यगर्भाद्यैरष्टभिर्मंत्रैर्विन्यसेत् ॥ ततोन्ये चवेद्याः पश्चिमभागेमृत्तिका १ गोमय २ गोमूत्र ३ भस्म ४ मिलितपंचगव्य ५

क्षीर ६ दधि ७ घृत ८ मधु ९ शर्करा १० युताः दशकलशाः स्थाप्याः चतुर्दशशुद्धोदककलशाअपितत्रैवस्थाप्याः ॥ अथान्यान्पंचत्रिंशत्कलशानासादयेत् ॥ तेषुपंचत्रिंशत्कलशेषुमध्येपंचसुपृथक्२पंचामृतानिपंचसुजलम् ॥ पंचसुपल्लवकषायाः दशक्रमात् पुष्पैः १ फलैः २ सौवर्णजलेन ३ गोशृंगोदकेन ४ धान्यैः ५ सहस्रच्छिद्रैः ६ सर्वौषधीभिः ७ पंचपल्लवैः ८ दूर्वाभिः ९ नवरत्नैर्युताः १० कार्याः अवशिष्टेषुदशसुदशपल्लवसहितेषु शुद्धजलमापूर्यलोकपालानावाहयेत् ॥ अथदशपल्लवनामानि कदंबपल्लवः १ शाल्मलीपल्लवः २ जंबूपल्लवः ३ अशोकपल्लवः ४ प्लक्षपल्लवः ५ उदुंबरपल्लवः ६ वटपल्लवः ७ बिल्वपल्लवः ८ नागपल्लवः ९ पलाशपल्लवः १० एते दशपल्लवाः सर्वेपि कलशा आजिघ्रकलशमित्यादिमंत्रेणस्थाप्याः ॥ ततः अन्यान्यपि वस्तूनि स्नानसाधनानि तत्रस्थाप

येत् ॥ तद्यथा–सूक्ष्मतंतुयुतंशुभ्रवस्त्रम् ॥ सुगंधि तैलम् ॥ यवाद्युद्वर्त्तन चूर्णम् सुगंधामलकचूर्णम् जटामांसीं च आसादयेत् ॥ ततः प्रथमवेदिका याः पश्चात्स्थापितेषुद्वादशकलशेषुमध्ये अंतिमंस्थपतिसंज्ञकंतीर्थोदककलशंदेवस मीपेकृत्वातस्मिन्नकलशे–सर्वेसमुद्राः सरितस्तीर्थानिजलदानदाः ॥ आयांतुयजमान स्यदुरितक्षयकारकाः ॥ इत्यादितीर्थान्यावाहयेत् ॥ तद्यथा–काशीकुशस्थलीमायाऽ वन्त्ययोध्यामधोः पुरी॥शालग्रामंसगोकर्णनर्म्मदाचसरस्वती॥तीर्थान्येतातिकुंभेस्मि न्नविशन्तुब्रह्मशासनात् ॥ ऊषारूढासरोजाक्षीपद्महस्ताशशिप्रभा ॥ आगच्छतुसरि च्छ्रेष्ठागंगापापप्रणाशिनी ॥ नीलोत्पलदलश्यामापद्महस्तांबुजेक्षणा॥आयातुयमुनादे वीकूर्म्मयानस्थितासदा ॥ प्राचीसरस्वतीपुण्यापयोष्णीगौतमीतथा ॥ चर्म्मिलाचं द्रभागाचसरयूर्गंडकीतथा ॥ जंबुकाचशतद्रुश्चकालिकासुप्रभातथा ॥ वितस्ताचविपा

शाचनर्म्मदाचपुनःपुना ॥ गोदावरीमहावर्त्ताशर्करावर्त्तमार्ज्जुनी ॥ कावेरीकौशिकीचै
वतृतीयाचमहानदी ॥ विटंकाप्रतिकूलाचसोमनंदाचविश्रुता ॥ करतोयावेत्रवतीरेणुका
वेणुकाचया ॥ आत्रेयगंगावैतर्णीकाश्मिरीह्लादिनीचया ॥ पावनीचशवत्रासाकल्मषा
शंशिनीतथा ॥ वसिष्ठाचअपापाचसिन्धुवत्यारुणीतथा॥ ताम्राचैवात्रिसंध्याचतथामंदा
किनीपरा ॥ तैलकाशीपराचैवदुंदुभीनकुलीतथा॥ तथैवनीलगंधाचपूर्णचंद्राशशिप्रभा॥
अमरेशंप्रभासंचनैमिषंपुष्करंतथा॥आषाढिडिंडिभारत्नंभारभूतंचलाकुलम्॥ हरिश्चंद्रं
परंगुह्यंगुह्यंमध्यमकेश्वरम् ॥ श्रीपर्वतंसमाख्यातंजलेश्वरमतःपरम् ॥ आम्रातकेश्वरंचै
वमहाकालंतथैवच ॥ केदारमुत्तमंगुह्यंमहाभैरवमेवच ॥ गयांचैवकुरुक्षेत्रंगुह्यंकनखलंत
था॥ विमलंचंद्रभासंचमाहेंद्रंभीममष्टकम् ॥ वस्त्रापदंरुद्रकोटिमविमुक्तंमहालयम्॥गो
कर्णभद्रकर्णचहेमांशंस्थानमष्टमम् ॥ छागलंद्विरंडमेवकर्कोटंमंडलेश्वरम् ॥ कालं

जरवनंचैववेदेवदारुवनंतथा ॥ शंकुकर्णंतथैवेहस्थलेश्वरमतःपरम् ॥ एतानद्यश्चतीर्थानि
गुह्यक्षेत्राणिसर्वशः ॥ तानिसर्वाणिकुंभेस्मिन्विशंतुब्रह्मशासनात् ॥ इत्यादिरीत्या
कलशेतीर्थान्यावाह्य कलशाभिमंत्रणंकुर्यात् ॥ कलशस्यमुखेविष्णुः कंठेरुद्रः समाश्रि
तः ॥ मूलेतस्यस्थितोब्रह्मामध्येमातृगणाः स्मृताः ॥ कुक्षौतुसागराः सप्तसप्तद्वीपाव
सुंधरा ॥ ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः ॥ अंगैश्चसहिताः सर्वेकलशंतुसमाश्रि
ताः ॥ ततः कलशप्रार्थना ॥ देवदानवसंवादेमथ्यमानेमहोदधौ ॥ उत्पन्नोसियदाकु
म्भविधृतोविष्णुनास्वयम् ॥ त्वत्तः सर्वाणितीर्थानिदेवाः सर्वेत्वयिस्थिताः ॥ त्वयिति
ष्ठंतिभूतानित्वयिप्राणाः प्रतिष्ठिताः ॥ शिवः स्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः ॥
आदित्यावसवोरुद्राविश्वेदेवाःसपैतृकाः ॥ त्वयितिष्ठन्तिसर्वेपियतः कामफलप्रदाः ॥
त्वत्प्रसादादिमंयज्ञंकर्तुमीहेजलोद्भव ॥ सांनिध्यंकुरुमेदेवप्रसन्नोभवसर्वदा ॥ एवंघटेती

र्थीवाहनादिकंकृत्वागंधौषधीपंचपल्लवहिरण्यवस्त्रफलादीनिपूर्वोक्ततत्तन्मंत्रैः प्रक्षिप्य यथाविधिपूजनंकुर्यात् ॥ ततः शुद्धोदककलशान्विन्यस्यस्नानोपस्करजातंचान्यत्समाहरेत् ॥ अथाचार्योयजमानश्चमूर्तिपस्थपतिसुवासिनीभिः सहितस्तूर्यादिघोषेणकर्मकुंडंगत्वाभूमिमुपलिप्य तत्राग्निंप्रतिष्ठाप्य प्राणानायम्यदेशकालौसंकीर्त्य प्रतिमानिर्माणेप्राणिवधादिदोषनाशार्थं दुर्निमित्तोपशमनायघृतेन यवैस्तिलैर्वाहोमं करिष्ये इति संकल्प्य ॥ ब्रह्मवरणाद्याज्यभागांतंकृत्वापापभक्षमंत्रेणदेवमंत्रेणवाशतद्वयंहुत्वापूर्णाहुतिंदत्त्वाप्रतिमांकुशैरुल्लिख्यमध्वाज्याऽभ्यंगेनदेवस्यव्रणभंगंकृत्वासितपुष्पैः संपूज्य मृदागोमयेनगोमूत्रेणभस्मनाक्षीरेणपृथक्पृथक्जलांतरितेनस्नापयित्वाभ्यर्च्य शंखतूर्यादिघोषैः ब्रह्मरथादिनादेवंमहामंडपप्रादक्षिण्येनस्नानमंडपमानयेत् ॥ तत्राचार्योदक्षिणवेद्यांभद्रंकर्णेभिरितिप्राङ्मुखंदेवंभद्रासनेनिवेश्य ॥ पूर्वकल्पि

१ भद्रंकर्णेभिः शृणुयामदेवाः भद्रंपश्येमाक्षभिर्यजत्राः॥ स्थिरैरंगैस्तुष्टुवा ५ सस्तनूभिर्व्यशेमहिदेवहितंयदायुः ॥ २९ ॥ २१॥

तंसरत्नंसहिरण्यं सवस्त्रंसपल्लवंकलशंदेवस्य पुरस्तात्स्थापयित्वा काशीकुशस्थली
त्यादिभिः मंत्रैः पूर्वोक्तैस्तीर्थान्यावाह्य गीतवादित्रनिनादैर्देवंस्नापयेत् ॥ अथयजमा
नः शिल्पिवर्गतत्परिचारकांश्चवस्त्रालंकरणाद्यैः संतोषयेत् क्षमध्वमितितान्प्रतिब्रूया
त्॥ अथाचार्यः सिद्धार्थघृतपायसैस्त्र्यंम्बकमितिमंत्रेण शंखदुंदुभिघंटानिनादैर्बहिर्निर्ग
त्यप्रागादिदिक्षु त्रातारमित्यादिमंत्रैर्दिक्पालेभ्योबलिंदत्त्वाआचामेत् ॥ तथाहि—पूर्वेइं
द्रायबलिदानम् ॥ ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम् ॥ ह्वयामि
शक्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्विन्द्रः ॥२०॥५०॥ इंद्रायेमंबलिंसमर्पयामि
भोइंद्रइदंरक्ष बलिंभक्षअस्ययजमानस्यसकुटुंबस्यायुःकर्त्ताक्षेमकर्ता तुष्टिकर्तापुष्टि
कर्त्तावरदोभव एवमग्रेपिज्ञेयम् ॥ अग्निकोणे ॥ ॐ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रु

१ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्द्धनम् ॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॥

वे ॥ देवाँ२ ऽआसांदयादिह ॥ २२ ॥ १७ ॥ अग्नयेइमंबलिंसमर्पयामि भो
अग्नेइमंबलिंभक्षेत्यादिपूर्ववत् ॥ दक्षिणे ॐ यमायत्वामखायत्वासूर्यस्यत्वा तपसे ॥
देवस्त्वासविता मद्ध्वानक्तुपृथिव्याः सुरृंस्पृशस्पाहि ॥ अर्चिरसिशोचिरसि तपो
सि ॥ ३७ ॥ ११ ॥ यमायइमं० ॥ नैर्ऋत्ये ॥ ॐ असुन्न्वन्तमयजमानमिच्छस्ते
नस्येत्त्यामन्न्विहितस्करस्य ॥ अन्यमस्म्मदिच्छसातऽइत्यानमोदेविनिर्ऋतेतुभ्य
मस्तु ॥१२॥ ६२ ॥ निर्ऋतयेइमंब० ॥ पश्चिमेवरुणाय ॐ तत्त्वायामिब्रह्मणावन्दमान
स्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोद्ध्युरुशरुंसमानऽआयुःप्प्रमो
षीः ॥२१॥२॥ वरुणायेमंब०॥ वायव्ये वायवे०॥ ॐ आनोनियुद्भिः शतनीभिरध्वरुंस
हस्त्रिणीभिरुपयाहियज्ञम् ॥ वायोऽअस्मिन्मन्त्सवनेमादयस्वयूयम्पातस्वस्तिभिः स
दानः ॥२७॥ २८ ॥ वायवेइमं० ॥ उत्तरेकुबेराय ॐ वयरुंसोमव्व्रतेतवमनस्तनूषुबिभ्र

तः ॥ प्रजावन्तः सचेमहि ॥ ३ ॥ ५६ ॥ कुबेरायेमं० ॥ ईशानेईशानाय ॥ ॐ तमीशानुञ्जगत
स्तुस्थुषुस्प्पतिन्धियञ्जिन्वमवंसेहूमहेव्वुयम् ॥ पूषानोयथावेदंसामसद्वृधेरक्षितापायुर
दब्धः स्वुस्तये ॥ २५ ॥ १८ ॥ ईशानायेमं० ॥ एवंबलिंदत्त्वाआचम्यदेवसमीप
मागत्य त्रातारमिंद्रामित्याद्यैः पूर्वोक्तदशभिर्मंत्रैर्मंडपांतर्हिक्षुरक्षांकृत्वा देवस्यपुरत
श्चतुरोब्राह्मणानुपवेश्यस्वस्तिवाचयित्वा तेभ्योदक्षिणांदत्त्वा कर्मसिद्धिमाशास्य ते
भ्यश्चाशिषोगृहीत्वादेवस्यस्नपनमारभेत् ॥ तद्यथा–अग्निर्मूर्द्धेतिमंत्रेणमृदास्नानम् ॐ
अग्निर्म्मूर्द्धादिवः कुकुत्पतिः पृथिव्याऽअयम् ॥ अपाᳬरेताᳬसिजिन्न्वति ॥ इन्द्र
स्यत्वौजसासादयामि ॥ १३ ॥ १४ ॥ यज्ञायज्ञावइतिकषायैः ॥ ॐ युज्ञायंज्ञावोऽअग्न
येगिरागिराचुदक्षसे ॥ प्रप्प्रंवुयममृतञ्जातवेदसम्प्प्रियम्मित्रन्नशᳬसिषम् ॥ २७ ॥
॥ ४२ ॥ ततः शुद्धोदकस्नानं गायत्र्यागोमूत्रेण ॥ ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्य

म्भर्गोदेवस्यधीमहि ॥ धियोयोनः प्रचोदयात् ॥ ३ ॥ ३५ ॥ ततः शुद्धोदकस्नानं
गंधद्वारामितिगोमयेन ॥ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम् ॥ ईश्वरींसर्वभूता
नांतामिहोपह्वयेश्रियम् ॥ ततःशुद्धोदकस्नानं मानस्तोकइतिभस्मना ॥ ॐमानस्तोके
तनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानोवीरान्रुद्रभामिनोवधीर्ह
विष्मन्तः सदमित्त्वाहवामहे ॥ १६ ॥ १६ ॥ ततः शुद्धोदकस्नानम् ॥ तत्सवितुरि
तिगंधतोयेन ॥ ॐ तत्सवितुर्वरेण्यम्भर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ ३ ॥
॥ ३५ ॥ ततः शुद्धोदकस्नानं ततःपंचकलशैः पंचदैवत्यैःस्नापयेत् ॥ तत्रक्रमः—नमःशम्भ
वायेतिप्रथमेन ॐनमः शम्भवायचमयोभवायचनमः शङ्करायचमयस्करायचनमः
शिवायचशिवतरायच ॥ १६ ॥ ४१ ॥ ततःशुद्धोदकस्नानं हꣳसइतिद्वितीयेन ॥ ॐहꣳसः
शुचिषद्वसुरन्तरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जा

गोजाऽऋतजाऽअद्रिजाऽऋतम्बृहत् ॥१०॥२४॥ ततःशुद्धोदकस्नानं यतेरुद्रशिवेतितृ
तीयेन॥ ॐयातेरुद्रशिवातनूरघोरापापकाशिनी॥ तयानस्तन्वाशन्तमयागिरिशन्ताभि
चाकशीहि ॥ १६ ॥ २ ॥ ततःशुद्धोदकस्नानं विष्णोरराटमितिचतुर्थेन ॥
ॐ विष्णोरराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसि वैष्णवमसिविष्णं
वेत्त्वा ॥ ५ ॥२१॥ ततः शुद्धोदकस्नानम् ॥ब्रह्मजज्ञानमितिपंचमेन ॥ ॐब्रह्मजज्ञान
म्प्रथमम्पुरस्ताद्विसीमुतः सुरुचोवेनऽ आवः ॥ सबुध्न्याऽ उपमाऽ अस्यविष्ठाः
सतश्चयोनिमसतश्चविवः॥१३॥ ३ ॥ततःशुद्धोदकस्नानम् एवंरीत्यादेवंसंस्नाप्यशतंजी
वेतिमंत्रेणदूर्वाक्षतश्वेतपुष्पैः संपूजयेत् ॥ ॐ शतञ्जीवेमशरदः शतꣳ शृणुयामशरदः
शतम्प्रब्रवामशरदः शतमदीनाः स्यामशरदः शतम्भूयश्चशरदः शतात् ॥ ३६ ॥
॥ २४ ॥ ततोदेवमभितः पीतवस्त्रेणाच्छाद्यद्वितीयवेद्यांभद्रंकर्णेभिरितिमंत्रेणभद्रासनं

102

निधायस्तीर्णंबर्हिरितिमंत्रेणप्रागग्रान्कुशानास्तीर्यंतत्रप्राङ्मुखमुत्तराभिमुखंवादेवंप्र
णवेनस्थापयेत् ॥ मंत्रद्वयंप्रदर्श्यंते ॥ ॐ भद्रङ्कर्णेभिः शृणुयामदेवाभद्रम्पश्येमाक्षभि
र्यजत्राः ॥स्थिरैरङ्गैस्तुष्टुवा ꣳसस्तनूभिर्व्यशेमहिदेवहितंयदायुः ॥२५॥२१॥ स्तीर्णं
म्बर्हिः सष्टरीमाजुषाणोरुपृथुप्प्रथमानम्पृथिव्याम् ॥ देवेभिर्युक्तमदितिः सजोषाःस्योनं
नङ्कृण्वानासंवितेदधातु ॥ २९ ॥ ४ ॥ ततः आचार्यउत्तराभिमुखोभूत्वा कुंकुमाक्ते
नसूत्रेणलिंगमावेष्ट्य हिरण्यगर्भइतिमंत्रेण पूर्वकल्पितंसुवर्णपात्रंताम्रपात्रंचादाय
तत्रमधुघृतेकृत्वा मधुवाता घृतवतीतिमंत्रद्वयेनाभिमंत्रयेत् ॥ ॐ मधुवाताऽऋतायते
मधुंक्षरन्तिसिन्धवः ॥ माध्वीर्न्नः सन्त्वोषधीः ॥ १३ ॥२७ ॥ घृतवतीभुवनानामभिश्रि
योर्वीपृथ्वीमधुदुघेसुपेशसा ॥ द्यावापृथिवीवरुणस्यधर्म्मणा विष्कभितेऽअजरेभूरि
रेतसा ॥ ३४ ॥ ४५ ॥ ततोमधुघृताभ्यामक्ताग्रांसुवर्णशलाकांगृहीत्वा ॥ ॐ नमोभग

वतेतुभ्यंशिवायहरयेनमः ॥ हिरण्यरेतसेविष्णोविश्वरूपायतेनमः ॥ इत्यनेनमंत्रेण
लिंगस्यलक्षणमुद्धरेत् ॥ तद्यथा—लक्षणोद्धरणंकुर्याल्लिंगस्यतुसमाहितः ॥ त्रिधाविभ
ज्यपूजांगंलक्षणंस्याद्विभागिकम् ॥ रेखात्रयंतुकर्तव्यंयवार्धांतरसंमितम् ॥नस्थूलंनकृ
शंतद्वन्नवक्रंछेदवर्जितम्॥निम्नंयवप्रमाणेनज्येष्ठलिंगस्यकारयेत् ॥ श्लक्ष्णाततश्चकर्त्त
व्यासदामध्येकनीयसी ॥ अष्टभागंततः कृत्वात्यक्त्वाभागत्रयंबुधः॥लंबयेन्मणिरेखां
तुपार्श्वयोरुभयोः समम् ॥ भ्राम्यंतुपंचभागोर्द्धकारयेत्संगमंततः॥ तावत्प्रलंबयोर्विद्वा
न्यावद्भागचतुष्टयम्॥ रेखयोःसंगमंतद्वत् द्वौभागौपृष्ठतस्ततः॥लिंगस्यदक्षिणेद्वारेब्रह्मे
शानजनार्दनाः ॥ दक्षिणादिषुरेखासुविज्ञेयाः प्रतिमासुच ॥ ऊर्द्ध्वाधः पद्मपुटयोरक्षणोर्द
क्षिणवामयोः ॥ क्रमाद्ब्रह्महरौज्ञेयौताराज्योतिर्महेश्वराः ॥ एवमेतत्समाख्यातंसमासा
ल्लक्षणंमया इति । स्वयंभूबाणलिंगसरिद्भवलोहरत्नचक्रलिंगानांलक्षणोद्धारंनकुर्यात्॥

निधायस्तीर्णंबर्हिरितिमंत्रेणप्रागग्रान्कुशानास्तीर्यतत्रप्राङ्मुखमुत्तराभिमुखंवादेवंप्र
णवेनस्थापयेत् ॥ मंत्रद्वयंप्रदर्श्यते ॥ ॐभद्रङ्कर्णेभिः शृणुयामदेवाभद्रम्पश्येमाक्षभि
र्य्यजत्राः ॥स्थिरैरङ्गैस्तुष्टुवाᳬसस्तनूभिर्व्यशेमहिदेवहितंयदायुः ॥२५॥२१॥ स्तीर्णं
म्बर्हिः सष्टरीमाजुषाणोरुपृथुप्प्रथमानम्पृथिव्याम् ॥ देवेभिर्युक्तमदितिः सजोषाःस्यो
नङ्कृण्वानासुविते दधातु ॥ २९ ॥ ४ ॥ ततः आचार्यउत्तराभिमुखोभूत्वा कुंकुमाक्ते
नसूत्रेणलिंगमावेष्ट्य हिरण्यगर्भइतिमंत्रेण पूर्वकल्पितंसुवर्णपात्रंताम्रपात्रंचादाय
तत्रमधुघृतेकृत्वा मधुवाता घृतवतीतिमंत्रद्वयेनाभिमंत्रयेत् ॥ ॐमधुवाताऽऋतायते
मधुक्षरन्तिसिन्धवः ॥ माद्ध्वीर्न्नः सन्त्वोषधीः ॥ १३ ॥२७॥ घृतवतीभुवनानामभिश्रि
योर्वीपृथ्वीमधुदुघेसुपेशसा ॥ द्यावापृथिवीवरुणस्यधर्म्मणा विष्कभितेऽअजरेभूरि
रेतसा ॥ ३४ ॥ ४५ ॥ ततोमधुघृताभ्यामक्ताग्रांसुवर्णशलाकांगृहीत्वा ॥ ॐ नमोभग ॥१९९॥

वतेतुभ्यंशिवायहर्येनमः ॥ हिरण्यरेतसेविष्णोविश्वरूपायतेनमः ॥ इत्यनेनमंत्रेण
लिंगस्यलक्षणमुद्धरेत् ॥ तद्यथा–लक्षणोद्धरणंकुर्याल्लिंगस्यतुसमाहितः ॥ त्रिधाविभ
ज्यपूजांगंलक्षणंस्याद्द्विभागिकम् ॥ रेखवात्रयंतुकर्तव्यंयवार्धांतरसंमितम् ॥नस्थूलंनकृ
शंतद्वन्नवक्रंछेदवर्जितम्॥निम्नंयवप्रमाणेनज्येष्ठलिंगस्यकारयेत् ॥ श्लक्ष्णाततश्चकर्त्त
व्यासदामध्येकनीयसी ॥ अष्टभागंततः कृत्वात्यक्त्वाभागत्रयंबुधः॥लंबयेन्माणिरेखां
तुपार्श्वयोरुभयोः समम् ॥ भ्राम्यंतुपंचभागोर्द्धंकारयेत्संगमंततः॥ तावत्प्रलंबयोर्विद्वा
न्यावद्भागचतुष्टयम्॥ रेखयोःसंगमंतद्वत् द्वौभागौपृष्ठतस्ततः॥लिंगस्यदक्षिणेद्वारेब्रह्मे
शानजनार्दनाः ॥ दक्षिणादिषुरेखासुविज्ञेयाः प्रतिमासुच ॥ ऊर्द्ध्वाधः पद्मपुटयोरक्षणोर्द
क्षिणवामयोः ॥ क्रमाद्ब्रह्महरौज्ञेयौताराज्योतिर्महेश्वराः ॥ एवमेतत्समाख्यातंसमासा
ल्लक्षणंमया इति । स्वयंभूबाणलिंगसारिद्धवलौहरत्नचक्रांलिगानांलक्षणोद्धारंनकुर्यात्॥

अथपूर्ववत्संकल्प्यप्रतिमायामुखंलिंगस्यनेत्राणिसुवर्णशलाकयानासिकासंनिधौनेत्रमू
लसंज्ञया चित्रंदेवानामित्यर्धर्चेन अग्निर्ज्योतिरित्यनेन आकृष्णेनेतिच आपांग
प्रांतयोर्नीत्वा ऊर्द्ध्वाधः पक्ष्मपुटद्वयं पृथग्भूतंकल्पयेत् ॥ ततोनेत्रमध्यस्त्रिभागेन
वृत्तांकनीनिकांप्रकल्पयेत्॥ ॐ चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यवरुणस्याग्नेः ॥
अग्निर्ज्ज्योतिर्ज्ज्योतिरग्निः स्वाहासूर्य्योज्ज्योतिर्ज्ज्योतिःसूर्य्यः स्वाहा ॥ अग्नि
र्वर्च्चोज्ज्योतिर्व्वर्च्चःस्वाहासूर्य्योवर्च्चोज्ज्योतिर्व्वर्च्चःस्वाहा ॥ ज्ज्योतिःसूर्य्यः सु
र्य्योज्ज्योतिः स्वाहा ॥ ३ ॥ ९ ॥ ॐ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्म
र्त्यञ्च ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ ३३ ॥ ४३ ॥ अत्रदेवस्य
नयनरचनसमयेमुहूर्त्तमात्रंदेवस्यपुरतोनकोपितिष्ठेत् ॥ सुवर्णंघृतंपायसंचदेवंप्रदर्शये
त् ॥ ॐ अंजंतित्वामध्वरेदेवयंतोवनस्पतेमधुनादैव्येन॥ यदूर्द्ध्वस्तिष्ठाद्द्रविणेहधत्ताद्यद्वा

क्षयोमातुरस्याउपस्थे॥इतिमंत्रेणदेवनेत्रेंऽजयेत्॥शीलपीशस्त्रेणरेखामुल्लेखयेत् ॥ ताम
र्चामाचार्योमधुसर्पिर्भ्यामभ्यज्य इमंमेइतिमंत्रेणाभ्युक्ष्यपुनर्मृदाद्यैः शिल्पशस्त्रदो
षनिवृत्त्यर्थंस्नपयेत् ॥ ॐइमम्मेवरुणश्रुधीहवमुद्याचमृडय॥त्वामवस्युराचके ॥२१॥
॥ १ ॥ अथप्रतिमाबहुत्वेपुनस्तत्रपिंडिकास्थानामेवार्चानांपूर्वोक्तंस्नपनादिकंसंक्षे
पतः प्रतिपुरुषेणनिष्पाद्यनेत्रज्योतिःप्रभृतितेनैवकारयेत् ॥ ततःसुवर्णपात्रंशलाकां
स्नानवस्त्राणिचप्रतिमाकर्त्रेशिल्पिनेदद्यात् ॥ अथयजमानः सहिरण्यांगामाचार्याय
दद्यात् ॥ ततः अन्यतृतीयस्यांवेद्यांभद्रासनेदेवंनिधायाचार्यश्चतुर्भिः कलशैर्वक्ष्यमा
णमंत्रैर्देवंस्नापयेत् ॥ तद्यथा–समुद्रज्येष्ठाः सलिलस्यमध्यात्पुनानायंत्यनिविशमा
नाः ॥ इंद्रोयावज्रीवृषभोरुरादुताआपोदेवीरिहमामवंतु ॥ १ ॥ याआपोदिव्याउतवा
स्रवंतिखनित्रिमाउतवायास्वयंजाः ॥ समुद्रार्थायाः शुचयः पावकास्ताआपो० ॥ २ ॥

यासां २ राजावरुणोयातिमध्येंसत्यानृतेअंवपश्यञ्जनांनाम् ॥ मधुश्चुतः शुचयो
याः पांवकास्ताआपोंदेवीरिहमामंवंतु ॥ ३ ॥ यासुराजावरुणोयासुसोमोविश्वेंदे
वायासूर्जंमदंति ॥ वैश्वानरोयास्वग्निः प्रविष्टस्ताआपोंदेवीरिहमामंवंतु ॥ ४ ॥
इतिचतुर्भिः कलशैः स्नापयित्वाऽभ्यर्च्यंदूर्वाक्षतान्शिरसिदत्त्वाप्रार्थयेत् ॥ नम
स्तेचैंसुरेशानिप्रकृतेविश्वकर्मणः ॥ प्रभ्व्यशेषजगद्धात्रितुभ्यमेवनमोनमः ॥ त्वयि
संपूजयामीशं नारायणमनामयम् ॥ रहिताशेषदोषैश्चऋद्धियुक्तासदाभवेति ॥ ततो
देवस्यदक्षिणहस्तेसितोर्णापट्टसूत्रनिर्मितंवितास्तिमात्रंकौतुकं मूलमंत्रेणकनिक्रदादि
त्यनेनवायदाबध्नेतिवाबार्हस्पत्येनवाबध्नीयात् ॥ ॐ शन्नोवातःपवता ᳪं शन्नस्तप
तुसूर्य्यः ॥ शन्नःकनिंक्रदद्देवःपर्जन्न्यौऽअभिवर्षतु ॥ ३६ ॥ १० ॥ यदाबध्न
न्दाक्षायणाहिरंण्यᳪंशतानींकाय सुमनस्यमानाः ॥ तन्मऽआबध्नामि शत

शारदायायुंष्म्माजुरदष्टिर्य्यथासम् ॥ ३४ ॥ ५२ ॥ ततः सर्वसत्त्वमयंशांतंपरंब्रह्म सनातनम्॥त्वामेवालंकरिष्यामित्ववंध्याभवतेनमः॥इतिमंत्रेणचेति॥अथकरिष्यमाण स्नपनंकलशेभ्यः शेषंवारिकलशांतरेधारयित्वा प्रतिमांतरपिंडिकाजातस्नपनायप्र तिपुरुषांतरमभिदध्यात् ॥ ततश्चतुर्भिःकलशैर्देवंपुनःस्नापयेत्॥ इदमापइतिप्रथमेन॥ ॐइदमापः प्रवहतावद्यञ्चमलंचयत्॥यच्चाभिदुद्रोहानृतंयच्चशेपेऽअभीरुणम् ॥ आपो मातस्स्मादेनसः पवमानश्चमुञ्चतु ॥ ६ ॥ १७॥ आपोदेवीरितिद्वितीयेन ॥ ॐआपो देवीःप्प्रतिगृब्भ्णीतमस्म्मैतत्स्योनेकृणुद्ध्वंसुरभाऽउंलोकेतस्म्मैनमन्ताञ्जनयः सु पत्नीम्मुतेवपुत्रम्भिभृतापस्वेनत् ॥ १२ ॥ ३५ ॥ इमंमेइतितृतीयेन ॥ ॐ इ मम्मेवरुणश्रुधीहवमुद्याचमृडय ॥ त्वामवस्युराचके ॥ २१ ॥ १ ॥ तत्वा यामीतिचतुर्थेन ॥ ॐतत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः॥अहे

डमानोवरुणेहबोद्ध्युरुशर्ठ सुमानुऽआयुः प्प्रमोंषीः ॥ २१ ॥ २ ॥ ततोग्निर्मूर्द्धेतिमं
त्रेणाष्टपलंमितेनमृत्तिकाकलशेनदेवंस्नापयेत् ॥ॐअुग्निर्म्मूर्द्धादिवः कुकुत्पतिःपृथि
व्व्याऽअुयम् ॥अुपाठ्ठंरेताठ्ठंसिजिन्न्वति ॥ ३ ॥ १२ ॥ समुद्रादूर्मिरितिशुद्धोदकेन
स्नानम् ॥ ॐसमद्राद्रूर्म्मिर्म्मधुंमा ँ ऽउदांरुदुपाठ्ठंशुनासमंमृतुत्त्वमानट् ॥घृतस्युनामु
गुह्यंय्यदस्तिजिह्वादेवानामुमृतंस्युनाभिंः ॥ १७ ॥ ८९ ॥ गंधद्वारामितिसप्तप
लमितेनगोमयकलशेन॥ॐगंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम् ॥ ईश्वरींसर्वभूतानां
तामिहोपह्वयेश्रियम् ॥ १ ॥ वरुणस्योत्तंभनमसीतिशुद्धोदकेन ॥ ॐवरुंणस्युोत्तम्भंन
मसिवरुंणस्यस्कम्भुसर्ज्जनीस्थोवरुंणस्यऽऋतुसदंन्यासिवरुंणस्य ऽऋतुसदंनमासिव
रुंणस्यऽऋतुसदंनुमासींद ॥ ४ ॥ ३६ ॥ तत्सवितुरितिद्वादशपलमितेनगोमूत्रक
लशेन ॥ ॐतत्संवितुर्वरेण्युम्भर्ग्गोंदेवस्यंधीमहि ॥धियोयोनंः प्प्रचोदयांत् ॥३॥३५॥

आपोहिष्ठेतिशुद्धोदकेन॥ ॐआपोहिष्ठामंयोभुवस्तानंऽऊर्ज्जेदंधातन॥ महेरणांयचक्षसे
॥ ३६ ॥ १४ ॥ प्रसद्यभस्मनेतिमुष्टिमितभस्मोदककलशेन ॥ ॐप्रसद्यभस्म्मंनायोनिं
मपश्चंपृथिवीमंग्ग्ने॥ सुठ्ठ्‌ं सृज्यंमातृभिष्ट्वज्योतिंष्म्मान्न्पुनुरासंदः ॥ १२॥३८ ॥ योवः
शिवेतिशुद्धोदकेन ॥ॐयोवंः शिवतंमोरसुस्तस्यंभाजयतेहनंः ॥ उशतीरिवमातरंः ॥
॥ ३५ ॥ १५ ॥ पयः पृथिव्यामितित्रिपलसंमितपंचगव्यकलशेन ॥ॐपयंःपृथिव्याम्प
यऽओषंधीषपयोंदिव्यन्तरिक्षेपयोंधाः ॥ पयंस्वतीः प्प्रदिशंः सन्तुमह्यंम् ॥ १८ ॥
॥ ३६ ॥ देवीरापइतिशुद्धोदकेन ॥ ॐदेवींरापोऽअपान्नपाद्योवंऽऊर्म्मिर्हविष्यऽइन्द्रि
यावांन्न्मदिन्तंमः ॥ तन्देवेभ्योंदेवत्राद॑त्तशुक्रपेभ्योयेषांम्भागस्थस्वाहां ॥ ६ ॥
॥ २७ ॥ आप्यायस्वेतिषोडशपलसंमितक्षीरकुंभेन ॥ ॐआप्प्यांयस्वसमैं तेविश्श्व
तंः सोमवृष्ण्यंम् ॥ भवावाजंस्यसङ्गथे ॥ १२ ॥ १२ ॥ तस्माअरमितिशुद्धोदके

न ॥ ॐ तस्म्मा ऽअरङ्गमामवोयस्यक्षयायजिन्न्वंथ ॥ आपोऽजुनयथाचनः ॥ ३६ ॥
॥ १६ ॥ दधिक्राव्णइतिविंशतिपलसंमितदधिकुंभेन ॥ ॐ दधिक्क्राव्णोऽअकारिषञ्जि
ष्णोरश्वस्यवाजिनंः ॥ सुरभिनोमुखाकरत्प्रण ऽआयूंषिंतारिषत् ॥ २३ ॥ ३२ ॥ युं
जानइतिशुद्धोदकेन ॥ ॐ युञ्जानःप्प्रथमम्ममनस्तत्त्वायसविताधियंः ॥ अग्ग्नेज्ज्यो
तिर्न्निचाय्यपृथिव्या ऽअद्ध्याभंरत् ॥ ११ ॥ १ ॥ घृतवतीतिसप्तपलसंमितघृतकुंभेन
ॐ घृतवंतीभुवंनानामभिश्रियोर्वीपृथ्वीमंधदुघेसुपेशंसा ॥ द्यावांपृथिवीवरुणस्य
धर्म्मणाविष्कंभिते ऽअजरेभूरिरेतसा ॥ ३४ ॥ ४५ ॥ देवस्यत्वेतिजलेन ॐ दे
वस्यंत्त्वासवितुः प्प्रसवेऽश्विनोर्ब्बाहुब्भ्यांम्पूष्णोहस्ताब्भ्याम् ॥ सरस्वत्त्यैवाचोयन्तु
र्यन्त्रेणाग्ग्नेः साम्म्राज्ज्येनाभिषिंञ्चामि ॥ १८ ॥ ३७ ॥ मधुवाताइतित्रिपल
संमितमधुकुंभेन ॥ ॐ मधुवाताऽ ऋतायतेमधुंक्षरन्तिसिन्धंवः ॥ माद्ध्वीर्न्नः संत्त्वो

षंधीः ॥ १३ ॥ २७ ॥ आपोअस्मानितिशुद्धजलेन ॥ ॐ आपोऽअस्म्मान्न्मातरः
शुन्धयन्तुघृतेनंनोघृतप्प्वः पुनंतु ॥ विश्श्वꣳहिरिप्प्रम्प्रवहन्तिदेवीरुदिदाभ्यः
शुचिरापूतऽएमि ॥ दीक्षातपसोस्तनूरसितान्त्वाꣳशिवाꣳशग्ग्मामपरिदधे भद्द्रंवर्ण्णं
म्पुष्यन्न् ॥ ४ ॥ २ ॥ आयंगौरितित्रिपलसंमितशर्कराकलशेन ॥ ॐ आयंगौः पृश्निं
रक्रमीदसदन्मातरम्पुरः ॥ पितरंञ्चप्प्रयन्त्स्वः ॥ ३ ॥ ६ ॥ आपोहयदितिशुद्धो
दकेनप्रक्षालयेत् ॥ ॐ आपोहयद्बृहतीर्विश्श्वमायन्न्गर्ब्भन्दधानाजनयन्तीरग्निम् ॥
ततोदेवानाꣳ समवर्त्ततासुरेकः कस्म्मैदेवायहविषाविधेम ॥ २७ ॥ २५ ॥ यज्ञाय
ज्ञावइतिसूक्ष्मतंतुवस्त्रेणसंमार्जयेत् ॥ ॐयज्ञायज्ञावोऽअग्ग्नयेगिरागिराचदक्षसे ॥ प्र
प्प्रंवयममृतंञ्जातवेदसम्प्प्रियम्मित्त्रन्नशꣳसिषम् ॥ २७ ॥ ४२ ॥ सुगंधतैलेनाभ्यज्य
द्रुपदादिवेतिमंत्रेणयवगोधूमशालिबिल्वमसूरचूर्णेनदेवमुद्वर्त्तयेत् द्रुपदादिवमुमुचा

नः स्विन्नः स्नातोमलादिव ॥ पूतम्पवित्रेणेवाज्यमापः शुन्धन्तुमैनसः ॥ २० ॥ २० ॥
ततोयातेरुद्रेतिमंत्रेणदेवस्यशिरसिसुगंधामलकंयक्षकर्दमानुलेपंचासिंचयेत् ॥ यक्षकर्द
मस्तु—कस्तूरिकायाद्वौभागौद्वौभागौकुंकुमस्यच ॥ चंदनस्यत्रयोभागाः शशिनस्त्वे
कएवहीत्युक्तलक्षणकोज्ञेयः ॥ ॐयातेरुद्रशिवातनूरघोरापापकाशिनी ॥ तयानस्तन्वा
शन्तमयागिरिशन्ताभिचाकशीहि ॥ १६ ॥ ४९ ॥ ततोजटामांसीमनुलिप्यमानस्तो
कइतिप्रतद्विष्णुरितिमंत्रद्वयेनकलशद्वयाभ्यांदेवंस्नापयेत् ॥ ॐ मानस्तोकेतनयेमा
नऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानोवीरान्रुद्रभामिनोवधीर्हविष्मं
न्तः सदमित्वाहवामहे ॥ १६ ॥ १६ ॥ ॐ प्रतद्विष्णुस्तवतेवीर्येणमृगोनभीमःकुच
रोगिरिष्ठाः ॥ यस्योरुषुत्रिषुविक्रमणेष्वधिक्षियन्तिभुवनानिविश्वा ॥ ५ ॥ २० ॥

१ केशरस्य । २ कर्पूरस्य । ३ बालछड ।

ततः पंचनद्यइतिपंचामृतेन ॥ ॐपञ्चनद्यः सरस्वतीमपियन्तिसस्त्रोतसः ॥ सरस्वती तुपंचधासोदेशेभवत्सरित् ॥ ३४ ॥ ११ ॥ तदनंतरंपृथक्पृथक्पंचामृतघटकदुग्धादिद्रव्यैर्देवंस्नपयेत् ॥ पयःपृथिव्यामितिदुग्धेन ॐ पयः पृथिव्याम्पयऽओषधीषु पयोदिव्यन्तरिक्षेपयोधाः ॥ पयस्वतीःप्प्रदिशः सन्तुमह्यम् ॥ १४ ॥ ३६ ॥ ततः शुद्धोदकेन ततोदधिक्राव्णइतिदध्ना॥ ॐदधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाकरत्प्राणऽआयूंषितारिषत् ॥ २३ ॥ ३२ ॥ पुनः शुद्धोदकेन ततोघृतंघृतपावानइतिघृतेन ॥ ॐ घृतङ्घृतपावानःपिबतवसांवसापावानः पिबतान्तरिक्षस्यहविरसिस्वाहा ॥ दिशः प्प्रदिशऽआदिशोविदिशऽउद्दिशोदिग्भ्यः स्वाहा ॥ ६ ॥ १९ ॥ पुनस्तथैवशुद्धोदकेन० ततोऽपांरसमितिशर्करास्नानम् ॥ ॐ अपांरसमुद्वयसंसूर्य्येसन्तंसमाहितम् ॥ अपांरसस्ययोरसस्तंवोगृह्णाम्म्युत्तम

म. सं. मुंपयामगृंहीतोसीन्द्रांयत्वाजुष्टंङ्गृह्णाम्म्येषतेयोनिरिन्द्रांयत्वाजुष्टंतमम् ॥ १ ॥ स्न. प्र.
॥२०१॥ ॥ ३ ॥ पुनस्तथैवशुद्धोदकेन ततोमधुव्वाताऽऋतायतइतिमधुस्नानम् ॥ ॐ मधवा
ताऽऋतायतेमधुंक्षरन्तिसिन्धंवः ॥ माद्ध्वींर्न्नः सुन्त्वोषंधीः ॥ १३ ॥ ३७ ॥ पुन तथै
वशुद्धोदकेन गंधद्वारामितिगंधोदकेन ॥ ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टाङ्करिषणी
म् ॥ ईश्वरींसर्वभूतानान्तामिहोपह्वयेश्रियम् ॥ ततोयज्ञायज्ञावइतिपंचपल्लवकषायक
लशेन ॥ ॐ यज्ञायंज्ञावोऽअग्नयेंगिरागिंराचुदक्षंसे ॥ प्रप्प्रंवयममृतंञ्जातवेंदसम्प्रिं
यम्मित्रन्नशंथ्ंसिषम् ॥ २७ ॥ ४२ ॥ ततोयाओषधीरितिओषधीकलशेन ॥ ॐयाओ
षंधीः पूर्व्वांजातादेवेब्भ्यंस्त्रियुगम्पुरा ॥ मनैनुबभ्रूणामहंठंशतन्धामांनिसप्तचं ॥ १२ ॥
॥ ७५ ॥ ततः ओषधीः प्रतिमोदध्वमितिसितपुष्पशीतोदककलशेन ॥ ॐ ओषंधीः ॥२०१॥
प्रतिमोदध्वंपुष्पंवतीः प्रसूवंरीः ॥ अश्वांऽइवसजित्वंरीर्वीरुधंः पारयिष्णवंः ॥ १२ ॥

॥ ७७ ॥ ततो याःफलिनीरित्यष्टफलोदककलशेन ॥ ॐ याः फुलिनीर्य्याऽअंफु
लाऽअंपुष्पायाश्श्चंपुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वꣳहंसः ॥ १२ ॥९९ ॥
ततोहिरण्यगर्भइतिसुवर्णोदककलशेन ॥ ॐ हिरण्युगर्भःसमवर्त्तताग्ग्रेभूतस्यंजातः
पतिरेकंऽआसीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम ॥ १३ ॥
॥ ४ ॥ हविष्मतीतिगोशृंगोदकेन ॥ ॐ हुविष्मतीरिमाऽआपोहविष्माँ २ ॥ ऽआ
विवासति ॥ हुविष्मान्देवोऽअध्वरोहविष्माँ २ ॥ ऽअस्तुसूर्य्यः ॥ ६ ॥ २३ ॥ ततो
धान्यमसीतिधान्योदककलशेन ॥ ॐ धान्युमसिधिनुहिदेवान्न्प्राणायत्वोदानायत्त्वा
व्यानायत्वा ॥ दीर्ग्घामनुप्प्रसितिमायुषेधान्देवोवःसविताहिरण्यपाणिःप्प्रतिगृ
भ्णात्वच्छिद्रेणपाणिनाचक्षुषेत्वामहीनाम्पयोसि ॥ १ ॥ २० ॥ सहस्राणीत्यनेन
सहस्राक्षेणेतिवासहस्रधारकलशेन ॥ ॐ सुहस्राणिसहस्रशोबाहोस्तवहेतयः ॥ तासामी

शंनोभगवःपराचीनामुखाकृधि ॥ १६ ॥ ५३ ॥ यादिव्याइतिसर्वौषधिजलेन ॥ ॐया
दिव्याऽआपःपयसासम्बभूवुर्याऽअन्तरिक्षाऽउतपार्थिवीर्याः ॥ हिरण्यवर्णायज्ञि
यास्तानऽआपःशिवाःशꣳस्योनाःसुहवाभवन्तु॥नमोस्तुसर्पेभ्यइतिपल्लवोदकेन॥ॐन
मोस्तुसर्पेभ्योयेकेचपृथिवीमनु ॥ येऽअन्तरिक्षेयेदिवितेभ्यः सर्पेभ्योनमः ॥१३॥६॥
काण्डात्काण्डादितिदूर्वोदकेन ॥ ॐकाण्डात्काण्डात्प्ररोहन्तीपरुषः परुषस्परि ॥ एवा
नोदूर्वेप्प्रतनुसहस्रेणशतेनच ॥ १३ ॥ २० ॥ अष्टौव्यख्यदितिरत्नोदकेन ॥ ॐअष्टौ
व्यख्यत्ककुभः पृथिव्याः त्रीधन्वयोजनासप्तसिन्धून् ॥ हिरण्याक्षः सविताद्वेवऽ
आगाद्दधद्रत्नादाशुषेवार्य्याणि ॥ ३४ ॥ २४ ॥ इमंमेइतितीर्थोदकेन॥ॐइमम्मेवरुण
श्रुधीहवमद्द्याचमृडय ॥ त्वामवस्युराचके ॥ २१ ॥ १७ ॥ एवंदेवंस्नापयित्वापुनर
ष्टभिः कलशैः फलपुष्पमंगलमूलतोयेनपूर्वकल्पितैः समुद्रसंज्ञकैः स्नपयेत् ॥ कया

नश्चित्रोतिक्षीरोदकेन ॥ १ ॥ ॐकयानश्चित्रऽआभुवदूतीसदावृधः सखा ॥ कयाश
चिष्ठयावृता ॥ ३६ ॥ ४ ॥ आप्यायेतिक्षीरकुंभेन ॥ २ ॥ ॐ आप्यायस्वसमेतुतेवि
श्वतः सोमवृष्ण्यम् ॥ भवावाजस्यसंगथे ॥ १२ ॥ ११२ ॥ दधिक्राव्णइतिदाधिकुंभे
न ॥ ३ ॥ ॐदधिक्राव्णोऽअकारिषंजिष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाकर
त्प्रणऽआयू ७ंषितारिषत् ॥ २३ ॥३२॥ घृतवतीतिघृतोदकेन ॥ ४ ॥ ॐघृतवतीभुव
नानामभिश्रियोर्वीपथ्वीमधुदुघेसुपेशसा ॥ द्यावापृथिवीवरुणस्यधर्मणाविष्क
भितेऽअजरेभूरिरेतसा ॥ ३४ ॥४५॥ पयः पृथिव्यामितीक्षुरसोदकेन ॥५॥ ॐ पयः पृ
थिव्याम्पयऽओषधीषपयोदिव्यन्तरिक्षेपयोधाः ॥ पयस्वतीः प्प्रदिशः सन्तुमह्य
म्॥१८॥३६॥ ततः शुद्धादकेन देवंबर्हिरितिसमुद्रोदकेन ॥६ ॥ देवम्बर्हिर्वारितीनान्देव
मिन्द्रमवर्द्धयत् ॥ स्वासुरस्थमिन्द्रेणासंनमुन्याबर्हीं ७ंऽभ्युभ्युभूद्वसुवनैवसुधेयं

प्र. सं. स्यवेतुयजं ॥ २८ ॥ २१ ॥स्वादिष्ठयेतिस्वादूदकेन ॥ ७ ॥ ॐ स्वादिष्ठयामदिष्ठया स्न. प्र.
॥२०३॥ पवस्वसोमधारया ॥ इन्द्रायपातवेसुतः ॥ २६ ॥ २५ ॥ ततः सरस्वतीयोन्यामि
तिगर्भोदकपदवाच्येननालिकेरजलेन ॥८॥ॐ सरस्वतीयोन्न्यागर्भमन्तरश्विभ्या
म्पत्नीसुकृतम्बिभर्ति ॥ अपाथ्रसेनवरुणोनसाम्नेन्द्रथ्रश्रियैजनयन्नप्सुराजा ॥
॥ १९ ॥ ९४ ॥ ततःपंचत्रिंशत्कलशेषुमध्येयेऽन्तिमादशपल्लवान्विताल्लोकपालकल
शास्तैर्देवंस्नपयेत् ॥ तत्रप्रथमंत्रातारमितिकदंबपल्लवकुंभोदकेन ॥ १ ॥ ॐ त्रातार
मिन्द्रमवितारमिन्द्रथ्रहवेहवेसुहवथ्रशूरमिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमिन्द्रथ्रस्व
स्तिनोमघवाधात्विन्द्रः ॥ २० ॥ ५० ॥ त्वन्नोऽअग्नइतिशाल्मलीपल्लवान्वित
कुंभेन ॥ २ ॥ ॐ त्वन्नो अग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः ॥ यजिष्ठोव ॥२०३॥
ह्नितमः शोशुचानोविश्वाद्वेषांथ्रसिप्रमुमुग्ध्यस्मत्स्वाहा ॥ २१ ॥ ३ ॥ सुगंनुपंथा

मितिजंबूपल्लवान्वितकलशेन ॥ ३ ॥ ॐ सुगन्नुपन्थांम्प्रदिशन्नएहिज्ज्योतिष्म्मद्धेह्य
जरन्नुऽआयुः ॥ अपैतुमृत्युरमृतन्नऽआगाद्वैवस्वतोनोऽअभयंकृणोतुस्वाहा ॥ असुन्वत
मितिअशोकपल्लवान्वितकुंभेन ॥ ४ ॥ ॐ असुन्न्वन्तुमयजमानमिच्छस्तेनस्येत्याम
न्न्विहितस्कंरस्य ॥ अन्न्यमुस्म्मदिच्छसातऽइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥१२॥
॥ ६२ ॥ तत्त्वायामीतिप्लक्षपल्लवान्वितकुंभोदकेन ॥ ५ ॥ ॐतत्त्वायामिब्रह्मणा
वन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोद्ध्युरुशथंसमानऽआ
युःप्रमोषीः ॥ २१ ॥ २ ॥ आनोनियुद्भिरित्याम्रपल्लवोदकेन ॥ ६ ॥ ॐ आनोनि
युद्भिःशतिनीभिरध्वरथंसहस्रिणीभिरुपयाहियज्ञम् ॥ वायोऽअस्मिन्न्त्सवनेमादयस्व
यूयम्पातस्वस्तिभिः सदानः ॥ २७ ॥ २८ ॥ वयठं सोमेतिवटपल्लवोदकेन ॥ ७ ॥
ॐवयठं सोमव्व्रतेतवमनस्तनूषुबिभ्रतः ॥ प्रजावन्तः सचेमहि ॥ ३ ॥ ५६ ॥ तमी

शानमितिबिल्वपल्लवोदककुंभेन ॥ ८ ॥ ॐ तमीशानंजगतस्तस्थुषुस्पतिंन्धियञ्जिन्वमवसेहूमहेव्वयम् ॥ पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धःस्वस्तये ॥ ॥ २५ ॥ १४ ॥ नमोस्तुसर्पेभ्यइतिनागपल्लवोदकेन ॥ ९ ॥ ॐ नमोस्तुसर्पेभ्योये केचपृथिवीमनु ॥ येऽअन्तरिक्षेयेदिवितेभ्यः सर्पेभ्योनमः ॥ १३ ॥ ६ ॥ ब्रह्मजज्ञानमितिपलाशपल्लवोदकेन ॥ १० ॥ ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतःसुरुचोवेन ऽआवः ॥ सबुध्न्याऽउपमाऽअस्यविष्ठाः सतश्चयोनिमसतश्चविवः ॥ १३ ॥ ३ ॥ ततो नानाभेरीशंखतूर्य्यकोलाहलध्वनिभिः पुण्यस्त्रीमंगलोद्गीतैर्ब्रह्मघोषगीतैः षोडशभि १६ रष्टाभि ८ श्चतुर्भि ४ रेकेन वा ॥ १ ॥ जलकुंभेन गंधतोयेन स्नापयित्वा अन्यकुंभधारितशेषवारिणाऽन्यत्प्रतिमाद्यंप्रतिपुरुषेणस्नापयित्वा ॥ देवंसितवस्त्रेणसुगंधिना परिमृज्यदेवलिङ्गमंत्रैर्विश्वतश्चक्षु

रित्याद्यैश्च समसंकलीकृत्यदेवमावाहयेत् ॥ ॐ विश्वतश्चक्षुरुतविश्वतोमुखोवि
श्वतोबाहुरुतविश्वतस्प्पात् ॥ सम्बाहुभ्यान्धमतिसम्पतत्रैर्द्यावाभूमीजनयन्देवऽए
कः ॥ १७ ॥ १९ ॥ एवंदेवंसंप्रार्थ्य एह्येहीत्यनेनावाहेयत् ॥ एह्येहिभगवन्वि
ष्णोलोकानुग्रहकारक ॥ यज्ञभागंगृहाणेमंवासुदेवनमोस्तुते ॥ देवभेदेनमंत्रोहःकर्त
व्यः ॥ एवंदेवमावाह्य हिरण्यवर्णेतिमंत्रेण पाद्यं अर्घ्यंदद्यात् ॥ ॐहिरण्यवर्णांहरिणीं
सुवर्णरजतस्रजाम् ॥ चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह ॥ ततो विभ्राडित्याचम
नीयम् ॥ ॐ विभ्राड्बृहत्पिबतुसोम्म्यम्मध्वायुर्द्दधद्यज्ञपतावविह्रुतम् ॥ वातजूतो
योऽअभिरक्षतितत्मनाप्प्रजाःपुपोषपुरुधाविराजति ॥३३॥३०॥ त्र्यंबकमितिचंदनानिवि
लिंपयेत् ॥ ॐ त्र्यंबकंय्यजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्व्वारुकमिवबंधनान्मृत्यो
र्म्मुक्षीयमामृतात् ॥ त्र्यम्बकंय्यजामहेसुगन्धिम्पतिवेदनम् ॥ उर्व्वारुकमिवब

न्धनादितोमुक्षीयमामुतः ॥ ३ ॥ ६० ॥ ततोवेदाहमेतमित्युपवीतंनिवेदयेत् ॥ वेदाहमेत
म्पुरुषम्महान्तमादित्यवर्णन्तमसः पुरस्तात् ॥ तमेवविदित्वातिमृत्युमेतिनान्यः
पन्थाविद्यतेयनाय ॥३१॥१८॥ तदनन्तरंयदश्वायेतिवस्त्रम् ॥ ॐ यदश्वायवासऽउप
स्तृणन्त्यधीवासंय्याहिरण्यान्यस्मै ॥ सन्दानमर्वन्तुम्पडीशम्प्रियादेवेष्वायामय
न्ति ॥ २५ ॥ ३९ ॥ ततोवेदाहमित्युत्तरीयम् ॥ ॐ वेदाहमेतम्पुरुषम्महान्तमा
दित्यवर्णन्तमसः पुरस्तात् ॥ तमेवविदित्वातिमृत्युमेतिनान्यः पन्थाविद्यतेयना
य ॥ इदम्विष्णुरितिपुष्पम् ॥ ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपा
ᳪंसुरेस्वाहा ॥ ५ ॥ १५ ॥ धूरसीतिधूपम् ॥ ॐधूरसिधूर्व्वधूर्वन्तंधूर्व्वतंय्योऽस्म्मान्धू
र्वतितन्धूर्व्वयम्वयन्धूर्वामः ॥ देवानामसिवह्नितम ᳪ सस्नितमम्पप्रितमञ्जुष्टत
मन्देवहूतमम् ॥ १ ॥ ८ ॥ चंद्रमामनसाइतिदीपम् ॥ ॐचन्द्रमामनसोजातश्चक्षोः ॥२०५॥

सूर्य्यों॒ऽअजायत ॥ श्रोत्रा॑द्वा॒युश्च॑प्प्रा॒णश्च॒मुखा॑द॒ग्निर॑जायत ॥ ३१ ॥ १२ ॥ अन्नपते इतिनैवेद्यम् ॥ ॐ अन्न॑पतेन्न॑स्यनोदेह्यनमी॒वस्य॑शु॒ष्मिण॑ः ॥ प्रप्र॑दा॒तार॑न्तारिष॒ऽऊर्ज॑न्नोधेहिद्वि॒पदे॒शञ्चतु॑ष्पदे ॥ ११ ॥ ८३ ॥ एवंनैवेद्यंदत्त्वा ॥ यत्पुरुषेणेत्याचमनीयम् ॥ ॐ यत्पुरु॑षेणह॒विषा॑दे॒वायु॒ज्ञमत॑न्वत ॥ व॒सन्तो॑ऽस्यासी॒दाज्ज्य॑ङ्ग्री॒ष्मऽ इ॒ध्मः शरद्ध॒विः ॥ ३१ ॥ १४ ॥ यज्ञेनेतिपुष्पांजलिम् ॥ ॐ य॒ज्ञेन॑य॒ज्ञम॑यजन्तदे॒वास्तानि॒ धर्म्मा॑णिप्प्रथ॒मान्या॑सन् ॥ तेह॒नाक॑म्महि॒मान॑ः सचन्तु॒यत्र॒पूर्वे॑सा॒ध्याः॒सन्ति॑दे॒वाः ॥३१॥१६॥एवंपुष्पांजलिंदत्त्वासंप्रार्थ्यतैलपात्रस्नानवस्त्रासननैवेद्यादिकंशिलिपनेदद्यात् ॥ इतिदेवस्नपनविधिः ॥ एवंयथाविधिदेवंस्नापयित्वा पुरुषसूक्तेनदेवस्यस्तुतिंकुर्यात् ॥ तथाहि—ॐ स॒हस्र॑शीर्षा॒पुरु॑षः सहस्रा॒क्षः स॒हस्र॑पात् ॥ सभूमि॑ꣳस॒र्वत॑स्पृ॒त्वात्त्य॑तिष्ठद्दशाङ्गुलम् ॥ ३१ ॥ १ ॥ पुरु॑ष॒ऽए॒वेद॒ꣳ सर्वं॒य्यद्भू॒तंयच्च॒भाव्य॑म् ॥ उ॒ताम॑तृ॒त्त्व

स्येशानोयदन्नेनातिरोहति ॥ ३१ ॥ २ ॥ एतावानस्यमहिमातोज्ज्यायाँश्चपूरुषः ॥
पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ॥ ३१ ॥ ३ ॥ त्रिपादूर्ध्वऽउदैत्पुरुषः
पादोस्येहाभवत्पुनः ॥ ततोविष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥ ३१ ॥ ४ ॥
ततोविराडजायतविराजोऽअधिपूरुषः ॥ सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः
॥ ३१ ॥ ५ ॥ तस्म्माद्यज्ञात्त्सर्व्वहुतः सम्भृतम्पृषदाज्ज्यम् ॥ पशून्ताँश्चक्रेवा
यव्व्यानारण्यान्ग्राम्म्याश्चये ॥ ३१ ॥ ६ ॥ तस्माद्यज्ञात्त्सर्व्वहुतऽऋचः सामानिज
ज्ञिरे ॥ छन्दांसिजज्ञिरेतस्म्माद्यजुस्तस्म्मादजायत ॥ ३१ ॥ ७ ॥ तस्म्मादश्वा
अजायन्तयेकेचोभयादतः ॥ गावोहजज्ञिरेतस्म्मात्तस्माज्जाताऽअजावयः ॥ ३१ ॥ ८ ॥
तंय्यज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्ग्रतः ॥ तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्चये ॥
॥ ३१ ॥ ९ ॥ यत्पुरुषंव्यदधुः कतिधाव्यकल्पयन् ॥ मुखङ्किमस्यासीत्किम्बा

हूकिमूरूपादांउच्येते ॥ ३१ ॥ १० ॥ ब्राह्मणोस्यमुखंमासीद्बाहूराजन्यः कृतः ॥
ऊरूतदंस्ययद्वैश्यः पद्भ्याᳬंशूद्रोअंजायत ॥ ३१ ॥ ११ ॥ चन्द्रमामनंसोजात
श्चक्षोः सूर्य्योंऽ अजायत ॥ श्रोत्रांद्वायुश्चंप्प्राणश्चमुखांदग्निरंजायत ॥ ३१ ॥ १२ ॥
नाभ्यांऽआसीदन्तरिक्षᳬं शीर्ष्णोंद्यौः समंवर्तत ॥ पद्भ्याम्भूमिर्दिशः श्श्रोत्रात्त
थांलोकाँ२ऽअंकल्प्पयन् ॥ ३१ ॥ १३ ॥ यत्पुरुंषेणहविषांदेवायज्ञमंतन्वत ॥ व
सन्तोऽस्यासीदाज्ज्यंग्ग्रीष्मऽइध्मःशरद्धविः ॥ ३१ ॥ १४ ॥ सप्तास्यांसन्परिधय
स्त्रिः सप्तसमिधंः कृताः ॥ देवायद्यज्ञन्तंन्वानाऽअबंध्नन्पुरुंषम्पशुम् ॥ ३१ ॥ १५ ॥
यज्ञेनंयज्ञमंयजन्तदेवास्तानिधर्म्माणिप्रथमान्यांसन् ॥ तेहनाकंम्महिमानंः सच
न्तयत्रपूर्वेंसाध्ध्याः सन्तिदेवाः ॥ ३१ ॥ १६ ॥ अद्भ्यः सम्भृंतः पृथिव्यैरसांच्चविश्व
कंर्म्मणः समंवर्त्ततताग्रें ॥ तस्यत्वष्टांविदधंद्रूपमेंतितन्मर्त्यंस्यदेवत्वमाजानमग्रें

प्र. सं. ॥ ३१ ॥ १७ ॥ वेदाहमेतम्पुरुषम्महान्तमादित्यवर्णन्तमसः पुरस्तात् ॥ तमेववि अ. प्रः
॥२०७॥ दित्वातिमृत्युमेतिनान्यः पन्थाविद्यतेयनाय ॥ ३१ ॥ १८ ॥ प्रजापतिश्चरतिगर्भे
अन्तरजायमानोबहुधाविजायते ॥ तस्ययोनिम्परिपश्यन्ति धीरास्तस्मिन्हतस्थुर्भु
वनानिविश्वा ॥ ३१ ॥ १९ ॥ योदेवेभ्यऽआतपतियोदेवानाम्पुरोहितः ॥ पूर्वो
योदेवेभ्योजातोनमोरुचायब्राह्मये ॥ ३१ ॥ २० ॥ रुचम्ब्राह्मञ्जनयन्तोदेवाऽअ
ग्ग्रेतदब्रुवन् ॥ यस्त्वैवम्ब्राह्मणोविद्यात्तस्यदेवाऽ असन्वशे ॥ ३१ ॥ २१ ॥ श्रीश्चते
लक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मऽ
इषाणसर्व्वलोकम्मऽइषाण ॥ ३१ ॥ २२ ॥ एवंपुरुषसूक्तेनदेवंस्तुत्वा उत्तिष्ठब्रह्म
णस्पतइतिमंत्रेणउत्तिष्ठोत्तिष्ठेत्यनेनवादेवमुत्थापयेत् ॥ ॐ उत्तिष्ठब्रह्मणस्पते दे ॥२०७॥
वयन्तस्त्वेमहे ॥ उपप्रयन्तुमरुतः सुदानवऽइन्द्रप्राशूर्भवासचा ॥३४॥५६॥ उत्तिष्ठो

त्तिष्ठगोविन्दउत्तिष्ठगरुडध्वज ॥ उत्तिष्ठकमलाकांतत्रैलोक्यंमंगलंकुरु ॥ उत्तिष्ठोत्तिष्ठ
कंसारेत्यजनिद्रांजगत्पते ॥ साधवःसंप्रतीक्षंतेत्वद्दर्शनमहोत्सवाः ॥ रथेतिष्ठन्निति रथ
मारोपयेत् ॥ ॐ रथेतिष्ठन्नयतिवाजिनंः पुरोयत्रंयत्रकामयंतेसुषारथिः ॥ अभीशूं
नाम्महिमानंम्पनायतमनंः पश्चादनुयच्छन्तिरश्मयंः ॥ २९ ॥ ४३ ॥ तत आमूर
जेतिच तूर्य्यनिनादैः पुरुषसूक्तंजपन् पुरस्यप्रासादस्यवाप्रादक्षिण्येनरथमार्गानुगा
मिनाकर्म्मकर्तृस्थपतिलोकान्वस्त्रहिरण्यादिनानीराज्यशनैःर्यागमंडपारव्यमहामंडप
पश्चिमद्वारि आनीयोत्तार्य्यार्घंदत्त्वा कनिक्रददितिमूलमंत्रेण पुरुषसूक्तेनाकृष्णे
नेतिमंत्रेणवाप्रवेशयेत् ॥ ॐशन्नोवातंः पवताᳪं शन्नस्तपतुसूर्य्यंः ॥ शन्नः कनिक्र
दद्देवः पर्ज्जन्योऽअभिवर्षतु ॥ पुरुषसूक्तंसहस्रशीर्षादिमंत्रसमुदायम् ॥ ॐ आकृष्णे
नरजंसावर्तमानोनिवेशयन्नमृतम्मर्त्यंञ्च ॥ हिरण्ययेन सवितारथेनादेवोयाति

भुवनानिपश्यन् ॥ ३३ ॥ ४३ ॥ तदनंतरं मध्यवेद्याः पश्चिमभागस्थितपी
ठेपूर्वाभिमुखंदेवंनिधाय पुरुषएवेत्यनेनपाद्यम् ॥ एतावानस्येत्यनेनार्घ्यंदद्यात् ॥ ॐ
पुरुषऽएवेदꣳसर्वं ण्यद्भूतँय्यच्चभाव्यम् ॥ उतामृतत्वस्येशानो यदन्नेनातिरोहति
॥ ३१ ॥ २ ॥ एतावानस्यमहिमातोज्ज्यायाँश्श्चपूरुषः ॥ पादोस्यविश्श्वाभूता
निंत्रिपादस्यामृतन्दिवि ॥ ३१ ॥ ३ ॥ ततःअन्नपतइतिमधुपर्कंकुर्यात् ॥ ॐ अन्नपते
न्नस्यनोदेह्यनमीवस्यशुष्मिणः ॥ प्रप्रदातारन्तारिषऽऊर्ज्जंनोधेहिद्विपदेशंचतुष्पदे ॥
अथपूर्वापरोत्तरायाम्यास्येषुप्रासादेषुवेदिकायामाग्निमरुदीशाननैर्ऋतेषुकोणेषुचतुःष्क
लशविकारान्विकीर्य्य महामंडपमध्यवेदिकायां प्राक्शिरसं शय्यांसारदारुमयं
पट्टंवानिधायतदुपरिउपधानद्वयोपेतांतूलिकामास्तीर्य्यतामपिसद्वस्त्रेणाच्छाद्यतदुपरि ॥२०८॥
अक्षतैःस्वस्तिकंकृत्वा प्रागग्रानकुशानास्तीर्य पुष्पाणिचाविन्यस्य तस्याः पूर्वादि

दिक्षुविष्णुमधुसूदनत्रिविक्रमवामनान् स्वनाममंत्रैः पूजयेत् ॥ आग्नेयादिकोणेषु
चश्रीधरंहृषीकेशंपद्मनाभंदामोदरंच स्वनाममंत्रैः पूजयेत् ॥ शिवादिप्रतिष्ठायांतु
शर्वादीन्मूर्तीशान्स्वस्वनाममंत्रैरेवपूर्वादिदिक्षुक्रमेणपूजयेत् ॥ तद्यथा-शर्वंपशुपतिं
चोग्रंरुद्रंभवमथेश्वरम् ॥ महादेवंचभीमंचईशानंक्रमतोन्यसेत् ॥ एवंसंपूज्य शय्या
यां नमःशंभवायेतिमंत्रेणप्राक्शिरसंदेवंनिवेशयेत् ॥ नमःशम्भवायचमयोभवाय
चनमः शंकरायच मयस्करायचनमः शिवायच शिवतरायच ॥ १६ ॥ ४१ ॥
एवंप्रकारेणदेवंशय्यायां निवेश्यत्रिभिः पट्टदुकूलैर्विचित्रैः कार्पासनिर्मितैर्दुकूलैर्वा
देवमाच्छाद्य देवस्यशिरोदेशेभूमावेवसवस्त्रंकांचनंराजतंताम्रमयंवामृन्मयंवाकलश
मापोदेवीरितिमंत्रेणस्थापयित्वा आपोअस्मानितिचप्रतिष्ठापयेत् ॥ ॐ आपोदेवीः
प्रतिगृभ्णीतभस्मैतत्स्योनेकृणुध्वꣳसुरभाउलोके ॥ तस्मैनमन्तांजनयः

सुपत्नीम्मर्तिवेपुत्रम्बिभृतापप्स्वेनत् ॥ १२ ॥ ३५ ॥ ॐ आपोऽ अस्मान्मातरः
शुन्धयन्तुघृतेननोघृतप्वः पुनन्तु ॥ विश्वꣳहिरिप्रम्प्रवहन्तिदेवीरुदिदाभ्यः
शुचिरापूतऽएमि ॥ दीक्षातपसोस्तनूरसितान्त्वाशिवाꣳशग्मामपरिदधेभद्रंवर्ण
म्पुष्यन् ॥ ४ ॥ २ ॥ तदनंतरमाप्यायस्वेतिमंत्रेणमधुसर्पिर्भ्यांदेवमभ्यंजयेत् ॥ ॐ
आप्यायस्वमदिन्तमसोमविश्वेभिरꣳशुभिः ॥ भवानः सुप्रथस्तमः सखा
वृधे ॥ १२ ॥ ११४ ॥ ततो यातेरुद्रेतिदेवंतैलसर्षपैरुपलिंपेत् ॥ ॐ यातेरु
द्रशिवातनूरघोरापापकाशिनी ॥ तयानस्तन्वाशन्तमयागिरिशन्ताभिचाकशीहि ॥
॥ १६ ॥ २ ॥ ततोगंधपुष्पाद्यैर्देवमभ्यर्च्य बृहस्पतेपरीतिमंत्रेणसितंपरिधानंदद्यात् ॥
ॐ बृहस्पतेपरिदीयारथेनरक्षोहामित्राँ२ऽअपबाधमानः ॥ प्रभञ्जन्त्सेनाः प्रमृणो
युधाजयन्नस्माकमेद्ध्यवितारथानाम् ॥१७॥३६॥ अत्रदेवस्यदक्षिणपाणौबृहस्पते

परीतिमंत्रेणकंकणबंधनमित्यपिकेचिद्वदन्ति ॥ ततोविश्श्वतश्चक्षुरितिमंत्रेणदेवस्यपा
दनाभिवक्षःशिरस्वालंभनम् ॥ ॐ विश्वतंश्चक्षुरुतविश्श्वतोंमुखोविश्श्वतोंबाहुरुतवि
श्श्वतंस्पात् ॥ सम्बाहुभ्यान्धमंतिसम्पतंत्रैर्द्यावाभूमींजनयंन्देवऽएकंः ॥ १७ ॥
॥ १९ ॥ ततइन्द्रश्छत्रंददात्वितिमंत्रेणदेवस्यदक्षिणपाश्र्वेछत्रधारणम् ॥ ॐ इन्द्रश्छ
त्रंददातु वरुणमभिषिंचतु ॥ शत्रवोनिधनंयांतुजयस्त्वंब्रह्मतेजसा ॥ ततो वातो
वामनोइतिव्यजनंस्थापयेत् ॥ ॐ वातोंवामनोंवागन्धर्वाःसप्तविंशतिः ॥ तेऽअग्रे
श्वंमयुञ्जुंस्तेऽअंस्मिञ्जवमादधुः ॥ ९ ॥ ७ ॥ त्रीणिपदेतिमंत्रेणचरणप्रदेशेपादुके॥ ॐ
त्रीणिपदाविचंक्रमेविष्णुर्गोपाऽअदांभ्यः ॥ अतोधर्म्माणिधारयंन् ॥ पार्श्वयोःशां
तिकुंभौ आसनदर्पणघंटाभक्ष्यभोज्यान्नपानादिघृतंगृहोपस्करजातंचअभित्वाशूरेति
मंत्रेणदेवस्यपुरतः परिकल्पयेत् ॥ ॐ अभित्वांशूरनोनुमोदुग्धाऽइवधेनवंः ॥ ईशां

प्र. सं. नमस्यजगतः स्वर्दृशमीशानमिन्द्रतस्थुषः ॥२७॥३५॥ अथभस्मदर्भतिलैर्देवस्यसमं अ. प्र.
॥२१०॥ ताद्भूतेभ्योरक्षार्थंप्राकारत्रयंकृत्वामंडपाद्बहिर्गत्वा प्रतिदिशमिंद्रादिलोकपालेभ्योगंधा
दिदानपूर्वकंबलिंदद्यात् ॥ बलिमंत्रस्तुपूर्वदिग्वासिभ्योदिक्पतिदिग्भूताधिपतिदिग्रुद्र
दिङ्मातृदिक्क्षेत्रपालेभ्योनमइत्येवंप्रतिदिशंबलिदानम् ॥ त्र्यंबकमितिमंत्रेणभूतेभ्यो
बलिदानम् ॥ ॐत्र्यंबकंयजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्वारुकमिवबन्धनान्मृत्यो
र्मुक्षीयमामृतात् ॥ त्र्यम्बकंयजामहेसुगन्धिम्पतिवेदनम् ॥ उर्वारुकमिवबन्धनादि
तोमुक्षीयमामृतः॥३६०॥एवंपूर्वादिदिक्षुबलिंदत्त्वाचम्यमहामण्डपमध्येआगत्यहोमं
कुर्यात् ॥ तद्यथा—ॐपरायविश्वात्मनेस्वाहेतिहोममंत्रोविष्णुप्रतिष्ठायांज्ञेयः॥शिवादिप्र
तिष्ठायांतु ॐपरायशिवात्मनेस्वाहेतिमंत्रोहःकर्तव्यः॥अनेनमंत्रेणाष्टोत्तरसहस्राष्टोत्तरं ॥२१०॥
शतमष्टाविंशतिरष्टौवातिलैर्यवैर्वाप्रत्येकमाहुतीर्हुत्वाप्रतिमायांन्यासानारभेत्॥ तद्यथा—

अंपादयोः उं हृदये मंललाटे इतिप्रणवन्यासः ॥ १ ॥ भूः पादयोः भुवः हृदये स्वः ल
लाटे इतिव्याहृतिन्यासः ॥ २ ॥ अंतालुके आंमुखे इंदक्षिणनेत्रे ईंवामनेत्रे उंदक्षिणश्र
वणे ऊंवामे ऋंदक्षिणगंडे ॠंवामे लृंदक्षिणनासापुटे लॄंवामे एंऊर्ध्वदशनेषु ऐंअधो
दशनेषु ओंऊर्ध्वोंष्ठे औंअधरे अंललाटे अः जिह्वायां यंवाचि रंचक्षुषि लंनासिकायां
वंदशनेषु शंश्रोत्रयोः षंउरसि संकटिदेशे हंहृदये क्षंनाभ्यां ळंलिंगे पंफंबंभंमंद
क्षिणबाहौ तंथंदंधंनं वामबाहौ टंठंडंढंणंदक्षजंघायां चंछंजंझंञंवामायां कंखंगंघंङं
सर्वांगुलीषु इतिमातृकान्यासः ॥ ३ ॥ आदित्यायनमः शिरसि चन्द्रायनमः नेत्रयोः
अंगारकायनमउरसि बुधायनमः स्कंधे बृहस्पतयेनमः जिह्वायां शुक्राय नमोलिंगे
शनैश्चरायनमः ललाटे राहवेनमः पादयोः केतुभ्योनमः केशेषु रोहिण्यै
नमः हृदये मृगशिरसे शिरसि आर्द्रायैनमः केशेषु पुनर्वसवेनमः ललाटे पुष्या

प्र. सं. यनमोमुखे आश्लेषाभ्योनमो नासायाम् मघाभ्योनमो दशनेषु पूर्वाफाल्गुनी अ. प्र.
॥२११॥ भ्यांनमोदक्षिणश्रोत्रे उत्तराफाल्गुनीभ्यांनमोवामे हस्तायनमोहस्तयोः चित्रायैनमो
दक्षिणभुजे स्वात्यैनमो वामभुजे विशाखाभ्यांनमोदक्षिणस्तने अनुराधाभ्योनमो
वामस्तने ज्येष्ठायैनमोदक्षिणकुक्षौ मूलायनमोवामकुक्षौ पूर्वाषाढाभ्योनमः क
टिपार्श्वयोः उत्तराषाढाभ्योनमः लिंगे श्रवणधनिष्ठाभ्योनमोवृषणयोः शतभिषजे
नमोनेत्रे पूर्वाभाद्रपदोत्तराभाद्रपदाभ्यांनमः ऊर्वोः रेवत्यश्विनीभ्यां० जंघयोः भ
रणीकृत्तिकाभ्योनमः पादयोः ध्रुवायनमोनाभ्याम् सप्तऋषिभ्योनमः कण्ठे मा
तृमंडलायनमः कटिदेशे विष्णुपदेभ्योनमः पादयोः नागवीथ्यैनमः अंगवीथ्यै
नमः वनमालायां ताराभ्योनमः रोमकूपेषु अगस्त्यायनमः कौस्तुभे इति ॥२११॥
ग्रहादिन्यासः ॥ ४ ॥ चैत्रायनमः शिरसि वैशाखायनमोमुखे ज्येष्ठायनमोहृदये

आषाढायनमः श्रावणायनमः स्तनयोः भाद्रपदायनमः उदरे आश्विनायनमः क
ट्यां कार्तिकायनमः मार्गशीर्षायनमः ऊरुद्वये पौषायनमः माघायनमः जंघयोः
फाल्गुनायनमः पादयोः संवत्सरायनमः परिवत्सरायनमः इडावत्सरायनमः वत्स
रायनमः इतिदक्षिणाद्येषुबाहुषु वर्षेभ्योनमः संधिषु ऋतुभ्योनमः लिंगे अहोरात्रेभ्यो
नमोऽस्थिषु क्षणायनमः लवायनमः कलायैनमः रोमकूपेषु कृतायनमो मुखे त्रेता
यनमो हृदये द्वापरायनमोनितंबे कलियुगायनमः पादयोः मन्वंतरेभ्योनमोबा
ह्वोः परायनमः परार्धायनमः जंघयोः महाकालायनमः शरीरे उदगयनायनमः
दक्षिणायनायनमः पादयोः विषुवतेनमः सर्वांगुलीषु इतिकालन्यासः ॥ ५ ॥ ब्राह्मणा
यनमोमुखे क्षत्रियायनमोबाह्वोः वैश्यायनम ऊर्वोः शूद्रायनमः पादयोः संकर
जेभ्यो० पादाग्रे अनुलोमजेभ्योनमः सर्वांगसंधिषु गोभ्योनमः मुखे अजाभ्यो

नमः अविकाभ्योनमः हस्तयोः ग्राम्यपशुभ्योनमः आरण्यपशुभ्योनमः ऊर्वोः इतिव
र्णादिन्यासः ॥६॥ मेघेभ्योनमः कोशेषु अभ्रेभ्योनमः रोमसु नदीभ्योनमः सर्वगात्रेषु
समुद्रेभ्योनमः कुक्षिदेशे इतितोयन्यासः ॥ ७ ॥ ऋग्वेदायनमः शिरसि यजुर्वेदायन
मो दक्षिणभुजे सामवेदायनमो वामे सर्वोपनिषद्भ्योनमोहृदये इतिहासपुराणेभ्यो
नमोजंघयोः अथर्वांगिरसेभ्योनमोनाभौ कल्पसूत्रेभ्योनमः पादयोः व्याकरणाय
नमो वक्त्रे तर्केभ्योनमः कंठे मीमांसायैसनिरुक्तायैनमो हृदि वृंदशास्त्रेभ्योनमो
ज्योतिःशास्त्रेभ्योनमः नेत्रयोः जीवशास्त्रेभ्यो भूतशास्त्रेभ्योनमः श्रोत्रयोः आयु
र्वेदायनमो दक्षिणभुजे धनुर्वेदायनमो वामभुजे योगशास्त्रेभ्योनमोहृदये नीतिशा
स्त्रेभ्योनमः पादयोः वश्यतंत्रायनमः ओष्ठयोः इतिविद्यान्यासः ॥ ८ ॥ दिवेनमोमूर्ध्नि
सूर्य्यलोकायनमो दक्षिणनेत्रे चन्द्रलोकायनमोवामनेत्रे अनिललोकायनमो घ्राणे

व्योम्नेनमो नाभ्याम् समुद्रेभ्योनमोऽस्थिदेशे पृथिव्यैनमः पादयोः इतिवैराजन्या
सः ॥ ९ ॥ हिरण्यगर्भायनमः शिरसि कृष्णायनमः केशेषु रुद्रायनमोललाटे य
मायनमोभ्रुकुटयाम् अश्विभ्यांनमः कर्णयोः वैश्वानरायनमोमुखे मरुद्भ्योनमोघ्राणे
वसुभ्योनमः कंठे रुद्रेभ्योनमोदंतेषु सरस्वत्यैनमोजिह्वायाम् इन्द्रायनमो दक्षिण
भुजे बलयेनमोवामभुजे प्रह्लादायनमोवामस्तने विश्वकर्मणेनमोदक्षिणस्तने ना
रदायनमोदक्षिणकुक्षौ अनंतादिभ्योनागेभ्योनमोवामकुक्षौ वरुणायनमो हस्तयोः
मित्रायनमः पादयोः विश्वेभ्योदेवेभ्योनम ऊरुद्वये पितृभ्योनमोजानुदेशे पक्षिभ्यो
नमोजंघयोः राक्षसेभ्योनमो गुल्फयोः पिशाचेभ्योनमः पादयोः असुरेभ्यो नमः
पादांगुलीषु विद्याधरेभ्योनमः पार्श्वयोः ग्रहेभ्योनमः पादतलयोः गुह्यकेभ्योनमो
गुदे पूतनादिभ्योनमो नखेषु गंधर्वेभ्योनम ओष्ठयोः कार्तिकेयायनमो गणेशायन

प्र. सं. मः कटिपार्श्वयोः इतिदेवयोनिन्यासः ॥ १० ॥ मत्स्यायनमो मूर्ध्नि कूर्मायनमः पा अ. प्र.
॥२१३॥ दयोः नृसिंहायनमोललाटे वराहायनमो जंघयोः वामनायनमो मुखे परशुरामायन
मो हृदि रामायनमो बाहुषु कृष्णायनमो नाभ्याम् ॥ बुद्धायनमोबुद्धौ कल्किनेनमो
जानुदेशे केशवायनमः शिरसि नारायणायनमो मुखे माधवायनमो ग्रीवायाम्
गोविंदायनमो बाह्वोः विष्णवेनमो हृदये मधुसूदनायनमः पृष्ठे त्रिविक्रमायनमः
कट्याम् वामनायनमो जठरे श्रीधरायनमः हृषीकेशायनमः जंघयोः पद्मनाभा
यनमः गुल्फयोः दामोदरायनमः पादयोः इतिमूर्तिन्यासः ॥ ११ ॥ अश्वमे
धायनमो मूर्ध्नि नरमेधायनमो ललाटे राजसूयायनमो मुखे गोसवायनमः कण्ठे द्वा
दशाहायनमो हृदि अहांतेनमो नाभौ सर्वजितेभ्योनमो दक्षिणकट्याम् अग्निष्टोमा ॥२१३॥
यनमो लिंगे अतिरात्रायनमो वृषणयोः आप्तोर्यामायनमः ऊर्वोः षोडशिनेनमोजानुनोः

उक्थ्यायनमो दक्षिणजंघायाम् ॥ वाजपेयायनमो वामजंघायाम् ॥ अत्यग्निष्टोमाय नमो दक्षिणबाहौ चातुर्मास्येभ्योनमो वामबाहौ सौत्रामण्यैनमोहस्तेषु पश्विष्टयैनमोंगुलीषु दर्शायनमः पौर्णमासायनमःनेत्रयोःसर्वेष्टिभ्योनमोरोमकूपेषु स्वाहाकारायनमः वषट्कारायनमः स्तनयोः पंचमहायज्ञेभ्योनमः पादांगुलीषु आहवनीयायनमो मुखे दक्षिणाग्नयेनमो हृदि गार्हपत्यायनमो नाभौ वेद्यैनम उदरे प्रवर्ग्यायनमो भूषणेषु सवनेभ्योनमः पादयोः इध्मेभ्योनमो बाहुषु दर्भेभ्योनमः केशेषु ॥ इतिक्रतुन्यासः ॥ ॥ १२ ॥ अथ मूलमंत्रन्यासः ॥ १३ ॥ आयुधन्यासः ॥१४॥ शक्तिन्यासः ॥१५॥अंगन्यासः ॥ १६ ॥ इतिसाधारणाः सर्वत्र–तेचवैष्णवमधिकृत्योच्यंते ॥ तद्यथा–धर्मायनमो मूर्ध्नि ज्ञानायनमो हृदि वैराग्यायनमो गुह्ये ऐश्वर्यायनमः पादयोः खड्गायनमः शिरसि शार्ङ्गायनमो मस्तके मुसलायनमो दक्षिणभुजे हलायनमो वामभुजे चक्रायन

 मो नाभ्यां जठरे पृष्ठेच शंखायनमो लिंगेवृषणेच गदायैनमो जंघयोःजानुनोश्च पद्मा
 यनमो गुल्फयोः पादयोश्च ॥ शिवयागेतु—वज्रायनमः शिरसि दंडायनमो मस्तके ख
ड्गायनमः दक्षिणभुजे पाशायनमो वामभुजे ध्वजायनमो नाभ्यां जठरेवृषेच अंकु
शायनमो लिंगे वृषणेच त्रिशूलायनमः जंघयोः जानुनोश्च चक्रायनमोगुल्फयोः यमा
यनमः पादयोः॥ इत्यायुधन्यासः (२३) लक्ष्म्यैनमो ललाटे सरस्वत्यैनमो मुखे रत्यै
नमो गुह्ये प्रीत्यैनमः कण्ठे कीर्त्यैनमो दिक्षु शांत्यैनमो हृदये तुष्ट्यैनमो जठरे पुष्ट्यै
नमः सर्वत्र॥ इतिशक्तिन्यासः ॥ मूलमंत्रस्य हृदयंहृदये शिरः शिरसि शिखाशिखायां
कवचंसर्वत्र नेत्रयोर्नेत्रं करयोरस्त्रं स्तनयोः श्रीवत्सायनमः उरसि कौस्तुभायन
मः कण्ठे वनमालायैनमः ॥ इत्यंगन्यासः ॥ ॐ पादयोः नंजानुनोः मोंगुह्ये भंनाभ्यां
गंहृदये वंकंठे तेंमुखे वांनेत्रयोः सुंललाटे देंशिरसि वांदक्षणपार्श्वे यंउत्तरे ॥ इति

द्वादशाक्षरन्यासः इतिचत्वारोन्यासाः ॥ अथप्रतिमायांजीवन्यासः ॥ तत्रनाभेरध
स्तादाधारस्थानादाकुंचनप्रकारेणनाभिचक्रेतेजआनीयतत्तेजोहृत्पद्ममानीयहृत्पद्मा
त्पंचतन्मात्रैरुपेतम् ऐश्वर्यादिगुणयुक्तं स्फुरद्रश्मिसंकाशमूर्ध्वचक्रत्रयभेनस्वदेहध्या
नेनवामनेत्रान्निःसार्य्यब्रह्मरंध्रेप्रतिमायां प्रविश्यचिंतयेत् ॥ तत्रललाटेकिंचित्स्थि
रंकृत्वा घंटिकाद्वारमानयेत् ॥ तत्रस्थिरीकृत्यतस्मात्तेजसः चक्षुरादिनासिकांतं
प्राणान्निवेशयेत् ॥ पार्ष्ण्यादिघंटिकांतमपानम् ॥ नाभौहृदयेसमानं सुषुम्णाब्र
ह्मरंध्रेउदानम् ॥ हृत्पद्मेदलाष्टकम् ॥ तन्मध्येकर्णिकायांव्यापिनंपुरुषंप्रणवेनन्यसेत् ॥
ॐ मंजीवात्मनेनमः॥ ॐ भंप्राणात्मनेनमःशरीरव्यापकंन्यसेत् ॥ ॐ बंबुद्ध्यात्मनेन
मः ॥ ॐ फंअहंकारात्मनेनमः ॥ ॐ पंमनआत्मनेनमः हृदये ॥ ॐ नंशब्दतन्मात्रा
त्मनेनमः शिरसि ॥ ॐ धंस्पर्शतन्मात्रात्मनेनमः वक्त्रे ॥ ॐ दंरूपतन्मात्रात्मनेनमोह

प्र. सं. दये ॥ ॐ थंरसतन्मात्रात्मनेनमोहस्तयोः ॥ ॐ तंगंधतन्मात्रात्मनेनमः पादयोः॥ॐ अ. प्र.
॥२१५॥ णंश्रोत्रात्मनेनमः श्रोत्रयोः ॥ ॐ ढंत्वगात्मनेनमः त्वचि ॥ ॐ डंचक्षुरात्मनेनमः चक्षु
षोः॥ॐ ठंजिह्वात्मनेनमोजिह्वायाम्॥ॐ टंघ्राणात्मनेनमोघ्राणे॥ ॐ ञंवागात्मनेनमोवा
चि॥ॐ झंप्राणात्मनेनमःपाण्योः॥ॐ जंपादात्मनेनमः पादयोः॥ ॐ छंपाय्वात्मनेनमः
पायौ ॐ चंउपस्थात्मनेनमः उपस्थे ॥ ॐ ङंपृथिव्यात्मनेनमः पादयोः॥ॐ घंअबात्म
नेनमःबस्तौ॥ॐ गंतेजआत्मनेनमोहृदये॥ॐ खंवाय्वात्मनेनमः घ्राणे॥ॐ कंआकाशा
त्मनेनमःशिरसि॥ ॐ शंपुंडरीकाक्षायनमोहृदये॥ॐ षंसूर्यात्मनेनमोहृत्पुंडरीकमध्ये
ॐ संसोमात्मनेनमस्तन्मध्ये ॐ रंवह्न्यात्मनेनमस्तन्मध्ये ततोवंबीजंस्वाभिमतमूर्त्यां
स्वमंत्रेणयोज्यम् ॥ ॐ पुरुषात्मनेनमः इतिपुरुषभावनायाम्॥ॐ पंपरायसर्वात्मनेनमः ॥२१५॥
इतिसर्वसाक्षिणंभावयित्वा ॥ ॐ फंसर्वात्मनेनमः इतिसर्वतोमुखम्॥ॐ वंअनुग्रहात्मनेन

मइत्यनुग्रहकारकम् ॐवंसर्वभूतात्मनेनमइतिसर्वसंभूतिकम् ॐ लंसर्वसंहरणात्मनेन
म इतिसर्वसंहारात्मकम् (१७) क्रमेणध्यात्वासर्वेश्वरम् ॥ तत्र तत्त्वाश्रयन्यासः
कर्तव्यः ॥ तद्यथा-ॐआत्मतत्त्वायनमः ॐआत्मतत्त्वाधिपतये ब्रह्मणेनमः पादयोः
ॐ विद्यातत्त्वाय० विद्यातत्त्वाधिपतयेविष्णवे० हृदये॥ ॐवायुतत्त्वायनमोघ्राणे ॥ॐ
जिह्वातत्त्वायनमोजिह्वायाम् ॥ ॐ चक्षुस्तत्त्वाय० चक्षुषोः ॥ ॐ त्वक्तत्त्वायनमश्च
र्मणि॥ॐश्रोत्रतत्त्वायनमःकर्णयोः॥ॐपायुतत्त्वात्मनेनमः पायौ॥ॐउपस्थतत्त्वात्म
नेनमः उपस्थे ॐहस्ततत्त्वायनमोहस्तयोः॥ ॐपादतत्त्वायनमःपादयोःॐवाक्तत्त्वा
यनमोवाचि॥ॐतमस्तत्त्वायनमोहृदि ॐबुद्धितत्त्वायनमःॐअहंकारतत्त्वायनमः ॐ
सत्त्वायनमःॐरजसेनमःॐतमसेनमःॐपुरुषतत्त्वायनमोहृदये॥ॐरागतत्त्वायनमः

ॐविद्यातत्त्वायनमः ॐकालतत्त्वायनमः ॐमायातत्त्वायनमः ॐईश्वरतत्त्वायनमः

ॐसदाशिवतत्त्वायनमः ॐशक्तितत्त्वायनमः ॐशिवतत्त्वायनमः इतिषोडशन्यासाः
(२७) अथगायत्रीन्यासःसूर्यस्य॥तत् पदांगुष्ठयोः स गुल्फयोःवि जंघयोःतु जानुनोःव
ऊर्वोःरे गुह्ये णि वृषणयोः यं कटिदेशे भ नाभौ गो जठरे दे स्तनयोःव हृदये स्य कंठे धी
वदने म तालुमध्ये हि नासिकाग्रे धि चक्षुषोः यो भ्रूमध्ये यो ललाटे नः पूर्वदिशि प्र द
क्षिणदिशि चो पश्चिमदिशि द उत्तरदिशि या मूर्ध्नि त् सर्वत्र ॥ तत्सवितुर्हृदये वरेणि
यं शिरसि भर्गोदेवस्य शिखायां धीमहि कवचे धियोयोनः नेत्रयोः प्रचोदयादस्त्रे
इति गायत्रीन्यासः (२०) अथ मंत्रन्यासः॥ अग्निमीळे इतिपादयोः ॐअग्निमीळे पुरो
हितंयज्ञस्यदेवमृत्विजम् ॥ होतारंरत्नधातमम् ॥ इषेत्वेतिगुल्फयोः ॥ ॐइषेत्वोर्ज्जेत्वा
वायवस्थदेवोवः सविताप्प्रार्प्पयतुश्श्रेष्ठतमायकर्म्मणऽ आप्यायध्वमघ्न्याऽ इन्द्रा ॥२१६॥
यभागम्प्रजावतीरनमीवाऽ अयक्ष्मामावस्तेनऽ ईशतमाघशंसोध्रुवाऽ अस्मि...

पंतौस्यातबुह्वीर्य्यंजमानस्यपुशून्न्पांहि ॥ १ ॥ १ ॥ अग्नआयाहीतिजंघयोः ॐअग्नुऽ
आयाहिंवीतयैगृणानोहुव्यदांतये ॥ निहोतांसत्सिबुर्हिंषि ॥ शन्नोदेवीरितिजानुनोः
ॐशन्नोंदेवीरुभीष्टंयुऽआपोंभवन्तुपीतयें ॥ शंय्योरुभिस्रंवन्तुनः ॥३६॥१२॥ बृहद्रथंत
रेइतिऊर्वोः ॐसुपुर्णोंसिगरुत्म्मांस्त्रिवृत्तेशिरोंगायुत्रंचक्षुर्बृहद्रथंरेपुक्षौ ॥ स्तोमऽआ
त्माछन्दांर्ठस्यङ्गांनियजूंर्ठषिनामं॥सामंतेतनूर्वांमदेव्यंयंय्यंज्ञायुज्ञियम्पुच्छंधिष्ण्याः
शुफाः ॥ सुपुर्णोऽसिगुरुत्मान्दिवङ्गच्छुः स्वृपत ॥ १२ ॥ ४ ॥ स्वस्तिनइतिजठरे ॐ
स्वुस्तिनुऽ इन्द्रोंवृद्धश्रंवाःस्वुस्तिनंःपूषाविश्ववेंदाः ॥ स्वुस्तिनुस्तार्क्ष्योऽ अरिंष्टने
मिः स्वुस्तिनोबृहुस्पतिर्दधातु ॥ २५ ॥ १९ ॥ दीर्घायुत्वेतिहृदये ॐ दीर्घायु
त्वायबलांयुवर्च्चंसे सुप्प्रजास्त्वायंसहस्राऽअथोंजीवशुरदंःशुतम् ॥ श्रीश्चत इति
कंठे ॐ श्रीश्चंतेलुक्ष्मीश्चपत्न्यांवहोरात्रेपार्श्वेनक्षंत्राणि रूपमश्विनौव्या

त्तंम् ॥ इ॒ष्णन्निषाणा॒मुम्मं॑ऽइषाण स॒र्वं॑लो॒कम्मं॑इषाण ॥ ३१ ॥ १२ ॥ त्रातारमिं
तिवक्त्रे ॐ त्रा॒तार॒मिन्द्र॑मवि॒तार॒मिन्द्र॒ᳬहवे॑हवे सु॒हव॒ᳬ शूर॒मिन्द्र॑म् ॥ ह्वया॑मि
शक्रम्पु॑रुहू॒तमिन्द्र॑ᳬस्व॒स्तिनो॑म॒घवा॑धा॒त्विन्द्रः॑ ॥ २० ॥ ५० ॥ त्र्यंबकमितिस्त
नयोः नेत्रयोश्च ॐ त्र्य॑म्बकँय्यजामहे सु॒गन्धि॑म्पुष्टि॒वर्द्ध॑नम् ॥ उ॒र्वा॒रु॒कमि॑व॒बन्ध॑ना
न्मृ॒त्योर्मु॑क्षीय॒मामृता॑त् ॥ त्र्य॑म्बकंय्यजामहे सु॒गन्धि॑म्पति॒वेद॑नम् ॥ उ॒र्वा॒रु॒कमि॑व॒बन्ध॑
ना॒दि॒तोमु॑क्षीय॒मामु॒तः ॥ १ ॥ ६० ॥ मूर्द्धानमितिशिरसि ॥ ॐ मू॒र्द्धानं॑न्दि॒वोऽअ॑र॒तिंपृ॑थि॒व्या
वै॑श्वान॒रमृ॒तऽ आजा॒तम॒ग्निम् ॥ क॒विᳬस॒म्राज॒मति॑थि॒ञ्जना॑नामा॒सन्ना॒पात्रं॑ञ्जनयन्त
दे॒वाः ३३ ॥ ८ ॥ इति साधारणो वैकल्पिकश्च न्यासः ॥ अथ द्वादशाक्षरेण नारायणस्य मूर्तिन्या
सः ॥ ॐ केशवाय नमः शिरसि ॐ नं नारायणाय नमो मुखे मों माधवाय नमो ग्रीवायाम् भं ॥२१७॥
गोविंदाय नमः कंठे गं विष्णवे नमः पृष्ठे वं मधुसूदनाय नमः कुक्षौ तें त्रिविक्रमाय नमः क

ट्याम् वां वामनायनमो जंघयोः सुं श्रीधरायनमो वामगुल्फे दें हृषीकेशायनमो दक्षि
णगुल्फे वां पद्मनाभायनमो वामपादे यं दामोदरायनमो दक्षिणे ॥ इतिनारायणद्वाद
शाक्षरेणमूर्तिन्यासः॥२२॥ॐहृदयायनमःहृदये विष्णवेनमःशिरसि ब्रह्मण्यायनमः शि
खायाम् ध्रुवायनमः कवचे चक्रिणेनमः अस्त्रायफट् अस्त्रंहस्तयोः शंभवायनमो गाय
त्री दक्षिणनेत्रे विजायनमः सावित्रेवामनेत्रे चक्रिणेचक्रिरूपायनमः पिंगलाक्षं दृक्षु ॥
इत्यष्टांगविष्णुमंत्रन्यासः ॥ २३ ॥ अथपुरुषसूक्तन्यासः॥ सहस्रशीर्षेतिपादयोर्न्यसेत
पुरुषएवेतिजंघयोः एतावानितिजानुनोः त्रिपादूर्ध्वमित्यूर्वोः तस्माद्विराडिति वृषणे
तस्माद्यज्ञेतिकट्याम् तस्माद्यज्ञादितिनाभ्याम् तस्मादश्वाइतिहृदये तंयज्ञमितिस्त
नयोः यत्पुरुषमितिबाह्वोः ब्राह्मणोस्येतिगले चन्द्रमामनसइति मुखे नाभ्याआसी

दितिनासायाम् यत्पुरुषेणेतिचक्षुषोः सप्तास्येतिकर्णयोः यज्ञेनयज्ञमिति शिरसि ॥

इतिपुरुषसूक्तन्यासः ॥ २४ ॥ अद्भ्यः संभृंतइतिहृदये वेदाहमितिशिरसि प्रजापति
रितिशिखायाम् योदेवेभ्यइतिकवचे रुचंब्राह्ममितिनेत्रयोः श्रीश्चतइतिअस्त्रे इत्यु
त्तरनारायणन्यासः ॥ २५ ॥ शिवस्यचेत्कलान्यासः ॥ २५ ॥ अथशिवस्यपंचब्रह्म
न्यासः ॥ तद्यथा–अंगुष्ठयोरीशानम् ॥ तर्जन्योस्तत्पुरुषम् ॥ मध्यमयोरघोरम्॥अना
मिकयोर्वामदेवम्॥कनिष्ठयोः सद्योजातम् ॥ ततः कनिष्ठयोःहृदये॥अनामिकयोः शिर
सि ॥ मध्यमयोः शिखायाम् ॥ तर्जन्योः कवचम् ॥ अंगुष्ठयोरस्त्रंविन्यस्य परेणतेज
सा संयोज्य कवचेनावगुंठ्यसर्वकर्मसुनियोजयेत् ॥ आचमनम् ॥ अनेनविधिनादेव
स्यकरन्यासंविधायलिंगमुद्रांबद्ध्वा ईशानःसर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपति
र्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवोमिति ईशानमुष्टिंबद्ध्वा अंगुल्यग्रेरुद्रमुद्र ॥२१८॥
यामूर्ध्नि तत्पुरुषायविद्महे महादेवायधीमहि ॥ तन्नोरुद्रःप्रचोदयात् ॥ तथैवतर्जन्यंगु

ष्ठयोगात्पुरुषमुखे अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः ॥ सर्वेभ्यः सर्वशर्वेभ्योनमस्ते
अस्तुरुद्ररूपेभ्यः इतिमध्यमांगुष्ठयोगेनहृद्यघोरम् वामदेवायनमोज्येष्ठायनमः श्रेष्ठा
यनमोरुद्रायनमः कालायनमः कलविकरणायनमोबलविकरणायनमो बलायनमो
बलप्रमथनायनमः सर्वभूतदमनायनमोमनोन्मनायनमः इतिअंगुष्ठानामिकायो
गेनगुह्ये सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः ॥ भवेभवेनातिभवेभवस्वमांभ
वोद्भवायनमः इतिकनिष्ठांगुष्ठयोगेनपादादारभ्यमस्तकांतंयावच्छरीरव्यापकत्वेन
मूर्तिभूतंसद्योजातमितिब्रह्मभंग्याविन्यस्य ऊर्ध्वपूर्वदक्षिणोत्तरपश्चिमचक्रेषु वक्रभं
ग्या ततोनमः कालभंग्या ईशानः सर्वविद्यानांनमइति शशिनींमूर्ध्नि ईश्वरः
सर्वभूतानामित्युभयदलांपूर्वमूर्ध्नि ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मणेनम इतिहृष्टांद

क्षिणमूर्ध्नि शिवोमेअस्तुनम इतिमरीचिंउत्तरमूर्ध्नि ॥ ४ ॥ सदाशिवोंनमइति

ज्वालिनींपश्चिममूर्ध्नि ॥ ५ ॥ एवमीशानस्यकलापंचकं तत्पुरुषायविद्महेनमइतिशां
तिंपूर्ववक्त्रे महादेवायधीमहिनमइतिविद्यांदक्षिणवक्त्रे तन्नोरुद्रइतिप्रतिष्ठामुत्तरवक्त्रे
प्रचोदयादितिधृतिंपश्चिमवक्त्रे इतितत्पुरुषतुलाश्चतस्रः अघोरेभ्योनमइतितमांहृदये
अथघोरेभ्योनमइतिज्वरमोहांग्रीवायां घोरायनमइतिक्षमांदक्षिणांसे घोरतरेभ्योन
मइतिनिद्रांवामांसे सर्वेभ्योनमइतिमृत्युंनाभौ सर्वशर्वेभ्योनमइति मायांजठरे नम
स्तेअस्तुइतिभयांपृष्ठे रुद्ररूपेभ्योनमइतिजरांउरसिइतिबहुरूपकलाष्टकम् ॥ वा
मदेवायनमइतिजरांमुखे ज्येष्ठायनमइति रक्षांलिंगे श्रेष्ठायनमइति रतिंदक्षिणोरौ
रुद्रायनमइति योनिंवामोरौ कालायनमइतिकल्पांदक्षिणजानुनि कलायनमइति
संजीवनींवामजानुनि कलविकरणायनमइति प्रियांदक्षिणजंघायाम् बलविकरणाय ॥२१९॥
नमइतिबुद्धिंवामजंघायां बलायनमइतिछायां दक्षिणस्फिजि बलप्रमथनायनमइति

धात्रींवामस्फिजि सर्वभूतदमनायनमइतिभ्रामणींकट्याम् मनोन्मनायनम इतिमो
हिनींदक्षिणपार्श्वे उन्मनायनम इति ज्वरांवामपार्श्वे इतित्रयोदशकलाः ॥ सद्योजा
तंप्रपद्यामिनमइतिसिद्धिं दक्षिणपादे सद्योजातायवैनमोनमइतिऋद्धिंवामपादे भ
वेनमइतिदितिं दक्षिणपाणौ भवेनमइति अदितिं वामपाणौ नातिभवेनमइतिमेधां
नासायाम् भवस्वमांनम इतिकांतिंशिरसि भवेनमइतिस्वधां दक्षिणबाहौ उद्भवाय
नम इतिप्रभांवामबाहौ ॥ इतिसद्योजातकलाष्टकम्॥अत्रविंशत्यितिकलांतरन्यासभाव
नांकृत्वा स्वस्वमुद्रयाशशिन्याद्यष्टचत्वारिंशत्कलान्यासं विधाय विद्यादेवंहंसंसंपा
द्य हंसहंसेतिहृदयादिन्यासःकायः॥ नृसिंहे ॐनृसिंहउग्रज्वलज्वलप्रज्वलप्रज्वलस्वा
हाइतिमंत्रः ॥ नारसिंहींयदास्थाप्यत्वधिवासनिशागमे ॥ कृत्रिमंवाथसाक्षाद्वाप
शुंदत्त्वा एवंन्यासान् विधाय निद्राकलशेनिद्रामावाहयेत् ॥ परमेष्ठिनंनमस्कृत्य

प्र. सं. ज्वालिनींपश्चिममूर्ध्नि ॥ ५ ॥ एवमीशानस्यकलापंचकं तत्पुरुषायविद्महेनमइतिशां अ. प्र.
॥२१९॥ तिंपूर्ववक्त्रे महादेवायधीमहिनमइतिविद्यांदक्षिणवक्त्रे तन्नोरुद्रइतिप्रतिष्ठामुत्तरवक्त्रे
प्रचोदयादितिधृतिंपश्चिमवक्त्रे इतितत्पुरुषतुलाश्चतस्रः अघोरेभ्योनमइतितमांहृदये
अथघोरेभ्योनमइतिज्वरमोहांग्रीवायां घोरायनमइतिक्षमांदक्षिणांसे घोरतरेभ्योन
मइतिनिद्रांवामांसे सर्वेभ्योनमइतिमृत्युंनाभौ सर्वशर्वेभ्योनमइति मायांजठरे नम
स्तेअस्तुइतिभयांपृष्ठे रुद्ररूपेभ्योनमइतिजरांउरसिइतिबहुरूपकलाष्टकम् ॥ वा
मदेवायनमइतिजरांमुखे ज्येष्ठायनमइति रक्षांलिंगे श्रेष्ठायनमइति रतिंदक्षिणोरौ
रुद्रायनमइति योनिंवामोरौ कालायनमइतिकल्पांदक्षिणजानुनि कलायनमइति
संजीवनींवामजानुनि कलविकरणायनमइति प्रियांदक्षिणजंघायाम् बलविकरणाय ॥२१९॥
नमइतिबुद्धिंवामजंघायां बलायनमइतिछायांदक्षिणस्फिजि बलप्रमथनायनमइति

धात्रींवामस्फिजि सर्वभूतदमनायनमइतिभ्रामणींकट्याम् मनोन्मनायनम इतिमो हिनींदक्षिणपार्श्वे उन्मनायनम इति ज्वरांवामपार्श्वे इतित्रयोदशकलाः ॥ सद्योजा तंप्रपद्यामिनमइतिसिद्धिं दक्षिणपादे सद्योजातायवैनमोनमइतिऋद्धिंवामपादे भ वेनमइतिदितिं दक्षिणपाणौ भवेनमइति अदितिं वामपाणौ नातिभवेनमइतिमेधां नासायाम् भवस्वमांनम इतिकांतिंशिरसि भवेनमइतिस्वधां दक्षिणबाहौ उद्भवाय नम इतिप्रभांवामबाहौ ॥ इतिसद्योजातकलाष्टकम्॥अत्रविंशांत्विंतिकलांतरन्यासभाव नांकृत्वा स्वस्वमुद्रयाशशिन्याद्यष्टचत्वारिंशत्कलान्यासं विधाय विद्यादेवंहंसंसंपा द्य हंसहंसेतिहृदयादिन्यासःकायः॥ नृसिंहे ॐनृसिंहउग्रज्वलज्वलप्रज्वलप्रज्वलस्वा हाइतिमंत्रः ॥ नारसिंहींयदास्थाप्यत्वधिवासनिशागमे ॥ कृत्रिमंवाथसाक्षाद्वाप शुंदत्त्वा एवंन्यासान् विधाय निद्राकलशेनिद्रामावाहयेत् ॥ परमेष्ठिनंनमस्कृत्य

निद्रामावाहयाम्यहम् ॥ मोहिनासर्वभूतानां मनोविभ्रमकारिणीम् ॥ विरूपाक्षेशिवेशां
ते आगच्छत्वंतुमोहिनि ॥ वासुदेवहितेकृष्णेकृष्णांबराविभूषिते ॥ आगच्छसहसाजस्रं
सुप्तसंसारमोहिनि ॥ सुषुप्तिसंहरेदेविकुमार्यैकांतमानसे ॥ आत्मनिःश्वासवाह्यंबेआग
च्छभुवनेश्वरि ॥ तमःसत्त्वरजोपेतेआगच्छत्वरचारिणि ॥ मनोबुद्धिरहंकारःसंहार
स्त्वंसरस्वति ॥ शब्दःस्पर्शश्चरूपंचरसोगंधश्चपंचमः ॥ आगच्छगृह्यसंक्षिप्यमोहपा
शनिबंधिनि ॥ भवस्योत्पत्तिहेतुस्त्वंयावदाभूतसंप्लवम् ॥ भवकल्पांतसंध्यायांवससेत्वं
चराचरे ॥ भोगशय्याप्रसुप्तस्यवासुदेवस्यशासने॥त्वंप्रतिष्ठासिवैदेविमुनियोगिसमुत्थि
ते॥पितृदेवमनुष्याणांसयक्षोरगरक्षसाम्॥पशुपक्षिमृगाणांचयोगमायाविवर्द्धिनि॥ वससे
सर्वसत्त्वेषुमातेवहितकारिणी ॥ एहिसिद्धित्रिमूर्तिस्त्वंचक्षुभ्यांस्थानगोचरे॥विशनासा
पुटेदेविकंठेचोत्कंठितािवश ॥ प्रीतिभावयमांसर्वमातृवद्देविसुंदरि ॥ इदमर्घ्यंमयादत्तंप्र

जेयंप्रतिगृह्यताम् ॥ उपप्रागादितिमंत्रोयंतस्याः पूजाविधौस्मृतः ॥ निद्राकलशेनिद्रां पूजयित्वालोकपालमातृक्षेत्रपालभूतेभ्योबलिंदत्त्वासंस्थाप्यदेवंशय्यातः प्राच्यांसर्वतो भद्रमंडलेलिंगतोभद्रमंडलेवागंधाद्यैः पूजयेत् ॥ विष्णुश्चेत् द्वादशारेचक्रे तन्मध्येऽष्ट दलेचक्रेमूलमंत्रेणदेवंनिवेशयेत् ॥ ॐ हुं हृदयायनमइतिकर्णिकायांमध्ये हृदयंपूज येत् ॥ विष्णवेनम इतिशिरःपूर्वपत्रे ब्रह्मण्यायनम इतिशिखायांदक्षिणे ध्रुवायनमइ तिकवचं पश्चिमे चक्रिणेनमः फट् अस्त्रमुत्तरे संक्षत्रायेतिअग्नये विजयायनमः सा वित्रीमीशानदले ज्योतिषरूपायनमोनैर्ऋते चक्रिरूपायनमः पिंगलास्त्रंवायव्ये इतिग र्भावरणम् आरासु पूर्वादिक्रमेणकेशवनारायणमाधवगोविंदविष्णुमधुसूदनत्रिविक्रम वामनश्रीधरहृषीकेशपद्मनाभदामोदर इतिद्वादशमूर्तीः पूजयेत्॥इतिद्वितीयावरणम् ॥ प्रागादितःखड्गायनमः गदायैनमः चक्राय० शंखाय० पद्माय० हलायनमः मुसलाय०

शार्ङ्गीय० इतितृतीयावरणम्॥एतैरेवमंत्रैर्विन्यस्यगंधादिनापूजनम्॥ अथमूर्त्तीशाःशैववै
ष्णवादेरन्यत्रच ॥ पृथिवीमूर्त्तयेनमःपृथिवीमूर्त्यधिपतयेशर्वायनमः अग्निमूर्तयेनमः
अग्निमूर्त्यधिपतयेपशुपतयेनमः यजमानमूर्तयेनमः यजमानमूर्त्यधिपतये उग्राय
नमः अर्कमूर्तयेनमः अर्कमूर्त्यधिपतयेरुद्रायनमः जलमूर्तयेनमः जलमूर्त्य
धिपतयेभवायनमः वायुमूर्तयेनमः वायुमूर्त्यधिपतये ईशानायनमः इंदुमूर्तये
नमः इन्दुमूर्त्यधिपतये महादेवायनमः खमूर्तयेनमः खमूर्त्यधिपतये भीमायनमः
इत्यष्टौमूर्तीस्तदधिपांश्चसंपूजयेत्॥ अथवैष्णवैः पंचैवमूर्तयइति चेत्तदाप्रागादिमध्यां
तम् पूर्वेपृथिवीमूर्तयेनमः पृथिवीमूर्त्यधिपतयेवासुदेवायनमः दक्षिणेजलमूर्तयेनमः
जलमूर्त्यधिपतयेसंकर्षणायनमः पश्चिमेअग्निमूर्तयेनमः अग्निमूर्त्यधिपतयेप्रद्यु
म्नायनमः उत्तरेवायुमूर्तयेनमः वायुमूर्त्यधिपतये अनिरुद्धायनमः मध्ये खमूर्तये

नमः स्वमूर्त्यधिपतयेनारायणायनमः ॥ शैवे पंचमूर्तिपक्षेमूर्तिपाः ब्रह्मविष्णुरुद्रेश्व
रसदाशिवाः ॥ लोकपालास्तुसर्वत्रपूजनीयाः॥ततोदिव्यवाससादेवमाच्छाद्यपुरुषसूक्ते
नस्तुत्वापुष्पांजलिंदत्त्वा गंधपुष्पादिभिर्मंडपंवेदिंचावकीर्यदेवस्याग्रेचतुरस्रंमंडलं
कोणेषु स्वस्तिकलांछितंकृत्वा ब्रह्मविष्णुरुद्रेशान् प्रतिदिशं लोकपालांस्तदंतरा
लेऽष्टवस्वेकादशरुद्रद्वादशादित्यविश्वेदेवसाध्यनासत्यमरुद्गणगंधर्वाप्सरःपितृगणपु
ण्यतीर्थानि विष्वीशस्कंददुर्गाक्षेत्रपालान् यथावकाशमावाह्य तत्तन्नामभिरर्चयि
त्वा प्रतिष्ठाप्यदेवपार्षदेभ्योनम इत्युच्चार्यपूजयेत् ॥ एवंमंडलेपूजांनिर्वर्त्य
आचार्यः स्वकुंडसमीपमागत्य हिरण्यगर्भइतिमंत्रेण यथाक्रमंपालाशोदुंबराश्वत्था
पामार्गशमीसमिद्भिराज्येनतिलैश्चपरिवारदेवताश्चप्रत्येकं द्वादशसहस्राणि षट्सहस्रा
णित्रीणिसहस्राण्यष्टसहस्रमष्टशतंवाशांतिकपौष्टिकैर्मंत्रैर्यथाविभागंजुहुयात् ॥ ऋ

प्र. सं. त्विक्सहितोवाचार्य्योजुहुयात् ॥ ॐ हिरण्यगर्भः समवर्त्तताग्रेभूतस्यजातः पति अ. प्र.
॥२२२॥ रेकऽआसीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवाय हविषाविधेम ॥ अथ
शांतिमंत्राः ॐ शन्नोवातः पवताᳬं शन्नस्तपतुसूर्य्यः ॥ शन्नः कनिक्रदद्देवः
पर्ज्जन्योऽअभिवर्षतु ॥ ३६ ॥ १० ॥ शन्नऽइन्द्राग्नीभवतामवोभिः शन्नऽइन्द्रा
वरुणारातहव्या ॥ शन्नऽइन्द्रापूषणावाजसातौशमिन्द्रासोमासुवितायशंयोः ॥ ॐ
शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शंय्योरभिस्रवन्तुनः ॥ इतिशांतिमंत्राः ॥
अथपौष्टिकमंत्राः ॐ पुष्टिर्न्नरण्वाक्षितिर्न्नपथ्वीगिरिर्न्नभुज्म क्षोदोनशम्भुः ॥ अत्यो
नाज्मन्सर्गप्रतक्तः सिन्धुर्न्नक्षोदः कईम्वराते ॥ ॐ गयस्फानोअमीवहावसुवित्पु
ष्टिवर्द्धनः ॥ सुमित्रः सोमनोभव ॥ ॐगयस्फानः प्रतरणः सुवीरोवीरहाप्रचरासो ॥२२२॥
मदुर्यान् ॥ ४ ॥ ३१ ॥ शिवोनामासिस्वधितिस्तेपितानमस्तेऽअस्तुमामाहिᳬंसीः ॥

निर्वर्तयाम्यायुषेऽन्नाद्यायप्प्रजननायरायस्प्पोषायसुप्प्रजास्त्वायसुवीर्य्याय ॥ ३ ॥
॥ ६३ ॥ ॐ त्र्यम्म्बकंय्यजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्व्वारुकमिवबन्धनान्न्मृत्यो
र्मुक्षीयमामृतात् ॥ त्र्यम्म्बकंयजामहेसुगन्धिम्पतिवेदनम् ॥ उर्वारुकमिवबन्धनादितो
मुक्षीयमामुतः ॥ ३ ॥६०॥ इतिपौष्टिकमंत्राः ॥ अथपूर्वकुण्डे अग्निमीळेइतिपलाशसामि
द्भिरष्टसहस्रमष्टशतंवातिलैर्य्यवैर्मूर्तिपान्ऋत्विजो जुहुयुः ॥ ॐ अग्निमीळेपुरोहितंय
ज्ञस्यदेवमृत्विजम् ॥ होतारंरत्नधातमम् ॥ इषेत्वेतिमंत्रेणदक्षिणकुंडे मूर्तिपानृत्वि
जोजुहुयुः ॥ ॐ इषेत्त्वोर्ज्जेत्त्वावायवस्थदेवोवः सवितापप्रार्पयतुश्श्रेष्ठतमायकर्म्मणऽ
आप्प्यायद्ध्वमग्घ्याऽ इन्द्रायभागम्प्रजावतीरनमीवाऽ अयक्ष्म्मामावस्तेनऽईशतमाघ
शंꣳसोध्रुवाऽअस्मिन्न्गोपतौस्यातबह्वीर्य्यजमानस्यपशून्पाहि ॥ १ ॥ १ ॥ अग्नआ
याहीतिपश्चिमकुंडेमूर्तिपान् जुहुयुः॥ ॐ अग्नऽआयाहिवीतयेगृणानोहव्यदातये ॥ नि

होतासत्सिबर्हिषि ॥ शन्नोदेवीरित्युत्तरकुंडेमूर्तिपान्॰ जुहुयुः ॥ ॐ शंन्नोंदेवीरभीष्टयऽ
आपोभवन्तुपीतये॥शंय्योरभिस्रवन्तुनः॥३६॥१२॥यदाऽष्टौकुंडानितदा ॐ वौषडितिमं
त्रेणाग्नेयकुंडेमूर्तिपान्॰ जुहुयुः॥दशप्रणवयुक्तयागायत्र्यानैर्ऋतेकुंडेजुहुयुः॥जातवेदसे
इतिमंत्रेणवायव्यकुंडेजुहुयुः ॥ ॐ जातवेदसेसुनवामसोमं मरातीयतोनिदहातिवेदः ॥
सनः पर्षदतिदुर्गाणिविश्वानावेव सिंधुंदुरितात्यग्निः॥नमोब्रह्मणइतिईशानकुंडेमूर्तिपा
न्॰जुहुयुः ॥ ॐनमोब्रह्मणेनमोअस्त्वग्नयेनमःपृथिव्यैनमओषधीभ्यः॥ नमोवाचेनमो
वाचस्पतयेनमोविष्णवेमहतेकरोमि॥ सहस्रांतेशतांतेवापूर्णाहुतिं जुहुयात्॥तद्यथा–आ
ज्येनस्रुचमापूर्य्यपुष्करोपरि अधोमुखंस्रुवंकृत्वातदग्रेपुष्करंदत्त्वा वामदक्षिणहस्ता
भ्यांसंहताभ्यांशंखवत् संलग्नौ तावुभौ समादायसमपादः समुत्थायोर्ध्वकायो ना
भ्यातिर्य्यग्विधायस्रुवाग्रेदत्तदृष्टिर्मूर्द्धानंदिव इतिमंत्रमुच्चार्य्य वामस्तनांतंस्रुङ्मूलमा

नीयात्नुद्विग्नोयवप्रमाणधारयासमस्तमाज्यंवह्निंप्रापयेत् ॥ प्रांचंयथाभवतितथापूर्णाहु
तिंदद्यात् ॥ आहुतेःसंपातंशांतिकलशेकुंडसमीपस्थेचनयेदिति ॥ ॐमूर्द्धानंन्दिवोऽअर
तिम्पृथिव्यावैश्वानुरमृतऽआजातमुग्निम्॥ कुविथ्ठंसम्म्राजमतिथिञ्जनानामासन्नापात्र
ञ्जनयन्तदेवाः ॥३३॥३८॥ ततोऽष्टसुपूर्वादिकुंडेष्वष्टानांमूर्तीनांमूर्त्तिपानांलोकपालानां
चैकैकं तत्तन्मंत्रेणविन्यस्याभ्यर्च्य ताभ्योदेवताभ्यः प्रतिदैवतमष्टसहस्रमष्टशतंवाख
दिरपालाशोदुंबरप्लक्षवटापामार्गाश्वत्थशमीसमिद्भिर्घृतेनतिलैर्वा मूर्तिमूर्तिपानां होमं
कुर्युः॥ सहस्रांतेशतांतेवापूर्ववत्पूर्णाहुतिंदद्युः॥तेषांमंत्राः—स्योनापृथिवीति पृथिवीमूर्त्तेः
अघोरेभ्यइतिपृथिवीमूर्तिपतेः शर्वस्य ॥ ॐस्योनापृथिविनोभवानृक्षुरानिवेशनी ॥ य
च्छानुःशर्म्मसुप्रथाः ॥ ३६ ॥ १३॥ ॐअघोरेभ्योऽथघोरेभ्योघोरघोरतरेभ्यः॥ सर्वेभ्य
स्सर्वशर्वेभ्योनमस्तेऽ अस्तुरुद्ररूपेभ्यः ॥ महा २ इन्द्रइतिइन्द्रमूर्तेः ॥ ॐमहा२

इन्द्रोयऽ ओजंसापुर्ज्जन्न्योवृष्टिमा ँ२ ऽइंव ॥ स्तोमैर्वत्सस्यंवावृधे ॥ उपयामगृंहीतो
सिमहेन्द्रायंत्त्वैषपतेयोनिम्मर्हेन्द्रायंत्वा ॥७॥४०॥ इन्द्रायाहीतीन्द्रमूर्तिपतेः॥ ॐइन्द्रा
यांहिवृत्रहन्पिबासोमंॅशतक्रतो ॥ गोमंद्भिर्ग्ग्रावंभिः सुतम् ॥ उपयामगृंहीतोसीन्द्रा
यत्वागोमंतऽ एषतेयोनिरिन्द्रांयत्वागोमंते ॥ २६ ॥ ५ ॥ अग्निन्दूतमित्यग्निमूर्तेः ॥
ॐअग्निन्दूतम्पुरोदंधेहव्यवाहमुपंब्ब्रुवे ॥ देवा ँ२ ऽआसांदयादिह ॥ २२ ॥ १७ ॥
द्रापे अंधसइत्यग्निमूर्तिपतेः पशुपतेः ॥ ॐद्रापेअंधंसस्पतेदरिंद्रंनीलंलोहित ॥ आ
सांप्रजानांमेषां पंशूनाम्माभेर्म्मारोङ्मोचंनः किंचुनाममत् ॥ १६ ॥ ४७ ॥ अग्न
आयाहीत्यग्नेः ॥ ॐअग्नुऽआयांहिवीतयेंगृणानोहव्यदांतये ॥ निहोतांसत्सिबर्हिंषि ॥
अहिरिवेतियजमानमूर्तेः ॥ ॐअहिंरिवभोगैः पर्य्यैंतिबाहुंज्यायांहेतिम्पंरिबाधंमानः॥
हस्तघ्नोविश्वांवयुनांनिविद्वान्पुमान्पुमांसंॅ परिंपातुविश्वतंः ॥ २९ ॥ ५१ ॥

तमिन्द्रमितियजमानमूर्त्यधिपतेरुग्रस्य ॥ ॐतमिन्द्रम्पुशवः सचाश्विनोभासरस्व
ती ॥ दधानाऽ अभ्यनूषतहविषायज्ञऽइन्द्रियैः ॥ २० ॥ ६९ ॥ यमायेतियममूर्त्तेः॥ ॐ
यमाय यमसूमथर्वभ्योवतोका ७ँ सम्वत्सरायपर्य्यायिणीम्परिवत्सरायाविजातामि
दावत्सरायातीत्त्वरीमिद्वत्सरायातिष्कद्वरीम्वत्सराय विजर्ज्जरां७ँसम्वत्सरायपलि
क्क्नीमृभुभ्योजिनसन्धर्ठँसाध्येभ्यश्चर्म्मम्नम् ॥ ३० ॥ १५ ॥ उदुत्यमितिसूर्य्य
मूर्तेः ॥ ॐउदुत्यञ्जातवेदसन्देवम्वहन्तिकेतवः ॥ दृशेविश्वायसूर्य्यम् ॥३३॥३१॥
परिनोइतिसूर्यमूर्त्यधिपतेरुद्रस्य ॥ ॐपरिनोरुद्रस्यहेतिर्वृणक्तुपरित्वेषस्यदुर्म्मतिर
घायोः ॥ अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोकायतनयायमृड ॥ १६ ॥ ५० ॥ असु

१ आवोराजानमित्यनेनापिसूर्य्यमूर्त्यधिपतेरुद्रस्य ॥ आवोराजानमध्वरस्यरुद्रंहोतारंसत्ययजंरोदस्योः ॥ अग्निंपुरातनयित्नोर
चित्ताद्धिरण्यरूपमवसेकृणुध्वम् ॥

117

न्वन्तमितिनिर्ऋतिमूर्तेः ॥ ॐअसुन्वन्तमयजमानमिच्छस्तेनस्येत्यामन्विहितस्कर
स्य ॥ अन्यमस्मदिच्छसातऽ इत्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥ १२ ॥ ६२ ॥
आपोहिष्ठेतिजलमूर्तेः ॥ ॐआपोहिष्ठामयोभुवस्तानऊर्ज्जेदधातन॥ महेरणायचक्षसे
॥ १६ ॥ ५० ॥ योवः शिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ ५१ ॥ त
स्माऽअरंगमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ ५२ ॥ शिवोभ
वेतिजलमूर्त्यधिपतेर्भवस्य ॥ ॐशिवोभवप्रजाभ्योमानुषीभ्यस्त्वमंगिरः ॥ माद्या
वांपृथिवीऽअभिशोचीर्म्मान्तरिक्षम्माववनस्पतीन् ॥११॥४५॥इमम्मेइतिवरुणस्य॥ॐ
इमम्मेवरुणश्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके ॥ २१ ॥ १ ॥ वातआवात्वि
तिवायुमूर्तेः ॥ ॐवातआवातुभेषजंशंभुमयोभुनोहृदे ॥ प्रणआयूंषितारिषत् ॥
तमीशानमितिवायुमूर्त्यधिपतेरीशानस्य ॥ ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियं

श्रिन्न्वमवंसेहूमहेव्वयम् ॥ पूषानोयथावेदंसामसंद्धूधेरंक्षिताप्पायुरदं॰धःस्वस्तये
॥ २५ ॥ १८ ॥ आनोनियुद्भिरितिवायोः ॥ ॐआनोंनियुद्भिः शतिनीभिरद्धुरꣳ सं
हुस्त्रिणींभिरुपंयाहियज्ञम् ॥ वायोऽअस्मिन्त्सवंनेमादयस्वयूयम्पांतः स्वुस्तिभिः
सदांनः ॥ २७ ॥ २८ ॥ वयꣳसोमेतिसोममूर्तैः ॥ ॐ वुयꣳ सोंमव्रुतेतवुमनंस्तुनूषु
बिभ्रंतः ॥ प्रजावंन्तः सचेमहि ॥ ३ ॥ ५६ ॥ इन्द्रन्तंशुंभमितितत्पतेर्महादेवस्य ॥ ॐ
इन्द्रुन्तंशुंम्भपुरुहन्मुन्नवंसेयस्यंद्धिताविंधुर्त्तारिं ॥ हस्तांयवज्रः प्रतिंधायिदर्शुतोमु
होदिवेनसूर्य्यः ॥ अभित्यमितिकुबेरस्य ॥ ॐ अभित्यन्दुेवꣳ संवितारंमोण्योः कु
विक्रंतुमर्च्चामिसुत्यसंवꣳरत्नुधामुभिप्प्रियम्मुतिंकुविम् ॥ ऊर्द्ध्वायस्यामतिऽभाऽ
अदिंद्युतत्सवींमनिहिरंण्यपाणिरमिमीतसुक्रतुः कृपास्वंः ॥ प्प्रुजाभ्यंस्त्वाप्रुजा
स्त्वांनुप्प्राणंन्तुप्प्रुजास्त्वमंनुप्प्राणिंहि ॥ ४ ॥ २५ ॥ आदित्प्रत्नस्येतिखमूर्त्तैः॥ॐआ

दित्प्रत्नस्युरेतंसोज्योतिंषपश्यन्तिवासुरम् ॥ पुरोयद्दिध्यतेंदिवा ॥ मृगोनभीमइति
तत्पतेभींममूर्तेः ॥ ॐ मृगोनभीमः कुंचुरोगिरिष्ठाः पंरावतआजंगन्थापरंस्याः ॥ सृ
कथ्यंसुथ्यंशायंपुविमिंन्द्रतिग्मंविशत्रून्ताड्दिविमृधोंनुदस्व॥ अभित्वादेवेतीशानमूर्तेः॥
ॐअभित्वांदेवसवितरीशांनंवार्य्याणाम्॥सदांवन्भागमींमहे ॥ ततोऽष्टसहस्राष्टशताष्टा
न्यतमसंख्ययामहाब्याहृतिभिस्तिलयवव्रीहिचर्वाज्यैःक्रमेणप्रत्येकंजुहुयुः ॥ अथाचा
र्य्यः स्थाप्यदेवतालिंगकेनमंत्रेण सहस्रसंख्याकमष्टोत्तरशतसंख्याकंवाघृतेनतिलै
र्वाहोमंविधायपूर्णाहुतिंदत्त्वादेवस्यदक्षिणेकरेहोमंनिवेद्यपूर्वकुंडेघृतस्याष्टाहुतीर्मूलमंत्रे
णहुत्वादेवस्यपादौस्पृशेत् ॥ मूलमंत्रेणपूर्वोक्तसंख्ययायाम्यकुंडेहस्तेनदधिहुत्वा
देवस्यनाभिंस्पृशेत् ॥ वारुणकुंडेक्षीरंहुत्वादेवस्यहृदयंस्पृशेत् ॥ सौम्यकुंडेमधुनाष्टा
हुतीर्हुत्वादेवस्यमूर्द्धानंस्पृशेत् ॥ वरुणकुंडेघृतादिचतुष्टयंमेलयित्वातेनैवद्रव्यजातेनपू ॥२२६॥

र्णाहुतिंहुत्वादेवस्यसर्वांगंस्पृशेत् ॥ एवंप्रतिमायांन्यासादिकंकृत्वाऽन्यत्प्रतिमाजात कूर्म्मशिलाब्रह्मशिलापिंडिकावाहनानिवानीय परिचारकदेवांश्च तत्तन्मंत्रेणावाह्यसं पूज्यपरिवारदेवांश्चप्रतिमाया वामपार्श्वेंएतानिसर्वाण्याधिवासयेत् ॥ परिवारदेवता यथा—विष्णोः चंडप्रचंडादिः । महादेवस्यतुनंदिमहाकालगणेशभृंगिचंडमातृवृषस्कं दादयः । सूर्य्यस्यदण्डिपिंगलादयः । तानिप्रतिमादीनिमधुघृतेनाभ्यज्यशुद्धवारिणाप्र क्षाल्य स्नानशेषवारिणाउक्तेनकुंभविधानेनप्रतिमावत्स्नपयित्वागंधपुष्पाद्यैः पूज यित्वा वस्त्रेणाच्छाद्य प्रधानप्रतिमापिण्डिकायाः स्वस्वमंत्राभ्यांन्यासंकुर्यात् ॥ तत्र विष्णुश्चेत्स्थाप्यस्तदा ॐघंटंपंचंभंफंलक्ष्म्यैनमः एतानिपंचाक्षराणि हृच्छिरः शिखाकवचनेत्रसंज्ञकानि हुँफडंतो वा वचनसमुदायइति महतीपिंडिकायां पंचां गानिन्यस्यतत्त्वत्रयमूर्तिंमूर्तिपांश्चपूर्ववद्विन्यसेत्॥तताऽऽभ्यां मंत्राभ्यामधिवासयेत् ॥

ॐ ह्रांह्रींश्रींह्रांक्षः ॥ परब्रह्मणेसर्वाधारायनमः ॐ ह्रींश्रींह्रां दिव्यतेजोधारिणि सुभगेनमइतिमंत्रद्वयम् ॥ इत्यधिवासनम् ॥ अथप्रासादोपिनूतनश्चेत्तस्याप्यस्मि न्नेवावसरेऽधिवासनंक्रियते ॥ तद्यथा–पंचगव्याद्यानीयप्रासादाग्रेएकाशीतिपदमक्ष तैःकृत्वा तेषुपदेषुसप्तधान्यपुंजान्कृत्वा उपरिवारिपूर्णानेकाशीतिकलशानाहृत्य तत्रतत्रनवनवकान्मध्येमध्यमंकोष्ठंज्ञात्वा तेषुनवकलशान्मध्यपूर्वादिक्रमेणाजिघ्रे तिमंत्रेणविन्यसेत् ॥ ॐ आजिघ्रकलशम्मह्यात्वाविशन्त्विन्दवः ॥ पुनरूर्ज्जानिवर्त स्वसानः सहस्रंन्धुक्ष्वोरुधारापयस्वती: पुनर्म्माविशताद्रयिः ॥ ८ ॥ ४२ ॥ त त्रसर्वमध्यमकुंभेसोमायवनस्पतयेइतिमंत्रेणशम्युदुंबराश्वत्थचंपकाशोकपलाशप्लक्ष न्यग्रोधकदंबाम्रबिल्वार्जुनतरुसंभवानिपल्लवानि निक्षिपेत् ॥ ॐअग्नयेगृहपतयेस्वा हासोमायवनस्पतयेस्वाहा मरुतामोजसेस्वाहेन्द्रस्येन्द्रियायस्वाहा पृथिविमातर्म्मा

मांहिरण्मयीं सुवर्णरजतस्रजाम् ॥ १० ॥ २३ ॥ तदनंतरं मध्यनवकुंभेषु पूर्वकुंभे पद्मकरोचना दूर्वांकुरदर्भपिंजुलश्वेतपीतसर्षपसितसुचंदनजातीकुसुमकुंदमघावर्तदशकं विनिक्षिपेत् ॥ ततो यवव्रीहितिलसुवर्णरजतसमुद्रगामिनदीकूलमृत्तिकाभूम्यसंस्पृष्टगोमय मितिसप्तकमाग्नेयकुंभे ॥ ३ ॥ सहदेवीविष्णुक्रांताभृंगराजमहौषधीशमीशतावरी गुडूचीश्यामाकमित्यष्टकंयाम्यकुंभे ॥ ४ ॥ कदलीफलपूगीफलनालिकेरबिल्वनारिंगमातुलिंगबदरामलकमितिफलाष्टकंनैर्ऋत्यकुंभे ॥ ५ ॥ मंत्रसाधितंपंचगव्यं वारुणकुंभे ॥ ६ ॥ शम्युदुंबराश्वत्थन्यग्रोधपलाशादिकषायपंचकंवायव्यकुंभे ॥ ७ ॥ शंखपुष्पीसहदेवीबलाशतावरीकुमारीगुडूचीवचाव्याघ्रीतिमूलाष्टकमुत्तरकुंभे ॥ ८ ॥ वल्मीकादिसप्तमृत्तिकाईशानकुंभेनिक्षिप्य हिरण्यवर्णांहरिणीमितिमंत्रेणमध्यनवकुंभानभिमंत्रयेत् ॥ ॐ हिरण्यवर्णांहरिणींसुवर्णरजतस्रजाम् ॥ चन्द्रांहिरण्मयींलक्ष्मीञ्जा

तवेदोममावह ॥ शेषकुंभान्गंधोदकपूरितान्मध्यमादिकलशानांसमंतात्पूर्वादिक्र
मेणाष्टावष्टौविन्यस्यमूलमंत्रेणाभिमंत्र्यरक्तसूत्रेणावेष्ट्यांतर्बहिरधस्तादूर्ध्वंचप्रासादंपं
चगव्येनसंप्रोक्ष्य मूर्द्धानन्दिवइतिवल्मीकमृदाविलिंपयेत् ॥ ॐमूर्द्धानंन्दिवोऽअर
तिम्पृथिव्यावैश्वानरमृतऽ आजातमग्निम् ॥ कविᳬसम्म्राजमतिथिञ्जनानामासन्ना
पात्रञ्जनयन्तदेवाः ॥ ३३ ॥ ८ ॥ ततः समुद्रादूर्मिरितिमंत्रेण समुद्रज्येष्ठाइतिमंत्रेणवा
ईशानदिक्स्थेनमृत्तिकाकुंभेनप्रासादंसशिखरंस्नपयेत् ॥ ॐ समुद्रादूर्म्मिर्म्मधुमा
२ ँ ऽउदारदुपाᳬशुनासमंमृतत्वमानट् ॥ घृतस्यनामगुह्यंयदस्तिजिह्वादेवाना
ममृतंस्यनाभिः ॥ १७ ॥ ८९ ॥ यज्ञायज्ञावेतिवायव्यस्थेनपंचकषायकुंभेन ॐयज्ञायं
ज्ञावोऽअग्नयेगिरागिराचदक्षसे ॥ प्रप्रंवयममृतञ्जातवेदसम्प्रियम्मित्रन्नशᳬसिष
म ॥ २७ ॥ ४२ ॥ पयःपृथिव्यामिति वारुणेनपंचगव्यकुंभेन ॐ पयः पृथिव्यां

पयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः ॥ पयस्वतीः प्प्रदिशः सन्तुमह्यम् ॥ १८ ॥
॥ ३६ ॥ याः फलिनीरितिनैर्ऋतेनफलकुंभेन ॐ याः फलिनीर्य्याऽअफलाऽअपु
ष्पायाश्चपुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुंचंत्वꣳ हꣳसः ॥ १२ ॥ ९९ ॥ हꣳ
सः शुचिषदितिसौम्यस्थमूलाष्टककुंभेन ॐ हꣳ सः शुचिषद्वसुरन्तरिक्षसद्धोतावे
दिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऽ ऋतजाऽअद्रिजाऽऋत
म्बृहत् ॥ १० ॥ २४ ॥ विष्णोरराटमितिपूर्वेणकुंभेन ॐ विष्णोरराटमसिविष्णोः
श्नप्त्रेस्थोविष्णोः स्यूरसिविष्णोर्ध्रुवोसिवैष्णवमसिविष्णवेत्वा ॥ ५ ॥ २१ ॥
सोमꣳराजानमित्याग्नेयकुंभेन ॐ सोमꣳ राजानमवसेग्निमन्वारभामहे ॥ आ
दित्यान्विष्णुꣳ सूर्य्यम्ब्रह्माणञ्चबृहस्पतिꣳस्वाहा ॥ ९ ॥ २६ ॥ विश्वतश्चक्षुरितिया
म्यदिक्स्थेनकुंभेन ॐविश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पा

त् ॥ सम्बाहुभ्यान्धमतिसम्पतत्रैर्द्यावाभूमीजनयन्देवऽएकः ॥ १७ ॥ १८ ॥ नमोऽस्तुसर्प्पेभ्यइतिमध्यमकुंभेन ॐनमोऽस्तुसर्प्पेभ्योयेकेचपृथिवीमनु ॥ येऽअन्तरिक्षेयेदिवितेभ्यः सर्प्पेभ्योनमः ॥ १२ ॥ ६ ॥ इदमापः प्रवहतेत्यष्टाभिः पूर्वादिक्रमेणप्रासादंसशिखरंस्नापयेत् ॥ ॐइदमापः प्रवहतावद्यञ्चमलञ्चयत् ॥ यच्चाभिदुद्रोहानृतंयच्चशेपेऽअभीरुणम् ॥ आपोमातस्म्मादेनसः ॥ पवमानश्च मुञ्चतु ॥ ६ ॥ ॥ १७ ॥ अथैकाशीतिकलशानामभावेगन्धोदकपूरितेनैकैककलशेनदैव्यायकर्म्मणेशुन्धध्वमितिसम्प्रोक्ष्य सूत्रेणावेष्ट्य स्नापयित्वा देवरूपंप्रासादंचिंतयित्वा तद्यथा—पादौपादशिलास्तस्यजंघापादोर्ध्वमुच्यते ॥ गर्भश्चैवोदरंज्ञेयंकटिश्चकटिमेखला ॥ १ ॥ स्तंभास्तुबाहवोज्ञेया घंटाजिह्वाप्रकीर्तिता ॥ दीपःप्राणोऽस्यविज्ञेयस्त्वपानंजलनिर्ग

---

१ दैव्यायकर्म्मणेशुन्धध्वन्देवयज्यायैयद्वोशुद्धाःपराजघ्नुरिदम्वस्तच्छुन्धामि ॥ १ । १३ ॥

मः ॥ २ ॥ ब्रह्मस्थानंतुयत्तस्यतन्नाभिः परिकीर्तिता ॥ हृत्पद्मंपिंडिकाप्रोक्ताप्रतिमा
जीवं[1]उच्यते ॥ ३ ॥ पादचारस्त्वहंकारोज्योतिस्तच्चक्षुरुच्यते ॥ तदूर्ध्वंप्रकृतिस्त
स्यप्रतिमापुरुषः स्मृतः ॥ ४ ॥ तलकुंभास्तथाद्वारंतस्यप्रजननंस्मृतम् ॥ शुकनासा
भवेन्नालागवाक्षः कर्णउच्यते ॥ ५ ॥ कपोतपालिः स्कन्धोस्यग्रीवाचामलसा
रकः ॥ कलशस्तुशिरोज्ञेयंमज्जाक्षिप्तरसंस्मृतम् ॥ ६ ॥ मेदश्चैवसुधांविद्यात्प्रलेपो
मांसउच्यते ॥ अस्थीनितुशिलास्तस्यस्नायुः कीलादयः स्मृताः ॥ ७ ॥ चक्षु
षीशिखराण्यस्यध्वजाः केशाः प्रकीर्तिताः ॥ एवंपुरुषरूपंतंध्यात्वाचमनसासुधीः
॥ ८ ॥ प्रासादंपूजयेत्पश्चाद्गंधध्वजादिभिःशुभैः ॥ सूत्रेणवेष्टयेद्देवंवाससतत्परिक
ल्पयेत् ॥ प्रासादमेवमभ्यर्च्यवाहनंचाग्रमंडपः ॥ ९ ॥ सर्वदेवमयंवास्तुपुरुषंसर्वा

[1] पुरुषः ।

 धारंतस्याधस्तादेवंसंचिंत्यसंपूज्यवक्ष्यमाणमंत्रेणप्रासादमधिवासयेत् ॥ तद्यथा—ॐ
॥२३०॥ ह्रींसर्वदेवमयाचिंत्यसर्वरत्नोज्ज्वलाकृते ॥ यावच्चंद्रश्चसूर्यश्चतावदत्रस्थिरोभव ॥ इ
त्यधिवास्यपिण्डिकावाहनपरिवारदेवतानां तत्तन्मंत्रैः प्रत्येकमष्टाविंशतिसंख्याकं
होमंतिलैःकृत्त्वा मूलमंत्रेणचरुणाष्टोत्तरशतंहुत्वा गंगायमुनागोदावरीसरस्वत्या
ख्याश्चतस्रोधेनवोमंडपस्यदक्षिणद्वारेउदङ्मुखीः स्थापयित्वासंपूज्य नारायणाय
विद्महेवासुदेवायधीमहि ॥ तन्नोविष्णुः प्रचोदयादिति विष्णुगायत्र्यादुग्ध्वा तत्क्षीरे
ण तत्पुरुषायविद्महेमहादेवायधीमहि ॥ तन्नोरुद्रःप्रचोदयादिति रुद्रगायत्र्याचरुं
श्रपयित्वा तथैवदेवायनिवेद्यमंडपस्योत्तरभागेद्वादशब्राह्मणान्विष्णुभक्तांश्च भोजयि
त्वा विष्णुर्मेप्रीयतामितिवदेत् ॥ अथाचार्यायधेनुंदद्यात् ॥ ततऋत्विगादिभ्यश्चतुरंगु ॥२३०॥
लीयकादिदक्षिणांदत्त्वारात्रौजागरणंगीतवादित्रादिनानानोत्साहेनकुर्यात् ॥ इतिप्रा

सादाधिवासनम् ॥ अत्र ज्येष्ठमध्यमकनिष्ठानांसप्तरात्रंपंचरात्रंत्रिरात्रमेकरात्रंसद्यो वाबल्यंतमधिवासनंकुर्यात्॥ अत्रश्लोकाः॥अनेकाहान्निनिर्वर्त्यं अधिवासनकर्मच॥हो मानष्टौसहस्राणिविदधीरन्पृथक्पृथक्॥ तस्मिन्नेकाहंनिर्वर्त्यकुर्यादष्टोत्तरंशतम्॥प्राग्व त्पूर्णाहुतिंदद्यात्सकृज्जपंतिद्वारयोः॥ यद्वाप्रतिदिनंकर्महोममष्टोत्तरं शतम् ॥ देशिको मूर्तिपैःकुर्याद्यावत्कार्यंसमाप्यते ॥ संध्यासुतिसृषुदेयोबलिर्मंत्रैर्यथोदितैः ॥ आचा र्यंदक्षिणादेयाऋत्विग्भ्यश्चस्वशक्तितः ॥ भोजनंचतथान्येभ्योदेयंवित्तानुसारतः ॥ वि नाधिवासनंयज्ञः कृतोऽपिनफलप्रदः ॥ इतिसर्वदेवप्रासादाधिवासनविधिः ॥ अथाधिवा सनानंतरं प्रातराचार्यः स्नात्वा नैत्यकंकर्मनिर्वर्त्ययागमंडपमेत्यमूर्तिपान्वितोद्वार स्थान्देवान्पूर्ववत्संपूज्य पश्चिमद्वारेणमंडपंप्रविश्य वास्तुमंडलस्थान्देवान्सामा न्यतःसंपूज्यकुण्डे वास्तोष्पतेइतिमंत्रेणाष्टोत्तरशतहवनंकुर्यात् ॥ ॐ वास्तोष्पतेप्रति

प्र. सं. जानीह्यस्मान्स्वावेशोऽअनमीवोभवानः ॥ यत्त्वेमहेप्रतितन्नोजुषस्वशन्नोभवाद्विपदेशं प्र. दि
॥२३१॥ चतुष्पदे ॥ अथदेवमंत्रेणमूलमंत्रेणमूर्तिपतिलोकपालमंत्रैश्चप्रतिदैवमष्टशतंहुत्वापूर्णा
हुत्यंतंकर्म्मकृत्वादिग्बलिंदत्त्वा देवसमीपमागत्ययथासंभवंसुवर्णादिकंदत्त्वा देवाय
चात्मानंनिवेद्यप्रणमेत् ॥ यत्रतुस्वयंभूर्देवःप्रागेवाप्रतिष्ठितःप्रासादश्च नूतनस्तत्रापि
तदुत्तरभागे मंडपंकृत्वापूर्वेद्युःपुण्याहवाचननांदीश्राद्धादिमंडपस्थापनपूजनादिऋत्वि
ग्वरणादिकंकुर्यात् ॥ तत्राचार्योमंडपेसर्वतोभद्रादि तत्तद्देवतामंडलंकृत्वावास्तुदे
वतापूजनाग्निप्रतिष्ठाग्रहपूजनाज्यभागोत्तरग्रहहोमशिख्यादिवास्तुपीठदेवताहोमैका
शीतिकलशस्थापनादिकृत्वा तैः प्रासादं पूर्वोक्तप्रकारेण स्नापयित्वायजमानमभि
षिच्यप्रासादमुत्सृजेदित्येतावानेवविधिः ॥ प्रकृतमनुसरामः ॥ मंडपादुत्तरतः पूर्वक ॥२३
ल्पितैःशांतिकलशादिजलैः सपरिकरंयजमानमभिषिंचेयुः ॥ तत आचार्य्यमूर्तिपब्राह्म

णस्थपतित्वादीन्परितोष्य प्रासादोत्सर्गंकुर्यात् ॥ तद्यथा—मासपक्षाद्युल्लिख्यइमंशिले ष्टकादार्वादिनिर्मितं वलभीजगतीप्राकारपरिवारगोपुरपरिवारदेवतादेवतालयसंयुतं तद्देवतालोककामः कुलद्वयानुग्रहायामुकदेवताप्रीतयेऽहमुत्सृजामीति कुशयवजला निक्षिप्त्वादेवंनत्वाब्राह्मणान्भोजयेत् इति ॥ अथाचार्यौमूर्तिधरैः सार्द्धम् अधिवासितां देवताधारभूतांकूर्मशिलांब्रह्मशिलांपिण्डिकांच त्रातारमितिमंत्रेण गृहीत्वा शांतिघोषेण प्रदक्षिणंप्रासादमानीय अस्त्रायफडिति अस्त्रमंत्रेणशततोयेनच विघ्नोत्सारणार्थंच पुष्पोदकधारणया प्रदक्षिणंप्रासादगर्भमभ्युक्ष्य दर्भैर्महा २ इन्द्रोवज्रेतिसमुल्लिखेत ॥ ॐमहा २ ऽइन्द्रोवज्रहस्तः षोडशीशर्म्मयच्छतु ॥ हन्तुपाप्मानंय्योस्मान्द्वेष्टिउपयाममगृहीतोसिमहेन्द्रायत्वैषतेयोनिर्म्महेन्द्रायत्वा ॥२६॥१०॥ ततोऽस्त्रायफडितिमंत्रप्र

१ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम् । ह्वयामि शक्रम्पुरुहूतमिन्द्रꣳ स्वस्तिनोमघवाधात्विन्द्रः ॥२०।५०।

प्र. सं. तेनवारिणासर्वतः प्रासादंसंप्रोक्ष्य द्वारमध्यंचोक्तसूत्रसंपातेनसंसाध्ययवेनयवार्द्धेनवा पि. प्र.
॥२३२॥ ईशानीमुत्तरां वा दिशमाश्रित्य स्नातांप्रणवेन कूर्म्मशिलांपंचरत्नोपरिनिधायतच्छ्वभ्रे
सौवर्णकूर्म्मंद्वारसंमुखमुपधाय तदुपरिरत्नानिविन्यस्य षट्त्रिंशद्भर्तयुतांपंचचत्वारिं
शद्गर्तयुतांवाब्रह्मशिलामधिवासितांनिदध्यात् ॥ ॐनमोव्यापिनिस्थिरेऽचलेध्रुवे ॐ
श्रीलंस्वाहेतिमंत्रेणगंधादिना यथाशक्तिसंपूज्य प्रार्थयेत् ॥ त्वमेवपरमाशक्तिस्त्वमे
वासनधारिका ॥ शिवाज्ञयात्वयादेविस्थातव्यमिहसर्वदा ॥ ततःस्थैर्यंसर्वगतंस्मरन्त्स
कलाध्वानंतद्रूपंचिंतयेत् ॥ ॐ तत्त्वात्मनेनमः पादाध्वनेनमः वर्णाध्वनेनमः मं
त्राध्वनेनमः भुवनाध्वनेनमः कलाध्वनेनमः ॥ ततः पुण्याहवाचनंकृत्वामूलमंत्रेणाष्टो
त्तरशतंहुत्वा षट्त्रिंशत्सुपंचचत्वारिंशत्सुवा ब्रह्मशिलागर्तेषु प्रागादिषुबाह्यावरणात्स- ॥२३
सुवर्णेनदक्षिणहस्तेनरत्नन्यासं वक्ष्यमाणमंत्रैः कुर्यात् ॥ अथार्चास्थापनेश्वभ्रेरहि

तेब्रह्मशिलोपरिभागेसश्वभ्रांपिंडिकांपूर्वपश्चिमाभिमुखेप्रासादेसौम्यप्रणालींदक्षिणोत्त
राननेपूर्वप्रणालींपिंडिकांध्रुवसूक्तेननिधाय देवपत्नीलिंगकमंत्रैः पिण्डिकामभिमं
त्रयेत् ॥ ततस्तत्रैवयस्यदेवस्ययस्यांदिशिआयतनंतत्रावाहनपूजनेविदध्यात् ॥
तद्यथा-इंद्रांबिकाविष्णूनामैन्द्र्याम् अग्नेराग्नेय्यां भूतानांमातृगणानामंतकस्यचयाम्या
म् भद्रकालीपितृनिर्ऋतीनांनैर्ऋत्यां वरुणोदधिसरितांप्रतीच्यां वायुदुर्गाफणींद्रग
जास्यानांमारुत्यां यक्षोमास्कंदानांसौम्यां ब्रह्मणोदक्षिणस्यां शिवस्यैशान्यां द्वा
रस्यदक्षिणवामेक्रमाद्धैश्रवणश्रियोः तत्रविष्णुश्चेत्स्थाप्यस्तदा श्रीश्चते श्रीरसि श्री
निधनं श्रीपत्यादीन्मंत्रान्पठेत् ॥ यदारुद्रस्तदा आपोहिष्ठा गौरीर्मिमाय जा
तवेदसेइत्यादीन् ॥ ब्रह्माचेत्स्थाप्यस्तदागायत्र्यादीन् ॥ सूर्यश्चेत्स्थाप्यस्तदा उप
स्तच्चित्रंप्रत्युअदर्शीत्यादीन्मंत्रानुच्चारयेत् ॥ तद्यथा-ॐश्रीश्चतेलक्ष्मीश्चपत्न्यांव

१ पूर्वपश्चिमाननेइत्यपिपाठः ।

प्र. सं. होरात्रेपार्श्वैनक्षत्राणिरूपमुश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मंइषाणसर्वंलोकम्मंऽइ पिं. प्र
॥२३३॥ षाण ॥ ३१ ॥ २२ ॥ ॐ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन ॥ महेरणायचक्षसे ॥ ११ ॥ ५० ॥ भूर्भुवःस्वः तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ ३० ॥ २ ॥ उषस्तच्चित्रमाभरास्म्मभ्यंव्वाजिनीवति ॥ येनतोकञ्चतनयञ्चधामहे ॥ ३४ ॥ ३३ ॥ ततस्तत्त्वन्यासंकुर्यात् ॥ तद्यथा—आत्मतत्त्वायनमः आत्मतत्त्वाधिपतये क्रियाशक्त्यैनमः विद्यातत्त्वायनमः विद्यातत्त्वाधिपतये ज्ञानशक्त्यैनमः शिवतत्त्वायनमः शिवतत्त्वाधिपतये इच्छाशक्त्यैनमः प्रतितत्त्वंमूर्तिंपलोकपालान्विन्यसेत् ॥ अथआधारशक्त्यैनमइतिपिंडिकायांन्यासंकृत्वा ततोऽनंतासनादिवह्नितत्त्वांतांपीठपूजांनिर्वर्त्य आनंदशक्तीर्नवप्रागादिमध्यांता नाममंत्रैर्विन्यस्याभ्यर्च्यतदुपरिपिंडिकां शक्तिरूपिणींसर्वाभरणभूषितांदेवसंयोगगामिनींमनसाध्यात्वा ॥२३३॥

देवभार्यालिंगकेनविन्यस्यदेवींप्रार्थयेत् ॥ सर्वदेवमयेशानित्रैलोक्याह्लादकारिणि ॥
त्वांप्रतिष्ठापयाम्यत्रमंदिरेविश्वनिर्मिते ॥ १ ॥ यावच्चंद्रश्चसूर्यश्चयावद्देववसुंधरा ॥
तावत्त्वंदेविदेवेशिमंदिरेऽस्मिन्स्थिराभव ॥ २ ॥ पुत्रानायुष्मतोलक्ष्मीमबला
मजरांनृणाम् ॥ अभयंसर्वभूतेभ्यः कर्तुंनित्यंविधेहिभोः ॥ ३ ॥ विजयंभूपतेः सर्वलो
कानांक्षेममेवच ॥ सुभिक्षंसर्वकालीनंकुरुदेविनमोनमः इतितांप्रार्थ्यतस्यांमातृकान्या
संकुर्यात् ॥ तद्यथा–प्रणवं श्रभ्रेतद्बाह्येषोडशस्वरान् तेषांपरितोव्यंजनानि ॥ अथपिं
डिकाश्वभ्रेषुरक्षादिन्यासंपूर्वादिमध्यांतंसव्यक्रमेणकुर्यात् ॥ तद्यथा--बाह्यपरिधौयव
व्रीहिनिष्पावप्रियंगुतिलमाषनीवारशालिसिद्धार्थकान् ॥ १ ॥ वज्रमौक्तिकवैडूर्यशंख
स्फटिकपुष्परागचंद्रकांतेन्द्रनीलपद्मरागान् ॥ २ ॥ मनःशिलाहरितालांजनश्या
मांजनकोशीरसौराष्ट्रीरोचनगैरिकपारदान् ॥ ३ ॥ हिरण्यरजतताम्रायसत्र

१ कांवळणी । २ सोनामाणि गंधक ।

प्र. सं. पुसीसककांस्यारकूटतीक्ष्णलोहानि ॥ ४ ॥ एतन्नवकचतुष्टयस्यासंभवेशालिशु पिं. प्र.
॥२३४॥ क्तिहरितालसुवर्णानिन्यासविधौप्रतिद्रव्यंयोज्यानीतिनारदोक्तम् ॥ अथमत्स्यपुरा
णोक्तरत्नादिन्यासंकुर्यात् ॥ बाह्यपरिधिमवधिंकृत्वाऽभ्यंतरतोऽभ्यंतरतः प्रत्येकं प्रा
गादीशानांतम् ॥ तद्यथा--वज्रमौक्तिकवैडूर्य्यशंखस्फटिकपुष्परागेन्द्रनीलमहानीलान्
॥ १ ॥ हरितालमनःशिलाऽभ्रकनीलांजनसौराष्ट्रिकासीसस्वर्णमाक्षिकगैरिकान् ॥
॥ २ ॥ गोधूमयवतिलमुद्गनीवारश्यामाकसर्षपव्रीहीन् ॥ ३ ॥ सुवर्णरजतताम्रत्र
पुसीसकलोहरीतिकान् ॥ ४ ॥ श्वेतचंदनरक्तचंदनागुरुकार्ज्जुनोशीरवैष्णवीस
हदेवीलक्ष्मणाचेति ॥ ५ ॥ रत्नानामभावेवज्रः धातूनामभावेहरितालम् लोहानाम
भावेसुवर्णं बीजानामभावेयवान् ओषधीनामभावेसहदेवी ॥ एतैर्मंत्रैः--इन्द्रस्तुसहसा ॥२३४॥
दीप्तः सर्वदेवाधिपोमहान् ॥ वज्रहस्तोमहासत्त्वस्तस्मैनित्यंनमोनमः ॥ १ ॥ आग्ने

यः पुरुषोरक्तः सर्वदेवमयोव्ययः ॥ धूमकेतूरजोध्यक्षस्तस्मैनित्यंनमोनमः ॥ २ ॥
यमश्चोत्पलवर्णाभः किरीटीदंडधृक्सदा ॥ लोकसाक्षीविशुद्धात्मातस्मैनि० ॥३॥ नै
ऋतस्तुपुमान्कृष्णःसर्वरक्षोधिपोमहान् ॥ खड्गहस्तोमहासत्त्वस्तस्मैनि० ॥ ४ ॥ वरु
णः सर्वलोकेषुपुरुषोनिम्नगाधिपः ॥ पाशहस्तोमहाबाहुस्तस्मैनि० ॥ ५ ॥ वायुश्चस
र्ववर्णोयंसर्वगंधवहःशुभः ॥ पुरुषोध्वजहस्तश्चतस्मैनि० ॥ ६ ॥ गौरोयस्तुपुमान्सौ
म्यः सर्वौषधिसमन्वितः ॥ नक्षत्राणांपतिःसोमस्तस्मैनित्यं० ॥ ७ ॥ ईशानः पुरुषः
शुक्लःसर्वदेवाधिपोमहान् ॥ शूलहस्तोविरूपाक्षस्तस्मैनि० ॥ ८ ॥ पद्मपाणिश्चतुर्मूर्तिर्वे
दाभ्यासीपितामहः ॥ यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मैनि० ॥ ९ ॥ योसावनंतरूपेणब्रह्मां
डंसचराचरम् ॥ पुष्पवद्धारयेन्मूर्ध्नितस्मैनित्यंनमोनमः॥१०॥एवंन्यस्तानांरत्नादीनांव

क्ष्यमाणदिक्पालमंत्रैर्नवभिरष्टाभिर्वाआलंभनपूर्वादिक्रमेणकुर्यात् ॥ तद्यथा–ॐत्राता

म. सं रमिन्द्रंमवितारमिन्द्रꣳ हवेहवेसुहवꣳशूरमिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳस्व पिं. प्र.
॥२३५॥ स्तिनोमघवाधात्विन्द्रः ॥ २० ॥ ५० ॥ इतीन्द्रम् ॥ अग्निन्दूतमित्यग्निम् ॐअग्निन्दू
तम्पुरोदधेहव्यवाहमुपब्रुवे ॥ देवाँ २॥ऽआसादयादिह ॥ २२ ॥ १७ ॥ यमायत्वे
तियमम् ॐयमायत्वामखायत्वासूर्य्यस्यत्वातपसे ॥ देवस्त्वासवितामध्वानक्तुपृथि
व्याःसꣳस्पृशस्पाहि ॥ अर्चिरसिशोचिरसितपोसि ॥ ३१ ॥ ११ ॥ एषतेनि
र्ऋतइतिनिर्ऋतिम् ॥ ॐ एषतेनिर्ऋतेभागस्तंजुषस्वस्वाहाग्निनेत्रेभ्योदेवेभ्यःपुरःस
द्भ्यः स्वाहा यमनेत्रेभ्योदेवेभ्योदक्षिणासद्भ्यः स्वाहाविश्वदेवनेत्रेभ्योदेवेभ्यःप
श्चात्सद्भ्यः स्वाहामित्रावरुणनेत्रेभ्योवामरुन्नेत्रेभ्योवादेवेभ्यऽउत्तरासद्भ्यः स्वा
हासोमनेत्रेभ्योदेवेभ्यऽउपरिसद्भ्योदुवस्वद्भ्यः स्वाहा ॥ ९ ॥ ३५ ॥ पंचनद्यइति ॥२३६॥
वरुणम् ॐ पञ्चनद्यः सरस्वतीमपियन्तिसस्रोतसः ॥ सरस्वतीतुपंचधासोदेशेभवत्स

रित् ॥ ३४ ॥ ११ ॥ तववायेतिवायुम् ॐतवंवायवृतस्पतेत्वष्टुंर्ज्जामातरद्भुत ॥
अवा ᳪ स्यावृंणीमहे ॥ २७ ॥ ३४ ॥ वयर्ठ सोमेतिसोमम् ॐव्वयर्ठ सोमव्व्रतेत
वमनंस्तनूषुबिभ्र्रतः ॥ प्रजावन्तः सचेमहि ॥ ३ ॥ ५६ ॥ तमीशानमितीशानम् ॥
ॐतमीशानञ्जगतस्तस्थुषस्पतिंन्धियंञ्जिन्न्वमवंसेहूमहेव्वयम् ॥ पूषानोयथाव्वेदसा
मसंद्वृधेरंक्षितापायुरदंब्धः स्वस्तये ॥ २५ ॥ १८ ॥ ब्रह्मजज्ञानमितिब्रह्माणम् ॥
ॐ ब्रह्मंजज्ञानम्प्रंथमम्पुरस्ताद्विसीमतः सुरुचोंव्वेनऽआंवः ॥ सबुध्न्याऽउपमाऽअंस्य
विष्ठाः सतश्च्चयोनिमसंतश्च्चविवंः ॥१३॥ ३ ॥ नमोस्तुसर्पेभ्य इतिचानंतम् ॐ नमोंऽ
स्तुसर्पेभ्योयेकेचंपृथिवीमनु ॥ येअन्तरिंक्षेयेदिवितेभ्यंः सर्पेभ्योनमंः ॥१३॥६॥ एवं
रत्नादिन्यासान्कृत्वा पृथिव्यांकूर्म्मवाहनानि सौवर्णानिद्वारोन्मुखानि पारदंचत
स्मिन्मध्यश्वभ्रेनिधायगुग्गलरसेनरत्नादिकंस्थिरीकृत्यमधुपायसेनश्वभ्रमवलिप्यग्रु

 कुवस्त्रेणाच्छाद्य हुमितिकवचेनावगुंठ्यफडितिअस्त्रमंत्रेणसंरक्ष्य मनोजूतिरितिमंत्रेणप्राति
 प्रासादमभिषेचनंकुर्यात् ॥ ॐ मनोजूतिर्जुषतामाज्यस्यबृहस्पतिर्य्यज्ञमिमन्तंनो
त्वरिष्टंय्यज्ञठं· समिमंदंधातु ॥ विश्वेदेवासऽइहमादयन्तामो ३ प्रतिष्ठ ॥२॥१३॥ तत
इन्द्रस्तुसहसादीप्तइत्यादिभिर्मंत्रैः पूर्वोक्तैर्वादिक्पालमंत्रैर्लोकपालेभ्योबलिंदत्त्वाचा
मेत् ॥ एवंपिंडिकांप्रतिष्ठाप्यरत्नन्यासंकृत्वा ततः प्रासादाद्बहिः समंतात् पंचगव्येन
प्रादक्षिण्येनभुवंसंप्रोक्ष्यदर्भपिंजूलैः संमार्ज्य पूर्वाद्यष्टदिक्षुवालुकयाऽष्टौस्थंडिलानि
चतुरस्त्राणिवितस्तित्रयसंमितानिकृत्वा तेषु स्थंडिलेषुअष्टौकलशान्वारिपूर्णान्पुष्प
फलपत्रपंचपल्लवादियुतान् सूत्रवेष्टितान् ॐ पूषापञ्चाक्षरेणपञ्चुदिश ऽउदंजयुत्ता उ
ज्जेषुठं·सविताषडक्षरेणषड्ऋतूनुदंजयुत्तानुज्जेषम्मरुतः सप्ताक्षरेणसप्तग्राम्यान्पशूनुदं
जयुँस्तानुज्जेषम्बृहस्पतिरष्टाक्षरेणगायत्रीमुदंजयुत्तामुज्जेषम्मित्रोनवाक्षरेण॥९॥३२

अष्टाक्षरेणस्थंडिलानामीशानभागे विन्यस्याभिमंत्र्य स्थंडिलेषु पंचभूसंस्कृतेषु अष्टोत्तरसहस्रंतदर्द्धमष्टशतंवा देवस्यमूलमंत्रेण संस्कृतमग्निंप्रणीयपलाशसमिधामा ज्याक्तमूलाग्राणांप्रतिस्थंडिलंदेवस्यमूलमंत्रेणहुत्वा तत आज्येन ॐनारायणायवि द्महेवासुदेवायधीमहि ॥ तन्नोविष्णुःप्रचोदयादिति विष्णुगायत्र्याअष्टोत्तरशतमष्टाविं शतिरष्टौवाहुत्वा आचार्यस्ताम्रपात्रेऽष्टदिक्संस्थेभ्यःकुंभेभ्यस्तोयमुपसंहृत्य मूलमं त्रेणशतवारमभिमंत्र्यप्रतिमासमीपंगत्वासर्वतीर्थमयमिदंजलमितिध्यायन्देवमूर्ध्निक्षि पेत् ॥ हुंफडित्यंतेननारसिंहेनमंत्रेणदेवस्यदिग्बंधनंकृत्वामूर्तिंपैर्युक्तः शंखतूर्य्यादि निनादेनदेवंप्रार्थयेत् ॥ ॐप्रबुध्यस्वमहाभागदेवदेवजगत्पते ॥ मेघश्यामगदापाणेप्रबु द्धकमलेक्षण ॥ १ ॥ प्रबुद्ध्यस्वधरानंतवासुदेवनमोस्तुते इति॥ततस्तोयक्षीरकुशाग्रति लतंडुलयवसिद्धार्थकपुष्पाणिशंखेकृत्वाशंखमुद्रयादेवायार्घंदत्त्वा उत्तिष्ठब्रह्मणस्पते

इतिमंत्रेण देवमुत्थाप्य रथेतिष्ठन्नितिमंत्रेणरथमारोपयेत् ॐ उत्तिष्ठब्रह्मणस्पतेदे
वयन्तस्त्वेमहे ॥ उपप्रयंतुमरुतः सुदानवइन्द्रप्राशूर्भवासचा ॥ ३४ ॥ ५६ ॥
रथेतिष्ठन्नयतिवाजिनः पुरोयत्रयत्रकामयतेसुषारथिः ॥ अभीशूनाम्महिमानम्प
नायतमनः पश्चादनुयच्छंतिरश्मयः ॥ २९ ॥ ४३ ॥ ततोदेवस्यपुरतआचार्यः
पृष्ठतोयजमानः पुत्रकलत्रबंधुयुक्तः पार्श्वयोर्मूर्तिपास्तूर्यघोषेणस्वस्तिनइत्यादि
शांतिपाठेनमंगलघोषेणचग्रामस्यप्रदक्षिणमेत्य प्रासादादिपरिभ्रम्यप्रासादमानीयर
थादवतार्यभद्रासनेद्वारसंमुखेदेवंकृत्वा अर्घ्यंदत्त्वाप्रासादंप्रवेशयेत् ॥ द्वारेणद्वारबंधे
नद्वारदेशेनतद्विना ॥ द्वारबंधेशिखाशून्येतदूर्ध्वेनाप्यतद्युते ॥ १ ॥ वर्त्तयेद्द्वारसंस्पर्शंद्वा
रेणैवमहेश्वरम् ॥ देवंगृहसमारंभेकोणेवापिप्रवेशयेत् ॥ २ ॥ अयमेवविधिर्ज्ञेयोव्यक्त
लिंगेचसर्वथा ॥ ग्रहप्रवेशनद्वारंलोकैरपिसमीहितम् ॥ ३ ॥ अपद्वारप्रवेशेनविद्गुर्गो

त्रक्षयंतथा ॥ कर्तुश्चैवविनाशांतिमतः शांतिंसमाचरेत् ॥ ४ ॥ जीर्णादिदोषदुष्टस्या
पद्धारेणैवनिर्गतम् एतल्लिंगविषयम् ॥ अथविष्णवाद्यर्चांतदासुखंद्वारेणैव देवमतोदे
वाइतिप्रासादंप्रवेश्यपिंडिकायाः समीपे भद्रपीठेद्वारसंमुखंदेवंनिधायार्घ्यमधुपर्का
भ्यांदेवमभ्यर्च्य देवस्यत्वेतिमंत्रेणपिंडिकामालभ्यपूजयेत् ॥ एतस्मिन्नवसरे एवर
तंवासोबल्यंतोभवतिनपूर्वमित्यपिकेचित् ॥ ततोमूर्तिपैर्यजमानेनऋत्विग्भिश्चसह
आचार्य्योदेवंपिंडिकायांस्थापयेत् ॥ तद्यथा–सुमुहूर्तेपुण्यलग्नेशुभग्रहनवांशेपुण्याहम
स्त्वित्युक्त्वा स्वयंपरमात्मानं सृष्टिसंहारकारकमजमष्टविधैश्वर्य्ययुक्तं जगदीश्वरं
भावयन्सौवर्णपद्मेपिंडिकायाः श्वभ्रेनिधाय ॐ प्रधानपुरुषोयावद्यावच्चंद्रदिवाकरौ ॥
तावत्त्वमनयाशक्त्यायुक्तोऽत्रैव स्थिरो भवेत्युक्त्वा ध्रुवोसिध्रुवोयंयजमानोस्मिन्
ध्रुवाद्यौरितिसूक्तेन देवमवक्रमदिङ्मूढं यवंयवार्द्धंवाउत्तराश्रितमीशानाश्रितंवापिंडि

कायाःश्वभ्रेनिधाय ततः स्थिरोभवशाश्वतोभवेत्युक्त्वापिंडिकालिंगयोरंतरालंवालु
कासीसकादिभिर्दृढंपूरयित्वापुनर्नचालयेत् ॥ ततो विश्वतश्चक्षुरुतविश्वतोमुखोविश्व
तोबाहुरुतविश्वतस्पात् ॥ सम्बाहुभ्यान्धमतिसम्पतत्रैर्द्यावाभूमीजनुयन्देवऽए
कः ॥ १७ ॥ १८ ॥ इतिमंत्रेणदेवस्यमस्तकंहृदयंवादक्षिणकरेणस्पृष्ट्वाप्राणप्रतिष्ठांकु
र्यात् ॥ तद्यथा–अस्यश्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुरुद्राऋषयः ऋग्यजुःसामा
निच्छन्दांसि क्रियामयवपुः प्राणाख्यादेवता आंबीजं क्रौंशक्तिः प्राणप्रतिष्ठायांवि
नियोगः॥ ब्रह्मविष्णुरुद्रऋषिभ्योनमः शिरसि ऋग्यजुःसामच्छंदोभ्योनमोमुखे प्राणा
ख्यदेवतायैनमोहृदि आंबीजायनमोगुह्ये क्रौंशक्त्यैनमः पादयोः ॐकंखंगंघंङं आं
पृथिव्यप्तेजोवाय्वाकाशात्मने आंहृदयायनमः ॐचंछंजंझंञंइंशब्दस्पर्शरूपरसगंधा
त्मने ईंशिरसेस्वाहा ॐटंठंडंढंणंउंश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊंशिखायैवषट्ॐ ॥२३८॥

तंथंदंधंनं एंवाक्पाणिपादपायूपस्थात्मने ऐंकवचायहुम् ॐ पंफंबंभंमं ॐवचनादान
विहरणोत्सर्गानंदात्मने ॐनेत्रत्रयायवौषट् ॐयंरंलंवंशंषंसंहंलंक्षं अँमनोबुद्ध्यहंका
रचित्तात्मने अःअस्त्रायफट् ॥ एवमात्मनिदेवेचकृत्वादेवंस्पृष्ट्वा जपेत् ॐआंह्रीं
क्रौंयंरंलंवंशंषंसंहंसः देवस्यप्राणाइहप्राणाः ॐआंह्रीं० हंसः देवस्यजीवइहास्थि
तः ॐ आंह्रीं० हंसः देवस्यसर्वेन्द्रियाणि ॐआंह्रीं० हंसः देवस्यवाङ्मन
श्चक्षुर्घ्राणप्राणा इहागत्यस्वस्तयेसुखेनसुचिरंतिष्ठंतुस्वाहा ॥ अर्चाहृद्यंगुष्ठंदत्त्वाजपे
त् ॥ अस्यैप्राणाः प्रतिष्ठंतुअस्यैप्राणाश्चरंतुच ॥ अस्यैदेवत्वमर्चायैमामाहेतिचकश्चन
प्रणवेनसन्निरुद्ध्यसजीवंध्यात्वा ध्रुवाद्यौरित्यृचंजप्त्वा कर्णेगायत्रींदेवमंत्रंचजप्त्वा
पुरुषसूक्तेनोपस्थायपादनाभिशिरः स्पृष्ट्वाइहैवैधीतितिर्जपेत् ॥ ततः कर्ता स्वाग
तंदेवदेवेशमद्भाग्यात्त्वमिहागतः ॥ प्राकृतंत्वमदृष्ट्वामांबालवत्परिपालय ॥ धर्मार्थका

मसिद्धयर्थंस्थिरोभवशिवायनः ॥ सान्निध्यंतुमहादेवस्वार्चायांपरिकल्पय ॥ यावच्चं
द्रावनीसूर्यास्तिष्ठंत्यप्रतिघातिनः ॥ तावत्त्वयात्रदेवेशस्थेयंभक्तानुकंपया ॥ भगवन्
देवदेवेशत्वंपितासर्वदेहिनाम् ॥ येनरूपेणभगवंस्त्वयाव्याप्तंचराचरम्॥तेनरूपेणदेवेश
स्वार्चायांसन्निधौभवेतिनमेत् ॥ परमसद्भावंदेवंध्यायन् जपेद्दैवतंसामरुद्रसूक्तंचत
तः प्रतिमाचेत्स्थाप्या तदादेवस्यमंत्रांतरोक्तंतद्रूपंनानाभरणभूषितंध्यायन्प्रातिष्ठिका
न्मंत्रान्जपेत् ॥ तत्रविष्णोः—अतसीपुष्पसंकाशं शंखचक्रगदाधरम् ॥ संस्थापया
मिदेवेशंदेवोभूत्वाजनार्दनम् ॥ १ ॥ रुद्रस्य—त्र्यक्षंचदशबाहुंचचंद्रार्द्धकृतशेखरम् ॥ ग
णेशंवृषभस्थंचस्थापयामित्रिलोचनम् ॥ २ ॥ ब्रह्मणः—ऋषिभिःसंस्तुतंदेवंचतुर्वक्त्रंज
टाधरम् ॥ पितामहंमहाप्राज्ञंस्थापयाम्यंबुजोद्भवम् ॥ ३ ॥ सूर्यस्य—सहस्रकिरणंशां ॥२३९॥
तमप्सरोगणसेवितम् ॥ पद्महस्तंमहाबाहुंस्थापयामिदिवाकरम् ॥ ४ ॥ दैविकाश्चेतव

ह्लिंगान्देवस्यहृदयंस्पृशन् जपेत् ॥ तद्यथा--पुरुषसूक्तंविष्णोः रुद्रस्यरौद्रं ब्रह्मणो ब्राह्मणम् सूर्यस्यसौरम् अन्येषांदेवानांतत्तल्लिंगान्मंत्रान् जपित्वा सव्याहृतिंस प्रणवांसशिरस्कांचगायत्रींपुरुषसूक्तंचजपित्वासान्निध्यंकुर्यात् ॥ ॐनमस्तेव्यक्तसां गायसंतोषपरमात्मने ॥ ज्ञानविज्ञानरूपायब्रह्मतेजोनुशालिने ॥ गुणातिक्रांतवेगाय पुरुषायमहात्मने ॥ अव्यक्तायपुराणायविष्णोसन्निहितोभव ॥ भगवन्देवदेवेशत्वंमा तासर्वदेहिनाम् ॥ त्वयाव्याप्तमिदंसर्वंजगत्स्थावरजंगमम् ॥ त्वमिंद्रःपावकश्चैवयमो निर्ऋतिरेवच ॥ वरुणोमारुतः सोमईशानःप्रभुरव्ययः ॥ येनरूपेणभगवंस्त्वयाव्याप्तं चराचरम् ॥ तेनरूपेणदेवेशअर्चायाः सन्निधौभव ॥ सर्वमंत्रादिसंयुक्तोलोकानुग्रहका म्यया ॥ अत्रार्चायांमहादेवभवसन्निधिमान्सदा ॥ सूर्याचंद्रमसौयावद् यावत्तिष्ठतिमे दिनी ॥ तावत्त्वयात्रदेवेशस्थातव्यंस्वेच्छयाप्रभो ॥ यावचंद्रोयमः सूर्यस्तिष्ठंत्यप्रतिघा

तिनः ॥ तावदत्रतुदेवेशस्थेयंसर्वानुकंपयेति ततः स्थापितं देवंप्रणामंकृत्वा तस्यपरितोन्यान्देवांस्तत्परिवारत्वेनस्मरेत् ॥ तद्यथा–नंदिमहाकालवृषभृंगिरीटिस्कंदोमाविनायकविष्णुरुद्रभगवतीन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशानाप्सरोगणगन्धर्वगुह्यकविद्याधरादीन् यदाब्रह्मास्थाप्यते तदाविष्ण्वादयः परिवारदेवताः यदाविष्णुस्तदाब्रह्मादयः परिवारदेवताः यदारुद्रस्तदाब्रह्मविष्ण्वादयः परिवारदेवताः एवंविनायकदुर्गादीनामपिपरिवारकल्पनम् ॥ ततः कुंडेष्वंगानिजुहुयात् ॥ तद्यथा–पूर्वकुंडेहृदयमंत्रेणाज्येनविंशत्याहुतीः ॥ १ ॥ दक्षिणकुंडेशिरोमंत्रेण ॥ २ ॥ पश्चिमेशिखामंत्रेण॥३॥ उत्तरेकवचमंत्रेण ॥ ४ ॥ आचार्यकुंडेनेत्रमंत्रेण ॥ ५ ॥ ततः पूर्वकुंडेऽस्त्रमंत्रेणेति षडंगमंत्राणांहोमोऽधिकांगानियेषांतानिपूर्वकुंडेहोतव्यानि ॥ ततः प्रतिमायास्तत्रतत्रावयवेविन्यसेदथमंत्रेणशतंहुत्वाप्रतिमाहृदयेजीवभूतांविन्यसेत् ॥ अन्याधिकानि

यानितान्याग्नेयकुंडे पूर्वकुंडेवा तथाप्रणवाद्यैर्नाममंत्रैर्देवशक्तीरप्यष्टकुंडेषुहुत्वा तत्त
त्स्थानेनिवेशनायप्रणवाद्या नाममंत्राः स्वाहांता होमे नमोंता न्यासकर्मणिभवंती
तिसर्वत्रज्ञातव्यम् ॥ एवंदेवंप्रतिष्ठाप्यप्रार्थयेत्॥ लोकानुग्रहहेत्वर्थंस्थिरीभवसुखासन॥
सान्निध्यंहिसदादेवप्रत्यहंपरिवर्तय ॥ १ ॥ माभूत्पूजाविरोधोस्मिन् यजमानः स
मृद्ध्यताम् ॥ संपालयंस्तथाराष्ट्रंसर्वोपद्रववर्जितम् ॥ २ ॥ क्षेमेणवृद्धिमतुलांसुखम
क्षय्यमश्नुताम् ॥ इतिसंप्रार्थ्यविधिनादेवंसांगंसमर्चयेत्॥ ततोबहिर्निर्गत्यद्वारपालादी
न्निजनाममंत्रैःस्थापयेत् ॥ विष्णुश्चेच्चंडप्रचंडादीन् शिवश्चेन्नंदिमहाकालादीन् सूर्य
श्चेच्चंडिपिंगलादीन् ॥ ततो ध्यानेनप्रासादंपुरुषाकृतिंस्थापयेत् ॥ अथ प्रासादस्य
रूपम् ॥ प्रासादस्यप्रवक्ष्यामिरूपंध्यानेयथाभवेत् ॥ पादौपादशिलास्तस्यजंघापादो
र्ध्वंउच्यते ॥ गर्भश्चैवोदरंज्ञेयंकटिश्चकटिमेखला ॥ स्तंभास्तुबाहवोज्ञेयाघंटाजिह्वा

प्रकीर्तिता ॥ दीपः प्राणोस्यविज्ञेयस्त्वपानोजलनिर्गमः ॥ ब्रह्मस्थानंतुयत्तस्यतन्नाभिः
परिकीर्तिता ॥ हृत्पद्मंपिंडिकाज्ञेयाप्रतिमाजीवउच्यते ॥ पादचारस्त्वहंकारोज्यो
तिस्तच्चक्षुरुच्यते ॥ तदूर्ध्वम्प्रकृतिस्तस्यप्रतिमापुरुषःस्मृतः ॥ जलकुंभास्तथाद्धा
रंतस्यप्रजननंस्मृतम् ॥ शुकनासाभवेन्नासागवाक्षः कर्णउच्यते ॥ कपोतपालिःस्कं
धोस्य ग्रीवाचामलसारिकाः ॥ कलशस्तुशिरोज्ञेयं मज्जाक्षिप्ररसंहितत् ॥ मेदश्चैव
सुधां विद्यात्प्रलेपोमांसमुच्यते ॥ अस्थीनितुशिलास्तस्यस्नायुःकीलादयःस्मृताः ॥
चक्षूंषिचशिरास्तस्यध्वजाःकेशाःप्रकीर्तिताः ॥ एवंपुरुषरूपंतुध्यात्वाचमनसासुधीः ॥
प्रासादंपूजयेत्पश्चात्गंधपुष्पादिभिःशुभैः ॥ सूत्रेणवेष्टयेद्देवंवासस्तत्परिकल्पयते ॥ प्रा
सादमेवमभ्यर्च्यवाहनंचाग्रमंडपे ॥ स्थापयेत्पुनरिंद्रादीन्निजदिक्षुचवेश्मसु ॥ दिक्पु
रायासमुद्दिष्टादेवस्यात्परिकल्पयते ॥ अथायतनानि ॥ कथ्यंतेविपरीताहिकर्तुस्स्या

दशुभावहाः ॥ तत्रैंद्रींद्रांबिकाविष्णोराग्नेयीकृष्णवर्त्मनः ॥ अवाचीभूतमातॄणांगणानामं
तकस्यच॥ भद्रकाल्याःपितॄणांचनिर्ऋतेर्नैर्ऋतीमता ॥ वरुणांभोधिसरितांप्रतीच्यायत
नस्यदिक् ॥ वायुदुर्गाफणींद्राणांगजास्यस्यचमारुती॥यक्षोमास्कंदसोमानांसौम्येशा
नीशिवस्यतु ॥ द्वारस्यदक्षिणेवामेक्रमाद्वैश्रवणश्रियोः ॥ मध्यादिक्पद्मगर्भस्यसर्वंज
तुसुखावहा ॥ उक्तस्यायतनाद्देवींदृष्टाशुभफलप्रदा ॥ शतंपंचाशदथवाविंशत्यष्टोत्तरंक्र
मात् ॥ नाममंत्रैरथैतेषामुत्तरादिक्रमाद्धुनेत् ॥ गर्भगेहंपुनः प्राप्यविस्तारविधिनार्च
येत् ॥ अर्घ्याद्यैरुपचारैस्तुप्रभूतैरर्चयेत्सुधीः ॥ अथशिवस्यप्रधानभूतस्यावाहनादि
पूजा॥ यथा–यस्यसिंहारथाउक्ताव्याघ्राभूतास्तथोरगाः॥ऋषयोलोकपालाश्चदेवस्कंद
स्तथावृषः ॥ प्रियागणामातरश्चसोमोविष्णुःपितामहः ॥ नागायक्षाः सगंधर्वायेचदि
व्यानभश्चराः ॥ तमहंत्र्यक्षमीशानंशिवंरुद्रमुमापतिम् ॥ आवाहयामिसगणंसपत्नीकं

म. सं. वृषध्वजमिति। आगच्छभगवन्रुद्रानुग्रहायाशिवोभव॥ शाश्वतोभवपूजांमेगृहाणत्वंन मू. प्र.
॥२४२॥ मोनमः॥ ॐस्वागतमनुस्वागतं भगवतेनमोनमः॥ सोमायसगणायसपरिवारायप्रति
गृह्णातुभवान्॥ मंत्रपूतमिदमर्घ्यंपाद्यं इदमाचमनीयंचयदासनंब्रह्मणाभिहितंनमो
नमः स्वाहेति। आगच्छेत्यादिकामंत्राः सोमायपदवर्जिताः सर्वत्रसाधारणाः॥ एवंसं
पूज्यप्रणम्य ब्रह्मघोषेणस्नापयेत्पंचामृतेनतत्तन्मंत्रपूर्वकम्॥ तद्यथा—दधिक्राव्णइ
तिदध्ना आप्यायस्वेतिक्षीरेण घृतवतीतिघृतेन मधुवाताइतिमधुना आयंगौरितिश
र्करया एषुपंचसुप्रतिस्नानंगंधोदकेनक्षालयेत्। ओषधीः प्रतिमोदध्वमितिपुष्पोदके
न गंधद्वारामितिगंधोदकेन शांतिकलशेनसंस्रवकलशैश्चस्नापयित्वा गंधाद्यैरुप
चारैः पूजयित्वादेवंध्यायनजपेत्॥ यज्जाग्रतोदूरमुदैति०॥३॥ततोविराडजायत०॥१॥ ॥२४२॥
सहस्रशीर्षापुरुषः० ॥१॥ अभित्वाशूरनोनुमः०॥१॥ पुरुषएवेदं०॥१॥त्रिपादूर्ध्व ०॥१॥

येनेदं ०॥१॥नत्वावां२ अन्यः०॥१॥इत्येतान्मंत्रान्सर्वांसुप्रतिष्ठासुचतुःकृत्वोजपेत्॥ प्र
तिपर्यायमद्भिर्देवस्यपादौनाभिंवक्षःशिरश्चालभेत्॥ ततोलिंगमंत्रैः प्रार्थयेत्॥भगवन्दे
वदेवेशधर्मकामार्थमोक्षद॥विद्याविद्येश्वरैरुद्रैर्गणेशैर्लोकपालकैः॥ देवदानवगंधर्वैर्यक्षैश्च
सह किन्नरैः॥ अस्मिन्लिंगेमहादेवसर्वदावसवैप्रभो॥पुंसामनुग्रहार्थायपृथिव्यांस्वेच्छ
याप्रभो॥ परावरेणभावेनस्थातव्यंसर्वदात्वया॥ सर्वविघ्नहरःपुंसांसर्वदुःखहरःसदा ॥
सर्वदायजमानस्यइच्छासंपत्करोभव॥ नमस्तेसर्वधर्मायसंतोषविजितात्मने॥ ज्ञानवि
ज्ञानतृप्तायब्रह्मतेजोभिशालिने॥ नमस्तेशुद्धदेहायपुरुषायमहात्मने ॥ स्थापकस्यमू
र्तिपानांशिल्पिनांचविभोसदा॥ ग्रामदेशनृपाणांचशांतिर्भवतुसर्वदा ॥ पूजकाराधका
नांचभक्तानांभक्तवत्सल॥ सर्वेषांचजगन्नाथइच्छासिद्धिप्रदोभव ॥ चंद्रार्कावनिपर्यंतं
लिंगेस्मिन्परमेश्वर॥ स्थातव्यमुमयासार्द्धंसर्वलोकानुकंपया ॥ यावच्चंद्रश्चसूर्यश्चया

106

वत्तिष्ठतिमेदिनी॥तावत्त्वयात्रदेवेशस्थातव्यंस्वेच्छयाप्रभो ॥ अथविष्णोस्तु-सहस्रशी
र्षेत्यादिभिर्मंत्रैः षोडशोपचारैः पूजनंकृत्वा वैदिकैः सूक्तैः पौराणिकैर्मंत्रैः स्तोत्रैर्वास्तु
त्वाक्षमस्वेत्युक्त्वादेवंप्रार्थयेत् ॥ तत्रशिवस्य-ज्ञानतोज्ञानतोवापिभगवन्यत्कृतंमया ॥
तत्सर्वंपूर्णमेवास्तुत्वत्प्रसादान्महेश्वर ॥ अथविष्णोःप्रार्थनम्॥ज्ञानतोज्ञानतोवापियावा
न्विधिरनुष्ठितः ॥ ससर्वस्त्वत्प्रसादेनसमग्रोभवतांमम ॥ ज्ञानतोज्ञानतोवापिशास्त्रोक्तंन
कृतंहियत् ॥ तत्सर्वंपूर्णमेवास्तुत्वत्प्रसादादधोक्षज ॥ अथकर्तृनामयुक्तंदेवस्यनाम
विदध्यात् ॥ तद्यथा-नारायणस्यामुकस्वामीअमुकनारायणोवा ॥ अथशिवस्यामु
केश्वरः अथभानोरमुकादित्यः देवीनामामुकेश्वरी गणपतेरमुकविनायकइत्यादि ॥
अथनैमित्तिकदोषप्रायश्चित्तमुच्यते ॥ स्थाप्यमानदेवप्रतिमालिंगंवा यांदिशमुपाश्र ॥२४३॥
येत्तद्दिगीशमंत्रेण शमीसमिधापालाशैर्वा तिलैर्वाष्टोत्तरसंख्ययापूर्णाहुत्यंतंहोमंकु

यात् ॥ तत्रइंद्रायेंदो० अग्निंदूतं० आयंगौः० असुन्वंत० इमंमे० क्राणाशिशु० अ
मित्यंदेवं० आवोराजानमितिमंत्रा यथासंख्येन आचार्यादिदक्षिणाश्चक्रमेण गजो
मेषोमहिषोजः शुक्तिर्मुक्ताफलंतथा ॥ वस्त्रयुग्माऽविकाधेनुर्वृषभश्चविधानतः ॥ तदभा
वेसुवर्णप्रतिकृतयोवाराजतोवावृषभएवेति तत्तत्स्थाप्यमानेदेवेशब्दोत्थानेवक्रेभ्रांतेस्फु
टितेवामूलमंत्रेणाष्टोत्तरशतमघोरेणवा शांत्यर्थंहुत्वासदाप्रतिष्ठाहुतीर्जुहोति ॥ ॐ
शिवायस्थिरोभवस्वाहा ॐ शिवायाप्रमेयोभवस्वाहा ॐ शिवायदानादिबोधोभ
वस्वाहा ॐ शिवायनित्योभवस्वाहा ॐ शिवायसर्वगोभवस्वाहा ॐ शिवायावि
नाशोभवस्वाहा ॐ शिवायतृप्तोभवस्वाहेति ॥ अथसर्वशांत्यर्थंअपरमष्टोत्तरशतम
घोरेणहुत्वास्विष्टकृतंहुत्वा सर्वप्रायश्चित्तहोमंविधाय पूर्वादिदिक्षु इंद्रादिभ्योबलि
दानपूर्वकंपूर्णाहुतिंजुहुयात् ॥तद्यथा-पूर्वे ॐत्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳ

शूरामिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्विन्द्रः ॥१॥ इंद्रायसां
गायसपरिवारायसायुधायसशक्तिकायएतंसदीपंदधिमाषभक्तबलिंसमर्प्पयामि ॥ भो
इंद्रदिशंरक्षबलिंभक्षअस्ययजमानस्यसकुटुंबस्यआयुःकर्ता क्षेमकर्ताशांतिकर्तापुष्टि
कर्तावरदोभव ॥ पूर्वदिशिबलिंसमर्प्य ॥ आग्नेय्याम् ॐ त्वन्नो अग्नेवरुणस्यविद्वान्
देवस्यहेडोऽअवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमः शोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्य
स्मत् ॥२॥ अग्नयेसांगाय० ॥दक्षिणे ॐ यमायत्वामखायत्वासूर्यस्यत्वातपसे॥देवस्त्वा
सवितामध्वानक्तुपृथिव्याःसꣳस्पृशस्पाहि॥ अर्चिरसिशोचिरसितपोसि॥३॥यमायसां
गाय० ॥ नैर्ऋत्याम् ॥ ॐअसुन्वंतमयजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य ॥
अन्यमस्मदिच्छसातऽइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥ ४ ॥ निर्ऋतयेसांगाय० ॥२४४॥
पश्चिमे ॐतत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमा

नोवरुणेहबोध्युरुशꣳसमानऽआयु꞉प्रमोषी꞉ ॥ ५ ॥ वरुणायसांगाय० ॥ वाय
व्ये ॐ आनोनियुद्भिः शतिनीभिरध्वरꣳसहस्रिणीभिरुपयाहियज्ञम् ॥ वायोऽअ
स्मिन्त्सवनेमादयस्वयूयंपातस्वस्तिभिःसदानः ॥ ६ ॥ वायवेसांगायसप० ॥ उत्तरे
ॐ वयꣳसोमव्रतेतवमनस्तनूषुबिभ्रतः ॥ प्रजावन्तःसचेमहि ॥ ७ ॥ कुबेरायसां
गाय० ॥ ईशान्याम् ॐ तमीशानंजगतस्तस्थुषस्पतिंधियञ्जिन्वमवसेहूमहेवयम् ॥
पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धःस्वस्तये ॥ ईशानायसांगाय० ॥ ८ ॥ ई
शानपूर्वयोर्मध्ये ॐ अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसजोषाः ॥ यःस
ꣳसतेस्तुवतेधायिपज्रइन्द्रज्येष्ठाऽअस्माँऽअवन्तुदेवाः ॥ ९ ॥ निर्ऋतिपश्चिमयो
र्मध्ये ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानःशर्मसप्रथाः ॥ १० ॥ अनं
तायसांगाय० इतिदशदिक्पालबलिः ॥ अथनवग्रहबलिः ॥ ॐ ग्रहाऽऊर्जाहुतयोव्यंतो

127

विप्रायमतिम् ॥ तेषांविशिंप्रियाणां वोहमिषमूर्जं ॐ समंग्रभमसुपयामगृहीतोसींद्रायत्वाजुष्टंगृह्णाम्येषते योनिरिंद्रायत्वाजुष्टतमम् ॥ संपृचौस्थःसंम्मांभद्रेणपृंक्तंविप्रचौस्थो विमापाप्मनापृङ्क्तम् ॥ १ ॥ ४ ॥ ग्रहेभ्यः सांगेभ्यः सपरि० भोग्रहाः दिशंरक्षतबलिंभक्षतअस्ययजमानस्यसकुटुंबस्य आयुःकर्तारः० इतिग्रहबलिः ॥ अथ दुर्गाबलिः ॥ ॐअंबेऽअंबिकेऽअंबालिके नमानयतिकश्चन ॥ ससस्त्यश्वकः सुभद्रिकांकाम्पीलवासिनीम् ॥ दुर्गायैसांगायै० भोदुर्गेममयजमानस्यसकुटुंबस्य आयुःकर्त्रीं क्षेमकर्त्रींशांतिकर्त्रींतुष्टिकर्त्रींपुष्टिकर्त्रींवरदाभव ॥ इतिदुर्गाबलिः ॥ अथक्षेत्रपालबलिं दधिमाषसिंदूरकज्जलदीपद्रव्यसहितपात्रेनिधाय कृतस्यकर्मणः सांगतासिद्ध्यर्थंक्षेत्रपालबलिदानमहंकरिष्ये इतिसंकल्प्य गंधादिभिर्वक्ष्यमाणमंत्रेणक्षेत्रपालंपूजयेत् ॥ ॐनहिस्पशमविदन्नन्यमस्माद्वैश्वानरात्पुरएतारमग्नेः ॥ एमेनमवृधन्नमृ

तुाऽअमर्त्यंवैश्वानुरंक्षेत्रंजित्यायदेवाः३३॥६०॥ॐक्षेत्रपालायशाकिनीडाकिनीभूतप्रेत
वेतालपिशाचसहितायइमंबलिंसमर्पयामि॥ भोक्षेत्रपालदिशोरक्षबलिंभक्षममयजमान
स्य०॥ द्यौः शांतिरितिमंत्रंपठेत् ॥ अनवेक्षमाणेनदुर्ब्राह्मणेनबलिं गृहीत्वा चतुष्पथेक्षि
पेत् ॥ ततोयजमानःस्वस्यपृष्ठतोगत्वाजलंक्षिपेत् ॥ ॐहिंकारायुस्वाहा हिंकृतायुस्वा
हाक्रंदंतुस्वाहांवक्रंदायुस्वाहा प्रोथंतेस्वाहां प्रप्रोथायुस्वाहां गुन्धायुस्वाहां घ्रातायु
स्वाहानिविष्टायुस्वाहोपविष्टायुस्वाहा संदितायुस्वाहावलगंतुस्वाहासीनायुस्वाहाश
यांनायुस्वाहास्वपंतेस्वाहा जाग्रंतुस्वाहा कूजंतुस्वाहा प्रबुद्धायुस्वाहां विजृंभमाणायु
स्वाहा विचृंत्तायुस्वाहा सꣳहांनायुस्वाहोपस्थितायुस्वाहायंनायुस्वाहा प्रायणायु
स्वाहां ॥२२॥७॥ ततोयजमानः पादौप्रक्षाल्याचम्यपूर्णपात्रदानंकुर्यात् ॥ अद्यकृतेत
दमुकहोमकर्मणि कृताकृतावेक्षणरूपामुककर्मप्रतिष्ठार्थमिदंपूर्णपात्रं प्रजापतिदैवतंअ

प्र. सं. मुकगोत्रायामुकशर्मणेब्राह्मणायब्रह्मणेदक्षिणांतुभ्यमहंसंप्रददे ॥ ब्रह्मग्रंथिविमोकः ॥ मू. म.
॥२४६॥ अथपूर्णाहुतिः ॥ देशकालौस्मृत्वा कृतस्यकर्मणः सांगतासिद्ध्यर्थंवसोर्धारासमन्वि
तंपूर्णाहुतिहोममहंकरिष्ये इतिसंकल्प्य चतुर्गृहीतमाज्यंद्वादशगृहीतंवा वस्त्रंना
रिकेलपुष्पचंदनमालादियुतं तदुपरिनिधाय पूर्णाहुतिंयजमानेनसहान्वारब्धआचा
र्योजुहुयात् ॥ तत्रमंत्राः ॐ समुद्रादूर्मिर्मधुमाँ उदारदुपाँशुनासममृतत्वमानट् ॥ घृत
स्यनामगुह्यं यदस्तिजिह्वादेवानाममृतस्यनाभिः ॥ १ ॥ वयंनामप्रब्रवामघृत
स्यास्मिन्यज्ञेधारयामानमोभिः ॥ उपब्रह्माशृणवच्छस्यमानं चतुःशृंगोवमीद्गौरए
तत् ॥ २ ॥ चत्वारिशृंगात्रयोऽअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य ॥ त्रिधाबद्धोवृ
भोरोरवीतिमहोदेवोमर्त्याँ २ आविवेश ॥ ३ ॥ त्रिधाहितंपणिभिर्गुह्यमानंगविदेवा ॥२४६॥
सोघृतमन्वविंदन् ॥ इंद्रएकंसूर्यएकंजजानवेनादेकंस्वधयानिष्टतक्षुः ॥ ४ ॥ एताऽअर्ष

तिहृद्यात्समुद्राच्छतव्रजारिपुणानावचक्षे ॥ घृतस्यधारा ऽअभिचाकशीमिहिरण्ययो
वेतसोमध्यऽआसाम् ॥५॥ सम्यक्स्रवन्तिसरितोनधेना अन्तर्हृदामनसापूयमानाः ॥ ए
तेअर्षन्त्यूर्मयोघृतस्यमृगाऽइवक्षिपणोरीषमाणाः ॥ ६ ॥ सिंधोरिवप्राध्वनेशूघनासोवा
तप्रमियः पतयन्तियह्वाः॥घृतस्यधाराऽअरुषोनवाजीकाष्ठाभिन्दन्नूर्मिभिः पिन्वमानः
॥ ७॥ अभिप्रवन्तसमनेवयोषाः कल्याण्यःस्मयमानासोऽअग्निम्॥घृतस्यधाराःसमिधो
नसन्तताजुषाणोहर्यतिजातवेदाः ॥ ८ ॥ कन्याइववहतुमेतवाउअंज्यंजानाऽअभिचा
कशीमि ॥ यत्रसोमः सूयतेयत्रयज्ञो घृतस्यधाराऽअभितत्पवन्ते ॥ ९ ॥ अभ्यर्षत
सुष्टुतिंगव्यमाजिमस्मासुभद्राद्रविणानिधत्त ॥ इमंयज्ञन्नयतदेवतानोघृतस्यधाराम
धुमत्पवन्ते ॥ १० ॥ धामन्तेविश्वंभुवनमधिश्रितमन्तःसमुद्रेहृद्यन्तरायुषि ॥ अपामनी
केसमिथेयआभृतस्तमश्याममधुमन्तंतऊर्मिम् ॥ ११ ॥ ॐमूर्द्धानंदिवोअरतिंपृथिव्या

128

म. सं वैश्वानरमृतआजातमग्निम् ॥ कविꣳसंम्राजमतिथिंजनानांमासन्नापात्रंजनयंतदेवाः ॥ मृ. प्र.
॥२४७॥ ॐपुनस्त्वादित्यारुद्रावसवः समिंन्धतांपुनर्ब्रह्माणोवसुनीथयज्ञैः ॥ घृतेनत्वंतन्वंवर्द्धय
स्वसत्याःसंतुयजमानस्यकामाः॥१२।४४॥ॐसप्ततेअग्नेसमिधःसप्तजिह्वाःसप्तऋषयः
सप्तधामप्रियाणि॥ सप्तहोत्राःसप्तधात्वायजंतिसप्तयोनीरापृणस्वघृतेनस्वाहा १७॥७९
इत्येकांऋचं पठेत् ॥ अथप्रातर्हुतेअहुतेवायतरथाकामयेतसोऽस्याअनिरतायैकुंभ्यै
दर्भोपहंति॥ॐपूर्णादर्विपरापतसुपूर्णापुनरापत ॥ वस्नेवविक्रीणावहा इषमूर्जꣳशत
क्रतोस्वाहा ॥ इतिस्वाहाकारेणाग्नौप्रक्षिपेत् ॥ इदमग्नयेवैश्वानरायवसुरुद्रादित्येभ्यः
शतक्रतवे सप्तवते अग्नये अद्भ्यश्चनमम॥ वाजश्चेत्यादिसप्तविंशतिकंडिकाः पठेत् ॥ स
मास्त्वाअनुवाकंपठेत् ॥ विष्णोर्नुकंषड्ऋचःपठेत् ॥ ॐसप्ततेअग्नेसमिधः सप्तजिह्वाः ॥२४७॥

सप्तऋषयः सप्तधामप्रियाणि ॥ सप्तहोत्राः सप्तधात्वायजंति सप्तयोनीरापृणस्वघृते

नुस्वाहा ॥ शुक्रज्योतिश्चचित्रज्योतिश्चसत्यज्योतिश्चज्योतिष्माँश्च ॥ शुक्रश्चऋतपा
श्चात्यꣳहाः ॥ १७ ॥ ८० ॥ ईदृङ्चान्यादृङ्चसदृङ्चप्रतिसदृङ्च ॥ मितश्चसं
मितश्चसभराः ॥८१॥ ऋतश्चसत्यश्चध्रुवश्चधरुणश्च ॥ धर्ताचविधर्ताचविधारयः ॥ ८२ ॥
ऋतजिच्चसत्यजिच्चसेनजिच्चसुषेणश्च ॥ अन्तिमित्रश्चदूरेअमित्रश्चगणः ॥ ८३ ॥ ईदृक्षा
सएतादृक्षासऊषुणः सदृक्षासः प्रतिसदृक्षासएतन ॥ मितासश्चसंमितासोनोअद्यसभ
रसोमरुतोयज्ञेअस्मिन् ॥ ८४ ॥ स्वतवांश्चप्रघासीचसान्तपनश्चसंगृहमेधीच ॥ क्रीडी
च शाकीचोज्जेषी ॥८५॥ इन्द्रंदैवीर्विशोमरुतोनुवर्त्मानोभवन्यथेन्द्रंदैवीर्विशोमरुतोनु
वर्त्मानोभवन् ॥ एवमिमंयजमानन्दैवीश्च विशोमानुषीश्चानुवर्त्मानोभवन्तु ॥ ८६ ॥
इमꣳस्तनमूर्जस्वन्तंधयापांप्रपीनमग्नेसरिरस्यमध्ये ॥ उत्संजुषस्वमधुमन्तमर्वन्त्समु
द्रियꣳसदनमाविशस्व ॥८७॥ घृतंमिमिक्षे० हव्यम् ॥८८॥ सहैवयज्ञउवाचनग्नतायावै

बिभेमीति कातेनघ्नतेत्याभितऽएवमापरिस्तृणीयुरिति तस्मादेतदग्निमभितः परि
स्तृणं वितृष्णायावैबिभेमीति कातेतृप्तिरितिब्राह्मणस्यैवतृप्तिमनेतृप्येयमितितस्मा
त्सर्वथ्ंरितेयज्ञेब्राह्मणेतर्पयतितंवैब्रूयाद्यज्ञमेवैनंतर्पयति ॥ यत्कर्मणोत्यरीरिचंयद्वान्यू
नमिहाकरम् ॥ अग्निष्टत्स्विष्टकृद्विद्वांत्स्विष्ट ग्वं सुहुतंकरोतुस्वाहा ॥ श्रद्धांमेधांयशःप्र
ज्ञांविद्यांपुष्टिंश्रियंबलम् ॥ तेजआयुष्यमारोग्यंदेहिमेहव्यवाहन ॥ इतिपूर्णाहुतिः॥अथ
त्र्यायुष्करणम् ॥ त्र्यायुषंजमदग्नेरितिललाटे कश्यपस्यत्र्यायुषमितिग्रीवायां यद्दे
वेषुत्र्यायुषमितिबाहुमूले तन्नोऽअस्तुत्र्यायुषमितिहृदि ॥ ततः संस्रवप्राशनम् ॥ पवि
त्राभ्यांमार्जनम् ॥ पवित्रप्रणीताविमोकः ॥ ततः पात्रेणजलमादायाग्नेरुपरिभ्रामयि
त्वा तज्जलेनयजमानमूर्द्धनिकुशैरभिषेकंकुर्यात् ॥ ॐसुमित्रियानआपओषधयः सं ॥२४८॥

तु शांतिरस्तु पुष्टिरस्तु यच्छ्रेयस्तदस्तु यत्पापंतत्प्रणश्यतु द्विपदेभ्यश्चतुष्पदे

भ्यः शांतिभवतु ॥ ॐदुर्मित्रियास्तस्मैसंतुयोऽस्मान्द्वेष्टि यंचवयंद्विष्मः ॥ इतिमंत्रेण
प्रणीतांन्युब्जींसंमृज्य इत्यैशानम् ॥ अत्रपूर्णपात्रदानमित्यपिमतम्॥ अथबर्हिर्होमः॥
ॐदेवांगातुविदोगातुंवित्वागातुमितमनसस्पतइमंदेवयज्ञꣳस्वाहावातेधाःस्वाहा॥ अथ
ईशानकोणेबलिंदत्त्वाऽऽचम्याक्षतैश्चतुष्कंकृत्वा तन्मध्येअष्टदलंपद्मंस्वस्तिकंवाविधा
यतदुपरिभद्रासनेसितवस्त्रोत्तरंविधाय तत्रयजमानंसपत्नीकपुत्रबांधवादियुतमुपवेश्य
होमोत्सर्गंकृत्वाप्रासादोत्सर्गंकुर्यात् ॥ तिथ्यादिकमुच्चार्य्यइमंप्रासादंपक्वेष्टकादिपाषा
णकाष्ठचूर्णादिनिर्मितं शिवंविष्णुंवाउद्दिश्य अहमुत्सृजेइति ॥ अत्रैवकरिष्यमाण
नैत्यिकपूजोपकरणानिताम्रकलशसाधारशंखधूपदीपनैवेद्यपात्रपुष्पकरंडतांबूलकरंड
कशय्यातूलिकोपधानघंटाछत्रचामरव्यजनपरिधानवस्त्रालंकारवितानादिकं देवोद्देशे
नोत्सृजेत् ॥ अथ मूर्तिपादिसंयुतआचार्यः पुत्रीपुत्रबांधवादिसहितस्य यजमान

स्यवक्ष्यमाणप्रकारेणाभिषेकं कुर्यात् ॥ तद्यथा—यजमानंप्राङ्मुखमुपवेश्यस्वयमा
चार्य उदङ्मुखस्तिष्ठन् देवस्नपनावशिष्टोदकंकुंडमंडपस्थशांतिकलशोदकंचतैज
सपात्रंसमादाय अंकुरितसप्तधान्यकुशदूर्वाम्रादिपंचपल्लवैः सोदकैः चतुर्वेदोद्भवैर
भिषेकमंत्रैः स्थाप्यदेवतासूक्तैः पौराणिकैश्चाभिषेकंगीतवाद्यादिपुरःसरंकुर्यात् ॥ अ
भिषेकेपत्नीवामभागेस्थापनीया ॥ अथाभिषेकमंत्राः॥ समुद्रज्येष्ठाइतिचतसृणां वसि
ष्ठऋषिः आपोदेवता त्रिष्टुप्छंदः अभिषेकेविनियोगः ॥ ॐसमुद्रज्येष्ठा०॥३॥ त्रायंता
मितितिसृणांसप्तर्षयः आपोदेवता अनुष्टुप्छंदः अभिषेकेविनियोगः ॥ ॐत्रायंतामि
ह० ॥ ३ ॥ इमाआपइतितिसृणांसप्तर्षयः आपोदेवता अनुष्टुप्छंदः अभिषेकेविनियो
गः॥ ॐइमा आपः शिवतमा०॥३॥यद्देवादेवहेडनमित्यनुवाकः पवमानःसुवर्जनइत्यनु
वाकः॥ पौरुषं सूक्तं श्रीसूक्तं रौद्रसूक्तं गाणपत्यं ग्रहमंत्राः॥ त्र्यंबकंयजामहे० अघोरमं

त्रः स्थाप्यदेवतासूक्तं छंदोगायबृहदितिअथर्वसाम अन्यान्यपिनानाशाखोद्भवानिअ
भिषेकसूक्तानिग्राह्याणि ॥ ॐआपोहिष्ठामयोभुवः स्तानऊर्ज्जेदधातन ॥ महेरणा
यचक्षसे ॥ योवः शिवतमोरसस्तस्यभाजयतेहनः ॥उशतीरिवमातरः ॥ तस्माअरंगमा
मवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ १ ॥ ॐस्तोकानामिन्दुंप्रतिशूरऽइं
द्रोवृषायमाणोवृषभस्तुराषाड् ॥ घृतप्रुषामनसामोदमानाः स्वाहादेवाअमृतामादयं
ताम् ॥१॥ आयात्त्विन्द्रोवसउपनइहस्तुतः संधमादस्तुशूरः ॥ वावृधानस्तविषीर्य्यस्यपू
र्वीर्द्यौर्नक्षत्रमभिभूतिपुष्यात् ॥ २ ॥ आनऽइंद्रोदूरादानऽआसादभिष्टिकृदवसेयास
दुग्रः॥ ओजिष्ठेभिर्नृपतिर्वज्रबाहुः संगेसमत्सुतुर्वणिः पृतन्यून्॥३॥आनइन्द्रोहरिभि
र्य्यात्वच्छार्वाचीनोवसेराधसेच ॥ तिष्ठातिवज्रीमघवाविरप्शीमंयज्ञमनुनोवाजसातौ
॥ ४ ॥ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवेसुहवꣳ शूरमिन्द्रम् ॥ ह्वयामिशक्रं

प्र. सं. पुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्विन्द्रः ॥ ५ ॥ २० ॥ ५० ॥ ॐ इमंमेवरुण मू. प्र.
॥२५०॥ श्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके ॥ १ ॥ तत्त्वायामिब्रह्मणा वन्दमान
स्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशꣳसमानऽआयुःप्रमोषीः
॥ १ ॥ त्वन्नोऽअग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमः
शोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत् ॥ १ ॥ सत्वन्नोऽअग्नेवमोभवोतीनेदिष्ठोअस्या
ऽउषसोव्युष्टौ ॥ अवयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳसुहवोनएधि ॥ उदुत्तमं
वरुणपाशमस्मदवाधमं विमध्यमꣳश्रथाय ॥ अथावयमादित्यव्रतेतवानागसोऽअदि
तयेस्याम ॥ १ ॥ भगप्रणेतर्भगसत्यराधोभगेमांधियमुदवाददन्नः ॥ भगप्रणोजन
यगोभिरश्वैर्भगप्रनृभिर्नृवन्तः स्याम ॥ १ ॥ इदमापःप्रवहतावद्यंचमलंचयत् ॥ य ॥२५०॥
च्चाभिदुद्रोहानृतंयच्चशेपेअभीरुणम् ॥ आपोमातस्मादेनसः पवमानश्चमुञ्चतु ॥ ६ ॥

॥ १७ ॥ समुद्रायंत्वावातायस्वाहा सरिरायंत्वा वातायस्वाहेत्यादिवैदिकमंत्रैर
भिषिच्य पौराणिकैर्मंत्रैरभिषिंचेत् ॥ तद्यथा–सुरास्त्वामभिषिंचंतुब्रह्मविष्णुमहे
श्वराः ॥ वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः॥ प्रद्युम्नश्चानिरुद्धश्चभवंतुविजयायते॥
आखंडलोग्निर्भगवान्यमोवैनिर्ऋतिस्तथा ॥ वरुणःपवनश्चैवधनाध्यक्षस्तथाशिवः ॥
ब्रह्मणासहिताःसर्वेदिक्पालाः सपरिच्छदाः ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धाक्रियाम
तिः॥बुद्धिर्लज्जावपुःशांतिःक्षांतिस्तुष्टिश्चमातरः॥ एतास्त्वामभिषिंचंतुदेवपत्न्यःसमा
गताः ॥ आदित्यश्चन्द्रमाभौमोबुधोजीवसितार्कजाः॥ ग्रहास्त्वामभिषिंचंतुराहुःकेतुश्च
तर्पिताः॥अथोंकारवषट्कारौसावित्रोविधयस्त्रयः॥ऋचोयजूंषिसामानिच्छंदांस्याथर्वणा
निच ॥ चत्वारःसकलावेदाःसरहस्याःसविस्तराः॥ पुराणमितिहासंचखिलान्युपखिला
निच ॥ अंगानिचैवोपांगानिव्याख्यातानिचपांवते॥ पृथिवीवायुराकाशआपोज्योतिश्च

म॰ सं. पंचमम् ॥ इंद्रियाणिमनोबुद्धिस्तथासत्वंरजस्तमः ॥ व्यानोदानौसमानश्चप्राणोपान मू. म.
॥२५१॥ श्चपंचमः ॥ वायवःसप्तचैवान्येयेष्वर्पितमिदंजगत् ॥ मरीचिरंगिरोत्रिश्चपुलस्त्यःपुल
हःक्रतुः॥भृगुर्वसिष्ठोभगवान् पांतुतेत्वांमहर्षयः॥स्वायंभुवाद्यामनवश्चतुर्दशादिशोदश॥
नरनारायणौदेवावभिषिंचंतुसर्वदा ॥ रुद्राश्चैकादशप्रोक्ताआदित्याद्वादशैवतु ॥ अष्टौ
चवसवश्चैवअश्विनौमरुतस्तथा॥ह्रीःश्रीर्लक्ष्मीः स्वधामेधापुष्टिस्तुष्टिःस्मृतिर्धृतिः॥ अ
दितिर्दितिर्दनुश्चैवसिंहिकादैत्यमातरः॥हिमवान्हेमकूटश्चनिषधःश्वेतपर्वतः॥ऋषभः
पारियात्रश्चविंध्योवैडूर्यपर्वतः॥ सह्यादयश्चमलयमेरुमंदारदर्दुराः॥क्रौंचकैलासमैना
काःपांतुत्वांधरणीधराः॥शेषश्चवासुकिश्चैवविशालाक्षश्चतक्षकः॥एलापर्णःशुक्तिकर्णः ॥२५१॥

कंबलाश्वतरावुभौ॥सुमनाश्चादधिमुखस्तथाशृंगारपिंडकः ॥ नागरोदधिकर्णश्चतथाहा

रिद्रकोपरः ॥ एतेचान्येचबहवोयेचान्येनानुकीर्तिताः ॥ भूधराःसत्यधर्माणःपांतुत्वां
भुजगेश्वराः ॥ समुद्राःपांतुचत्वारोगंगाचसरितांवरा ॥ सरस्वतीचंद्रभागाशतद्रुर्देविका
शिवा ॥ इरावतीविपाशाचशरयूर्यमुनातथा॥कल्माषीचरथोष्माचबाहुदाचहिरण्यदा ॥
प्लक्षाचेक्षुमतीचैवअवनीचबृहद्रथा ॥ ख्यातार्चमण्वतीचैवपुण्याचैववधूसरा ॥ वेणागो
दावरीसीताकावेरीकोंकणावती ॥ कृष्णावेणाशुक्तिमतीतमसापुष्पवाहिनी ॥ ताम्रपर्णी
ज्योतिरथाउत्पलोदुंबरावती ॥ नदीवैतरणीपुण्याविदर्भानर्मदाशुभा ॥ वितस्ताभीमर
थ्याचएलाचैवमहानदी ॥ कलिंगीगोमतीपुण्यानदःशोणश्चविश्रुतः ॥ क्षिप्राचर्मण्वती
पुण्यामहाशुभ्रवतीतथा॥सिंधुर्वेत्रवतीचैवभोजान्तावनमालिका॥पूर्वभद्रापराभद्रा ऊर्मि
लाचवरद्रुमा॥ख्यातावेत्रवतीचैवतुंगभद्राऽघहारिणी ॥प्रस्थावतीलुंठनदीनदीपुण्यासर

प्र. सं. स्वती॥चित्रांग्रीचेंदुमालाचतथामधुमतीनदी ॥ उमागुरुनदीचैवतापीचविमलोदका ॥ मू. प्र.
॥२६२॥ विमलाविमलोदाचमत्तगंगायशस्विनी॥एताश्चान्याश्चवैनद्योयाचान्यानानुकीर्तिताः॥
एतास्त्वामभिषिंचंतुसलिलैरमृतोपमैः ॥ प्रभासंचप्रयागंचनैमिषंपुष्कराणिच ॥ गंगा
तीर्थंकुरुक्षेत्रंश्रीकंठंगौतमाश्रमम् ॥ रामह्रदंविनशनंरामतीर्थंतथैवच ॥ गंगाद्वारंकनख
लंसोमोवैयत्रचोत्थितः ॥ कपालमोचनंतीर्थंजंबूमार्गंचविश्रुतम् ॥ सुकर्यांबिंदुविख्यातं
तथाकनकपिंगलम् ॥ दशाश्वमेधिकंचैवपुण्याश्रमविभूषितम् ॥ बदरीचैवविख्यातानर
नारायणाश्रमः ॥ विख्यातंफल्गुतीर्थंचतीर्थंचेंद्रवटंतथा ॥ गोकामुखंपुण्यतमंगंगासाग
रमेवच ॥ मगधेषुतपोदश्चगंगोद्भेदश्चविश्रुतः ॥ तीर्थान्येतानिपुण्यानिसेवितानिमह ॥२६२॥
र्षिभिः॥त्वांप्लावयंतुसलिलैः कीर्तिताऽकीर्तितानिवै॥सुकरयोगमार्गंचश्वेतद्वीपंतथैवच ॥

ब्रह्मतीर्थंरामतीर्थंवाजिमेधदशोपमम् ॥ धारासंपातसंयुक्तागंगाकिल्बिषनाशिनी ॥
गंगावैकुंठकेदारंसूकरोद्भेदनंपरम् ॥ तत्पापमोचनंतीर्थंपुनंत्वेतानिकिल्बिषात् ॥ धर्मा
र्थकामविषयोयशःप्राप्तिःशमोदमः ॥ अष्टांगयोगोपहरोयमोनियमएवच ॥ कालोन
यःसन्नतिश्च क्रोधोमोहःक्षमाधृतिः ॥ विद्युतोभ्राण्योषधयः प्रमादोन्मादविग्रहाः ॥
यक्षाःपिशाचागंधर्वाःकिन्नराःसिद्धचारणाः ॥ नक्तंचराःकेसरिणोदंष्ट्रिणःप्रियविग्रहाः ॥
लंबोदराश्चबलिनःपिंगाक्षाविश्वरूपिणः ॥ मरुतःसहपर्जन्याःकलात्रुटिलवक्षणाः ॥
नक्षत्राणिग्रहाश्चैवऋतवःशिशिरादयः ॥ मासांतोरात्रयश्चैवपक्षायोगास्तथैवच ॥
आमोदश्चप्रमोदश्चप्रहर्षःशोकएवच ॥ मन्युस्तन्यस्तपःसत्यंसिद्धिर्वृद्धिःश्रुतिर्धृ
तिः ॥ रुद्राणीभद्रकालीचभद्रषष्ठातथारुणा ॥ भासीचकालिकाचैवशांडिलीचेति
विश्रुता ॥ आर्याकुहूःसिनीवालीभीमाचित्रवतीरतिः ॥ एकाननाचकूष्मांडीदेवीका

त्यायनीचया ॥ लोहित्याधनमित्राचदेवकन्याचयास्मृता ॥ गोनंदादेवपत्न्यश्चत्वां
रक्षंतुसबांधवम् ॥ नानाभरणचेष्टाश्चनानारूपांकितानना: ॥ नानादेशविचारिण्यो
नानाशस्त्रोपशोभिता: ॥ मुखमंडीबिडालीचपूतनागंधपूतना ॥ शीतवातोत्थवेताली
रेवतीग्रहशांतिदा: ॥ पितामहमुखोद्भूतारौद्रारुद्रांगसंभवा: ॥ कुमारस्कंदजाश्चैवज्व
राश्चवैष्णवादय: ॥ क्रोधना:क्रोधजा:क्रूरा:सुरविग्रहकारिण: ॥ लंबोदराजघनिन:
पिंगाक्षाविश्वरूपिण: ॥ वामनाविकटा: कुब्जा: करालालूनमूर्द्धजा: ॥ सहस्रशिरस
श्चान्येत्वांसिंचंतुशुभांबुभि: ॥ महागणपतिर्नंदीमहाकालोमहाबल: ॥ ग्रामणीश्चैवगो
पाल: शृंगीऋद्धिर्गणेश्वर: ॥ देवश्चवामदेवश्चघंटाकर्ण: करंधम: ॥ श्वेतमोद:कपाली
चजृंभक:शत्रुतापन: ॥ मज्जनोन्मज्जनौचोभौसंतापनविलापनौ ॥ निजघासोघसश्चै
वस्थूलकर्ण: प्रशोषण: ॥ उल्कामालिधमधमोज्वालासिंह:प्रतर्दन: ॥ संघट्टन: संकुच

नः काष्ठभूतःशिवंकरः ॥ कुंभांडःकुंभमूर्द्धाचरोचनोवैकृतोग्रहः ॥ अनिकेतःसुरारिघ्नः
शिवश्चाशिवएवच ॥ क्षेमकःपिशिताशीचसुरारिर्हरिलोचनः ॥ भीमकोग्राहकश्चैवतथै
वोग्रामहाग्रहाः ॥ उपग्रहोर्यकश्चैवतथास्कंदग्रहोपरः ॥ चपलोलोमवेतालस्तमसःस
महाकपिः ॥ हृदयोद्वर्तनश्चैवकुंडासिद्धःकणप्रियः ॥ हरिश्मश्रुर्गरुत्मंतोमनोमारुतरंह
सः ॥ पार्वत्यारोषसंभूताःसहस्राणिशतानिच ॥ शक्तिमंतोद्युतिमंतोब्राह्मण्याः सत्यसं
गराः ॥ सर्वकामोपहर्तारोहंतारोद्विषतांमृधे ॥ एतेगणानांपतयो ह्यभिषिंचंतुसर्व
दा ॥ नारदःपर्वतश्चैव गंधर्वाप्सरसांगणाः ॥ पितरःकारणं कार्यमाधयोऽव्याधय
स्तथा ॥ अगस्त्योगालवोगार्ग्यःशक्तिर्धौम्यःपराशरः ॥ कृष्णात्रेयश्चभगवानासि
तोदेवलोनलः ॥ बृहस्पतिरुतथ्यश्चमार्कंडेयःकृतश्रवाः ॥ द्वैपायनोविदर्भश्चजै
मिनिर्माठरःकठः ॥ विश्वामित्रोवसिष्ठश्चलोमशश्चमहानृषिः ॥ उत्तंकश्चैवरैभ्य

प्र. सं. श्चपौलोमश्चद्वितस्त्रितः ॥ ऋषिर्वैकालवृक्षीयो मुनिर्मेधातिथिस्तथा ॥ सारस्वतो मू. प्र.
॥२५४॥ पविक्रीतःकुशिकोगौतमस्तथा ॥ संवर्तऋष्यशृंगश्चस्वस्त्यात्रेयोविभांडकः ॥ ऋ
चीकोजमदग्निश्च तथौर्वस्तपसांनिधिः ॥ भारद्वाजःस्थूलशिराःकाश्यपःपुलहःक्र
तुः ॥ बृहदग्निर्हरिच्छ्मश्रुर्विजयः कण्वएवच ॥ वितंडीवैदीर्घतपा वेदश्वाथांशुमा
न्शिवः ॥ अष्टावक्रोदधीचिश्चश्वेतकेतुस्तथैवच ॥ उद्दालकःक्षीरपाणिः शृंगीगौ
रमुखस्तथा ॥ अग्निवेश्यः शमीकश्चप्रमुचुर्मुमुचुस्तथा ॥ एतेचान्येचबहवऋषयः
संशितव्रताः ॥ मुनयःशांतितात्मानोयेचान्येनानुकीर्तिताः ॥ तेत्वांसर्वेभिषिंचंतु
सर्वकामार्थसिद्धये ॥ त्रयोग्नयस्त्रयोवेदास्त्रैविद्यंकौस्तुभोमणिः ॥ उच्चैःश्रवाहयः
श्रीमान्वैद्योधन्वंतरिर्हरिः ॥ अमृतंगौःसुवर्णंचदधिगौराश्चसर्षपाः ॥ शुक्लाः सुम ॥२५४॥
नसः कन्याः श्वेतच्छत्रयवाक्षताः ॥ दूर्वाहिरण्यगंधाश्चवालव्यजनमेवच ॥ तथाप्र

गंतामुकशाखाध्यायिनेऽमुकशर्म्मणे आचार्याय इमांगां सालंकारां घंटाचामर भूषणवस्त्रगोदोहनपात्रादियुतां ताम्रपृष्ठयुतां स्वर्णशृंगींरौप्यखुरां यथाशक्त्युपस्क रयुतां तुभ्यमहंसंप्रददे नमम इत्युच्चार्य आचार्य्यकरेस्वकरस्थंसतिलंहिरण्याक्षत पुष्पपूगीफलद्रव्यादियुतंजलपुच्छादिकमाचार्य्यहस्तेक्षिपेत् ॥ कृतैतद्गोदानप्रतिष्ठासां गतासिद्ध्यर्थमिमांदक्षिणांतुभ्यमहंसम्प्रददे इत्यभिधाय शिरसाप्रणम्यविज्ञापयेत् ॥ तद्यथा–भगवन्सर्वधर्मज्ञसर्वधर्मपरायण॥ सर्वशास्त्रार्थतत्त्वज्ञशिवशास्त्रविशारद॥अना दिजन्मसंतानेह्यप्रमेयेभवार्णवे ॥ अद्यमेह्युत्तमंजन्मअद्यमेसफलंधनम् ॥ अद्यमेजनननो च्छित्तिरद्यमेपरमंपदम्॥मोचितोहंत्वयानाथास्मादच्छेद्याद्भवार्णवात्॥ संत्रातोहंत्वया यस्मादप्रमेयाद्भवार्णवात् ॥ मुक्तोहंमर्त्यसंसारात्प्रपन्नोहंतवांतिकम् ॥ ज्ञानतोऽज्ञा नतोवापियन्न्यूनंचमयाकृतम् ॥ तत्सर्वंपूर्णमेवास्तुत्वत्प्रसादात्क्षमस्वमे ॥ एवंब्रह्म

पीठंनिधाय सितवस्त्रेणाच्छाद्य गंधपुष्पादिभिरभ्यर्च्य तत्रप्राङ्मुखोयजान उद
ङ्मुखमाचार्यमुपवेश्यविष्टरपाद्यार्घाचमनीयादिभिरर्चयित्वा नवीनंसुदरंवस्त्रयुग्मं
परिधाय चंदनागुरुकुंकुमादिसुगंधिद्रव्यैरनुलिप्य ततो दक्षिणहस्तेसौवर्णमंगुलीय
कंविन्यस्य अन्यानि चकुंडलकंकणादिभूषणैर्भूषयित्वा देववद्भावयित्वा पुष्पां
जलिंमूर्द्धनिविन्यस्यअर्घ्यंदत्त्वा भक्तिश्रद्धायुक्तोयजमानो वित्तशाठ्यविवर्जितो
दक्षिणामाचार्य्यायदद्यात् ॥ तद्यथा–ग्राममश्वंदासींदासंव्यजनचमरच्छत्रवितान
यानासनवस्त्राणिगोसहस्रंतत्तदर्द्धंगोशतंतदर्द्धंवावृषभैकादशकंदशकंवास्ववित्तानुसारे
णसर्वाः सालंकृताः सन्निधीकृत्यप्रधानगोपुच्छं सतिलहिरण्यंजलंपुष्पाक्षतपूगीफल
द्रव्यादिसहितंहस्तेधृत्वा प्रयोगमुच्चार्य्य आचार्यहस्तेदद्यात् ॥ तद्यथा–देवताप्र
तिष्ठासांगतासिद्धयर्थंअमुकगोत्रोत्पन्नोहम् अमुकशर्माहममुकगोत्रोत्पन्नायामुकवेदांत

गंतामुकशाखाध्यायिनेऽमुकशर्म्मणे आचार्याय इमांगां सालंकारा घंटाचामर भूषणवस्त्रगोदोहनपात्रादियुतां ताम्रपृष्ठयुतां स्वर्णशृंगींरौप्यखुरां यथाशक्त्युपस्क रयुतां तुभ्यमहंसंप्रददे नमम इत्युच्चार्य आचार्य्यकरेस्वकरस्थंसतिलंहिरण्याक्षत पुष्पपूगीफलद्रव्यादियुतंजलपुच्छादिकमाचार्य्यहस्तेक्षिपेत् ॥ कृतैतद्गोदानप्रतिष्ठासां गतासिद्ध्यर्थमिमांदक्षिणांतुभ्यमहंसम्प्रददे इत्यभिधाय शिरसाप्रणम्यविज्ञापयेत् ॥ तद्यथा–भगवन्सर्वधर्मज्ञसर्वधर्मपरायण॥ सर्वशास्त्रार्थतत्त्वज्ञशिवशास्त्रविशारद॥अना दिजन्मसंतानेह्यप्रमेयेभवार्णवे ॥ अद्यमेह्यत्तमंजन्मअद्यमेसफलंधनम् ॥ अद्यमेजनना च्छित्तिरद्यमेपरमंपदम्॥मोचितोहंत्वया।नाथास्मादच्छेद्याद्भवार्णवात्॥ संत्रातोहंत्वया यस्मादप्रमेयाद्भवार्णवात् ॥ मुक्तोहंमर्त्यसंसारात्प्रपन्नोहंतवांतिकम् ॥ ज्ञानतोऽज्ञा नतोवापियन्न्यूनंचमयाकृतम् ॥ तत्सर्वंपूर्णमेवास्तुत्वत्प्रसादात्क्षमस्वमे ॥ एवंब्रह्म

प्र. सं. णेऋत्विगादिभ्यश्चदक्षिणांदद्यात् ॥ अथाचार्योऽक्षतफलसहितंयजमानायाशिषंदद्या मू. प्र.
॥२९६॥ त् ॥ यजमानस्यतिलकंकृत्वा समस्तजगदुत्पत्तिस्थित्यनुग्रहकारकः ॥ शिवःसानुच
रस्ताद्भःसर्वदासर्वकामदः ॥ द्रव्यहीनंतुयत्किंचिद्विधिहीनंतुयत्क्वचित् ॥ तत्सर्वंपूर्ण
मेवास्तुप्रसादात्कारणस्यते ॥ स्थापकमूर्तिपानांतुवर्णिनांशिल्पिनांतथा ॥ सराष्ट्रपार्थि
वानांचशांतिर्भवतुसर्वदा॥भृत्यपुत्रकलत्रैश्चस्वमित्रैर्बंधुवाहनैः ॥ कारणस्यप्रसादेनस
र्वलोकेश्वरोभव: ॥ ॐस्वुस्तिनइन्द्रोवृद्धश्रवाःस्वुस्तिनः पूषाविश्ववेदाः॥स्वुस्तिनुःस्ता
र्क्ष्योऽअरिष्टनेमिःस्वुस्तिनोबृहुस्पतिर्दधातु॥१॥पुनंस्त्वादित्यारुद्रावसवःसमिन्धतामपु
नर्ब्रह्माणोवसुनीथयुज्ञैः ॥ घृतेनुत्वन्तुन्वंवर्द्धयस्वसुत्याः संन्तुयजमानस्युकामाः ॥२॥ ॥२९६॥
मंत्रार्थाः सफलाःसंतुपूर्णाः सन्तुमनोरथाः॥शत्रूणांबुद्धिनाशोस्तुमित्राणामुदयस्तव ॥

तदनंतरंग्रहादीनामुत्तरपूजांकुर्यात्॥ यस्तुब्रह्मगोचरद्वारापीडांकरोति॥ जन्मकालेवाऽ
निष्टस्थानेस्थितोभवति दशादिष्वशुभदोभवतितंजपदानादिभिर्विशेषेणपूजयेत् ॥ त
तश्चशांतिंकरोति॥ उक्तंच ग्रहा गावोनरेंद्राश्चब्राह्मणाश्चविशेषतः॥पूजिताःपूजयंत्ये
तेनिर्दहंत्यवमानिताः ॥ ततोऽग्नेःपश्चादवस्थितोयजमानो भूयसीदक्षिणादिकंदत्त्वा
अग्निंविसर्जयेत्॥ ॐगच्छगच्छसुरश्रेष्ठस्वस्थानेपरमेश्वर ॥ यत्रब्रह्मादयोदेवास्तत्र
गच्छहुताशन॥ ततोनवग्रहविसर्जनम्॥ अक्षतानादाय ॐयांतुदेवगणाःसर्वेपूजामादा
यमामकीम्॥ इष्टकामसमृद्ध्यर्थंपुनरागमनायच॥ अनेनविधिनायस्तुग्रहपूजांसमाच
रेत्॥सर्वान्कामानवाप्नोतिशांतिर्भवतिनिश्चिता॥ततोब्राह्मणान्भोजयित्वा सर्वकुटुंबज
नैःसहभोजनंकुर्यात्॥एवंदेवप्रतिष्ठांकृत्वा आत्मानंकृतार्थंमन्येत॥ निरीक्ष्यानेकशास्त्रा

णिरचितोऽयंसुसंग्रहः ॥ सतांप्रीत्यैविभूत्यैमेभवत्येवपरिश्रमः ॥ ॥ इतिश्रीनानकचंद्रात्मजरामलालपंडितविरचितेप्रतिष्ठासंग्रहेचतुर्थःकिरणः ॥ ग्रंथश्चायंसमाप्तः ॥
॥ ॥ श्रीव्यंकटेशार्पणमस्तु ॥ ॥ श्रीरस्तु ॥ ॥ शुभंभूयात् ॥

इति प्रतिष्ठासंग्रहःसमाप्तः ।

यह पुस्तक पंडितजी रामलालजी इनके पाससे हक्क सहित लेकर मुंबईमें श्रीवेंकटेश्वर छापेखानेमें खेमराज श्रीकृष्णदास इन्होंने छापके प्रसिद्ध किया। संवत् १९६४, शके १८२९.

कर्मकांड प्रयोगादि ग्रंथाः।

संस्कारभास्कर–(शुक्लयजुर्वेदीय गर्भाधानादिसे लेके सब प्रकारके संस्कारोंकी विधि, प्रयोग और मंत्रसहित) सर्व त्रैवर्णिक यज्ञोपवीतवाले को अति उपयोगी है ... ... २॥)

शान्तिप्रकाश–इसमें पहिले गणपत्यादिपूजन, पुण्याहवाचन, कलशस्थापनादि और विनायकादि ३० शान्तिप्रयोग वास्तुशान्तिप्रयोगादि समंत्रक हैं ... ... १)

गौडीयश्राद्धप्रकाश महानिबंध–इसमें श्राद्धस्वरूप श्राद्धमें ब्राह्मण लक्षण महालयादि निर्णय और श्राद्धप्रयोग क्षयाहश्राद्ध संकल्पश्राद्ध हेमश्राद्ध एकादशादिश्राद्ध मासिकश्राद्ध मघादिश्राद्ध नांदीश्राद्धादि बहुतसे श्राद्ध और विष्णवादि पूजन, पितृतर्पणादि अपूर्व संग्रह है. चारोंवर्णोंको उपयोगी है ... ... ३)

जाहि-

॥२९८॥

ग्रहशान्ति—(शुक्लयजुर्वेदोक्त) यज्ञोपवीत विवाहादि शुभकर्ममें बहुत उपयोगी है ... ... ॥=)

श्राद्धप्रयोगावली—(शुक्लयजुर्वेदीय) गुर्जर और दाक्षिणात्यलोगोंको अत्यन्तोपयोगी ... ।॥=)

नवग्रहविधानपद्धति—मनुष्यको ग्रह अरिष्ट होने पर प्रत्येक ग्रहके स्तोत्रपाठादि पढनेको अवश्य लेना चाहिये ... ... ।)

पूजापंकजभास्कर—(पांचो देवताओंके वैदिक मंत्रोंसे यथोपचार पूजा प्रकरण है) ... २)

श्राद्धविवेक—सब प्रकारके श्राद्धकी विधि प्रमाणयुक्त ... ... ॥।)

श्राद्धमयूख— ... ... ॥)

व्रतोद्यापनकौमुदी—व्रतोंके उद्यापनमें अति उत्तम है ॥)

अन्त्येष्टयर्क—(यजुर्वेदीय प्रेतकृत्यका) प्रथमदिवससे लेके एकादशादिश्राद्ध और मासिकश्राद्ध रजस्वलादि मरणे कर्तव्य प्रायश्चित्तादि अत्यंत उपयोगी है ... ... २)

गयायात्रापद्धतिः—(गयाजीमें श्राद्धादि करनेकी विधि है) ... ... ।)

रात.

॥२९८॥

पुस्तक मिलनेका ठिकाना—खेमराज श्रीकृष्णदास,

“ श्रीवेङ्कटेश्वर ”स्टीम्–प्रेस–(मुंबई.)

अत्रेयमभ्यर्थना.

अत्रास्माकं मुद्रणालये ऋग्वेदादयो वेदा उपनिषदो वेदान्तग्रन्था महाभारतादीतिहासाः श्रीमद्भागवतादिमहापुराणोपपुराणानि धर्मशास्त्र–कर्मकाण्ड–व्याकरण–न्याय–योग–सांख्य–मीमांसादिशास्त्रीयग्रन्थाः काव्य–नाटक–चम्पू–प्रहसन–व्यायोग–बाणाख्यायिकादिग्रन्थाः सहस्रनामाद्यनेकस्तोत्रग्रन्थाः विविधभाषाग्रन्थाश्च सीसकोत्तममहल्लघ्वक्षरैर्मनोहरं मुद्रिता योग्यमूल्येन क्रय्याः सन्ति, तांश्च ग्राहका यथापुस्तकसूचीपत्रं मूल्यप्रेषणेन प्राप्नुयुः।

अधिकमस्मदीयसूचीपुस्तकानां भिन्नभिन्नविषयाणां प्रापणेन "श्रीवेङ्कटेश्वरसमाचार" पत्रिकाप्रापणद्वारा च ज्ञेयमिति शम्।

खेमराज श्रीकृष्णदास,

"श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रालयाध्यक्ष–मुंबई.

124

॥ * ॥ इति प्रतिष्ठासंग्रहः समाप्तः ॥ * ॥

॥ * ॥ इति प्रतिष्ठासंग्रहः समाप्तः ॥ * ॥